00044436

NOT TO BE ISSUED
OUT OF THE LIBRARY.

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY.
TOWN HALL, BOMBAY.

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES,

Nos. 494, 506, 508, 517, 526 and 538.

THE NIRUKTA.

WITH COMMENTARIES.

44436

EDITED BY

PAṆḌIT SATYAVRATA SÁMAS'RAMÍ.

VOL. II.

CALCUTTA:

PRINTED BY J. W. THOMAS, BAPTIST MISSION PRESS.

1885.

00044436

निरुक्तम् ।

(निघण्टुः)

अत्रिगोत्रश्रीदेवराजयज्वकृत 'निर्वचन' नामटीकासहितम् ।

श्रीलश्री

वङ्गदेशीयासियातिक्समाजाभ्यर्थनया व्ययेन च

काश्यधीतवेदादि-वङ्गसामगेन

श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण

सम्पादितम् ।

द्वितीयो भागः ।

कलिकातानगरीराजधान्याम्

वाणिलमिश्रग्रन्थे मुद्रितम् ।

शकाब्दाः १८०७ ॥

॥ निरुक्तम् (निघण्टुभाष्यम्) ॥

तस्य

वृत्ति-भूमिका।

आदितः पाणिनीयन्तु शिक्षा ज्योतिस्तथच्छन्दः।
पञ्चाध्यायी-निघण्टोश्च निरुक्त मुपरि स्थितम् ॥
प्रणम्य तत् प्रवक्ष्यामि रुद्रायामिततेजसे।
स मे दिशतु सुप्रीतो वाग्धियोः शिष्टसम्मतिम् ॥

अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि ? सर्व्वकामप्राप्त्या-दिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि। तानि पुनरमूनि* प्रतिनियतार्थविषय-त्वात्तावेद मास्कन्दन्ति। तद्यथा—

शिक्षा तावत् "आत्मा बुद्ध्या समेत्यार्थान्"—इत्येवमादिना† क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणम्, पूर्वाह्णमध्यन्दिनापराह्णेषु यथाध्येयम्, अधीतस्य च स्वरसौष्ठवयुक्तस्य यज्ञकर्म्मणि प्रयोगः;—इत्येवमादि अर्थजातं निरूवाच। तथा ह्यधीतः प्रयुज्यमानश्चापूर्व्वाङ्गभावाय नान्य-

---

* शिक्षादीनि षडेव। "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति" मु० उ० १, ५।

† आत्मा बुद्ध्येत्यर्थं श्लोको न ग्रन्थारम्भकः, 'अथ शिक्षां प्रवक्ष्यामीत्यस्यैवाद्यत्वात्; अतोऽत्र आदिशब्दो न प्रकृत्यर्थोऽपि तु प्रकारार्थएव।

येत्येव मर्थवत्ता शिक्षायाः*। एवं ह्याह—"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः† स्वरतोऽपराधात्" (शि० ५०)—इति। वेदाध्ययनानुषङ्गतश्चेतिहासपुराणशास्त्राणां लौकिकानां ग्रन्थविस्ररचनानाम्। अतएवाध्ययनपरिज्ञानं शिक्षाऽधिगताध्ययनविधेः॥

वेदस्याक्षरकोशपादव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिराद्रियते। इयताक्षरकोशेनेयद्भिः पादैर्गायत्री, इयद्भिस्त्रिष्टुप्, इति। न हि अविज्ञातच्छन्दसा प्रयुज्यमानो मन्त्रः कर्मण्यार्द्धकः स्यात्। एवं ह्याह—

---

* तथाच तैत्तिरीया आमनन्ति—"शीक्षां व्याख्यास्यामः। वर्णः, स्वरः, मात्रा, बलं, साम-सन्तानः। इत्युक्तः शीक्षाध्यायः।" इति तै० उ० १व० २अ० १ख०। वर्णः अकारादिः। 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः (१)'—इत्यायुक्तः। स्वरः उदात्तादिः। 'उदात्तश्चानुदात्तश्च (११)'—इत्येवमादिना कथितः। मात्रा ह्रस्वादिः। 'ह्रस्वो दीर्घश्च प्लुत इति (११)'—इत्येवमादिना भाषिता। बलं स्थानप्रयत्नौ। तच 'अष्टौ स्थानानि वर्णानाम् (१२)'—इत्यादिना स्थानमुक्तम्, 'अचोऽस्पृष्टा (१८)'—इत्यादिना प्रयत्नश्चोक्तः। साम-सन्तानः। अतिद्रुतादिदोषशून्यत्वेन माधुर्यादिगुणयुक्तत्वेन चोच्चारणं साम्यम्, तस्य सन्तानो विस्तारः। तच 'गीती शीघ्री (२२)'—इत्येवमादिना दोषविस्तारः, 'माधुर्यमक्षरव्यक्तिः (२२)'—इत्येवमादिना गुणविस्तारश्चोपदिष्टः। यदचार्यपादैः संहितैति पदं पृथक्कृत्य व्याख्यातं, यच्च तदनुसारतएव भगवत्सायणेन ऋग्भाष्यभूमिकायां 'सन्तानः संहिता'—इत्यायुक्तः; तदस्माकन्न मनोरमम्। 'एतच्च व्याकरणेऽभिहितत्वाच्छिक्षायामुपेक्षितम्'—इति तदुत्तरग्रन्थेनैव बाधात्। मूले तु श्रुतेऽव्यवहितमेव 'शीक्षां पश्च (तै० उ० १व० २अ० २१ख०)'—इति, पञ्चानामेव शिक्षाविषयत्वेन परिगणितत्वात् सन्तानस्य पार्थक्यमूलकं षष्ठत्वं स्वतएव व्याहतम्।

† "इन्द्रशत्रुर्वर्द्धस्व"—इत्यस्मिन् मन्त्रे इन्द्रस्य शत्रुघातक इत्यर्थे विवक्षिते तत्पुरुषत्वादन्तोदात्तएवेन्द्रशत्रुश्चरितव्यः, प्रयुक्तस्त्वायुदात्तः; तथाच इन्द्रो घातको यस्येति बहुव्रीहिश्चेत् सम्पन्नः इति भावः। प्रदर्शितमेतत् पातञ्जले महाभाष्ये पस्पशाह्निके शब्दानुशासनस्य भूयः प्रयोजनकथनावसरे 'दुष्टःशब्दः'—इत्युपक्रमेच।

"यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति"*—इति। अतोऽनुषङ्गतो वक्तादिलक्षणपरिज्ञानं लोकेऽत्र लौकिक मिति ह्याह॥

सम्यगधीतस्य परिज्ञातच्छन्दसो अमुष्मिन् कर्म्मणि विनियोग इति कल्प आद्रियते। तद्यथा। इषेत्वेतिच्छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टीति†। न हि कल्पानभिज्ञः प्रयोगान् विजानीयादिति॥

श्रुतिचोदितकर्म्माङ्गभूतकालपरिज्ञानाय ज्योतिषम्। अनुषङ्गतस्तातो प्राणिनां शुभाशुभकर्म्मफलविपाककालपरिज्ञानम्‡॥

व्याकरणादिभक्त्यादिपरिज्ञानम्। एवं ह्याह—"प्रयाजाः सविभक्तिकाः कर्त्तव्याः"§। तथाचेदं दर्शयति—"सङ्ख्यादयो न विवर्द्धन्ते"—

---

* सा० वे० आ० ब्रा० १प्र० १खण्डे। एतस्योपरिष्टाद्व्याख्यास्यमथेत्यादिकमपि द्रष्टव्यम्।

† एतच्च फललक्षकथनम्। तथा हि। "पर्णशाखाश्छिनत्ति शमिलीं वेषेत्येतु-र्जेत्येति वा छिनद्मि इति वोऽर्थेयः साकाङ्क्षत्वात् सन्नयामीति वोत्तरः"—इति कात्यायनसूत्रम् ४, १, १, १। 'इषेत्वा (य० वा० सं० १, १, १)'—इति छेदनार्थो मन्त्रः। ऊर्जे त्वा य० वा० सं० १, १, २)'—इति सन्नमनार्थः। सन्नमनमृजूकरणं शाखालग्नधूल्याद्यपनयनम्'—इति महीधरव्याख्यांशः।

‡ उक्तञ्च तत्रैव। "वेदा हि यज्ञार्थ मभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्"—इति ज्यो० १, १। 'ज्योतिःशास्त्रज्ञः कालस्वरूपज्ञतया यथोक्तयज्ञफलभाग् भवतीत्यर्थः'—इति तद्भाष्यांशः।

§ "विभक्तिं कुर्वन्ति। याज्ञिकाः पठन्ति। 'प्रयाजाः सविभक्तिकाः कर्त्तव्याः'—इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्त्तुम्। तस्माद्-ध्येयं व्याकरणम्"—इति पा० स० भा० १अ० १पा० १ आ०।

इति । न च व्याकरणानभिज्ञो विभक्तीर्ज्ञानीयादूहितुं वा मन्त्रान्* । तत एव चानुषङ्गतो लोके लौकिकलक्षणपरिज्ञान मेवं छन्दस्येवं भाषाया मिति प्रविभागो नान्तरीयकोऽनन्तरेण व्यवस्थितः ॥

अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तविनियोगस्योपलचितकर्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदं मङ्ग मारभ्यते । प्रधानं चेद मितरेभ्योऽङ्गेभ्यः सर्व्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात्। अर्थोहि प्रधानं । तदुपायः शब्दः। स चेतरेषु व्याकरणादिषु चिन्यते । कल्पे खल्वपि विनियोगश्चिन्यते । स च पुनरर्थाभिधानवशेन मन्त्राणाम्। योऽर्थ मर्थ मभिधानेन संस्कर्त्तुं समर्थो मन्त्रः, स तत्र विनियुज्यते । तदुक्तं†—"अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् (३,२,१)"—इति‡ । न च निरुक्तादृतेऽन्यदङ्ग मन्यद्वा वाह्यं शास्त्र मस्ति, तात्पर्येण यदशेषान् शब्दान् निर्ब्रूयात्। यदपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्व्वचनम्, अतएव तदित्युपलक्ष्यम् । यथा शब्दलक्षणपरिज्ञानं सर्व्वशास्त्रेषु व्याकरणात्, एवं शब्दार्थनिर्व्वचनपरिज्ञानं निरुक्तात् । वस्तुमात्र मेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषय मेव किञ्चिच्चिन्यते ब्राह्मण मपि च विध्यर्थवादरूप मशेषमन्त्रार्थशेषभूत मेव । मन्त्रब्राह्मणार्थ-

* "अङ्गः खल्वपि । न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते यावद्यं यज्ञाङ्गत्वेन यथायथं विपरिणमयितव्याः । तावद्वैयाकरणः शक्नोति विपरिणमयितुम् । तस्माद्ध्येयं व्याकरणम्"—इति पा० म० भा० १ अ० १पा० १आ० ।

† मीमांसादर्शनकारेण जैमिनिना ।

‡ "तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात्"—इति जैमिनीयसूत्रशेषोऽयम् । एष हि तस्मिन्नाय उच्यते ।

परिज्ञानवद्भुश्चाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाममोक्षाख्योऽखिलपुरुषार्थः। न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति। तस्मादर्थपरिज्ञानाभिनिवेशादिद मेव प्रधान मित्युपपन्नम्। अथास्यैव मखिलपुरुषार्थोपकारवृत्तिसमर्थस्य सङ्ग्रहः।

तद्यथा;—नामाख्यातोपसर्गनिपातलक्षणम्[१]; भावविकारलक्षणम्[२]; नामान्याख्यातजानि सर्व्वाणि च यथोपन्यस्य पक्षप्रतिपक्षतो विचार्यावधारणम्[३]; सर्व्वाण्याख्यातजानि कानिचिदेवानेकधातुजान्यपीति मन्त्राणा मर्थवत्त्वानर्थवत्त्वे विचार्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम्[४]; पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा[५]; अर्थज्ञप्रशंसा[६]; अनर्थज्ञावधारणम्[७]; वेदवेदाङ्गव्यूहः[८]; सप्रयोजननिघण्टुसमाम्नायविरचनम्[९]; प्रकरणत्रयविभागेन नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम्[१०]; निर्व्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः[११]; अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता[१२]; अन्तस्थान्तर्द्धातुनिमित्तेन सम्प्रसार्यासम्प्रसार्योभयप्रकृतिधातुनिर्वचनोपदेशः[१३]; भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः[१४]; नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः[१५]; देशव्यवस्थया शब्दरूपव्यपदेशः[१६]; तद्धितसमासनामनिर्व्वचनलक्षणम्[१७]; शिष्यलक्षणम्[१८]; विशेषेण व्याख्यया तत्त्वपर्य्यायभेदसङ्ग्रासन्दिग्धोदाहरणान्निर्व्वचनव्यवस्थया नामाख्यातो-

पसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम्[१९] ; अनेकार्थानवगतसंस्कारानुक्रमणम्[२०] ; परोक्षकृतप्रत्यक्षकृताध्यात्मिकमन्त्रलक्षणम्[२१] ; स्तुत्याशीःशपथाभिशापाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेशः[२२] ; निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम्[२३] ; इतरेतरजन्मत्वम्[२४] ; स्थानत्रयभेदशः तिसृणा मेकैकस्या माहाभाग्यकृतोऽनेकनामधेयप्रतिलम्भः[२५] ; पृथगभिधानन्नूत्पत्तिसम्बन्धाद्वा[२६] ; देवताना माकारचिन्तनम्[२७] ; भक्तिसाहचर्यसंस्तवकर्मसूक्तभाक्तहविर्भाक्तव्यञ्जनभाक्तानि[२८]-[३३] ; पृथिव्यन्तरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्रुत्युदाहरणम्[३४] ; तन्निर्व्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः[३५] ; विद्यापारप्राप्त्युपायोपदेशः[३६] ; मन्त्रार्थनिर्व्वचनद्वारेण देवताभिधाननिर्व्वचनफलं देवतातात्पर्य्यम्[३७]।—इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः ॥

तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसंग्रहः। सा च पुनरियं साक्षात्कृतधर्म्मभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थ मुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्य मवेक्ष्य तदनुजिघृक्षया वाच्यार्थसामर्थ्यादभिधेयानुनीय मन्त्रार्थावबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता। सैषा छन्दोवयवभूता छन्दोधर्म्मेणैव यथायथापन्नस्तागौर्गाधर्म्मा* इति ॥

---

* क्वचित् पुस्तकेष्वेवमेव पाठः परमत्राऽपि नूनं लेखकप्रमादः।

(पूर्वषट्कः)

॥ अथ प्रथमाध्यायः ॥

तत्र,

॥ प्रथमपादः ॥

॥ ॐ* ॥ समाम्नायः समाम्नातः स व्याख्यातव्यस्त मिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यः समाहृत्य समाहृत्य† समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवोऽपि वा हननादेव स्युः समाहता भवन्ति यद्वा समाहृता भवन्ति, तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति, तचैतन्नामाख्यातयो र्लक्षणं प्रदिशन्ति, भावप्रधान माख्यातं, सत्वप्रधानानि

---

* ङ-पुस्तके "ओ३म्" —इति पाठः। च-छ-पुस्तकयोर्नास्त्येव।

† "समाहृत्य"—इति च-पाठो मुद्राकरप्रमादः।

नामानि, तद्यचोभे भावप्रधाने भवतः पूर्वापरीभूतं भाव माख्यातेनाचष्टे व्रजति-पचतीत्युपक्रमप्रभृत्यपवर्ग-पर्यन्तं मूर्त्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्ति*रित्यद इति सत्त्वाना मुपदेशः† ॥ १ ॥

अयञ्च तस्या द्वादशाध्यायी भाष्यविस्तरः‡ । तस्य इद मादि-वाक्यम्—"समाम्नायः समाम्नातः"—इति । गवादिर्देवपत्न्यन्तः शब्दसमुदायः समाम्नाय उच्यते । समाङ्पूर्व्वस्य ज्ञाते रभ्यासार्थस्य कर्म्मणि कारके समाम्नायः । समभ्यस्यते मर्य्यादयाऽय मिति समा-म्नायः । स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः पञ्चाध्यायी शास्त्रसंग्रहभावेन एकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः ॥

तस्य किमिति ? "स व्याख्यातव्यः" । स च यो समाम्नातः छन्द-स्येवावस्थितोगवादिभिरन्यैर्वा निरुक्तैर्यः समाम्नातः । अयं च एतस्मि-न्निरुक्ते स एष उभयलक्षणोऽपि व्याख्यातव्यः ॥ आह; कथमेतद्गम्यते असमाम्नातव्याख्यान मप्यत्राभिप्रेत मिति ? समाम्नानार्हाणां वा किमर्थं मसमाम्नान मिति ? उच्यते—निर्व्वचनलक्षणोपदेशात् । निर्व्वचनप्रसक्तानाञ्च मृग-कर्ण-दक्षिणा-लक्ष्मी-निघण्टु-भद्राधः-शब्द-प्रभृतीना मेव माद्यानां निर्वचनोपदेशात् ज्ञायतेऽसमानव्याख्यान-

---

* "पङ्क्ति"—इति क-पाठः । ख-ग-पुस्तकयोश्च पाठान्तरतयोल्लिखितः ।

† क-ख-ग-पुस्तकेभ्योऽन्यत्र नात्र खण्डसमाप्तिः । तथा च तेषु "मुपदेशो गौरवः" —इत्येव पाठः ।

‡ अयञ्च ग्रन्थः, तस्याः पञ्चाध्याया: निघण्टुनामप्रसिद्धायाः, भाष्यविस्तरः, द्वादशा-ध्यायी । परिशिष्टाध्यायद्वयस्यात्रैवान्तर्भावः स्वीकार्यः ।

मण्यचाभिमत मिति। यत्पुनरेतदुक्तं समाम्नानार्हाणां वा किमर्थं मसमाम्नान मिति। अत्र ब्रूमः;—न हि समाम्नानार्हाणा मन्तोऽस्ति, तेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात्, अतस्त्राध्ययनश्रवण-ज्ञानशक्तिहानदोषः प्रसज्येत। शक्यश्च तावल्लक्षणेदृशेदाहरणभूतनि-घण्टुशब्दसमवायेनाधीतवेदेन मेधाविना तपस्विना लक्षणविनियोगा-र्थञ्छन्दोदैवतनिदानविद्याभियुक्तेनागमवता मन्त्रार्थोऽभूदिहु मित्ये-तावानेव निघण्टुषु शब्दसमुदायः समाम्नातः। तस्मादुपपन्न मसमा-म्नातव्याख्यान मण्यचाभिमत मिति। असमाम्नानं च सर्वेषां शास्त्रा-तिगौरवभयादिति। "व्याख्यातव्यः"- विभज्य इमान्यत्र नामानि, इमान्याख्यातानि, उपसर्गा इमे, निपाता इमे, इदं सामान्यलक्षणम्, इदं विशेषलक्षणम्, इमान्येकार्थानि, इमान्यनेकार्थानि, इमान्यवगत-संस्काराणि, इदमभिधानम्, इदमभिधेयम्, इदमभिधानस्य निर्व-चन मित्येवंविधया मर्यादया परिपाट्या यथासमाम्नात आख्यातव्यो निर्वक्तव्य इत्यर्थः॥

"त मिमं समाम्नायं निघण्टव इत्याचक्षते"। तं च योऽसमा-म्नातस्कन्दस्येवावस्थितोऽगवादिरन्यैर्वा निरुक्तैः समाम्नातः, त मिमं च निघण्टव इत्याचक्षते। अन्येऽप्याचार्या इति वाक्यशेषः। निरू-ढाहीय मेतस्मिंश्छन्दःसमुदाये सञ्ज्ञेत्यभिप्रायः॥

"निघण्टवः कस्मात्"—इति। निघण्टुशब्दव्युत्पिपादयिषया प्रश्नः॥

निर्विवक्षयेद माह—"निगमा इमे भवन्ति"। येष्वभिधाननि-र्वचनप्रारम्भकेष्वाचार्यः अयं यास्को निरुक्तकारः कस्माच्छब्द मुत्तरत्र न कुर्यात्, तेष्वपि व्याख्याकाले कस्मादिति शब्दः समुत्पाद्यः।

तथाहि व्याख्यासाफल्यं भवति। निगमा इमे भवन्ति। निश्चयेनाधिकं वा निगूढार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ततो निगमसञ्ज्ञा निघण्टव एव इमे भवन्ति॥

आह;—कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति। उच्यते;—यस्मादेते गवादयः "छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः"। छन्दांसि मन्त्राः तेभ्य उपलक्षितसामर्थ्याः समाहृत्य ग्रन्थीकृता इत्यर्थः। आह;—कस्मात् पुनरेतावन्त एव ग्रन्थीकृता इति। उच्यते;—इतो यस्मादेतैरेव छन्दस्यवस्थिते रभिनिविष्टधियामपि मेधाविनां तपस्विनां लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदामपि सता मन्त्रार्थपरिज्ञानायोद्यमभङ्गः क्रियते, दुःपरिज्ञानत्वात् तेषाम्, एतेषु परिज्ञातेषु अप्रतिबन्धेन शक्यते मन्त्रार्थः परिज्ञातुमिति अत उच्यते त एव ज्ञापका भवन्तीति। अतस्यैत एवोन्नीतसामर्थ्याः समाहृत्य समाम्नाता इति॥

समाम्नानमात्र मेव दर्शयति। प्रकरणगताश्च नित्या एवैत इति गम्यते। "ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः"। उदाहृताः समाम्नाताः निर्वचनप्रसङ्गतो निरुच्यन्ते। य एते समाम्नाता गवादयः त एते मन्त्रार्थनिगमयितृत्वा दुभयेऽपि निगन्तवः सन्तो निगमनाद्धेतो र्निघण्टव उच्यन्त इत्यौपमन्यवः। इत्येव मर्थनिगमयितृत्वान्निगन्तव एते सम्पन्नाः सन्तोऽतिपरोक्षवृत्तिना शब्देन गकारस्थाने घकारं कृत्वा तकारस्थाने च टकारं कृत्वा वर्णव्यापत्त्यादिलक्षणम्। अथाप्यादिविपर्यय इत्येव मादि तदेतत्परोक्षातिपरोक्षवृत्तिषु यथासम्भवं द्रष्टव्यम्। त्रिविधा हि शब्द-

व्यवस्था;—प्रत्यक्षवृत्तयः, परोक्षवृत्तयः, अतिपरोक्षवृत्तयश्च। तत्रोक्तक्रियाः प्रत्यक्षवृत्तयः, अन्तर्लीनक्रियाः परोक्षवृत्तयः, अतिपरोक्षवृत्तिषु शब्देषु निर्वचनाभ्युपायः। तस्मात्परोक्षवृत्तिता मापाद्य प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः। तद्यथा;—निघण्टव इत्यतिपरोक्षवृत्तिः, निगन्तव इति परोक्षवृत्तिः, निगमयितार इति प्रत्यक्षवृत्तिः। यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यन्ते। उक्तञ्च;—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"। वक्ष्यति चायमपि;—वर्णविपर्ययवर्णव्यापत्तिलक्षणम्। त एते निगन्तवः सन्तो निघण्टव उच्यन्ते। इत्येव मतिपरोक्षवृत्तयो निर्वक्तव्याः। प्रायेण चोणादिषु परोक्षवृत्तयः शब्दाश्चिन्त्यन्ते। तत्र तेषां लक्षणमुपेक्षितव्यम्। येषामपि लक्षणं नास्ति, तेषामपि तत्र कल्प्यम्। अपरिसमाप्ता ह्युणादय इति लक्षणविदः प्रतिजानते, सर्वथापि लक्षणासम्भवे पृषोदरादिपाठसिद्धिरेव द्रष्टव्या। तत्र हि यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्यभिव्याहारानभिघातायेति हि लक्षणविदो मन्यन्ते। इत्यौपमन्यवः आचार्यो मन्यत इति वाक्यशेषः। उपरतमन्युरुपमन्युस्तस्यापत्यं औपमन्यवः। कीर्त्तिप्रथनार्थं औपमन्यवग्रहणम्॥

"अपि वाऽऽहननादेव स्युः समाहता भवन्ति"। अपि चैवं यथोक्तम्। अपि चैव मन्यथा निघण्टवः स्युः। कथमिति? आहननादेव। न निगमनादित्यभिप्रायः। विद्यमानमपि निगमनमविवक्षितमेतस्मिन् पक्षे। अनेकक्रियायोगेऽपि हि सति काञ्चिदेव क्रियां मङ्गीकृत्य नामधेयप्रतिलम्भो भवति। तदुत्तरत्र वक्ष्यामः।

आह; किमेतेष्वाहत मिति? उच्यते;—समाहता भवन्ति। समः स्थाने नीत्येष नियुक्तः। दर्शयिष्यति चाय मुपसर्गव्यत्ययं निरित्येष समित्येतस्य स्थाने इति। आङ् विद्यमान एवाध्याहृतो मर्यादार्थ-प्रकाशनाय हन्तेः पाठार्थे वर्त्तमानस्यानेकार्थत्वाद्धातूनां वर्णव्यापत्या ओघ-शब्दवत् हकारस्थाने घकारः। अथ कोऽर्थः एतस्मिन् पञ्चाध्यायीसंग्रहे मर्यादया पठिता ह्येते भवन्ति? तस्मात्समाहताः समाहन्तव एते सन्त उपसर्गव्यत्ययोपसर्गाध्याहारवर्णव्यापत्तिभिर्निघण्टव इत्युच्यन्ते। प्रसिद्धश्च पाठार्थे हन्तेः प्रयोगः; एवं हि वक्तारो भवन्ति—'ब्राह्मणे इह माहतम्', 'सूत्रे इद माहतम्'—इति। अर्थप्राधान्यादर्थनिर्वचनवशेन शब्दविपरिणामोऽयं प्रदर्शितः॥

"यद्वा, समाहता भवन्ति"। पूर्ववदेवोपसर्गव्यत्यय उपसर्गाध्याहारोऽत्रापि। धातुस्तु हरतिरत्र। यत् यस्मादित्यर्थः। यस्माद्वा एते समाहृता भवन्ति छन्दोभ्यः, तस्मात् समाहरणक्रियायोगात् समाहर्त्तवः एते समाहृताः सन्तः पूर्ववदेवोपसर्गव्यत्ययादिक्रमेण निघण्टव इत्युच्यन्ते। एतस्मिन्नपि निगमन-समाहनन-क्रिये निघण्टुषु विद्यमाने अर्थविवक्षिते कृत्वा समाहरणक्रियायोगहेतुको नामधेयप्रतिलम्भ उक्तः। एव मेष निघण्टुशब्दो गमेर्वैकोपसर्गात् हन्तिहरतिभ्यां वा न्युसर्गाभ्यां निरुक्तः॥

आह;—किमयं पुनरतिमहान् यत्न एकस्मिन्नभिधाने अनेकधात्वर्थनिर्वचनकृतइति? उच्यते;—इह तावत् सर्वाण्याख्यातजानि नामानीति सिद्धान्तः; सत्याख्यातजत्वे ऽभिधेयस्था या क्रिया लक्ष्यते, तदभिधानसमर्थे परोक्षकृत्तौ वा तदभिधायि-निरूढि-शब्दे धातु

रूपतः, स च पुनः स्ववर्णक्रियासामान्येन; तच्चैवं सति रूढ़िशब्दे यावन्तो धातवः स्वलिङ्गं रूढ़िगतं वर्षयन्ति, तावन्तः सङ्गृह्य स रूढिशब्दो निर्वाच्यः। किं कारणं? विशेषलक्षणव्यवस्थाभावात्। न हि तत्र विशेषलक्षणव्यवस्था का चिदस्ति योऽय मेकोऽवतिष्ठेत, अन्ये व्यावर्त्तेरन्। अपि चोक्तं वार्त्तिककारेण। "यावता मेव धातूनां लिङ्गं रूढ़िगतं भवेत्। अर्थस्याप्यभिधेयस्यास्तावङ्गिर्गुणविग्रहः"—इति। रूढ़िशब्दगतानां च धातूनां रूढ़िशब्दवाच्येऽर्थे क्रियायोगे सति एतदभावे तु क्रियाया रूढ़िशब्दे वर्त्तमान मपि धातुलिङ्ग मकिञ्चित्करम्। स एव क्रियाभावः तदाश्रयनिर्वचनव्यावर्त्तको भवति। ता एताः तिस्रः क्रिया निगमन-समाहनन-समाहरणाख्याः निघण्टुषु विद्यन्ते, तदभिधायिन्यपि च रूढ़िशब्द निरुच्यमाने गमिर्हन्तिर्हरतिश्चाहम्पूर्विकया* सन्निपत्य वदन्ति;—'ममानुरूपं मयैतं निर्ब्रूहि', 'मयैतं निर्ब्रूहीति। गमिस्तच गकार मात्मीयं व्यापन्नं मन्यते घकारं तथा हन्ति-हरती हकारं व्यापन्नं घकारं मन्येते। तस्मादय मनेकैर्धात्वर्थैर्निघण्टुशब्दो निरुक्त एवञ्जातीयाभिधाननिर्व्वचनप्रदर्शनाय॥

"तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति"। दृहैतावदेवोक्तं समाम्नायो निघण्टव इति, समाम्नायशब्दपर्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता, न तु निघण्टुशब्दस्यार्थतत्व मवधारितं, तदवधार्यत इति पर्युपयुक्त-

* 'अहंपूर्वं गमिष्यामि', 'अहम्पूर्वं गमिष्यामि'—इत्येवं मिथो विवदन्त इति।

स्तच्छब्दः। किं पुनस्तदिति? यान्येतानि चत्वारि पदजातानि, या एतास्चतस्रः पदजातयः। क? लोके वेदे च। कतमानि तानि? नामाख्याते चोपसर्गनिपातास्च। किन्तेषा मिति? इमानि चत्वार्यपि पदजातानि सन्त्येतस्मिन् शास्त्रे। किमिति निघण्टुसञ्ज्ञानि भवन्ति? नित्य मेवानुविधीयमानानि भवन्तीत्याह। न कदाचिदपि न भवन्ति, नित्यं भवन्त्येवेत्यभिप्रायः॥ चत्वारीति चतुर्ग्रहण मवधारणार्थम्; नैकं पदजातं, यथार्थः पद मैन्द्राणा मिति; नापि द्वे, यथा सुवन्तं तिङन्तं च; नापि त्रीणि, निपातोपसर्गावेकतः कृत्वा; नापि पञ्च, षड्वा, यथा गति-कर्म+प्रवचनीय-भेदेनेति॥ पदजातानीति पदगणा इत्यर्थः। जात शब्दो हि गणे प्रसिद्धः। तद्यथा। गोजात मश्वजात मिति। तद्वदिहापि। तत्र; नामपदगणः, स्त्रीपुन्नपुंसकलिङ्गप्रविभागेन; तथाऽऽख्यातपदगणः, कर्तृवचन-भाववचन-कर्मवचन-प्रविभागेन; तथोपसर्गगणः, आङादिः; तथा निपातगणः, दूवादिः। एव मभिप्रेत्योक्तं चत्वारि पदजातानीति। अत्र नामाख्यातयोः पूर्वं मभिधानं प्राधान्यात्, अप्राधान्यादुपसर्गनिपातानां पश्चात्। उभे अपि नामाख्याते निपातोपसर्गनिरपेक्षे अपि सती स्व मर्थं ब्रूतः; न तूपसर्गनिपातानां नामाख्यातनिरपेक्षाणा मर्थोऽस्ति। वक्ष्यति हि;—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः"—इति। वाच्ये, न चैते अर्थेनार्थवती। द्योत्ये नोपसर्गनिपाता इति वाऽप्राधान्यम्। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति। तस्मादुपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वं मभिधानम्, अप्राधान्याच्च पश्चा दुपसर्गनिपाताना मिति। नामाख्याते

इतीतरेतराकाङ्क्षित्व मुभयोर्नामाख्यातयोः समासेनाभिधानम्। कथ मितरेतराकाङ्क्षित्व मिति ? यज्ञदत्त इति हि नामशब्दः तावदेव साकाङ्क्षो भवति, यावत् पचति पठति इत्याद्याख्यातशब्दैर्न निराकाङ्क्षीक्रियत इति; तथा पचतीत्याख्यातशब्दस्तावदेव साकाङ्क्षो भवति, यावन्न यज्ञदत्तशब्दः। पचति यज्ञदत्त ओदन मिति, इतरेतराकाङ्क्षित्व मुभयोर्नामाख्यातयोः, समानकार्यत्वं चैतयोर्लक्ष्यते। वाच्येनार्थेनार्थवत्व मित्यतः समस्येते नामाख्याते इति। नाम्नः पूर्वनिपातोऽल्याच्तरत्वात्* । नामपदवाच्यार्थाश्रयक्रियोपलक्ष्यत्वाच्चाख्यातस्य पश्चान्निपातः। उपसर्गनिपाता इति। उभयेषा मुपसर्गनिपातानां नामाख्यातयोरर्थविशेषद्योतकत्वात् समानकार्यत्व मित्यतः समस्यन्ते। आख्यातसहयोगित्वा दुपसर्गाणा माख्यातानन्तरं पाठः, परिशेषाणां निपातानां पश्चाद् अपरिमिताश्च निपाता इति॥

"तच्चैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति"। तत्र तस्मिन्, लोकवेदप्रसिद्धे पदचतुष्टये निघण्टुशब्दसमानसञ्ज्ञोपलक्षिते, ये तावन्नामाख्याते तयोस्तावदेतल्लक्षणं प्रदिशन्ति। कतमद्? यदेतदुच्यमाणमित्यभिप्रायः। प्रदिशन्ति प्र विभज्येदं नाम्नां लक्षण मिद माख्यातस्येत्येवं दिशन्ति उपदिशन्त्याचार्या इति वाक्यशेषः। आह, लक्षणोपदेशः कस्मात् ? अनुक्रमणेनैव सिद्धत्वात्। अनुक्रमणेनैव हि वक्ष्यति "इमानि पृथिवीनामधेयान्येकविंशतिः (२,२,१०)", "हिरण्यनामान्युत्तराणि पञ्चदश (२,३,१)", कान्तिकर्मण उत्तरे धातवोऽष्टादश (३,२,१०)", गतिकर्मण उत्तरे धातवो द्वाविंशं शतम् (३,२,१०)"—इति। तत

* "अल्पाच्तरं" पूर्वं प्रयोज्यम्। सि० कौ० द० स०।

एव विज्ञास्याम इमानि नामानीमान्याख्यातानीति। तस्मादय मनर्थको लक्षणोपदेशः? नानर्थकः। कस्मात्? अथापि हि लक्षणं समाम्नाता-न्यसमाम्नातानि च व्याप्य वर्त्तते। यत्पुनरेतदुक्त मनुक्रमणादेव विज्ञा-स्याम इति। अत्र ब्रूमः;—निर्देशोऽसौ न हि लक्षणम्, निर्देशस्य परि-च्छिन्नविषयः। स तर्हि किमर्थ इति? शास्त्रे रूपस्वभावोपप्रदर्शनार्थः। तस्मादसमाम्नातार्थोऽय मादितो लक्षणोपदेशो युक्त इत्युपपन्नम्॥

आह;—तात्पर्येणैवेद मन्तरेण समाम्नातवदसमाम्नातानि कस्मा-न्नोपदिश्यन्ते, अपि च तथा सूपदिष्टानि भवन्तीति? उच्यते;—तथाह्युपदेशगौरवं भवति, ग्रहणशक्तिहानं च। अपिचोक्तम्। "ऋषयो ह्युपदेशस्य नान्तं यान्ति पृथक्प्रजः। लक्षणेन तु सिद्धाना मन्तं यान्ति विपश्चितः"—इति। तस्मादुपदेशगौरवभयाद् ग्रहणशक्ति-हानदोषाच्च समानलक्षणोपदेशः क्रियते इति।

आह;—किं पुनस्तल्लक्षणमिति? उच्यते;—"भावप्रधान माख्यातं, सत्त्वप्रधानानि नामानि"। नामपदवाच्यार्थाश्रयक्रियाव्यङ्ग्यो भावः। पाक-राग-त्यागाख्यः। स यत्र प्रधानं, गुणभूता क्रिया, तदिदं भावप्रधानम्। किं पुनस्तदिति। आख्यातम्। आख्यायतेऽनेन गुणभावेन वर्त्तमाना अनेककारक-प्रविभक्ता स्फुरमाणेव प्रधानद्रव्य-भावाभिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन प्रवर्त्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः।

आह;—कथं पुनर्गुणभूताक्रियेति? उच्यते;—तदर्थत्वात्। तदर्था हि सा। भावार्था भावसिद्ध्यर्थ मात्मलाभ मनुभूय कारकेषु तण्डुलादौ पाकाख्यं भाव मभिनिष्पाद्यावसितप्रयोजनैकदेश एव तिरोभवति।

यस्य च यदर्थं आत्मलाभ स्तत्तद्गुणभूतं भवति। भावसिद्ध्यर्थश्च क्रियाया आत्मलाभ स्तस्माद् गुणभूतेति गम्यते। भावसिद्धौ च चानुमीयते क्रिया परोक्षापि सती॥

आह;—कथं पुनः परोक्षा क्रियेति? उच्यते;—न हि सेन्द्रियाणा मन्यतमेन स्वरूपस्था सती कदाचिदपि सन्निकृष्यते। किं तर्हि? तदवसाने योऽभिनिष्पद्यते भावः, तेन लिङ्गेते। नून मभिनिर्वृत्ता क्रिया यथा भावोऽय मभिनिष्पादित इति नाभिनिर्वृत्ता चेदभविष्यद्! यथैव सा क्रियानिर्वृत्तेर्नाभव दयं भावः, एवं साम्प्रत मपि नाभविष्यत्; अस्ति चायम्। तस्मादभिनिर्वृत्ता क्रियेत्येव मनुमीयते। तदेत दाख्यातं क्रियावाचक मपि सद्भावार्थत्वात् क्रियाया भावं प्रधान मुच्यत इति एव मेके मन्यन्ते। एके पुनर्भावप्रधान माख्यात मिति प्रकृत्यर्थप्रधान मिति मन्यन्ते। प्रकृत्यर्थविशेषणं हि प्रत्ययार्थादय इति। भावः, कर्म, क्रिया, धात्वर्थः, इत्यनर्थान्तरम्। स यत्र प्रधानं गुणभूतानि साधनानि तदिदं भावप्रधानम्। किं पुनस्तत्? आख्यातम्। आख्यायन्ते स्त्रीपुन्नपुंसकानि क्रियागुणभावेन वर्त्तमानान्यनेन, क्रिया च तेषा मुपरि प्राधान्येन वर्त्तमानेत्याख्यातम्॥

आह;—कथं पुनरत्र क्रियायाः प्राधान्य मिति? उच्यते;—सा ह्यत्र शब्दवाच्या। अर्थगृहीतानि तत्साधनानीति। अतः प्राधान्य मत्र क्रियायाः। इतश्च प्राधान्यम्। कुतः? विशेषप्रत्ययाधानात्। पचतीति प्रथमपुरुषैकवचनान्तेः आख्यातशब्दो वर्त्तमानकालकर्तृविषयो यत्किञ्चिदविवक्षितविशेष मेव पक्त्रादिसाधन मात्मन आश्रय-

भावेनोपलक्षयन्ननेकक्रिया शक्तिमत्यपि पक्त्रादौ साधने पचिक्रियाया मेव विशेषप्रत्यय मादधाति; नान्यासु क्रियासु; नापि विशिष्टे पक्त्रादौ साधने । यश्च यस्मिन्नर्थे विशेषेण वर्त्तते शब्दः, स एव तस्य प्रधानम् । विशेषेण च क्रियाया माख्यातशब्दो वर्त्तते, गुणभावेन कारके । तस्माद्विशेषप्रत्ययाधानाद्भावप्रधान माख्यात मित्युपपन्नम् । अपि च क्रियाव्यापारविज्ञानपरतया पृष्टः— 'किं करोति देवदत्तः ?' क्रियाख्यानपरतयैव प्रत्याचष्टे— 'पचतीति' । न त्वोदन मिति पूर्व मुक्त्वा ततः पचतीति ब्रवीति ॥

अथ कथ मुच्यते भावप्रधान माख्यात मिति ? शृणु;— अमूर्त्ता हि क्रिया निरूपाख्या, सा हि कारकै रभिव्यज्यमाना कारक-शरीरे च सती शक्यते निर्दिष्टुम् । इतरथा हि अशरीरा सती सा न गृह्येत, अगृह्णे च सति कथ मिव निर्दिश्येत । तच्चैवं सति कारक-समूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्ट मात्मीयं कार्य मारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद् ग्रहणासम्भवान्नि-र्दिश्यते । न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाकृतिरिति साक्षाद् ग्रहणासम्भवः । तस्मादोदनकर्म्मकार्या देवदत्तकर्तृकौदनशब्दोपपदैव निर्दिश्यते,—ओदनं पचति देवदत्त इति । तत्राविवक्षितस्वार्थ ओदन शब्दः । अपि च क्रियाव्यापारपिपृच्छिषयैव पृष्टः— किं करोतीति, क्रियाव्यापारमात्र मेव प्रत्याचष्टे— पचतीति । ततः किमिति पर्य-नुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदन मिति । तस्माच्छ-ब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधान मित्युपपन्नम् । यत्पुनरेतदुक्त मोदन मिति पूर्व मुक्त्वेति, तत्र ब्रूमः;— स हि पर्य-

नुयुयुक्षां साधनगतां भाविनी माशङ्कमानः पर्यनुयोग मात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थं मोदन मिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्यनुयोगोऽनुक्तो द्रष्टव्यः। तस्मात् पचतीति शब्दवाच्यत्वाच्च क्रियायाः शब्दान्तरवाच्यत्वात् द्रव्यस्य क्रियैव प्रधान मिति। इतश्च न द्रव्यप्रधान माख्यातम्। एकस्मिन् वाक्ये द्वयो राख्यातयो रसमवायात्। पचति-पठतीत्युभयोः प्राधान्या दितरेतरेण समवायो नास्ति। न ह्येतरः शब्द इतरत्र गुणी भवति। द्रव्यशब्दे च समवायात्, समवैति द्रव्यशब्देनाख्यातशब्दः। पचति देवदत्त इत्युक्ते पचिक्रिया-गुणभूतो लक्ष्यते देवदत्तः। तस्मादुपपन्नं भावप्रधान माख्यात मिति। अपिचोक्तम्। "क्रियावाचक माख्यातं लिङ्गतो न विशिष्यते। चोनच पुरुषान् विद्यात् कालतस्तु विशिष्यते"—इति। तत्पुनरेतच्चतुःप्रभेद माख्यातं भवति। कर्त्तरि, भावे, कर्म्मणि, कर्म्मकर्त्तरि चेति। पचतीति कर्त्तरि। भूयते, पच्यते इति भावकर्मणोः। पच्यते स्वयमेवेति कर्मकर्त्तरि। चतुर्ष्वप्यवयवार्थानि द्रव्याण्यप्रधानानीति क्रिया एव प्रधानम्। ता मभिदधत् तयैव लक्ष्यमाण आख्यातसञ्ज्ञो भवतीत्युक्तम्। आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वं माख्यातलक्षण मुक्तम्, पश्चान्नामलक्षण मुच्यते। किं पुनस्तत्? सत्वप्रधानानि नामानि। लिङ्गसञ्ज्ञयो रत्र सद्भाव इति सत्त्वम्। तया लक्षणोपपत्तेः। तद्येषु प्रधानं गुणभूता क्रिया नामान्येव तानि। नमन्त्याख्यातशब्दे गुणभावेन, नमन्ति वा स्व मर्थं माख्यातशब्दवाच्ये गुणभावेनेति नामानि। यथैव ह्याख्याते विद्यमान मपि द्रव्य मविवक्षित मेव मिहापि विद्यमानापि क्रिया

अविवक्षिता। द्रव्यपरत्वात्सत्त्वशब्दस्य तद्विक्रियाजनित मुत्तरकालं क्रियाशेषभूत मभिधाय धात्वर्थोऽसौ व्यावर्त्तते॥

आह;—कथं पुनर्नास्ति क्रिया विद्यत इति, विद्यमानापि वा विवक्षितेति? उच्यते। प्रकृतिः, प्रत्ययो, विभक्तिरिति चेधा विभज्यमान मेतावदेवैतन्नाम। तत्र प्रकृतिर्धातुरित्येकोऽर्थः। धातुश्च पुनः क्रियावचनः स च नास्ति विद्यत इति तदभिधेयभूतया क्रियया भवितव्यम्। यथावश्यं यत्रार्थस्तत्र तदभिधायकः शब्दः, यत्र शब्दस्तत्र तदाक्षेपोऽर्थ इति। सम्बद्धौ हि शब्दार्थौ वाच्यवाचकत्वेन नित्य मिति। एवं तावत्क्रिया विद्यते। यत्पुनरेतदुक्तं—विद्यमानापि क्रिया कथ मविवक्षितेति? अत्र ब्रूमः;—नास्ति यो धातुः सकृत्प्रयोजयतितेन प्रातिपदिकेनाभिभूतक्रियाभिधानशक्तिः प्रातिपदिकान्तर्लीनवृत्तिरेव स्व मर्थ मुद्भावयितु मशक्नुवन् प्रातिपदिकार्थ मेवानुवर्त्तमानो द्रव्यप्रधान एव भवतीत्येवं न विवक्षिता क्रिया। सा तु विद्यमानापि विगृह्यमाणे नास्ति प्रातिपदिकनिबन्धनादुन्मुच्यमाना द्रव्यगत मर्थं प्रकाशयति; न प्राग्विग्रहादिति द्रव्यपरता सत्त्वशब्दस्य गम्यते। तथाचोक्तम्। "शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते। तदवस्थविधौ युक्तं नामेत्याऽऽर्मनीषिणः"—इति। पुनश्चोक्तम्। "अष्टौ ये यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः। तन्नाम कवयः प्राऽऽर्भेदे वचनलिङ्गयोः॥ निर्देशः कर्म करणं प्रदान मपकर्षणम्। स्वाम्यर्थोऽप्यधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः"—इति। स्त्रीपुन्नपुंसकभेदं निपातोपसर्गाणा मपि वा क्वचिन्नामत्व मपेक्ष्य बहुवचनेनोक्तं नामानीति। अपरे पुनर्भावकालकारकसङ्ख्यास्वित्वार एतेऽर्था आख्यातस्य। तेषां

भावप्रधानता भवति। अतो भावप्रधान माख्यात मित्युक्तम्। नाम्नोऽपि सत्ता द्रव्यं सङ्घा लिङ्ग मित्येतेऽर्थाः। तेषां द्रव्यं प्रधान मित्यतः सत्त्वप्रधानानि नामानीत्युक्तम्॥

एव मेके मन्यन्ते;—"तद्यत्रोभे भावप्रधाने भवतः"। एवं तावद्-नयोर्नामाख्यातयोः परस्परा विनाभूतयोः स्वपदार्थोक्ता वेकस्य भाव-प्राधान्य मेकस्य सत्त्वप्राधान्यम्। अथ पुनर्यत्रैते उभे भवतः। क्व च पुन रेते उभे भवतः? वाक्ये। तत्र कस्य प्रधान मर्थः, कस्य गुणभूत मिति? शृणु;—भावप्रधाने भवतः, तस्य चिकीर्षितत्वात्। वाक्ये ह्याख्यातं प्रधानं, तदर्थत्वात् गुणभूतं नाम। तदर्थस्य भावनिष्पत्ता वङ्गभूतत्वात्। एवं तावदाख्यातं वाक्ये प्रधानम्॥

अथ पुनः कथ मभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते? किं वा तदाख्यात मिति? यतो लोकप्रसिद्धैवेदाहरति। तत् प्रसिद्धत्वाच्छब्दार्थसम्बन्धस्य। "पूर्वापरीभूतं भाव माख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तम्"। अपूर्व मनपरं सन्त मेकत्वात् पूर्वापरीभूतं पूर्वापर मिव पौर्वापर्येणावस्थित मेक मनेकासु क्रियासु आश्रित मुपानदधिनहनपूर्वोत्तरपदविहरणपथिभोजनशयनासनोद-कपानाद्यास्वाश्रितं तदभिनिर्वृत्तिवशेनाभिनिर्वर्त्तमानं कस्मै चित् पृच्छते किं करोति? अन्य आचष्टे व्रजतीति। अविभक्तकर्तृकं द्वितीय मिति उदाहरणद्वयं भावद्वयोपप्रदर्शनार्थम्। उपक्रमप्रभृतीति। उपक्रम आरभ्यतस्मादारभ्यापवर्गपर्यन्तं यावदन्या क्रियेत्यर्थः॥

आह;—अन्यासन्निधौ भावनिर्वृत्तिदर्शनादन्ययैव निर्वर्त्यतदिति? शृणु;—पूर्व्वासा मभावे अन्ययैव न स्यात्, पूर्व्वापेक्षं हि तस्या अन्यात्वम्।

अपि च। प्राप्तिफलो हि व्रजति र्न चैकया क्रियया ऽभिमतदेशान्तरे प्राप्तिरस्ति। तस्मादुपक्रमाद्याभिः क्रियाभि रीषदभिनिष्पाद्यमानो भावोऽन्यायां मभि सन्तिष्ठते। ततः सन्निकर्षे गृह्यते न त्वसावन्त्ययैव निर्वृत्त इत्यन्ते गृहीतः। अपि च, प्रसिद्ध मेतदुपक्रमादारभ्य यच्च व्रजितं, यच्च व्रज्यते, व्रजिष्यमाणं, तत्सर्व्वं मेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति। न प्रसिद्धिरूपरोद्धुं न्याया। यथावस्थितानां हि शब्दाना मन्वाख्यानमात्र मेव शास्त्रेण क्रियते; नोत्पाद्यन्ते शब्दाः, नाप्यर्थेषु विधीयन्ते। तस्मात् प्रसिद्धशास्त्रसमयोऽपि लौकिकप्रसिद्धीव पूर्व्वापरीभूतं भाव माख्यातेनाचष्टे, व्रजति-पचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तम्। तस्मादुपपन्न मनेकक्रियाभिर्निर्व्वर्त्त्यमानो भाव आख्यातेनोच्यन्त इति। आह च। "क्रियासु बक्रीष्वभिसंश्रितो यः पूर्व्वापरीभूत इवैक एव। क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन त मर्थ माहुः"—इति॥

"मूर्त्तं सत्त्वभूतं सत्त्वनामभिः"। कदाचित्तु तमेव भावं तथैवोपक्रमप्रभृत्यभिनिर्व्वर्त्तमान मपवर्गपर्य्यन्तं मूर्त्तं सत्त्वभूतं सत्त्वरूपिणं लिङ्गसङ्ख्यायुक्तैः सत्त्वनामभि राचष्टे॥

कथम्? "व्रज्या पक्तिरिति"। तत्रोक्तो विशेषः। कृदभिहितो भावो द्रव्यवद्भवति सोऽयं प्रयुक्तस्य लक्षणस्य प्रयोग मपेक्ष्य क्वचिदपवादः। आह च। "क्रियाभिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात्। सङ्ख्याविभक्तिव्ययलिङ्गयुक्तो भावस्तदा द्रव्य मिवोपलक्ष्ये"—इति॥

आह;—कस्मात्पुनरेकएव भावस्तिङन्तेन कृदन्तेन चान्यथोच्यत

इति? उच्यते;—शब्दस्वाभाव्यादृते नान्यदत्र प्रयोजक मस्ति। अपिचोक्त मस्माभि रवस्थिताना मेव शब्दाना मभिधानाभिधेय-सम्बन्धेनाभिसम्बन्धाना मेव नित्य मन्वाख्यानमात्र मेव क्रियते। नोत्पाद्यन्तेऽर्थेषु वा विधीयन्ते शब्दा इति। व्याप्तिरित्युदाहरणद्वय मुक्तप्रयोजनम्॥

"अददति सत्त्वाना मुपदेश" इति*। भावोऽधिकृतः। स च पुनः सत्त्वभूतो नेतरः, यतस्तत्सम्बन्धेनैव नाम्नो यदवशिष्यते तदुच्यते। किं पुनस्तत् सामान्यविशेषवाचित्वम्? तत्रादददति सत्त्वाना मुपदेशः। सामान्यत इति वाक्यशेषः। सर्व्वेषा मपि सत्त्वाना मध्ययने प्राप्ते लिङ्गाविशिष्टत्वा दिद मेवैक मुदाहृत मुपप्रदर्शनार्थम्॥१॥

आह;—विशेषोपदेशः कथ मिति? उच्यते खण्डसूत्रम्;†—

गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतीन्द्रियनित्यं वचन मौदुम्बरायण‡ स्तच्च चतुष्टं नोपपद्यते युगपदुत्पन्नानां वा शब्दाना मितरेतरोपदेशः शास्त्रकृतो योगश्च§ व्याप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके

---

* अनेनेतिशब्देन प्रथमं खण्डं समाप्त मिति सूचितम्। परं घ-ङ-च-पुस्तकेषु नात्र खण्डसमाप्तिर्दृश्यते।

† द्वितीयं खण्डं, "गौरश्वः"—इत्यादिक मिति यावत्।

‡ घ-ङ-च-पुस्तकेष्वेव प्रथमखण्डसमाप्तिः। तथा च तेषु "औदुम्बरायणः॥ १॥ तच"—इति पाठः।

§ "शास्त्रकृतोपयोगश्च"—इति घ-ङ-पुस्तकयोः पाठः, परं इत्यिकारासङ्गतः।

तेषां मनुष्यवद्देवताभिधानं, पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे* ॥ २ ॥

"गौरश्वपुरुषो हस्तीति"। सत्त्वानां विशेषोपदेश इति वाक्यशेषः॥ सोपाधिकनिरुपाधिकोपप्रदर्शनार्थं मनेकोदाहरणम्। सामान्यवृत्त्या विशेषवृत्त्या चोभयथा शब्दः प्रवर्त्तत इत्युभय मुपदर्शितम्॥

"भवतीति भावस्य"। सामान्येनोपदेशः। अत्र हि सर्वेषां सत्तावाचिना मध्ययने प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः। विद्यमानत्व मेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्याभिर्विशेषक्रियाभिरभिसम्बन्ध्यन्ते। तस्माद्भवतीति सर्वक्रियाप्रसववीजभूत मस्तित्व मात्र मेव निरुपपदेन भवतिशब्देनोच्यत इत्युपपन्नं भवति। सामान्यवाचित्वं विशेषनिर्देशः॥

कथ मिति? उच्यते;—"आस्ते शेते व्रजति तिष्ठतीति"। सकर्मकाकर्मकोपदर्शनार्थ मुभयेषा मुदाहरणम्॥

"इन्द्रियनित्यं वचन मौदुम्बरायण स्तच्च चतुष्टं नोपपद्यते"। आह;—इह तावदुक्तं पदचदुष्टयम्। भाववचनता, द्रव्यवचनता; गुणभावः, प्रधानभावः, पूर्वापरीभावः; सामान्यवाचित्वं, विशेषवाचित्व मिति। नोपपद्यते। कस्मात्? वचनानित्यत्वात्। कः पुनरेव माहाऽनित्यं वचन मिति? उच्यते;—इन्द्रियनित्यं वचन मिति। इन्द्र आत्मा, स येन ईयते लिङ्ग्यते अनुमीयते चास्यसा वात्मा

* क-ख-ग-पुस्तकेष्वेतावत्यन्त्र नात्र खण्डसमाप्तिः।

कर्त्ता, यस्येदं करणम्, नाकर्त्रकं करण मस्तीति, तदिन्द्रियम्। तस्मिन्नित्य मिन्द्रियनित्यम्। किं पुनस्तत्? वचनम्। उच्यते अनेनेति वचनं वाक्य मित्यर्थः। कतमत्? यदेतन्नामाख्यातोपसर्ग-निपातात्मकम्। औदुम्बरायणः आचार्यो मन्यत इति वाक्यशेषः। उदुम्बरस्यापत्य मौदुम्बरिः; तस्यापत्य मौदुम्बरायणः॥

आह;—ततः किमिति? उच्यते;— तच्च तस्मिन्वाक्ये एव मिन्द्रियनित्ये सति यदेतत्पदचतुष्ट मुक्त मेतन्नोपपद्यते। कस्मात्? शृणु;— यावदेव वक्तुर्वागिन्द्रिये वचनम्, तावदेव तदस्तीति शक्यते वक्तुं; प्रच्युतं च नास्ति। अपि च। वाक्य मपि वाक्यं समस्त मुद्भूतं तदिन्द्रियेणावतिष्ठते। यदवयवभूतानि पदान्यवस्थितानि परिसङ्ख्या-तुम्। न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यान मस्ति। तस्माद्वचनानित्यत्वात् पदचतुष्टानुपपत्तिरित्युपपन्नम्॥

किं चान्यत्;—"अयुगपदुत्पन्नानां वा शब्दाना मितरेतरोप-देशः"। वा शब्दः समुच्चयार्थो "वा विकल्पोपमानद्वन्द्वसमुच्चया-र्थेष्विति" हि निपातविदः पठन्ति। वक्ष्यति चाय मपि*। "वेति विचारणार्थे"—इत्युपक्रम्य "अथापि समुच्चयार्थे भवित"—इति (१,१,३)। एवं चैतेषा मयुगपदुत्पन्नानां शब्दानां वाक्यावयव-भूतानां योऽय मितरेतरोपदेशः। इतरेतरगुणप्रधानभावो नाम आख्यातं प्रति गुणभावेनोपदेशः। आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशः। अयं च नोपपद्यते इत्यनुवर्त्तते। किं कारणं? न हि विनष्टं नाम गुणभाव मियादाख्याते; नापि नष्ट माख्यातं

* निरुक्तकार-यास्कोऽपीत्यर्थः।

प्रधानभाव मियान्नास्ति । न हि विनष्टाविनष्टयोरितरेतरगुणप्रधान-भावोऽस्ति किं वान्यतः ॥

"शास्त्रकृतोयोगश्च" । यश्चायं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः । तद्यथा । उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य लोपागमवर्णविकारैः । अयं वचनानित्यत्वान्नोपपद्यते । किं कारणं ? अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चारितो विनष्टः स वाय मुपसर्गेण योच्यते, प्रत्ययेन वा । न हि विनष्टाविनष्टयोर्योगोऽस्ति । तस्माद्य एष नामाख्यातयो रितरेतरगुणप्रधानभाव उपसर्गनिपाता-नां नामाख्याताभ्यां योगः, यच्च पदचतुष्टय मुक्तं, सर्व मेतदसम्यगिति । युगपदुत्पन्नाना मयुगपदुत्पन्नाना मित्येव मारभ्यमाणयोर्वाक्ययोरन्यो व्याख्यामार्गो भवति । नोपपद्यते । युगपदुत्पन्नाना मयुगपदुत्पन्ना-ना मित्युभावपि व्याहारौ प्राप्नुतः । समानसंहितत्वात् । इन्द्रियनि-त्यत्वात्पदचतुष्टानुपपत्तिरित्युचार्यमता शङ्कादारेणैतदवतार्यते ;— युगपदुत्पन्नाना मिति । अथ मतम्,—"अविचालिन एवैते कूटस्था अविनाशिनः शब्दास्तु तु कल्पान्ते" । तस्माद्व्याप्तिरूपादिशीर्णेष्वभिधे-येष्वभिधात्वेषु कारणभाव मापद्यमानेष्वाश्रयाभावादेवावस्थातु मशक्नु-वतो अभिधेयाभिधात्वसहिता एव कारणात्मभाव मधिक मनुभूया-भिसंस्तवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्यकारणसर्वभूत-साधारणात्मभूते हिरण्यगर्भे विवर्त्तमाने तद्बुद्धि माश्रयं प्राप्यते ; नैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति। अत्र ब्रूमः ;—एव मप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टयं प्राप्नोत्येव सहावस्थितानां, तथापीतरेतरोपदेश

दृतरेतरगुणप्रधानभावश्च न प्राप्नोति। न हि युगपदुत्पन्नयोर्गो-विषाणयोरितरेतरगुणप्रधानभावोऽस्ति। किं चान्यत्;—कूटस्थेषु चाविचालिषु नित्येषु शब्देषु यएष शास्त्रकृतो योगः, स एष नोपपद्यते। किं कारणम्? अयुक्तो हि युज्यते, नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च; प्रत्ययाश्च लोपागमवर्णविकारैरिति। तस्मान्नित्यपक्षेऽपि वचनस्य तदेतदुपवर्णितम्। गुणप्रधानभावादि-पदचतुष्टय मधिकृत्य सर्व मेतदसम्यगिति॥

"व्याप्निमत्त्वात्तु शब्दस्य"। उच्यते;—सर्व मेतदुपपद्यते, कस्मात्? व्याप्निमत्त्वाच्छब्दस्य। व्यापनं व्याप्तिः, सा यस्मिन्नस्ति, सोऽयं व्याप्नि-मान् शब्दः, तद्भावो व्याप्निमत्त्वम्। तस्माद् व्याप्निमत्त्वाच्छब्दस्य सर्व मेतदुपपद्यत इति वाक्यशेषः। आह;—कथं पुनर्व्याप्निमान् शब्द इति? शृणु;—शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयान्तर्गताका-शप्रतिष्ठितयोरभिधानरूपाभिधेयरूपयोर्बुद्ध्योर्मध्येऽभिधानरूपया शा-स्त्राभिमतप्रयोजनविजिज्ञापयिषया बुद्ध्या पुरुषेण तदभिव्यक्तिसम-र्थेन स्वगुणभूतेन प्रयत्नेनोदीर्यमाणः शब्दः उरः-कण्ठादिवर्णस्थानेषु निष्पद्यमानस्तया पुरुषार्थाभिधानसमर्थवर्णादिभाव मापद्यमानः पुरुष-प्रयत्नेन बहिर्विनिक्षिप्तोऽविनाशिनि व्यक्तिभाव मापन्नः श्रोत्रद्वारेणा-नुप्रविश्य प्रत्याय्यास्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्निमान् शब्दः। आह;—ततः किं यदि व्याप्निमाञ्छब्दः? उच्यते;—यदि नित्यो यदा नित्यः पदचतुष्टयादि सर्व मुपपद्यतएव। किं कारणम्? न ह्यसंव्याप्य पुरुषस्य बुद्ध्यवस्थ मर्थप्रत्यय मादधीत, न चानवस्थितो व्याप्नुयात्। ततश्च किम्? स शब्दः स्व मर्थ मभिद-

धत् स्वक्रियाप्रवेशोपजनितेनाभिधानेनाख्यात मित्येव मादिना स्व मात्मान मभिसम्बध्य तिरोभवितु मुपक्रमते, विनाशञ्चोपेति। तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यान मुपपद्यत एव। तस्मात्सम्यगेवोक्तम्। यत्पुनरेतदुक्तं न हि विनष्टाविनष्टयोः परिसङ्ख्यान मस्तीति। अत्र ब्रूमः;—पुरुषप्रयत्नोपजनिताद्वक्तोद्दातात्पर्यार्थप्रत्यय माधाय शब्दव्यक्तय एव ध्वंसन्ते, न तु शब्दाकृतयः। तासु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति। तासु साक्षात्पदपरिसङ्ख्यानं वर्त्तमान मितरासु विनाग्निनीषु व्यक्तिषु लक्षणयोपचर्यते। तस्माद् व्याग्निमत्त्वाच्छब्दस्य पदचतुष्ट्वादि सर्व मुपपद्यत एव। व्याग्निमत्त्वादित्यनेनैवेतरेतरोपदेशः प्रत्युक्तः। शास्त्रकृतो योगश्च। नामाख्यातपदरूपबुद्धित्वे सत्त्वक्रियाविषये गुणप्रधानभावेनातिष्ठेत्। तयोर्गुणप्रधानभावे सति तच्छब्दे लक्षणयोपचर्यते। तथा च धातुरूपा बुद्धिरुदर्थया संयुज्यते। बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते। तस्यां संस्क्रियमानायां शब्दे संस्कारोपचारः क्रियते। तदभिधायकत्वाच्छब्दस्य। तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः, शास्त्रकृतस्य योगो नोपपद्यत इत्येतदयुक्त मिति। नित्यत्वपक्षेऽपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तम्, अनैकान्तिकोऽसौ दृष्टान्तः। दृष्टो हि युगपदुत्पन्नयोः एककाले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः। तत्र यदुक्तं युगपदुत्पन्नाना मितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं, व्याग्निमत्त्वाच्छब्दस्य सर्व मुपपद्यत इति; तदेव सम्यगिति॥

अपरो व्याख्यामार्गः।—इन्द्रियनित्यत्वात्पदचतुष्टयानुपपत्तिस्तदा-श्रयस्य च सर्वस्येत्येव माक्षिप्ते परिहारपक्षेणेदं भवतार्थते। युगपदुत्पन्नानां वा शब्दाना मितरेतरोपदेश इति। अत्र समञ्जस एव वा-शब्दः। कथम्? अयुगपदुत्पन्नानां वा युगपदुत्पन्नानां वा नित्यानां वा अनित्यानां वेत्यर्थः। इतरेतरोपदेशः। इतरस्येत्याख्यातस्य क्रिया-वचने शब्देऽभिधानत्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्ववचने शब्देऽभिधानत्वेनोपदेशः। शास्त्रकृतो योगश्च। लक्षणशास्त्रेण चैते क्रियासत्त्वे आख्यातनामशब्दाभ्यां युज्येते। तस्मादुपपद्यते पदचतुष्ट मिति॥

आह;—आगमनमात्र मेतत्। हेतुरुच्यतां, कथं विनष्टाविनष्टयोः सह परिसङ्ख्यानम्, अवस्थितयोर्वा गुणप्रधानभाव इति? उच्यते;—व्याप्तिमत्त्वात्तु शब्दस्य। हेत्वर्थः समान एव पूर्वेण॥

आह;—यदि व्याप्तिमत्त्वाच्छब्दस्य व्यवहारार्थं पदचतुष्ट मुपादी-यते, एव मपि नोपादेयम्। किं कारणम्? अभिनया अपि व्याप्ति-मन्तः, पाणिविहारात्तिनिकोचादयः; तैरेव कार्यसिद्धिरस्तिति। अपि चैवं पदचतुष्टयदोषैर्न सम्भोक्ष्यामहे, न चाय मतिमहान् वेदसमुद्रः पठितव्यो भविष्यति क्लेशेनेति। उच्यते;—स्यादेतदेवं यद्यय मपरो विशेषहेतुर्न स्यात्। कतमः?

"अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके"। सत्यम्! अभिनया अपि व्याप्तिमन्तः, न त्वणीयांसः; ते महता यत्नेन व्याप्नु-वन्ति; न च निःसन्दिग्धं कुर्वन्ति। तत्प्रतीतशब्दार्थसम्बन्धस्यैव नेतरस्य शब्दस्वरूपमित मर्थं मल्पीयसा यत्नेनोच्चारितो व्याप्नोति।

तस्मादणीयस्त्वादिति विशेषहेतूपपत्त्या शब्देनैव सञ्ज्ञाकरणं व्यवहारार्थं लोके इत्युपपन्नम्। यत्पुनरेतदुक्तं मध्ययनदोषैर्न सम्भक्ष्यामहे, न चाय मतिमहान् वेदसमुद्रोऽध्येतव्यो भविष्यतीति। अत्र ब्रूमः;—अभ्युदयो ह्यत्र वेदानुरूप एव भवति, अभ्युदयार्थं नः शास्त्रारम्भे यत्नः॥

"तेषामनुष्यवद्देवताभिधानम्"। आह;—एवं तावन्मनुष्याणां मनुष्येषु शब्देन चतुर्द्धा भक्तेनावबोधकरणम्। अथ मनुष्याणां वेदेषु हविःसम्प्रदानाशीःप्रार्थनादिव्यवहारः केनेति? उच्यते;— तेषामेव शब्दानामियमेव व्यवस्था देवेष्वपि देवानपि प्रति। कतमा? मनुष्यवद्देवताभिधानमिति। मनुष्येण तुल्यं मनुष्यवत्, देवताभिधानमभिधित्सुरभिधानम्। यथैव हि मनुष्याः प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिदधति। एवमेव देवा अपि। देवेष्वपि शब्दस्याभिधानेनापि शक्तिरपरिहीनेत्यभिप्रायः। तेऽपि हि मनुष्यवद्देवा अङ्गादियुक्ताः पौरुषविधिकैरङ्गैः कर्मभिश्च संस्तूयन्त इति हि वक्ष्यति तस्मादुपपद्यते मनुष्यवद्देवताभिधानमिति॥

आह;—यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवानभिधातुमथ किमर्थं वेदे मन्त्राः समाम्नाताः? इत्युच्यते;—"पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे"। पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात्पुरुषविद्यानित्यत्वाद्धेतोः कर्मसम्पत्तिः फलेन सम्पादनं अविगुणकर्मसम्पत्तिः, फलसम्पन्न मेव कर्म भविष्यतीत्येव मर्थं वेदे मन्त्राः समाम्नातइति वाक्यशेषः। इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभिदधते देवान्नामाख्यातोपसर्गनिपातैरभि-

चित्तत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा देवाना मपराधे, यथावत् प्रयुञ्जानाः नामाख्यातोपसर्गनिपातान्। ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्खल्प मप्ययथावदभिधानं न मर्षयन्ति। विगुण मेतदिति विद्याऽनित्यत्वात्तदभावेनेयुः कर्मणि। ततश्च देवताहीनं कर्मफलं सम्पद्यते। न च केवलं फलासम्पत्तिः। किं तर्हि? दुरिष्टहेतुको दोषोऽपि स्यात्! तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः। न हि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति। एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कया चिदवस्थितं मन्त्रा इत्युच्यन्ते।

आह;—कथ मनित्यत्वं विद्यायाः पुरुषेष्विति? उच्यते;—इह तु न वाक्यविरचनानुक्रमेण अर्थवत्त्वमनुप्रेक्ष्यते, मनुष्य एव मेव ब्रूयात्—'त्वं गच्छ देवत्त मिति'। स तेनैव वाक्यविरचनानुक्रमेण वद्ध मपि सन्त मर्थं न शक्नोति प्रतिपादयितुम्। एव मनित्यत्वं विद्यायाः पुरुषेषु। तददोषं वा मनुष्यान् प्रति, सर्वेषा मेव मनुष्याणा मनित्यत्वाद्विद्यायाः। अथ मपि हि येन वाक्यानुक्रमेण वक्ति मनुष्यः कञ्चिदर्थं, न तेनैव श्वा शक्नोति वक्तुम्। तत्र यदुक्तं—किमर्थं मन्त्रो वेदे समाम्नात इति। इदं न युक्तम्। पुरुषविद्यानित्यत्वात्कर्मफलसम्पत्त्यर्थं मन्त्रो वेदे समाम्नात इति। न ह्यविचारित मेव विज्ञायन्ते। अत इद माह। पदचतुष्ट माश्रित्य पक्षप्रतिपक्षशो विचार्य्य अवधारितम्। विषयाख्याक्षेपप्रसङ्गेनैवाख्य परिक्लिप्ताः। देवमनुष्यव्यवहारार्थ मेतदिति। तदेतत्सर्व मपि चोदकवशेन प्रसक्तानुप्रसक्त मुक्तम्। भावस्तु प्रकृतो यतस्तच्छेष मधुना

वर्णयिष्यामः। स च पुनरुभयात्मा भावः। कार्यात्मा कारणात्मा च। तयोर्यः कार्यात्मा तमधिकृत्योक्तम्,—"क्रियानिर्वर्त्योऽर्थः स भावः, क्रियैव वा भावः"—इति। इदानीं कारणात्मा भावो निरूप्यते। कथं क्रियाद्रव्ययोः स्वात्मस्थो विशेषः, कार्यात्मप्रध्वस्तयोः पुरुषोपभोगसन्तानोपक्षये कार्यात्मभावातीतः, येनात्मभावेन सदनमात्राभिसम्बन्धिना प्रलयकालेऽवतिष्ठते, सोऽत्यन्ताविनाशधर्ममात्र आत्मा भावइत्युच्यते।

आह;—कथ मय मिह प्रसक्तः? शृणु;—तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभिधीयन्ते। स्थितिकाले असावपि च प्रहीनसर्वविशेषभवनमात्रक्रियाभिसम्बन्धी सन् व्यावृत्तसर्वोपपदाभ्यां नामाख्यातशब्दाभ्या मुच्यते भवतीति भाव इति च शब्दगतत्वादपोढसर्वविशेषा मप्येतावस्था मेतौ शब्दावाक्रन्दतः। यत एतयोरेव साधारण्यार्थं मय मिह प्रसञ्जितः पदचतुष्टयाधिकरणे।

आह;—प्रधान मेतत् स्यात्! किं कारणम्? तद्भावे न ह्येतज्जगदवतिष्ठते प्रलयकाल इत्येके मन्यन्ते। तच्च नैव। किं कारणम्? भावविकारएव हि सोऽयं पदशब्दवाच्यत्वात्प्रधानभाव इति ह्युच्यते। पुरुषस्तर्हि? तत्राप्यय मेव हेतुः, अनुपक्षीणशक्तित्वात्। एतेनैव ईश्वरपरमाण्वादिभावाः प्रत्युक्ताः। ईश्वरभावः परमाणुभाव इति सोपपदत्वात्। शून्यं तर्हि? तदपि न। यस्माच्छून्यशब्देऽपि भावशब्दासङ्गदर्शनम्, न ह्यसत्यर्थे शब्दः प्रयुज्यते। शब्दो हि शब्दस्यार्थेन सम्बन्धः। किं चित्तद्अस्ति यच्छून्य मिति। लोके हि प्रसिद्धं गृहं शून्यं, यामः

शून्यः, शून्ये शब्दमहत्त्वे इति। तस्मान्न शून्यशब्देनाभाव एवोच्यते। किं तर्हि? अपेक्षाकृतं शून्यत्व मिति। भावशब्दएवाचोपपदत्वेन युक्त इति चेत्, न; प्रयोगाप्रसिद्धेः। न हि अभावे भाव इति प्रसिद्धः प्रयोगः। न च प्रयुज्यमानोऽपि भावशब्दो भावशब्द एवोपपदत्वेन प्रधानादिशब्दवत्कञ्चिद्विशेषप्रत्यय मादधाति। तस्मात्सर्वोपपदहीनस्य भवतेरात्मभावेनेदं जगन्नित्यम्, इतरैस्तु भावविकारैः परमाण्वादिभिर्भावविकारात्मभिरनित्यम्। कस्माद्? विकारात्मकत्वादेव। विकारो ह्यनित्यः, त मेवं भवनमात्राभिसम्बन्धेन प्रहीनसर्वभावविकारम्।) एतत्सद्भावविदोऽधृतवेदान्तरहस्यसम्पदः परावरविदो मेधाविन आत्मवेदविदो न कृत्स्नकारितया युक्ताधिकारबन्धना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसन्तानाः सन्त आत्मकामाः प्रतिपद्यन्ते। नेतरे प्रधानादिविदः। वेदानुशासनैकदेशानीश्वरपुरुषप्रधानादीननित्यान् भावविकारान् स्व मतिकल्पनाहेतुव्यवहितान् मत्वा स्थिरीकृत्यानेन प्रतिपद्यन्ते भवनमात्राभिसम्बन्धेन तदेतस्मादात्मन उद्विजन्त आत्मप्रकाशकान्तर्यान्यं चित्सन्तान मिव मन्यमानाः। केचिच्च शक्तिहानादसम्बाधनादेव। स एष दृह वेदाङ्गैर्वेदार्थनिर्वचनाभिनिवेशशब्दानां सामान्यविशेषवत्त्युपदेशप्रसङ्गे प्रवर्त्तमाने भवतेः कृदन्तीभूतस्य भवनमात्र मेव वक्तुं सामर्थ्यम्, नेतरान् भावविकारान् विद्यमानानपीति। एतेन प्रसङ्गेनात्र संसूचितो वेदरहस्यो ब्राह्मणैः॥ २॥

तच्च विस्तरेणायं विधीयते;—

षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति जायतइति पूर्वभावस्यादिमाचष्टे नापरभाव माचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं वर्द्धतइति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वाऽपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभाव माचष्टे न प्रतिषेधति ॥ ३* ॥

"षड् भावविकाराः भवन्तीति"। अपि च लक्षणविदो विगृह्णन्ति भावशब्दं भवतेः; स्वपदार्थे भवनं भाव इति। "सन्मात्रं भावलिङ्गं स्यात्"—इति पठन्ति। तस्य विकाराः भावविकाराः, भवन्तीति सामान्यादात्मनः प्रस्कन्दा इव सन्तत्त्वेन वैशेषिकेन भावविकारात्मलाभाय भवन्ति। इतिपरः प्रयुज्यमानः शब्दपदार्थकः।

क एवमाह "षड् भावविकाराः"—इति? उच्यते;—"वार्ष्यायणिः"—इति। तिकादिपाठात् फिञ्†। आचार्य इति वाक्यशेषः॥ निर्देशत उपलब्धानां षडित्यवधारणं सुखार्थम्। अतोऽन्ये भावविकारा एतेषा मेव भावविकारा भवन्तीति॥

आह;—कतमतदिति? उच्यते;—"जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति"॥

---

* घ-ङ-च-पुस्तकेष्वर्द्धमेव द्वितीयः खण्डः समाप्तः।

† "तिकादिभ्यः फिञ्" पा० ४, १, १५४।

आह;—एतेषां जन्यादीनां भावविकारशब्दानां कः कस्यां विकारावस्थाया मवस्थितं भाव माचष्टे, कं वा विद्यमान मपि नाचष्टे, कं वा न प्रतिषेधतीति? उच्यते;—"जायत इति पूर्वभाव-स्यादि माचष्टे, नापरभाव माचष्टे, न प्रतिषेधति"। जनिः पूर्वो भावः, तस्य पूर्वभावस्य षण्णां भावविकाराणां यदि वान्यो यः पूर्वो भावविकारः, तस्य जायत इत्यनेन शब्देनादि माचष्टे॥

आह;—किं मादि मेव? नेत्युच्यते। उक्त मुपक्रमप्रभृत्यपवर्ग-पर्य्यन्त मिति। स एव पूर्वापरीभूतो भावस्तावदेव जायत इत्युच्यते। यावन्निष्ठाशब्दवाच्यः संवृत्तो जात इति। नापरभाव माचष्टे, न प्रतिषेधति। नेति प्रतिषेधे, न परो भावः, अपरभावः॥

आह;—कस्मादपरः? पौर्वापर्यं हि देशकालकृतम् उच्यते;—जनिशब्दवाच्यो भावविकारः पूर्वः, तस्मादपरकालोऽस्तिशब्दवाच्यः। तच्चैवं सति जनिशब्दवाच्ये भावविकारे अस्तेरप्यर्थोऽस्ति विद्यमानता। किं कारणम्? न ह्यविद्यमानो जायते। अपि च कारणात्मनि भावे सर्व एते भावविकाराः सन्ति। सर्वार्थप्रसवशक्तित्वात्तस्य। यथा पृथिव्यां घटादयो भावविकाराः। ते तु द्वारद्वारिभावेन विशेषात्मलाभं प्राप्नुवन्ति। तद्यथा। जनिद्वारेणास्तिः। अस्तिद्वा-रेण विपरिणमतिः। किं कारणम्? न ह्यजातोऽस्तीत्युच्यते। नाप्यविद्यमानो विपरिणमत इति। तच्चैवं सति जायत इत्येष शब्दो जन्मैव केवलं ब्रवीत्यविवक्षितेतरभावविशेषम्। किं कारणम्? एकार्थवृत्तित्वाच्छब्दस्य। अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्ण-त्वात्। अनवधृतरूपं हि तस्या मवस्थायां तद्भवत्यनुमानगम्यं किमपि

जायत इति । तस्माज्जायत इत्येष शब्दो जायमानावस्थायां सत्त्वं विद्यमान मपि नाचष्टे ॥

आह;—यदि नाचष्टेऽर्थादापन्नं भवति प्रतिषेधतीति। उच्यते;—"न प्रतिषेधति"—इति । अस्तित्वस्य न प्रतिषेधं करोतीत्यर्थः । किं कारणम् ? उच्यते;—अस्तित्वात्मवानपि ह्यसौ जायेतैतस्मिन् प्रतिषिद्धेऽनात्मक एव स्यात् । क मालम्ब्य जायते ? तस्मान्न प्रतिषेधत्यस्तित्वम् । उपस्थितत्वाच्च । उपस्थित एव च प्रत्यासन्नस्यावधारणकाल इत्यतश्च न प्रतिषेधति ॥

एव मेव प्रपञ्च उत्तरेष्वपि भावविकारेषु । समासतस्तु यत्र यद्वक्तव्यं तत्र तद् ब्रूमः ॥

"अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्" । अस्तीति जातस्य सत्त्वस्यावधारणमात्रं ब्रवीति, न विपरिणाम माचष्टे, अपूर्णत्वात्; न प्रतिषेधत्युपस्थितत्वात् ॥

"विपरिणमतइत्यप्रच्यवमानस्य तत्त्वाद्विकारम्" । विपरिणमत इत्येष शब्दो प्रच्यवमानस्य तत्त्वाद्प्रभ्रश्यमानस्य तत्त्वात्तद्भावाद्विकारम् । योऽस्य भावोऽस्तित्वं पुरुषत्वं वा, तस्माद्विकारं विक्रियामात्रं ब्रवीति; न वृद्धेरर्थं माचष्टे, न प्रतिषेधति ॥

"वर्द्धत इति स्वाङ्गाभ्युच्चयम्, सांयौगिकानां वार्थानाम्"। वर्द्धत इत्येष शब्दः, स्वेषा मङ्गानां शिरोग्रीवाबाह्वदरादीनां, सांयौगिकानां वा हिरण्यधान्यादीनाम्, अभ्युच्चय माह, अभ्युच्चिततां ब्रवीति ॥

आह;—कथं प्रयोगः? उच्यते;—"वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वा" । वर्द्धते विजयेनेति सांयौगिकेषु उदाह-

रणम्। वर्द्धते शरीरेणेति स्वाङ्गाभ्युच्चये। अत्र वर्द्धत इति ब्रुवन्नपचीयति माचष्टे, न प्रतिषेधति॥

"अपचीयत इत्येतेनैव व्याख्यातः प्रतिलोमम्"। यथैव हि स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते, तथैवापचीयते। तत्रापि नाचष्टे, न प्रतिषेधति॥

"विनश्यतीत्यपरभावस्यादि माचष्टे, न पूर्वभाव माचष्टे, न प्रतिषेधति"। विनाशमेवापरभावस्तस्यादि माचष्टे। किमादि मेव? न इत्युच्यते। उपक्रमप्रभृत्यपवर्गपर्यन्त मित्युक्तं, यावद्विनष्ट इति। स च विनाशं ब्रुवन् अपूर्वभाव माचष्टेऽपचीयतेरर्थं विज्ञात मपि तस्मिन् विनाशे कथं युगपदपचीयतेरर्थोविनाशेऽस्तीति? उच्यते;—न ह्यनपचीयमाणो विनश्येत्॥ ३॥

अतोऽन्ये भावविकारा एतेषा मेव विकारा भवन्तीति ह स्माह ते यथावचन मभ्यूहितव्या न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तन्नामाख्यातयोरर्थविकरणम्*॥ ४॥

आह;—एतेभ्यो भावविकारेभ्यः किं मन्येऽपि व्यतिरिक्ताः सन्ति भावविकारा न वा? इत्युच्यते;—"अतोऽन्ये भावविकारा एतेषा

* क-ख-ग-पुस्तकेष्वेतेऽन्यच्च नाच खण्डसमाप्तिर्दृश्यते।

मेव विकारा भवन्तीति ह स्माह"। अतो भावविकारषड्भाद्येऽन्यत्वेन भावविकाराः लक्ष्यन्ते, ते पृथक् पृथगत्यन्तभिन्नाः सन्ति। किन्तर्हि? एतेषा मेव विकारा भवन्ति। तद्यथा— जनि-शब्दवाच्यो भावविकारो ऽनेकप्रभेदभिन्नोऽनेकपर्यायशब्दवचनो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येव मादुपेक्षितव्यम्। तथा अस्ति-शब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्यायवचनश्च; अस्ति, विद्यते, भवतीत्येव मादि। तथा विपरिणमति-शब्दवाच्यो विपरिणमते, जीर्यति, भावान्तर मापद्यते इत्येवमादि। तथा वर्द्धति-शब्दवाच्यो वर्द्धते, पुष्यति, उपचीयते, अर्थायत इत्येव मादि। तथा अपक्षीयति-शब्दवाच्यो ध्वस्यति, भ्रश्यतीत्येव मादि। तथा विनश्यति-शब्दवाच्यो विनश्यति, म्रियते, विलीयत इत्येव मादि। "इति ह स्माह"। एव माहाचार्योवार्ष्यायणिरित्यनुवर्त्तते॥

"ते यथावचन मभ्यूहितव्याः"। त एते जन्यादि-शब्दवाच्याः विकाराः, यथावचनं यो यस्मिन्वचने यथावचन मवस्थिताः सन्तः प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणं प्रति अभ्यूहितव्याः वितर्क्याः प्रयुज्यमाना इति वाक्यशेषः। सर्व एव धातवो भाववचनास्तेषा मिहाध्ययने प्राप्ते शास्त्रातिगौरवभया देतल्लक्षण मुत्सृष्टम्। इह शास्त्रे व्याख्या-शैलीयं द्रष्टव्या;—उद्देशो निर्देशः प्रतिनिर्देश इति। तत्रोद्देशः, सूत्रस्थानीयः। तद्यथा,—षड्भावविकारा इति। निर्देशो वृत्तिस्थानीयः। तद्यथा,—जायतेऽस्ति विपरिणमत इति। प्रतिनिर्देशो वार्त्तिकस्थानीयः। तद्यथा,—जायत इति पूर्वभावस्यादि माचष्टे इति। एवं सर्वत्र यथासम्भवं योज्यम्॥

सानुषङ्ग मुक्तं नामाख्यातयो र्लक्षणं, नान्यत्तु किञ्चिदवशिष्यते, तदवसरप्राप्त मपि सदधुना नोच्यते; पदचतुष्टयलक्षणप्रतिज्ञाव्याघात-भयात्। उक्का पदचतुष्टयलक्षणं चतुर्थेन पादेन तदुच्यामः* ॥

प्रतिज्ञाप्रसक्त मेवाधुनोपसर्गलक्षण मुच्यते ॥

आह;—वक्ष्यति भवानुपसर्गलक्षण मिद मेव तावदुच्यताम्;—किं मिमे उपसर्गनामाख्यातवत्पदचतुष्टान्निःकृष्य बद्धाः सतोऽर्था-नाहुः? न इत्युच्यते;—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः"। नेति प्रतिषेधे। निष्कृष्य नामाख्यातमध्यात् पद-वाक्यरूपेण विरचिताः सन्तः। के पुनस्ते? उपसर्गाः। आख्यात मुपगृह्यार्थविशेष मिमे तस्यैव सृजन्तीत्युपसर्गाः। "अर्थान्निराहुरिति शाकटायनः"। निश्चयेन सतोऽर्थानाहुः। साक्षान्न तेषा मर्थाभि-धानशक्तिरस्ति, पृथग्विरचिताना मित्यभिप्रायः। यथा वर्णानां पदा-दयगताना मर्थाभिधानशक्तिर्नास्ति, एव मेतेषा मपि नामाख्यातवि-योगेऽर्थाभिधानशक्तिर्नास्ति। क एव माह? शाकटायनः। शकट-स्यापत्यं नडादिपाठात् फक्†, शाकटायनः ॥

आह;—कथं तेषा मर्थवत्तेति? उच्यते;—"नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति"। तु-शब्दोऽवधारणार्थः। नामाख्यात-योरेव योऽर्थः कर्म, तत्रैव विशेषं कञ्चिदुपसंयुज्य द्योतयन्ति। स एष नामाख्यातयोरेवार्थविशेष उपसर्गसंयोगे सति व्यज्यते। यथा

---

* अत्रैव; "अथापीदमन्तरेण"—इत्यादिना।

† "नडादिभ्यः फक्" पा० ४, १, ९९।

प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति, न प्रदीपाश्रयः॥

आह;—कोऽन्यथा ब्रवीति येनैव मुच्यते 'शाकटायन एव माहेति'? मृणुः;—"उच्चावचाः पदार्था भवन्तीति गार्ग्यः"। उच्चाश्चावचाश्च उच्चावचाः, बहुप्रकारा इत्यर्थः। एषा सुपसर्गपदानामर्थाः पदार्था भवन्ति वियुक्तानामपि नामाख्याताभ्यामिति गार्ग्यः। आचार्यो मन्यत इति वाक्यशेषः। एकैकोऽप्येषां प्रादीनां नामाख्यातवियोगेऽपि अनेकार्थ इत्यभिप्रायः। तद्यथा;—प्रेत्यादिकमीदीर्णो भृशार्थे इत्यभिधाने शक्तिरस्त्येवेत्येव मायुपलक्षितव्यं लक्षणशास्त्रे। यत्पुनरेतदुक्तं वर्णवदिति, अनभ्युपगमादयुक्तं; न ह्यभ्युपगतमस्माभिरेतदनर्थका वर्णा इति। सामान्या हि वर्णेष्वभिधानशक्तिरस्त्येव। यथा मृदोऽवयवेषु सर्वमृण्मयभाण्डारम्भशक्तिः। सा तु पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते। यथा मृदोऽवयवानां घटे घटारम्भशक्तिरभिव्यज्यते, एवं तत्र यदुक्तं "वर्णवदनर्थका उपसर्गाः, नामाख्यातवियोगात्"-इत्येतदयुक्तम्। अपि च। वर्णैरनर्थके आरभ्यमाणं पदमप्यनर्थकमेव स्यात्? न ह्यशुक्लैस्तन्तुभिरारभ्यमाणः पटः शुक्लो भवति। ततश्च पदैरनर्थकैरारभ्यमाणं वाक्यमनर्थकमेव स्यात्? वाक्यैश्चानर्थकैरारब्धं शास्त्रमप्यनर्थकमेव स्यात्? ततश्चाभ्युदयनिःश्रेयसार्थो योऽयमभ्युद्यमस्त्यप्रत्ययेन विदुषामयमनर्थक एव स्यात्? अनिष्टञ्चैतत्। तस्मादर्थवन्तो वर्णा इत्युपपन्नम्। यत्पुनरेतदुक्तं 'प्रदीपवदनर्थका उपसर्गाः'—इति। तत्रोच्यते;—प्रदीपोऽपि स्वेनार्थेन प्रकाशाख्येनार्थवानेव सत्यपि

चार्थवत्त्वे प्रकाश्य मर्थं माधारभूतं प्रत्याययन् स्वं, प्रकाशनशक्ति मभिव्यनक्ति। एव मुपसर्गा अर्थवन्तोऽपि सन्तः स्वार्थाभिधानशक्ति मनेकप्रकारां विद्यमाना मपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याय्य अभिव्यञ्जयेयुः। तच्च यदुक्तं 'प्रदीपवदनर्थका उपसर्गाः' इति; एतदयुक्तम्। नामाख्यातयोरेवासावर्थ उपसर्गसंयोगे सति उपजायत इति, तच्च ब्रूमः; न हि लोके यो यत्र समर्थो भवति, स तत्रान्य मपेक्षते। नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोग मपेक्षेते। तस्मादुपपन्न मुपसर्गस्य क्रियाविशेषोऽर्थः। क्रियासामान्यमाच्च माख्यातस्येति॥

तच्च यदुक्तम् 'अनर्थकाः पृथगवस्थिता उपसर्गाः'-इति, तदयुक्तम्। कुतः? "तद्य एषु पदार्थः प्राङ् रिमे तम्"। तदेतदुपपन्नं भवति। य एषूपसर्गेषु स्वोऽनेकप्रकारोऽर्थ इति, प्राङ् रेव, त मिमे उपसर्गाः पदविशेषाः पृथगपि सन्तः॥

कः पुनरसाविति? उच्यते;—"नामाख्यातयोरर्थविकरणम्"। अर्थविक्रिया मित्यर्थः। तस्मादर्थवन्त एवेति॥ ४॥

आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्य मभीत्याभिमुख्यं प्रतीत्येतस्य प्रातिलोम्य मति सु इत्यभिपूजितार्थे निर्दुरित्येतयोः प्रतिलोम्यं न्यवेति विनिग्रहार्थीया उदित्येतयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य प्रातिलोम्य मन्विति सादृश्यापरभाव मपीति संसर्ग मुपेत्युपजनं परीति सर्वतोभाव मधीत्युपरि-

भाव मैश्वर्य वैव मुच्चावचानर्थान् प्राहुस्त उपेक्षितव्याः(३*) ॥ ५ ॥

प्रथमाध्यायस्य प्रथमः पादः† ॥ १,१.

उच्यतां तर्हि क एषां कस्मिन्नर्थविशेषे वर्त्तते? उच्यते;—अर्थ तावत्—"आ इत्यर्वागर्थे"। तद्यथा;—आ पर्वतादिति। अर्वागिति गम्यते। अनेकार्थत्वेऽपि सत्युपसर्गाणा मेकैकोऽर्थ उदाहरणत्वेनोच्यतेऽर्थवत्त्वप्रकाशनार्थम् ॥

"प्र-परेत्येतस्य प्रातिलोम्यम्"। प्र-परा-इत्येतावुपसर्गावेतस्यैवाङ्गेऽर्थस्य प्रातिलोम्य माहतुः। प्रगतः परागतः ॥

"अभीत्याभिमुख्यम्"। आह। अभिगतः ॥

"प्रतीति", "एतस्य" एव अभेः "प्रातिलोम्यम्" आह। प्रतिगत इति ॥

"अति-सु-इत्येतावभिपूजितार्थौ" वर्त्तेते। अतिधनः सुब्राह्मण इति ॥

"निर्दुरित्येतयोः प्रातिलोम्यम्"। निर्धनो दुर्ब्राह्मण इति ॥

"न्यवेति विनिग्रहार्थीयौ"। निगृह्णाति। अवगृह्णातीति ॥

"उदिति" अय मेक एव "एतयोः" द्वयोः "प्रातिलोम्यम्" आह। उद्गृह्णातीति ॥

"समित्येकीभावम्" अर्थं माह। सङ्गृह्णातीति ॥

---

* घ-ङ-च-पुस्तकेषु अत्रैव तृतीयखण्डःसमाप्तिः।

† क-ख-ग-पुस्तकेभ्योऽन्यत्र नैव दृश्यते पादवत्त्वम्।

"व्यपेत्येतस्य प्रातिलोम्यम्" आहतुः । विगृह्णातिर्विग्रहार्थीयः विगृह्णाति, अपगृह्णातीति ॥

"अन्विति सादृश्यापरभावम्" आह । अनुरूप मस्येद मिति सादृश्यम् । अनुगच्छतीत्यपरभावः ॥

"अपीति संसर्गम्" आह । सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् ॥

"उपेत्युपजनम्" । उपजायते ॥

"परीति सर्वतोभावम्" आह । परिधावतीति ॥

"अधीत्युपरिभावम्" आह । "ऐश्वर्यं वा" । अधितिष्ठति, अधिपतिरिति ॥

आह;—नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीत्युक्तम् । अत्र नाम्नः कर्मोपसंयोगद्योतका भवन्तीत्येवं न गृह्यते । "उपसर्गाः क्रियायोगे (पा० १,४,५९)"—इति प्रसिद्धो ह्युपसर्गाणां क्रियापदेन योगो न नाम्ना । उपसर्गा हि क्रियाङ्गत्वेनैव नामान्याक्रन्दन्तीति* ॥ ५ ॥

इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ निरुक्तव्याख्यायां षष्ठस्याध्यायस्यां प्रथमः पादः ॥ १ ॥

---

* एव मुक्तावत्येत्यादि-मूलस्य व्याख्या न दृश्यतेऽत्र ।

† निघण्टुनाम निरुक्तं पञ्चाध्यायात्मक मस्यैव पूर्वदल मिति मत्वाह षष्ठस्येति । पर मेतन्मूलग्रन्थविरुद्धम्, सर्वेष्वेव पुस्तकेषु प्रथमाध्यायस्येत्यादिदर्शनात्, निघण्टुनिरुक्तयोर्मूलभाष्यरूपत्वाभ्यां पार्थक्योपलब्धेः स्फुटत्वाच्च ।

॥ द्वितीयपादः ॥

अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्यप्युपमार्थेऽपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणास्तेषा मेते चत्वार उपमार्थे भवन्तीवेति भाषायाञ्चान्वध्यायञ्चाग्निरिवेन्द्र इवेति नेति प्रतिषेधार्थीयो भाषाया मुभय मन्वध्यायन्नेन्द्रन्देव ममंसतेति प्रतिषेधार्थीयः पुरस्तादुपाचार*स्तस्य यत्प्रतिषेधति दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपाचार†स्तस्य येनोपमिमीते‡ ॥ १ ॥

"अथ निपाताः"। उक्त मुपसर्गलक्षणं सामान्यम् (३७पृ०),—"नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति"—इति; विशेषलक्षण मपि (४१पृ०),—"आ इत्यवागर्थे"—इत्येव मादि। अल्पा इति कृत्वा च ते प्रत्येकं समाम्नाताः। अधुना सामान्यलक्षणानुषक्तं प्रतिज्ञाप्रसक्त मेव निपातलक्षणं वर्णयिष्यामः। तदधिकारोऽय मथशब्दः॥

"उच्चावचेष्वर्थेषु निपतन्ति"। उच्चावचेष्वनेकप्रकारेष्वर्थेषु निपतन्तीति निपाताः॥

आह;—कतमे पुनस्ते? उच्यते;—"अप्युपमार्थेऽपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणाः"। उपमैवार्थ उपमार्थः, तस्मिन्नुपमार्थे।

---

*, † "दुपचार"—इति ङ, ट्टिप्पणग्रन्थेषु च।

‡ घ-ङ-च-पुस्तकेष्वत्र खण्डसमाप्तिर्नास्ति।

उपमा नाम,—कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणः, तदन्यस्मिन्नप्रसिद्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा। कर्मोपसंग्रह एवार्थः कर्मोपसंग्रहार्थः, तस्मिन् कर्मोपसंग्रहार्थे। अर्थोपसंग्रहार्थे इत्यर्थः। कर्मशब्दो हि प्रायेणार्थपर्यायवचन एतस्मिञ्छास्त्रे। "गतिकर्माण उत्तरे धातवः (३,२,३)", गत्यर्था इति गम्यते। पद मेव पूरयितव्यं, येषा मर्थः, ते पदपूरणाः। तदेतत् त्रिधात्व मर्थभेदकृतं निपातानां समासेन॥

आह;—किं मविशेषेण सर्व एतस्मिन्नर्थे निपतन्ति? नेत्युच्यते। "तेषा मेते चत्वार उपमार्थे भवन्ति"। तेषां सर्वेषां मध्ये एत एव चत्वारः—इव, न, चित्, नू च प्रायोवृत्त्या उपमार्थे भवन्ति॥

अधुनैव मुक्ता भाषा-छन्दः-प्रविभागेनोदाहरण मेकैकं दर्शयति। समासविस्ताराभ्यां हि शास्त्राणि प्रतीयन्ते। तत्रायं तावत्;—"इवेति भाषायां च" उपमार्थीयः। "अन्वध्यायञ्च"। छन्दसि चेत्यर्थः। कश्चित् छन्दस्येव भवति, न भाषायाम्; कश्चिद्भाषाया मेव, न छन्दसि; कश्चिदुभयत्र; इत्येतो विभागेन प्रदर्श्यते॥

आह;—किं मुदाहरण मिवेत्यस्योपमार्थीयस्य? का चोपमाशब्दस्य व्युत्पत्तिरिति? उच्यते;—उपगम्यातयागुणैर्मीयत इत्युपमा। "अग्निरिवेन्द्र इवेति"—इत्येतदचोदाहरणम्*। तपसः पुत्रो मन्युर्नाम, तस्येय मार्षम्†॥

---

* ऋगद्वयमध्यस्थ मुदाहरणद्वय मित्यर्थः। तथाहि;—ऋ० सं० ८, ३, १९, १या; किञ्च ऋ०सं० ८ ८ ३१, १या।

† प्रथमोदाहरण मवर्म्यैव मन्त्रम्।

आह;—ननु सर्व्व एवाय मृग्यजुःसामाथर्वात्मको ब्रह्मराशि-रादित्यान्तरपुरुषस्य भगवतो हिरण्यगर्भप्राणस्यार्ष मैतरेयके रहस्य ब्राह्मणे "अतर्चिनो मध्यमाः"—इत्येव माद्यनुपरिक्रम्य पुनः पर्यावृत्य "एत मेव सन्तं अतर्चिन इत्याचक्षत एत मेव सन्तं गृत्समद इत्याचक्षते"—इत्येव मादिना क्रमेण मन्त्रदृक्शब्दान् प्राणे निगमयति। अथापीदृशः,—शौनकेन सन्दृष्टा, यस्या मार्षाणि विद्यन्ते। सा च स्मृतिः। 'श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी'—इति न्यायविदः। खल्वपि पठन्ति—"विरोधे त्वनपेक्षं स्यात् (जै० सू० १,३,३)"—इति। तस्मादविशेषाभिधान मनर्थक मेवेति? उच्यते;—न ह्येकस्मादात्मनः परिशयमाचशेषः सन् शौनकः कुर्यात्, पश्यतो ह्युभावपि। तेन चेच्चाभावपि मन्त्राभिव्यक्तौ व्याप्तौ। बुद्धि-देवतात्वेन हिरण्यगर्भः चेच्चाऽवस्थितः, सर्वभूतानां कर्मविपाकानु-रूपेण। य मर्थं शब्दं वा दर्शयति। तदितरो विशिष्टकर्मकारी चेच्चा बुद्धिस्थः पश्यति। तच्चैवं सति वसिष्ठादिर्मन्त्रदृक् चेच्चाः। तेनैवोपदर्शितं मन्त्रं पश्यतीत्युभय मुपपद्यते। एवं सत्युभावपि याथात्म्यतस्तावदनुसन्धेयौ मन्त्रप्रयोगकाले उभयोरर्थवत्त्वाय॥ यत्पुन-रेतदुक्तं भवति, श्रुतिस्मृत्योर्विरोधे श्रुतिरनपेक्ष्येति। न हि विरो-धोऽस्त्युभयोरपि सम्भीयमानयोः। अपि च श्रुतिपूर्वक मेवेदं स्मरणं, न स्वतन्त्रम्। ताण्डके हि रहस्यब्राह्मणं दर्शयति;—"यत् साम्ना स्तोष्यन् स्यात्, तत्सामोपधावेत्। यस्या मृचि ता मृचम्। यदार्षं त मृषिम्"—इति। तत्र यदुक्तं स्मृतिरिय मिति, तदयुक्तम्। तस्मादुक्तव्य मेव विशिष्यार्ष मिति॥

त्रिष्टुबेषा, मान्यवी, श्येनादिषु निष्केवल्ये शस्यते*। मन्युः पुनरिन्द्रएव,† माहाभाग्यात्कर्मपृथक्त्वाच्च। अथवा देवतान्तरम्, पृथगभिधानश्रुत्यभिधानसम्बन्धात्॥

आह;—ननु मान्यवो मन्त्रो माहेन्द्रग्रहयजिसन्निधौ निष्केवल्ये शस्यमानो महेन्द्र मभिहितसंस्कारेणासमर्थ एव वक्तुम्। अथ किमर्थं मयं निष्केवल्ये शस्यते इति? उच्यते;—अन्यदेव हि श्रुत्यभियज्ञ मपूर्वं मारादुपकाराङ्गभूतं माहेन्द्रग्रह-यजि-यज्ञस्यापूर्वस्य। अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदधता मिति न्यायविदो याज्ञिका पठन्ति। वक्ष्यति चाय मपि‡;—"इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज ऋग्भाजश्च भूयिष्ठाः (७,३,६)"—इति। स एष मन्युस्तुतिभाक् एव। यथा—"अभि त्वा शूर (ऋ० सं० ५,३,२१,२)"—इति इन्द्र एव तस्मिन्निष्केवल्ये, यथा "आपो हि ष्ठा (ऋ० सं० ७,६,५,१)"—इत्याप आग्निमारुते, सूर्यादय आश्विने, एवम्॥

हे 'मन्यो'! 'सहुरे' सहनशील! एतस्मिन् शत्रूणा मभिभवनकाले प्रत्युपस्थिते 'हुतः' आहूतः सन् अस्माभिः, 'सेनानीः' सेनाप्रणेता 'नः' अस्माकम् 'एधि' भव। ततश्च 'अग्निरिव' 'लिषितः' दीप्तस्त्वं तेजसा

---

* "अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि।
हत्वाय शत्रून् भजस्व वेद ओजो मित्रानो वि मृधो नुदस्व॥"
(ऋ० सं० ८, ६, १९, ६.)

† "मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः।"
(ऋ० सं० ८, ६, १८, ६.)

‡ निरुक्तकारो यास्कएव।

'सहस्व' अभिभव तानस्मच्छत्रून्। 'हत्वाय' हत्वैव यदेतेषा मस्माच्छत्रूणां 'वेदः' धनं तत् त्व मादाय तेषा मस्माद्योधानाम् 'ओजः' बलं 'मिमानः' निर्माय यथावस्तु यथार्हं 'वि भजस्व'। येऽपि च के चिद्भुतावशिष्टाः 'मृधः' मृधकारिणः अस्मद्विषः अस्मत्तः प्रत्याजिहीर्षन्त्येतद्धनम्, तेषा मोजो मिमानः तूलयित्वा कियदवशिष्टबला ह्येते न शक्ताः प्रत्याहर्त्तुं मित्येवं मिमानस्तावन्मात्रशेषबलान् कृत्वा त्वं 'वि नुदस्व' एनान् दूरं प्रक्षिप अपुनरागमनाय॥

द्वितीय मुदाहरण मेतस्यैव;—"दृंहैवैधि ०——० धारय"*। अनया चानुष्टभा ध्रुव आङ्गिरसो राजान मभिषिषेच। 'दृंहैव' राष्ट्रे त्वम् 'एधि' भव। 'मा' चातस्त्वम् 'अप च्योष्ठाः'। 'पर्वत इव' 'अविचाचलिः' अविचलनशीलः। 'इन्द्र इव' च 'दृंह' 'ध्रुवः' शाश्वतः 'तिष्ठ'। स्थित्वा च इदं 'राष्ट्रम्' 'दृंह' 'उ' एव विभूतियोगेन स्थितं 'धारय'—इत्याशीः॥

भाषायां प्रसिद्ध मेवेति कृत्वा नोदाहरणं पठितम्। अथ वा एते एव। 'अग्निरिव तीक्ष्णः', 'इन्द्र इव विक्रान्तः'॥

"नेति प्रतिषेधार्थीयो भाषायाम्"। प्रसिद्धः। "उभय मन्वध्यायम्"। "नेन्द्रं देव ममंसतेति (ऋ० सं० ८, ३, २९, १)"। नेन्द्रं देव मात्मनो दीपयितार ममन्यन्तादित्यरश्मयः॥

आह;—किं पुनर्लक्षण मिति? उच्यते;—"प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषेधति"।

---

* दृंहैवैधि मापं च्योष्ठाः पर्वत इवाविचाचलिः।
इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्र मु धारय॥" (ऋ० सं० ८, ८, २१, १)

"दुर्मदासो न सुराया मित्युपमार्थीय उपरिष्टा दुपचार स्तस्य येनोपमिमीते"—इति। येनार्थेनोपमेय मर्थ मुपमिमीते। तद्यथा;—"दुर्मदासो न सुराया मिति"। "हृत्सु पीतासो ०——० जरन्ते" *। काण्वो मेधातिथि राङ्गिरसस्य प्रियमेध ऐन्द्रं सूक्तं ददृशाते। तत्रैषा गायत्री। येषा मपि विनियोगः क्वचि दन्यत्र नास्ति, तेऽपि वाचःस्तोमे विनियुज्यन्ते। 'हृत्सु' 'पीतासः' पीताः सन्तो हृदयेष्ववस्थिताः सोमाः 'युध्यन्ते' सम्प्रहार मिव कुर्वन्ति। अहं विशिष्ट इत्येवं स्पर्द्धमानाः। क इव? 'दुर्मदासो न' दुर्मदासः "आज्जसे रसुक् (पा० ७,१,५०)" यथा कुत्सितमदाः केचित् पुरुषाः सुरायां पीतायां सत्यां युध्येरन्; एवम्। किञ्च, त मेव यजमानं 'जरन्ते' स्तुवन्तीव आत्मलाभपरितुष्टाः। कथं जरन्ते? 'ऊधर्न' ऊधरिव रात्रि मिव 'नग्नाः' भूत्वा स्त्रियं सम्प्रयोज्यामह इत्येव मभिप्राया इव†। के चिद्विशिष्टाः पुरुषा॥ १॥

चिदित्येषोऽनेककर्माऽऽचार्यश्चिदिदम्ब्रूयादिति पूजाया माचार्य‡ आचारङ्गाहयत्याचिनोत्यर्थानाचिनोति बुद्धि मिति वा दधिचिदित्युपमार्थे कुल्माषांश्चिदाहरेत्यवकुत्सिते कुल्माषाः कुलेषु सीदन्ति नु इत्येषो-

---

* हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम्।
ऊधर्न नग्ना जरन्ते॥" (ऋ०सं० ५, ७ १९, १.)

† "नग्नाः' स्तोतारः। ते च 'ऊधर्न' पयसा पूर्णं गवादे रूध इव सोमपूर्णं स्वां 'जरन्ते' स्तुवन्ति।" इति सायणः॥

‡ "पूजाया माचार्यः कस्मादाचार्य"—इति घ, ङ, च।

ऽनेककर्मेदन्नु करिष्यतीति हेत्वपदेशे कथन्नु करिष्यतीत्यनुपृष्टे नन्वेतदकार्षीदिति* चाथाप्युपमार्थे भवति† ॥ २ ॥

चिदित्येषोऽनेकार्थोऽपि सन्नुपमार्थीयमंयोगादत्रोदाहृतः ॥

कथ मय मनेकार्थइति? उच्यते;—"आचार्यश्चिदिदं ब्रूयादिति पूजायाम्"। आचार्य एवं ब्रूयात्, कोऽन्य एवं वक्ष्यतीति। "दधिचिदित्युपमार्थे" दधिरूप ओदन इति। "कुल्माषांश्चिदाहरेत्यवकुत्सिते"। भृशं कुत्सिते। कुल्माषानपि तावदाहरेति किं वान्यदाहरिष्यसि। "नु इत्येषोऽनेककर्मा"। कथं? "इदन्नुकरिष्यतीति"। कथं हि क्रियाया हेतुर्निमित्त मित्यर्थः। कथं नु करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत्पुनरनुपृच्छति कथं नु करिष्यति? तदनुज्ञान मेतस्मिन्ननुपृष्टे। "नन्वेतदकार्षीदिति च"। अनुपृष्ट एवायं भवतीति ॥

नन्वय मकार्षीदेतत्, कथ मयं ब्रवीति कथं करिष्यतीति? "अथाप्युपपमार्थे भवति" तद्यथा—॥ २ ॥

वृक्षस्य नु ते पुरुहूत वयाः वृक्षस्येव ते पुरुहूत शाखा वयाः शाखा वेतेर्वातायना भवन्ति शाखाः

---

* "कार्षीदिति"—इति च०, अन्यच्च शोधिततया दृश्यते,—इष्टौ चैव मेव। परं क-ख ग-घ-ङ-पुस्तकेषु पञ्चस्वेव "कार्षीरिति" एव मेव पूर्वलिखितः पाठोऽनु भूयते।

† नेदापि खण्डसमाप्तिः घ-ङ-च०पुस्तकेषु।

खशयाः शक्नोतेर्वाऽथ यस्यागमादर्थपृथक्त्वं मह* विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स†कर्मोपसङ्ग्रहश्चेति समुच्चयार्थं उभाभ्यां सं प्रयुज्यतेऽहं च त्वं च वृत्रहन्नित्येतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकारो वेति विचारणार्थे हन्ताहं पृथिवी मिमां निदधानीह वेहवेत्यथापि समुच्चयार्थे भवति (४‡) वायुर्वा त्वा मनुर्वा त्वेति ॥ ३ ॥

"अत्रो न ०—०पूर्वीः"§। भरद्वाजो वार्हस्पत्योऽस्यास्त्रिष्टुभः, पूर्वेणार्द्धर्चेन इन्द्रं स्तुत्वोत्तरेणोपालब्धवान्। हे 'शूर' इन्द्र! 'पुरुहूत!' महानत्र इव चक्रयोः 'प्र रिरिचे' प्रकर्षेणातिरिच्यते। तव 'महा' महत्त्वेन विभूतिः। कुतोऽतिरिच्यते? 'रोदस्योः' द्यावापृथिव्योः। तथापि चैवं विभूतियुक्तस्य सतस्तव लङ्गकाना मेवास्माकं सतां वृत्रस्येव 'वयाः' शाखाः 'पूर्व्वीरुतयः' पूर्वास्माद्यज्ञागमनमार्गाः 'वि ररुजः' खिलीभूतास्तावाचागमनात्। अहो कष्टं मन्दभागधेयतास्माकम्! येषां नो धनं, न तदस्ति येन त्वां यजेमहि। कि

---

* "मितिच" घ, ङ।

† "पृथक्त्वाच्च" क, ख, ग। परं वृत्तिविरुद्धः।

‡ घ-ङ-च-पुस्तकेष्वत्र प्रथमाध्यायस्य चतुर्थः खण्डः समाप्तः।

§ "अत्रो न चक्रयोः शूर वृहन् प्र ते महा रिरिचे रोदस्योः।
वृत्रस्य नु ते पुरुहूत वया शूर रुतयो ररुरिन्द्र पूर्वीः॥"
(ऋ० सं० ४, ९, १७, २।

मत्र त्वां वक्ष्याम इति ॥ * "वयाः शाखाः"—इति पर्यायवचनः। "वेतेः" वया इति निगमप्रसक्तस्य निर्वचनम्। "शाखाः ख-शयाः" इति पर्यायप्रशक्तस्य। व्याख्याता उपमार्थीयाः ॥

अथानन्तरं प्रतिज्ञाप्रसक्तानेव कर्मोपसङ्ग्रहार्थान् वक्ष्यामः ॥

"अथ यस्यागमादर्थपृथक्त्वं मह विज्ञायते, न त्वौद्देशिकमिव विग्रहेण, पृथक्त्वात्स कर्मोपसङ्ग्रहः"। यस्यागमादध्याहारादश्रूयमाणस्यैव निपातस्य सरूपविरूपैकशेषादर्थतो वा 'पृथक्त्वं मह' पृथग्भाव एव 'विज्ञायते'। तद्यथा,—देवदत्तयज्ञदत्तौ, देवदत्तश्च यज्ञदत्तश्चेति ॥

आह;— द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते; न तु तयोरौद्देशिकमिव पृथक्त्वमिति। यथा गाः, अश्वान्, पुरुषान्, पशूनिति प्रत्येकमुद्दिश्यमानानाम्। इह तु विग्रहेण च शब्दागमादेतत् पृथक्त्वमुपजायते। नानाग्रहणं द्वयोर्बहूनां वार्थानां विग्रहः स एष पृथक्त्वाद्धेतोः पृथक्त्वेन निमित्तेनोपलक्ष्यमाणः, यस्माद् द्वावर्थौ बहून् वा गृह्णात्येकस्मिन् कर्मणि उपसमावेष्टयति। तद्यथा;—'देवदत्तयज्ञदत्तौ पचेते'—इत्येवम्। तस्मात् 'कर्मोपसङ्ग्रहः'—इत्येतन्नामैव तद्भवति। अथ वा बृहस्पतिश्चेत्युक्ते प्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिश्चेति ॥

कतमः पुनरसाविति ? उच्यते;—"चेति" कदाचिदय मेव

---

* "हे 'पुरुहूत' बहुभिराहूतेन्द्र 'पूर्वीः' बह्व्यः 'कृतयः' रचाः 'वि रोचते' विशेषेण रोचन्ति। मत्र इदाग्नः-'इदस्य नु'। यथा इदस्य वयाः शाखाः विरोचन्ति तद्वत्"—इति सायणव्याख्यांशः।

'समुच्चयार्थः' 'उभाभ्याम्' अपर्थाभ्यां विगृहीताभ्या मेव संयुक्तः 'प्रयुज्यते' । तथा च,—"अहं च त्वं च वृत्रहन्निति" । "अहं च ०——० रातयः"* । घोरपुत्रः प्रगाथोऽनया ऐन्द्र्या पङ्क्त्या इन्द्रस्य सख्यार्थी सन्नब्रवीत् । हे 'वृत्रहन्' इन्द्र ! 'अहं च' प्रगाथ 'त्वं च' 'संयुज्याव' । एकस्मिन्नर्थे सति प्राप्तिलक्षणे युज्यावहै 'आ सनिभ्यः' आप्राप्तेः । 'अरातीवा'-इत्येकं पदम् अयैव मावां संयुक्तौ दृष्ट्वा हे 'अद्रिवः' । 'अरातीवा चित्' अदानशीलोऽपि दानशीलता मुपेत्यानुमंस्यत एवावयोर्दानम् । 'भद्रा' भन्दनीया 'इन्द्रस्य' 'रातयः' दानानीत्येवं मन्यमानः । को हि नाम त्वत्संयुक्ताना मस्माकं न दद्यादित्यभिप्रायः ॥

अथाप्याकारः "एतस्मिन्नेवार्थे" समुच्चयार्थे । "देवेभ्यश्च पितृभ्य आ"—इति । अय मस्मिन्मन्त्रे आकारः । "यो अग्निः ०——० पितृभ्य आ"† । अनुष्टुप्, आप्री, पितृयज्ञे विनियुक्ता । 'योऽग्निः' कव्यस्य वोढा, यस्याय मधिकारः, कव्यानि वोढव्यानीति; स इहास्माकं पितृयज्ञे होतृत्वेन स्थितः, 'पितॄन्' 'यक्षत्' पूजयत्वित्यर्थः । किम्लक्षणान्? 'ऋतावृधः' सत्यवृधो वा यज्ञवृधो वा । किञ्च । 'प्रेदु हव्यानि' वोचति, वोचतु च । प्रब्रवीत्वेतानि हवींष्यस्मत्प्रदत्तानि । कस्मै ? 'देवेभ्यश्च पितृभ्यश्च'-इति ॥

---

* "अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ । अरातीवा चिदद्रिवोऽनु नो मूर मंसते भद्रा इन्द्रस्य रातयः ॥" (ऋ० सं० १, ४, ४१, ५) ।

† यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥" (ऋ० सं० ७, १, २२, १)

"वेति" अयं "विचारणार्थे"। समुच्चयार्थीयप्रसङ्गेनोदाहृियते। "हन्ताहं ०——० मिति"*। ऐन्द्रो ह्यवस्तस्येय मार्षं, गायत्री। 'हन्त' इदानीमेव 'अहम्' 'इमां पृथिवीम्' 'दृह वा' अन्तरिक्षलोके, 'दृह वा' द्युलोके। अथवा 'दृह' दक्षिणे स्कन्धे, 'दृह वा' सव्ये 'निदधानि' अवस्थापयामि। अतः स्थानादुद्धृत्य। अथ किमर्थं ब्रूते? 'कुवित्सोमस्य' बह्वहं सोमम् 'अपाम्' पीतवानिति। अस्य मे सोमपानस्यानुरूप मेव वीर्यं मस्तीत्यभिप्रायः॥

"अथापि," "वेति" अयं "समुच्चयार्थे भवति"। "वायुर्वा त्वा मनुर्वात्वेति"। "वायुर्वा त्वा मनुर्वा त्वा † गन्धर्वाः सप्तविंशतिः। ते अग्ने अश्वं मयुञ्जंस्ते अस्मिञ्जव मादधुः (य० स० ९,७)"। अनुष्टुबेषा। वाजपेयेऽश्वयोजने विनियुक्ता। हे अश्व! वायुश्च त्वा मनुश्च त्वा; गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वा मस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। एवं च पूर्वं मप्यश्वं युक्तवन्तो देवानामृषीणां च। त एव च तस्मिन् जव मादधुः आहितवन्तो यस्मादेतो ब्रवीमि ममापि चाग्ने! त मश्वं त एव युञ्जन्तु; जवं चास्मिन्नादधत्विति॥ २॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते अय महेदं करोत्वय मिद मिदं ह ‡ करिष्यतीदं

* "हन्ताहं पृथिवी मिमां निदधानीह वेह वा।
कुवित्सोमस्यापामिति॥" (ऋ० सं० ८, ९, १७, २)

† "वातोवा मनोवा"—इति माध्यन्दिनीपाठः।

‡ "करोत्वय मिदं ह"—इत्व च। "हि" ख।

न* करिष्यतीत्यथाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषेमे वदन्ति सत्यमु ते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यस्यायां किलेति विद्याप्रकर्ष एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यते ऽनु पृष्टे न किलैवं ननु किलैव मेति प्रतिषेधे मा कार्षीर्मा हार्षीरिति च खल्विति च खलु कृत्वा खलु कृत मथापि पदपूरण एवं खलु तद्वभूवेति श्रश्वदिति विचिकित्सार्थीयो भाषायां श्रश्वदेव मित्यनुपृष्ट एवं श्रश्वदित्यस्वयं पृष्टे नून मिति विचिकित्सार्थीयो भाषाया मुभय मन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः सम्प्रदित्सां चकार स इन्द्रेत्यपरिदेवयाञ्चक्रे (५†) ॥ ४ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥ १, २.

"अह इति च, ह इति च" द्वावप्येतौ "विनिग्रहार्थीयौ"। तयोः पुनरेतयो रेतत् प्रयोगस्वाभाव्यम्। द्वयोरर्थयोरेककाले प्रकृतयोः "पूर्वेण" पूर्ववाक्यगतेनार्थेन संयुक्तौ "प्रयुज्येते"। तद्यथा;—"अय महेदं करोत्वय मिदम्"। अय मह यज्ञदत्तो गाः पाययतु, अयं देवदत्तो भुङ्क्तां मिति॥

---

* "नु" क, ख, ग, घ। परं वृत्ति-विरुद्धः।

† घ-ङ-च-पुस्तकेष्वत्र प्रथमाध्यायस्य पञ्चमः खण्डः समाप्तः।

हकारस्योदाहरणम् "इदं ह करिष्यतीति"। यज्ञदत्त इदं ह करिष्यति। "इदं न करिष्यतीति"। ओदनं न पक्ष्यतीति॥

"अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण"। विनिग्रहार्थं भवति। स पुन रुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्ते प्रयुज्यते। तद्यथा;— "ह्यषेमे" ऋषय "वदन्ति"। "सत्य मु ते" ब्राह्मणाः "वदन्तीति"। विनिग्रहो नाम, विभागेनावस्थितयोर्यज्ञदत्तदेवदत्तयो रेकस्मिन् यज्ञदत्तेऽभिमतस्यगोपायनस्य नियमेन ग्रहणं यत् स विनिग्रहः। तदर्थो विनिग्रहार्थः, विनिग्रहार्थ एव विनिग्रहार्थीयः॥

"अथापि" उकारः "पदपूरणः" भवति। "इद मु त्यत् ०——० जनाय"*। वामदेवो गौतमोऽनया त्रिष्टुभोषसं तुष्टाव। प्रातरनुवाकाश्विनयोः शस्यते। 'इदं' तत् 'ज्योतिः' यत् जनाः कथयन्ति। उकारः पदपूरणः। एतत् 'पुरुतमं' बहुतमम्। कुतः? पुरुतमम्। 'तमसः' यदभिभूय ग्रावरं तमः स्व मात्मान मभिव्यनक्ति। अत एव तद्बहुतमम्। 'पुरस्तात्' प्राच्यां दिशि ज्योतिः 'वयुनवत्' प्रज्ञानवदुत्तिष्ठति। 'नूनं' निश्चयेन एताः 'उषसः' दिवो दुहितरः रूपसामान्यात् दुहितृत्वात्। 'विभातीः' विभासमानाः 'गातुं' गमन मपि कृतार्थं जनानां 'कृणवत्' कुर्वन्त्य आगच्छन्ति। यथेय मुषरुज्यते प्राची दिक्, विध्वंस्यते च तमः। एकस्या एव पूजनार्थं बहुवचनम्॥

---

* "इद मु त्यत् पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्।
नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय॥"
(ऋ० सं० २, ८, २, १)

"तदु प्रयक्षतम ०——० चतस्रः"*। द्वितीय मुदाहरण मस्यैव। गौतमो नोधाश्चानया चिष्टुभेन्द्र मस्तौत्। प्रवर्ग्ये विनियुक्ता। 'तत्' प्रकर्षेण 'यक्षतमं' पूज्यतमम्। उ इति पदपूरण एव। 'अस्य' इन्द्रस्य 'दस्मस्य' दासयितुर्दर्शनीयस्य वा 'चारुतमं' शोभनतम मन्यदपि तस्य 'अस्ति' 'दंसः' कर्म्म किमपि बहुप्रकारम्। तत् चार्वेव पूज्य मेव। इद मेव तस्य चारुतमं च पूज्यतमं च। तत् किम्? 'उपक्करे यत् उपराः अपिन्वत्'। उपक्कान महन्ति यस्मिन् देशे ऽवस्थिताः सहायाः, स उपक्करो देशः; जनैरनाकीर्णो यस्मिन्नेकाकी 'यत्' 'उपराः' मेघपूरिताः 'मध्वर्णसः' मधूदकाः 'चतस्रः' 'नद्यः' नदीः 'अपिन्वत्' अपातयत् अचारयत्। वर्षद्वारेण यज्ञादि प्रावर्त्तयत्;—इत्यतः। एतदेवास्य चारुतमत्वम् पूज्यतमत्वञ्चेत्यभिप्रायः॥

"हीत्येषोऽनेककर्मा"। तद्यथा;—"इदं हि करिष्यतीति हेत्वपदेशे। कथं हि करिष्यतीत्यनुपृष्टे। कथं हि व्याकरिष्यतीत्यसूयायाम्"। कथ मयं व्याकरिष्यतीत्यक्षतप्रयत्नोऽय मित्यभिप्रायः। अमर्षादसाक्षाच्छब्दपूर्वकोऽभिप्रायः परिवादोऽसूयेत्युच्यते। परगुणानभिज्ञेत्यर्थः॥

"किलेति विद्याप्रकर्षे" विज्ञानातिशय इत्यर्थः॥ अन्यत उपश्रुत्यातिशय इत्यर्थः। अन्यत उपश्रुत्यातिशयेनावधार्यान्यस्मा आचष्टे कश्चित्—"एवं किल" एतदाबोधयुद्ध मिति॥

---

* "तदु प्रयक्षतम मस्य कर्म दस्मस्य चारुतम मस्ति दंसः।
उपक्करे यदुपरा अपिन्वन् मध्वर्णसो नद्य१श्चतस्रः॥"
(ऋ० सं० १, ५, १, १)

"अथापि न ननु इत्येताभ्यां" संयुक्तः किलेत्ययं प्रयुज्यते। "अनु पृष्टे" अर्थे। अन्यत उपश्रुत्य कञ्चिदर्थं नाय मेव मिति; ततस्त मेवार्थ मन्य मनुपृच्छति। अथेतर मश्रद्दधत्पूर्वस्य। "न किलैवम्"—इति। "ननु किलैवम्"—इति॥

"मेति" अयं "प्रतिषेधे"। तद्यथा;—"मा कार्षीर्मा हार्षीरिति च"। अयं च प्रतिषेधार्थीय एव।

"खल्विति च"। तद्यथा;—"खलु कृत्वा"। अकृत्वेत्यर्थः। देशभाषाव्यवस्थयैवज्ञातीयाना मुपेक्षितव्यः क्वचित्प्रयोगः॥

"अथापि" खल्वित्ययं "पदपूरणो" भवति। तद्यथा;—एवं खलु तद्भवेति। अन्वीक्ष्यः प्रयोगः क्वचित्पादवृत्तेषु॥

"श्वदिति विचिकित्सार्थीयो भाषायाम्"। छन्दसि पुनरन्येष्वर्थेषु भवति। यथासम्भवं द्रष्टव्यः। दृश्यं चास्य शैली अर्थ मपेक्ष्य। एवं शब्दस्य पुरस्तात् प्रयोगो वा भवति, उपरिष्टाद्वा। तद्यथा;—"श्वदेव मित्यनुपृष्ट एवं श्वदित्यस्यं पृष्टे" अर्थे इति वाक्यशेषः॥

"नून मिति विचिकित्सार्थीयो भाषायाम्"। विचिकित्सा नाम विवेकपूर्वको अवधारणाभिप्रायः। तच्चायं भाषायां भवति। "उभयम् अन्वध्यायम्"। पुन रय मर्थद्वये भवति—"विचिकित्सार्थीयश्च पदपूरणश्च"॥

उदाहरण मत्र निर्विवक्षुर्निदान मेवाह;—"अगस्त्य इन्द्राय"—इत्यादि। निदानवतां मन्त्राणां निदान मेव पूर्वं वक्तव्यम्, तेन ह्यतितरा मर्थ मुच्यमानः प्रकाशते। ततः पदानि। ततोऽर्थः। ततः प्रत्येकं विग्रहेण

निर्वचनम्। एष हि व्याख्याक्रमः। अगः कुम्भः, तत्र स्थानः संहत इत्यगस्त्यः। सः "इन्द्राय हविर्निरूप्य मरुद्भ्यः सम्प्रदित्सां चकार"। सम्प्रदातु मैच्छदित्यर्थः। "स इन्द्र एत्य परिदेवयाञ्चक्रे"। परिदेवना नाम मन्युपूर्वको विलापः॥ ४॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य द्वितीयः पादः* ॥ ६, २॥

॥ तृतीयः पादः॥

न नून मस्ति नो श्वः कस्तद्वेद यदद्भुतम्। अन्यस्य चित्त मभि संच्चरेण्य मुताधीतं वि नश्यति॥ न नून मस्त्यद्यतनं नो एव श्वस्तन मद्यास्मिन् द्यवि द्युरित्यहो नामधेयं द्योतत इति सतः श्व उपाशंसनीयः कालो ह्यो हीनः कालः कस्तद्वेद यदद्भुतम् कस्तद्वेद यदभूत मिद मपीतरदद्भुत मभूत मिवान्यस्य† चित्त मभिसच्चरेण्य मभिसच्चार्य्यन्यो‡ नानेयश्चित्तं चेततेरुताधीतं वि नश्यतीत्याध्यात§ मभिप्रेत मथापि पदपूरणः(ई॥)॥ १॥

---

* इत्यिग्रन्थे तु 'न नून मस्ति'—इत्याद्यग्रिमखण्डान्तो द्वितीयः पादो दृश्यते, परं सर्वमूलग्रन्थविरोधादिहोपेक्षितः सः। तथाचानुपदवक्ष्यमाणोऽयं 'न नून मस्ति'—इत्यादि-खण्डस्तृतीयपादस्याद्य इत्येव ज्ञेयम्।

† "मिति वान्यस्य" क-ख-ग-ङ-घ-पुस्तकेऽपि शोधिततया दृश्यते, पर मयं पाठो वृत्तिविरुद्धः।

‡ "मभिसच्चार्यमन्यो" घ, ङ।

§ "वि नश्यत्यधीतं वि नश्यत्याध्यात" घ, ङ, च।

॥ घ-ङ-च-पुस्तकेष्विह षष्ठः खण्डः समाप्तः।

"न नून मस्ति (ऋ० म० २,४,१०,१)"—इति। विचार्य मेतन्ममैतत्तावत्;—अद्यतनं हविर्मम नास्तीति। नकारं दृष्ट्वाद्यतन-शब्दोऽध्याहृतः आचार्येण। प्रतिषेधे हि सति प्रतिषेध्येनाप्यवश्यं भवितव्य मिति। एते च मन्त्रैकदेशा एव सन्तोऽध्याहाराः, पदा-तिरेकाद्ध्ययनकालेनाधीयन्ते। ते त्वर्थनिर्वचनकाले प्रकाशयि-तव्याः। अथापि स्यात् श्वस्तनं भविष्यतीति। 'नो श्वः' इदं तावद-स्मदर्थ मेव निरुप्तं सदस्मन्नो व्याप नून मथ श्वस्तने का प्रत्याशा। किङ्कारणं? 'कस्तद्वेद यदद्भुतम्'। को हि नाम तद्वेद जानाति यदद्भुत मनुत्पन्नं कस्य भविष्यतीति मम वा अन्यस्य वा इति। कस्मात्पुनर्न विज्ञायत इति? अतः; यस्मात् 'अन्यस्य चित्त मभि सञ्चरेण्यम्' सञ्चरणशील मनवस्थित मित्यभिप्रायः। 'उत', अपि, अथेति छन्दसि समानार्थाः। एतदद्यतनं हविः 'आधीतम्' आध्यात मभिप्रेतं सत् मया ममेद मित्येवं तथापि 'वि नश्यति' एवान्यस्मै प्रदीयते। तच्चैवं सति श्वस्तन मस्माकं भविष्यतीति कुत एतदिति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"अस्मिन् द्यवि;—द्युरित्यङ्को नामधेयम्; द्योतत इति सतः"। द्योततेर्द्युरिति। द्योतत इति कर्तृकारकम्। सदिति यच्च ब्रूयात्, तच्चोच्चारित एव कारकनियमो द्रष्टव्यः; अन्यत्र यथेष्टं योज्यम्। "श्व उपाङ्गमनीयः" उपगम्यः, सचेतसा आशास्तव्यो भवति, अनागतत्वात्। "ह्यो हीनः कालः" अतिक्रान्तो हि स भवति॥ श्वः-सम्बन्धात् ह्यः-शब्दोऽविमानोऽपि निरुक्तः,—"अद्भुतम् अभूतम्"। "इद मपीतरदद्भुतम्"—शोणितवर्षादि; "अभूत मिव" कादाचि-

त्कत्वात्। शब्दसारूप्यप्रसङ्गेनेदं निरुक्तम्। "अन्यो नानेयः" नानात्वेन व्यवस्थितस्यापत्य मसत्कुलजस्येत्यर्थः। अथवा न सता मानेयः। "चित्तञ्चितेः" चेतत्यनेनार्थानिति चित्तम्। "उताधीतं वि नश्यतीत्याध्यात मभिप्रेतम्"—इतिपर्यायवचनम्॥

"अथापि" अय मस्मिन्मन्त्रे "पदपूरणः" भवति— ॥ १ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद्दधेम विदथे सुवीराः॥ सा ते प्रति दुग्धां वरं जरित्रे वरो वरयितव्यो भवति जरिता गरिता दक्षिणा मघोनी मघवती मघ मिति धननामधेयं मंहतेर्दानकर्मणो दक्षिणा दक्षतेः समर्द्धयतिकर्मणो व्यृद्धं समर्द्धयतीत्यपि वा प्रदक्षिणागमनादिश मभिप्रेत्य दिग्घस्तप्रकृतिर्दक्षिणो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्हनने देहि स्तोतृभ्यः कामान् मास्मानतिदंहीर्मास्मानतिहाय दा भगो नो अस्तु* बृहद्दधेम स्वे वेदने भगो भजतेर्बृहदिति महतो नामधेयं परिवृढं† भवति वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यभिचान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा

* "नोऽस्तु" घ, ङ, च।

† "परिवृढं"—इति च पुस्तकपाठो दक्षिणपुस्तकेषु च; परं वस्तुलिखितसर्वमूलपुस्तकविरुद्धः। वस्तुतश्छन्दसि ढकारं खलु व्यत्यय मेवापद्यते, विद्यते च छन्दोवत्त्व मङ्गानाम्।

सी मिति परिग्रहार्थीयो वा पदपूरणो वा प्र सीमादित्यो असृजत् प्रासृजदिति वा प्रासृजत्सवित इति वा वि सीमतः सुरुचो वेन आवरिति च व्यङ्गणात् सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा सीमेत्येतदनर्थक मुपबन्ध मादद्दीत पञ्चमीकर्माणं सीम्नः सीमतः सीमातो मर्यादातः सीमा मर्यादा विसीव्यति* देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदात्त मर्द्धनामेत्येके(७†] ॥ २ ॥

"ननं सा ते (ऋ० सं० २,६,६,६)"—इति। गृत्समदस्येय मार्षम्। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीये शस्यते। 'नूनम्' इति पदपूरण एव। 'सा' 'दक्षिणा' 'ते' तव या पुत्रभावके कर्मणि। सा किं करोतु? 'प्रति' दुग्धाम्। किम्? 'वरम्'। कर्मणो दक्षिणा-गुणकात् फलप्राप्तिस्तथापि तु दक्षिणाया मुपचर्यते। कस्मै? 'जरित्रे' स्तुवते यजमानाय। किंलक्षणा? 'मघोनी' मघवती हिरण्यधान्यादिधनेन संयुक्ता, तद्वतीत्यर्थः। किञ्च; 'शिक्षा'‡ देहि। कस्मै? 'स्तोतृभ्यः' ऋत्विग्भ्योऽनुकामान्। किञ्च; 'मारति धक्' मास्मानतिहायातीत्यान्येभ्यो देहीति मादा इत्यर्थः। अस्मभ्यं तावद्देहि, ततोऽन्येभ्योऽपि दास्यसि चेत्यभिप्रायः। किञ्च; 'भगो नः' धनं नोऽस्तु। येन किं कुर्याम? 'वृहद्वदेम' महद्बृंहितं वदेम दीयतां भुज्यता मिति।

* "विषीव्यति"—इति घ, ङ, च।

† घ-ङ-च-पुस्तकेष्विह सप्तमः खण्डः समाप्तः।

‡ "द्व्याचोतस्तिङः (पा० ८, ३, १०५)"—इति दीर्घः।

क ? 'विदथे' यज्ञे। अथवा स्वे गृहे। किञ्च; युष्मदनुग्रहाच्च सुवीराः' वीरवन्तो भवेम पुत्रवन्तः। यद्यपुत्राः, एव मयं मत्वर्थीयः सुः; अथ पुनः पुत्रवन्तः, एवं ततः कल्याणवीरा इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"वरो वरयितव्यो भवति" त्रियते ह्यसौ। "जरिता गरिता" इति स्तुत्यर्थस्य। "मघ मिति मंहतेर्दानकर्मणः" दीयते हि तत्। "दक्षिणा दक्षतेः" समर्द्धयत्यर्थस्य; यज्ञे हि यत्किञ्चिद्विगतर्द्धिकं भवति, तदियं समर्द्धयति; विशिष्टं यज्ञस्य साधन मेतदिति। "अपि वा प्रदक्षिणागमनात्" दक्षिणा। दक्षिणां "दिश मभिप्रेत्य",—सा हि दक्षिणस्यां वेदिश्रोणौ, अग्नेण गार्हपत्यं, जघनेन सदो, दक्षिणेनाग्नीध्रीयं गत्वा अन्तर्वेदिं स्थित्वा अन्तरेण चात्वालोत्करौ त मात्मीध्रं चोत्सृज्यमाना गच्छन्तीति "दिक्" पुनर्दक्षिणा। "हस्तप्रकृतिः" प्राङ्मुखस्य प्रजापतेर्दक्षिणो हस्तो बभूव, सा दक्षिणा दिगभवत्। अथ "दक्षिणो हस्तः" कस्माद्दक्षिण इति? "दक्षतेः" उत्साहार्थस्य,—स ह्युत्साहवान् भवति कर्मसु; न तथा सव्यः। "दाशतेर्वा स्यात्" दानार्थस्य,—तेनैव हि प्रायेण दीयते। अथ "हस्तः" कस्मात्? "हन्तेः",—तेन हि हन्यते। न, अन्येनापि केनचिदङ्गेन हन्यते। एवं यो हन्तव्यो भवति तस्य "हनने", अथ मेव तु "प्राशुः" शीघ्रः इत्यर्थः। "हृहदिति महतो नामधेयम्; परिवृढं भवति"—इति। "वीरो वीरयत्यमित्रान्" नानाप्रकारं मारयतीत्यर्थः। "वेतेर्वा स्याद्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य; गच्छत्येवासावभिमुखं यत्नन्। "वीरयतेर्वा" विक्रमार्थस्य; विक्रान्तो ह्यसौ भवति॥

"सी मिति" अयं "परिग्रहार्थीयो वा पदपूरणो वा"। "प्र सीमादित्यो असृजत् (ऋ० सं० २,७,८,४)"। अस्या मेव तावदुभय मपि प्रदर्शयति। ततः परिग्रहार्थीयत्वे द्वितीय मुदाहरणं वक्ष्यति। गत्समदस्य तत्पुत्रस्य वा कूर्मस्येय मार्षम्*, त्रिष्टुप्, सौरी। सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते॥ प्रासृजत्सूर्यो रश्मीन्। सी मिति पदपूरण एव; कुतोऽपीत्यविवक्षित मेवैतत्पदपूरणपक्षे। अथ परिग्रहार्थीयं सर्व मेव परिगृह्णाति;—"प्रासृजत् सर्वत इति वा"। 'वि धर्त्ता' वि धारयिता; रसानां, रश्मीनां वा, स्वरश्मिजालान्तर्गतस्य वा, धर्त्ता सर्वस्य जगतः। 'ऋतम्' उदक मादाय, पृथिवीलोकादन्तरिक्षलोकाच्च। 'सिन्धवः' स्यन्दनाः सूर्यरश्मयः,—ते हि आदित्यमण्डलात् प्राच्यो वर्त्तमानाः स्यन्दन्ते वर्षकाले; सूर्येण प्रसृष्टा उदक मादाय सार्वलौकिकं 'वरुणस्य' सूर्यस्य स्थानं मण्डलं 'यन्ति'। तदेव मध्यनिश मुत्सर्गादानलक्षणं स्व-कर्म कुर्वाणा 'न श्राम्यन्ति'। 'न' वा श्रान्ता अपि सन्तो विरागादप्येतत् कर्म्म 'वि मुञ्चन्ति' एते। कथं पुनः पतन्तो न श्राम्यन्ति? किं शनकैः? न। 'वयो न' वय इव पक्षिण इव शीघ्रं 'पप्तुः' पतन्तः 'रघुया' लघुया लघ्व्या शीघ्रिकया गत्यापि 'परिज्मन्' परिजमन्तः परिगच्छन्तः सर्व मध्येतज्जगन्न श्राम्यन्ति न विमुञ्चन्त्येतत्कर्म॥ एतदुणयुक्ताना मध्येतेषां सूर्य एव प्रतिसर्गे संयमे च ईश्वर इत्येवं सूर्यस्य स्तुतिरेषा॥

---

* "प्र सी मादित्यो असृजद् वि धर्त्ता ँ ऋतं सिन्धवो वरुणस्य यन्ति।
न श्राम्यन्ति न वि मुञ्चन्त्येते वयो न पप्तू रघुया परिज्मन्॥"

"वि सीमतः सुरुचो वेन आवरिति च"। इदं द्वितीय मुदाहरणम्। ब्रह्मजज्ञान मिति*। वामदेवपुत्रो नकुलोऽनया त्रिष्टुभा आदित्यं तुष्टाव। प्रवर्ग्यविनियुक्ता रुक्मोपधाने चाग्निचयने। 'ब्रह्म' आदित्याख्यं 'जज्ञानं' जायमानं 'प्रथमम्' अनुत्पन्नेषु आदितः 'पुरस्तात्' प्राच्यां दिशि; तदुद्भवोपलक्षित मेव प्राच्याः प्राचीत्वम्। 'वि आवः' व्यवृणोत्, विवृतानकरोत्। 'सुरुचः' प्रशस्तरोचनान् रश्मीन् 'सीमतः' सर्वतः। किञ्च; 'सः' 'वेनः' मेधावी 'बुध्न्याः' बुध्न मन्तरिक्षं तदवयवभूताया दिशः 'उपमाः' उपनिर्माच्यः; तासु ह्येतत्प्रतिष्ठितं सर्वं मुपनिर्मीयते जगदित्येतत्;—तस्मात्ता एवोपनिर्माच्य उच्यन्ते। 'विष्ठाः' विस्थाः;—तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः। 'सतश्च' अभिव्यक्तस्य स्थूलस्य 'असतश्च' अनभिव्यक्तस्य सूक्ष्मस्य 'योनिं' 'विवः' व्यवृणोदित्यर्थः। आदित्योदये ह्येवङ्गुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः। अथवा बुध्ना आप आन्तरिक्षास्ता उपमा इत्येव मादि सर्वं योज्यम्॥

"अपि वा सीमेत्येतदनर्थक मुपबन्ध मादद्दीत पञ्चमीकर्माणम्। सीव्नः सीभनः सीमातो मर्यादातः। सीमा मर्यादा विसीव्यति देशाविति"। विगतसन्तानौ देशौ करोतीति॥

"त्व इति विनियहार्थीयं सर्वनामानुदात्तम्" निपातत्वेनैतदपि

---

* "ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥"
य० वा० सं० १३, ३। सामवदसंहितायामपि ऋ० आ० ४, १३ १, ९।

सन्दिह्यते । वक्ष्यति हि "निपात इत्येके"—इति* । अतः त्व इति ह्येवं निपातकाण्ड उदाहृियते । संशयपरिशोधनाय त्व इत्येतद्विनिग्रहार्थीय मिति व्याख्यातम् । किमु तत् सर्वनामविप्रतिपन्नखरत्वात्खर मध्यवधारयन् अस्यानुदात्त मित्याह; कथं पुनर्विप्रतिपन्नखरमेतदिति? उच्यते;—प्रातिपदिकस्यान्तउदात्त इत्यौत्सर्गिकं लक्षणम् (फि० सू० १,१)—अन्यत्र चापवादात्,—लक्षणविदोऽपि चास्यापवादं पठन्ति,—"लक्ष्मनेमसमसिमेत्यनुक्षानि (फि० सू० ४,८)"—इति ।

"अर्द्धनामेत्येके" । अर्द्धस्येतन्नामेत्येव मेके आचार्या मन्यन्ते । वक्ष्यति चाय मपि "त्वो नेम इत्यर्द्धस्य (निरु० ३,४,१)"—इति । तदेतत् प्रकरणोपपदाभ्या मध्यवसेयम्,—कार्द्धनाम? क सर्वनाम? इति ॥२॥

यथात्र सर्वनाम तथेय मुदाहृियते ;—

कृचान्वः पोष मास्ते पुपुष्वान् गायचन्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥ इत्यृत्विक्कर्मणां विनियोग माचष्ट कृचा मेकः पोष मास्ते पुपुष्वान् होतर्गर्चनी गायच मेको गायति शक्करीपूज्ञाता गायचं गायतेः स्तुतिकर्मणः शक्वर्य कृचः शक्नोते स्तुत्यदाभिर्दृच्च मश्नकङ्न्तुं तच्छक्करीणां शक्करीत्व मिति विज्ञायते ब्रह्मैको जानेजाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितु मर्हति ब्रह्मा

* उत्तरस्मिन्नेव खण्डे । ६७ पृ० ५ पं०, ६८ पृ० १७ पं० ।

परिवृल्हः श्रुततो ब्रह्म परिवृल्हं सर्वतो यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्वरयुरध्वरं* युनक्त्यध्वरस्य नेताध्वरं कामयत इति वापि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथ मनुदात्तप्रहृति नाम स्याद्दृष्ट्व्यर्यन्तु भवति। उत† त्वं सख्ये स्थिरपीत माहुरिति द्वितीयाया मुतो त्वस्मै तन्वं विसस्र इति चतुर्थ्या मथापि प्रथमाबहुवचने—॥ ३‡ ॥

"ऋचान्वः (ऋ० स० ८,२,२४,५)"—इति। हृहस्पतेरार्षम्। ऋत्विक्कर्मणां विनियोग मनयर्चाऽऽचष्टे। "ऋचां त्वः पोष मिति"। य एते चत्वारो महर्त्विजः, एतेषां 'त्वः' एक इत्यर्थः। कि मेकः करोति? 'ऋचां' 'पोषं' पुष्टिं 'पुपुष्वान्' पुनः पुनः भृशं वा देवतायाथात्म्यानुचिन्तनसन्तानमर्मस्थानकरणानुप्रदानवतीर्यथाकाल मृचोऽधीयानः 'आस्ते';—स हि तासां पोषः। कतमः? 'एकः' एतत्कर्म कुर्व्वन्नास्ते इति;—होता; एतत्तावदृगध्ययनकर्म तस्मिन् होतरि विनियुक्तम्; उक्तं च—"यदृचैव होत्रं क्रियते"—इति (ऐ० ब्रा० ५,५,८)। 'गायत्रं' त्वः? गायत्र मेको 'गायति' 'शक्वरीषु' छन्दु। कतमः? उद्गाता; तस्मिन्नप्येतत्सामगानकर्म विनि-

* "एकोऽध्वर्युरध्वरयुरध्वर्युरध्वरं" क, ख, ग।
† "भवत्युत" घ, ङ, च।
‡ घ-ङ-च-पुस्तकेष्विदमष्टमः खण्डः समाप्तः।

युक्तम्; उक्तञ्च—"साम्नोद्गीथम्"—इति (ऐ० ब्रा० ५,५,८)। "ब्रह्मा त्वः" ब्रह्मा नाम एक ऋत्विक् 'जाते' प्रायश्चित्ते 'विद्यां वदति'। विद्याचयहेतुत्वादात्मनो विद्यां विज्ञानं वदतीतरेभ्य ऋत्विग्भ्यः; इदं मत्र कुरुतेति। तत्रापि ह्येतत् कर्म विनियुक्तम्। स पुनरेष सर्वविद्यः सर्वविज्ञानस्तथाविधो ह्यमावधिकारी चयीविद्यामंयुक्तो येनासौ सर्व मेव वेदितु मर्हति। न ह्यसर्ववित् त मधिकारं शक्नुयान्निर्वर्त्तयितुम्। उक्तञ्च—"अथ केन ब्रह्मत्वं क्रियत इति? चय्या विद्यया"—इति (ऐ० ब्रा० ५,५,८)। "यज्ञस्य मात्रां वि मिमीत उ त्वः"। एक इति। मीयत इति मानं कर्म, तन्मात्रेत्युच्यते। या का चिदितिकर्त्तव्यता* यज्ञस्य, तां विमिमीतेऽध्वर्युः; नानाप्रकारं करोतीत्यर्थः॥

अथैकपदं निरुक्तम्।—"गायत्रं गायतेः" स्तुत्यर्थस्य,—स्तूयते ह्यनेन। "शक्वर्य ऋचः शक्नोतेः"—इत्युक्त्वा शक्वरी-शब्दे वृत्तिं दर्शयति;—"तद्यदाभिर्वच मशकद्धुन्तु" "तत्" एव "शक्वरीणां शक्वरीत्वम्"। तत् यद्यस्मादाभिरभिष्टुत इन्द्रो वच मशकद्धुन्तु तच्छक्वरीत्वम् "—इति विज्ञायते"। ऋचां शक्वरीत्व मित्येवं ब्राह्मणेऽपि शक्नोतेरेव शक्वर्य इति विज्ञायते†। लिङ्गतोऽपि हि दर्शितं भवति, आख्यातजानि नामानीति॥

"ब्रह्मा परिवृढः श्रुतः" स हि चयीं विद्यां वेद। शब्दसारूप्यप्रसक्त मुच्यते;—"ब्रह्म परिवृढं सर्वतः"। ऋगादिपरं चोभय

---

* मीमांसायाः अर्थसङ्ग्रहाख्ये ग्रन्थे भावनाप्रकरणे द्रष्टव्या।

† "इन्द्रो वा एताभिः————शक्वरीत्वम्"—इति ऐ० ब्रा० ५, १, १। अन्यत्र च द्रष्टव्यम्।

मपि तत्परिवृढं सर्वासु दिक्षु। "अध्वर्युः अध्वरयुः" एव मपि च्छगूह्यत इति। पुनरप्याह;—"अध्वरं युनक्त्यध्वरस्य नेता" प्रापयितेत्यर्थः,—स ह्यन्नं प्रापयत्यध्वर मेव। अथवा "अध्वरं कामयते" कर्तुम् "—इति" अध्वर्युः। एतस्मिन्निर्वचने युः, वसूयव इति यथा*। अथ वा "अधीयाने" त मध्वरं कस्मिंश्चिद् ब्राह्मणे अध्वर इतीय मेव सञ्ज्ञा भवति, मञ्चाक्रोशनवत्। एतस्मिंश्च निर्वचने "युः" अयम् "उपबन्धः" नामकरणम्। अध्वर मधीते यः सोऽध्वर्युः। विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्व माचष्टे;—"अध्वरः—इति यज्ञनाम"। ध्वरः-इत्यधुना निर्वक्तव्यः;—"ध्वरतिर्हिंसाकर्मा"। ध्वरति धूर्वतीति हिंसार्थेषु पठितौ (१भा० २८०,२८१पृ०), "तत्प्रतिषेधः" अध्वरः अहिंस इत्यर्थः॥

आह;— नन्वत्र हन्यन्ते पशवः, छिद्यन्ते तृणवनस्पतय; तत् कथ महिंसः? उच्यते;—अभ्युदय एव हि सः। एवं हि श्रूयते—"न वा उ एतस्मिन् म्रियसे (य० वा० सं० २३,१६)"—इति। तथाच—"कुशल मिच्छन्ति तृणानि राजन्" —इति। तस्मादभ्युदययोगाद्-हिंस इत्युपपद्यते॥

"निपातः" अयम् "इत्येके" मन्यन्ते॥

एव मेकीयपक्षे निपातत्व मस्योक्त्वा अधुना चोदकपक्षे स्थित्वा परपक्ष माक्षिपन्नाह;—"तत् कथ मनुदात्तप्रकृति नाम स्यात्"—

---

* "वसूयवः। वसु धन मात्मन इच्छन्तः। सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोरिति दीर्घः। क्याच्छन्दसीत्युप्रत्ययः।"—इति सा० भा०; ऋ० सं० १, ४, ९, ४।

इति। तदेतच्छन्दरूप मनुदात्तस्वभावं सत् कथं नाम स्यात्? ननु भवतैवोक्तम्—उत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानि—इति (६ ६ पृ० ५ प०)। उच्यते;—सत्य मुक्तम्। ननु तचैवेदं प्रत्युक्तम्—अन्यत्र चापवादात्—इति (६ ६ पृ० ६ पं०)। स एषोऽपवादांशः—त्वत्तनेममम सिमेत्यनुच्चानीति (६ ६ पृ० ७ पं०)। उत्सर्गादपवादो बलीयान्। तस्माद्विप्रतिपन्नस्वर मपि एतन्नामैव। किं च; "दृष्टव्ययं तु भवति"। तु-शब्दो हेत्वर्थः,—हेतुमसमुच्चयार्थो वा। अनुदात्तप्रकृतित्वेऽपि स तु 'दृष्टानुविधयश्छन्दसि'—इति दृष्टव्ययत्वान्नामेति तद्भवति। एवं हेत्वर्थः। अथ वैव मन्यथाहेतुमसमुच्चयार्थः; अपवादस्मरणात्—व्ययदर्शनाच्च अनुदात्त मपि सदेतन्नामैव भवति। निपाता आद्युदात्ता भवन्ति (फि० सू० ४,१९)। तस्मात् कृतापवादत्वाद्—दृष्टव्ययत्वाच्च नामैवैतदित्युपपन्नम्॥

आह;—क्व पुनरस्य व्ययो दृष्टः? उच्यते;—"उत त्वं मन्ये शिरपौत माऊरिति* द्वितीयायाम्" एकवचने। एवम् "उतो त्वस्मै तन्वं१ वि सस्र इति† चतुर्थ्याम्" एकवचने व्ययो दृष्टः। उपरिष्टाच्छेषः। "अथापि प्रथमा-बहुवचने"—व्ययो दृष्ट इत्यध्याहारः॥३॥

अक्षण्वन्तः कर्णवन्त सखायो मनोजवेष्वसमा बभूवुः। आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे। अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेरनक्ते

---

* ऋ० सं० ८, १, १३, ४।
† ऋ० सं० ८ १, १२ ५।

रित्याग्रायणस्तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृन्ततेर्निरुक्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छन्तीव खे उद्गन्ता मिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपर आस्य मस्यतेरास्यन्दत एनदन्न मिति वा दघं दध्यतेः सवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति प्रस्रेया ह्रदा इवैके प्रस्रेया ददृशिरे* स्नानार्हा ह्रदो ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽप्यापि समुच्चयार्थे भवति†—॥ ४ ॥

"अक्षण्वन्तः कर्णवन्तः (ऋ० मं० ८,२,३४,२)"—इत्येतस्मा न्मन्त्रात्। बृहस्पतेरार्षं विद्यासूक्तं नाम। 'अक्षण्वन्तः' अक्षिसंयुक्ताः; एव मपि समानेन्द्रियाः समानदृष्टेादरपाणिपादाः सन्तः। अपि च; 'सखायः' समानख्यानाः सर्वे मनुष्याः। अथवा समानेषु शास्त्रेषु कृतश्रमाः। वैयाकरणा वैयाकरणाना मेव समानख्यानाः, नैरुक्ता एव नैरुक्तानाम्। 'मनोजवेषु' मनोगम्येष्वर्थेषु 'असमा बभूवुः'। केचिदूहापोहधारणवक्तृत्वसमर्थाः, केचिदसमेधसः। कथ मसामान्य मिति? यतो दृष्टान्तेन प्रतिपादयति।—"आदघ्नास उपकक्षास उ ल्वे ह्रदा इव"। आदघ्ना एव आदघ्नासः। आस्यदघ्नह्रदपरिमाणाः,

* 'ददृशिरे' क, ख, ग। च-पुस्तके तु 'ददृशिरे प्रस्रेयाः'—इति व्यत्ययपाठस्य।
† घ-ङ-च-पुस्तकेषु नाच खण्डसमाप्तिः।
‡ 'प्रथमाबहुवचने व्यत्यो हृदः'—इति (७० पृ० १२ पं०) पूर्वेणान्वयः।

केचिन् प्रज्ञया। उपकक्षासः कक्षसन्निकृष्टदेशतुल्योदका इवह्रदाः। एके प्रज्ञया ह्रदाः 'स्नात्वा' अन्योन्याः अपरिमेयप्रज्ञानाः। 'ददृश्रे' ददृशिरे—दृश्यन्त इति समस्तार्थः॥

अथैकपदं निरुक्तम्।—"अञ्चि, चष्टेः" पश्यत्यर्थस्य,—दृश्यते ह्यनेन। "अनक्तेः" व्यक्त्यर्थस्य—"इत्याग्रायणः" मन्यते। वाह्य मपि चैतस्मिन्निर्वचने भवति। "तस्मादेते व्यक्ततरे इव भवतः"—इति। यस्मादिदन्नामेति किं मिति प्रकृत मपेक्ष्य। अथवा यस्मादेते तेजोऽवयवभूदिष्टे, तस्मात्कारणादित्येवं यच्छब्द मन्वाकृष्य विद्यमान मविद्यमानं चोत्पाद्य तस्माच्छब्दस्य सामर्थ्य मुत्पाद्यते। तथाहि स निराकाङ्क्षो भवति। सर्वत्र च साकाङ्क्षेषु शब्देष्वेवं व्याख्यान-धर्मो द्रष्टव्यः। एते अञ्चिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे प्रकाशतरे भवतः,—अन्धकारेऽपि ह्येते प्रकाशेतेव नक्तञ्चरादीनाम् न तथेतराण्यङ्गानि। एवं ब्राह्मणेऽपि अनक्तेरेवाञ्चिणी"—इति ह विज्ञायते"। "कर्णः कृन्ततेर्निकृत्तद्वारो भवति, चष्टेरित्याग्रायणः" मन्यते। ब्राह्मण मपि चैतस्मिन्निर्वचने भवति;—"चष्टान्तौव खे उदगन्तां मिति ह विज्ञायते"—इति। चष्टान्तौवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः एतावपि च उदगन्तां प्रत्युदृष्टान इव गृहणाय। विचार्यमाणे ज्ञायते खे कर्णाविति। "आस्य मश्नुतेः" क्षेपार्थस्य,—क्षिप्यते ह्येतदाभिमुख्येनास्यम्। स्यन्दतेर्वा स्यादाङ्पूर्वस्यैव स्रवणार्थस्य,—मुष्कोऽपि ह्येतदन्ने आगते स्रवत्येव स्रेमाणं, येन तदार्द्रीकृतं सन्तिष्ठते। "दन्नं, दद्यतेः" स्रवत्यर्थस्य। स्रुततर मिव तद्भवत्युत्तरात्परिमाणात्। "दस्यतेर्वा स्यात्" क्षयार्थस्य। "विदस्ततरं" क्षुपक्षौ

णतरं, तद् "भवति" उत्तरस्मात्परिमाणात्। "प्रस्नेयाः" प्रकर्षेण स्नातुं येषु योग्यम्, अगाधत्वात्; ते प्रस्नेयाः स्नानार्हा इत्यर्थः। "ह्रदो ह्रादतेः" शब्दार्थस्य,—शब्दं ह्यसावभिहन्यमानः करोति। "ह्रादतेर्वा स्यात्" शीतीभावार्थस्य,—ग्रीष्मेऽपि ह्यसौ शीतल एव भवति॥

"अथापि" अथ मपरो निपातः "समुच्चयार्थे भवति" एकतमः —त्वत् इति ॥४॥

किमुदाहरणम्?—

पर्याया इव त्वदाश्विन माश्विनञ्च पर्यायाश्चेत्यथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कर्मीमिदिति*। (नि-ष्ट्रक्कासश्चिदिन्नरो भूरितोका वृकादिव। बिभ्यस्यन्तो ववाशिरे) शिशिरञ्जीवनाय कम्। शिशिरञ्जीवनाय। शिशिरं शृणातेः शम्नातेर्वा†। एमेनं सृजता सुते। आसृजतैनं सुते‡। तमिद्वर्द्धन्तु नो गिरः। तं वर्द्धयन्तु नो गिरः। स्तुतयो गिरो गृणातेः§। अयमु ते समतसि। अयन्ते समतसीवोऽपि दृश्यते॥ ॥५॥

---

* घ-ङ-च-पुस्तकेष्विह नवमखण्डः समाप्तः।
*, †, ‡, §, ॥ एषु स्थानेषु खरचिह्नानि न दृश्यन्ते घ-ङ-क-पुस्तकेषु।
॥ क-ख-गेभ्योऽन्यत्र नेह खण्डसमाप्तिः।

"पर्याया इव त्वदाश्विनम् (ऋ० प्राति० १२,१०)"—इति। आह; किं मुक्तं भवति? उच्यते;—"आश्विनं च पर्यायाश्चेति"—एवं समुच्चयार्थं भवति। "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिदिति"। व्याख्याताः क अपि संग्रहार्थीयाः*, तत्-प्रसङ्गेन हीत्येव मादयो अन्यार्था अप्युक्ताः†। प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान् वक्ष्यामः। तेषां सामान्य मेव तावल्लक्षण मुच्यते। तत्राधिकारार्थोऽत्र मथशब्दोऽत्र ये प्रवृत्ते परिसमाप्ते अर्थे अन्यैरेव वाक्यगतैः पदैरमिताक्षरेषु गद्यग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्तएव मिताक्षरेषु भवन्ति। उभयत्रापि तु ते अनर्थकाः अनर्थान्तरवाचकाः, प्राकृतादर्थात् न किञ्चिदर्थान्तरं द्योतयन्ति। पद मेव वाक्य मेव वा पूरयितव्य मित्यत्र मेव हि तेषा मर्थो नान्यदर्थान्तरम्। उक्तं च;—

"क्रियावाचक माख्यात मुपसर्गो विशेषवत्।
सत्वाभिधायकं नाम, निपातः पादपूरणः॥"—इति।

कतमे पुनस्ते? "कमीमिदिति" एते चत्वारः। कम्, ईम्, इत्, उ,—इति॥

आह;—ननु ये प्रवृत्तेऽर्थ इति पदे तदुपदिष्टं लक्षण मत एव विज्ञास्यामो येऽमिताक्षरेषु वाक्येषु पठितास्ते मिताक्षरेषु पदपूरणा भविष्यन्तीति॥

---

* "तेषा मेते चत्वारः"—इत्यादयः ४४ पृ० १ पं०।
† "हीत्येषोऽनेककर्मा"—इत्यादयः ५५ पृ० २ पं०।

अथ किमर्थं मेते विशेषतः कर्मोमिदवो निर्दिश्यन्त इति? उच्यते; —एते हि प्रायेण पदपूरणा एव। अन्ये पुनः इव-न-चि-त्वादयो अर्थवन्तोऽप्यर्थासम्भवे सति पदपूरणा भवन्ति;—लक्षणं हि तानपि व्याप्नोति। एते पुनः प्रायेणानर्थका एवेति विशेषतो निर्दिश्यन्ते। अथ वा ते प्रायेणार्थवन्तः कदाचिदनर्थकाः इत्यतो विशेषतो निर्दिश्यन्ते॥

आह;—एवमपि च उकारो न निर्देष्टव्यः। किं कारणम्? स हि पुरस्तान्निर्दिष्ट एव (५५पृ० २पं०) "अथापि पदपूरण इद्म तद्"—इति। उच्यते;—सत्यं निर्दिष्टः। प्रासङ्गिकस्तु स तस्य निर्देशोऽयमेवाचोकारस्य पदपूरणत्वे मुख्यो निर्देशः; स्वप्रकरणत्वात्। तत्र तर्हि अकिञ्चित्कर इति? न अकिञ्चित्करः। किं कारणम्? शृणु;—यदि ह्यय मुकारः तत्र पूरणत्वेन नोच्यते, इहैवोच्येत; ततः पूर्वोक्तस्य विनिग्रहार्थोयत्नस्याय मपवाद इति गम्येत। अथापि तत्रैव केवल मस्य पदपूरणत्व मुच्यत, नेह; तथापि पादपूरणेषु परिसङ्ख्यायमानेषु नाय मुक्त इति पदसङ्ख्या पदपूरणत्व मस्य बाध्येत। अनिष्टं चैतत्। तस्मादुभयत्राप्यधीत इति॥

आह;—नन्वेवं खलु-नून मित्येतयोः पदपूरणत्वस्य बाधः प्राप्त इति? उच्यते;— नैवम्। किं कारणम्? उकारवन्तौ ह्युभावपि। यथैव ह्युकारोऽर्थवांस्तानर्थकश्च; एवं तावपि। तस्मादुकारग्रहणेनापि तावप्यत्र ग्रहीतौ द्रष्टव्यौ। न केवल मुभावेव; किन्तर्हि? अन्येऽपि तावन्त एव सन्ति। तद्यथा;—"आ घा ता गच्छानुत्तरा"—इति*

* ऋ० सं० ७ १, ७, ५।

अत्र घकारः। तेऽपि चात्रावरुद्धा द्रष्टव्याः। उदाहरणमात्रप्रदर्शनार्थं ह्येतावन्त एवोदाहृताः। त एते सर्व एवार्थासम्भवे सत्यनर्थका एव, सम्भवे त्वर्थवन्त इति। किं कारणम्?—न हि कस्मिंश्चिदर्थे तावत्सम्भवति अनर्थकल्पना न्याय्या शब्दस्य;—अर्थप्रधानो हि शब्दः। स नाकस्माद्भिधेयेनार्थेन विना वाक्ये संहन्येत। तस्मादावद्वम्य मेव तावदर्थः कल्पनीयः। यत्पुनरेतदुक्तम्—'वाक्यपूरणाः' इति (७३पृ० १०पं०)। अगतिरेषा। तदेतत् सर्वथाप्यर्थासम्भवे सति अगतौ सत्यां भवति। त एते प्रायोवृत्त्या इव-न-चि-न्वादयोऽर्थवन्तः। प्रायोवृत्त्या च कमीमिदवोऽनर्थका इति द्रष्टव्यम्॥

आह;— ननु आदौ च मध्ये च पूरणाना मागमो दृष्टः; तद्यथा—"नूनं सा ते"—इति; अथ कथ मुच्यते,—'ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणाः'—इति? उच्यते;— न ह्येतदध्ययनकालीन मानुपूर्व्य मन्त्राणां पदानां व्याख्याकाले नियत मस्ति, अर्थप्रकाशनार्थनिर्वचनवशेनान्यपदानुपूर्व्य मुपजायते समाख्याकाले। तच्चैवं सत्याख्यातपदम् प्रधानम्, तदनु नाम, तदनूपसर्गाः, तदनु निपाताः;—इत्येता मानुपूर्वी मपेक्ष्येतदुक्तम्। तत्र ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणा भवन्ति। एता मानुपूर्वी मपेक्ष्य पूर्वं माख्यातलक्षण मुक्तम्, तदनु नामलक्षणम्। तस्मादादावपि निपातः, तन्मध्ये वा अतएव द्रष्टव्यः। लोकेऽपि हि दत्तानुयोगानां ब्राह्मणाना मवस्थानक्रमोऽकिञ्चित्कर एव भवति। मध्येऽन्ते वावस्थितो यः प्रधानः, सोऽग्र्य इत्युच्यते। तस्मात्सम्यगेवोक्तं 'ये प्रवृत्तेऽर्थे'—इति॥

व्यत्ययं चाधिकृत्य श्लोक मप्युदाहरन्ति;—

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि च।
ब्रह्मणः परिगुप्त्यर्थं वेदे व्यवहितानि च॥"—इति

अधुना एव मेतानुदाहृतान् कर्मौमिदून् समासतः प्रत्येक मुदाहरणैर्दर्शयति;—"शिशिरं जीवनाय कम्"—इत्यत्र क मित्येष पदपूरणः। शिशिरं जीवनाय, जीवनार्थ मित्यर्थः। तत्र हि प्रायेण प्रचुराणि शरद्धान्यानि भवन्ति। क मिति पदपूरण एव*। शाखान्तरेषु शेषो द्रष्टव्यः॥

केचिदेवं कृतशेष मन्वाधीयते†;—

"निष्टुक्कासस्त्रिदिन्नरो भूरितोका वृकादिव॥
बिभ्यस्यन्तो ववाशिरे शिशिरञ्जीवनाय कम्॥"—इति।

निष्टुक्का एव 'निष्टुक्कासः' निर्वसना इत्यर्थः। अपि च। 'भूरितोकाः' बहुपत्या इत्यर्थः। के पुनस्ते? दरिद्राः; के 'त्रिन्नरो' मनुष्या इत्यर्थः। किं तेषामिति? 'वृकादिव बिभ्यस्यन्तः' पुनः पुनर्भर्त्सं वा बिभ्यतो वृकादिव हिमाद् 'ववाशिरे' पुनः पुनर्भर्त्सं वा वश्यन्ते। कि मिति ववाशिरे? शिशिरम्। अस्माकं 'जीवनाय' जीवनार्थं मागच्छति;—इत्येवं हेमन्ते ववाशिरे। अल्पतरशीतं हि शिशिरं, सुखं तत्र जीविष्याम इत्यभिप्रायः॥

निगमप्रसक्तस्य शिशिरशब्दस्य निर्वचनम्,—"शिशिरं शृणातेः"

---

* "मघवन्मिं ना चुविष्टा जीवनाय कम्"—इति ऋ० सं० ८, ८, १९, १। अत्र सायणः,—'किमर्थम्? "जीवनाय कम्" जीवनार्थम्; इह लोके चिरकालावस्थानार्थं मित्यर्थः। क मिति पूरकः।'—इति।

† एतेनाचेतन्मन्नस्य पाठो न दयानन्दाभिमतः।

हिंसार्थस्य "शत्रातेर्वा" हिंसार्थस्यैव; नार्थकृतो विशेषः। हिनस्ति तस्मिन् काले अप्रतिबध्यमानो अतिशयेन दावाग्निः शुष्कानोषधिवनस्पतीन्॥

ईं मित्यस्योदाहरणम्—"एमेनं०——०चक्रये"*। ऐन्द्रेयर्चा, गायत्री। मधुच्छन्दस आर्षम्। पृष्ठ्याभिप्लवस्तोमवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे महाव्रते च ऋचाशीतिषु विनियुक्ता। 'आ सृजतैनम्' आभिमुख्येन सृजत। 'ईम्'—इति पदपूरण एव। द्रोण्यपाचेण चमसेश्च सोमं हे अध्वर्यवः!। किं मासृजत? योऽस्य मिन्द्रस्य 'सुते' अभिषुते सोमे खांशः, उक्थ्यपात्रचमसस्थः; एन मासृजत। 'मन्दिं' मन्दयितारम्। 'मन्दिने' इन्द्राय हर्षवते। 'चक्रिं' चकनवन्तं क्रमणवन्तं वा। अपि वा हविर्द्धानशकटवक्त्राभ्यां चक्रवन्त मपि। चक्रदिति कर्मनाम (१भा० १६८पृ०)। अतिविशिष्टवीर्यजनकैः संस्कारकर्मभिस्तद्वन्तं। 'विश्वानि' सर्वाणि भूतानि वा। 'चक्रये' कृतवते इन्द्राय। सोमो प्रत्यक्षः, दातारश्च; परोक्ष्या विन्द्रस्य स्तुतिः। "अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति, परोक्षकृतानि स्तोत्राणि"—इति वक्ष्यति†॥

६ "तमिद्वर्द्धन्तु नो गिरः"—इति। इदित्यस्योदाहरणम्। "त मिद्वर्द्धन्तु०——०हृदं सनिः"‡। अमहीयोराङ्गिरसस्येय मार्षम्। गायत्री,

---

* "ए मेनं सृजता सुते मन्दि मिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये॥" ऋ० सं० १, १, १७, १।

† अथैवोक्तरषट्के १, १, १।

‡ "त मिद्वर्द्धन्तु नो गिरो वत्सं सं शिशवरी रिव। य इन्द्रस्य हृदं सनिः॥" ऋ० सं० ७, १, १०, ५।

सौमी। ग्रावस्तुतो विनियुक्ता। 'तम्' वर्द्धयन्तु 'नः'। तं सोमम्। 'इत्'—इति पदपूरणः। वर्द्धयन्तूपजातवीर्यं कुर्वन्तु। देवतृप्तये। नः एताः अस्मद्-'गिरः' स्तुतयः। कथं पुनर्वर्द्धयन्तु? 'वत्सं संशिश्वरीरिव'। वत्स मिव; एकशिशुका बह्व्यो गावः, ता यथा पर्यायेण वत्स मेकं स्तन-वत्साः स्वैः स्वैः पयोभिर्बृंहनादिसमर्थं कुर्युः। एव मेवास्मद्भिः एतं सोम मुपजातवीर्यं देवतर्पणाय कुर्वन्तु वर्द्धयन्तु। कतमः? 'यः' 'इन्द्रस्य' 'हृदं मनिः' हृदयसम्भक्ता, त मेनं वर्द्धयन्त्वित्यभिप्रायः॥

आह;— कस्मात् पुनरत्र केचिदुदाहरणमन्त्रा अशेषाः पठ्यन्ते, निरुच्यन्ते; केषां चिदेकदेशाः? इति। उच्यते;— ये तावदशेषाः पठ्यन्ते, निरुच्यन्ते च; ते व्याख्याधर्मोपदेशनार्थम्। यदि पुनः सर्व एव पठेरन् निरुच्येरंश्च, अतिगुरुशास्त्रं सम्पद्येत। अथापि सर्वेषा मप्यु-दाहरणमन्त्राणा मेकदेशः पठ्येत निरुच्येत च, तथापि व्याख्याधर्मो न प्रदर्शितः स्यात्। तस्माद्व्याख्याधर्मोपदर्शनार्थं केचिदशेषाः पठ्यन्ते, निरुच्यन्ते च; केषाञ्चिदेकदेशाः; शास्त्रानिगौरवभयात्।—इति प्रतिमन्त्र मपि सकलार्द्धर्चपादाध्ययने प्रक्ष्यते प्रयोजन मन्वेष्टुम्, तदेतत्समासेन ब्रूमः। यस्मिन् यस्मिन्मन्त्रे यद्यत्पद मेकार्थं मनेकार्थं मनवगतसंस्कारं वा निर्ब्रवीति, किञ्चिदान्यच्छब्दरूप मध्याहरति, अन्यदापोहति, अन्यथा वा कञ्चिद्विपरिणामं करोति, सन्दिग्धं वा निर्णयति; तदर्थ मेव तं सकल मधीते। यस्मिन्नार्द्धर्चे पादे तावत्पदं भवति, यदभिमतं निर्वक्तुं तावन्मात्र मेवाधीते। तन्निर्विवक्षया तदेतदेवं निपुण मन्वेष्टव्यं सर्वत्र॥

उकारस्योदाहरणम्—"अयमु०——०ओहसे"*। पुनःशेपो यूपे नियुक्त आत्मानं मोचयितु मिच्छन्नेतया गायत्र्येन्द्रं तुष्टाव†। 'अयम्' इति वर्त्तमानः सन् कर्मणि निर्वित्सन्नाह । 'ते' तव युष्मदर्थं सोमः यं प्रति नित्यकाल मेव 'समतसि' सम्यतसि। त्वं तासु क्रियासाह्रयमानः समतसि सम्यतसि । कथं पुनर्यं प्रति समतसि? 'कपोत इव' कम्पतनः कपोतः, कुत्सितपतनः; स यथा 'गर्भधिं' गर्भधानीं कपोतिकाम्, अण्डाश्रयं वा नीडं प्रति पुनः पुनः पतति; एवं यं प्रति नित्यकाल मेव सम्यतसि त्वम्, स एवाय मभिषुतः सोमः, एभिर्च्छन्दोलिङ्गैः । अथ किं मत्सकाशाभिः करिष्यसि? मोचय अस्मान्। किं वा 'वचः' एवेदं नः स्तुतिलक्षणं 'नोहसे' न वितर्कयसि रोरूप्यमाणानाम्? केनाप्यभिप्रायेण वय मेतद् ब्रूमः,—कैर्वा युष्मद्गुणैर्न युक्त मेतदिति; यतो न मोचयस्यस्मानतो यूपात्। अत्रैतदवबुद्ध्यार्थ मार्त्तता मस्माक मवधार्य कारुण्यान्मोचयास्मान्। किं तेऽस्माभिरय मेव तेऽस्मत्तः प्रति विशिष्टतरः सोमोऽभिषुत इत्यभिप्रायः ॥

"द्वेऽपि दृश्यते"। कदाचिदनर्थकः—इति वाक्यशेषः ॥ ५ ॥

किं मुदाहरणम्?—

---

* "अय मु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे॥" ऋ० सं० १, १, १८, ४।

† तथा चैतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयेऽध्याये चतुर्थे खण्डे;—"इन्द्रो वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तनु कुत्सथ लोमत्स्याम इति। स इन्द्रं तुष्टाव,—'यच्चिद्धि सत्य सोमपा (ऋ० सं० १, १ १७,१)'—इति चैतेन सूक्तेनोत्तरस्य पञ्चदशभिः' सूक्तैरिति शेषः। तदाद्यसूक्ते एवायं मन्त्रश्चतुर्थः।

सु विदुरिव सु विज्ञायेते इवाथापि नेत्येष इदित्येतेन सं प्रयुज्यते परिभये*। हविर्भिरेके स्वरितः संचन्ते सुन्वन्त एके सवनेषु सोमान्। शचीर्मदन्त उत दक्षिणाभिर्नेज्जिघ्नायन्त्यो नरकम्पतामेति। नरकं न्यरकं नीचैर्गमनं नास्मिन्त्रमणं स्थान मल्प मप्यस्तीति वाथापि न चेत्येष इदित्येतेन संप्रयुज्यतेऽनुपृष्टे न चेत्सुरां पिबन्तीति सुरा सुनोतेरेव मुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः (११†) ॥ ६ ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥ १, ३.

"सु विदुरिव, सु विज्ञायेते इव"—इत्येते उदाहरणे। सुष्ठु विदुर्यज्ञं ब्राह्मणा इति; इवोऽनर्थक एव वाक्यपूरणः। सुष्ठु विज्ञायेते यज्ञो नक्तं ब्राह्मणैरिति; अत्रापीवोऽनर्थक एव ॥

व्याख्याताः पदपूरणाः, निपातसमाहार मधुना दर्शयति; तदधिकारार्थोऽयम् "अथ" शब्दः। "अपि" इति सम्भावने। अथाय मेव इदिति केवलः प्रयुज्यमानः पदपूरणो भवति। अपिचाय मेव "न—इत्येतेन" "सं" युक्तः, "प्रयुज्यते परिभये" अर्थे। सर्वतो भयं परिभयम्। कथं प्रयोगः? "नेज्जिघ्नायन्त्यो नरकं पतामेति"। सुगमः शेषः ॥

के चित्त्वेतं कृतशेष मन्त्राधीयन्ते;—

---

* घ-ङ-च-पुस्तकेषु इदैव दशमखण्डसमाप्तिः।

† घ-ङ-च-पुस्तकेषु इदैकादशखण्डः समाप्तः।

"हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्।
शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम"-इति॥

नारदेन किल विप्रलभ्यमाना असुरपत्न्यो भर्तॄन् प्रति तं मनेन मन्त्रेण प्रत्यूचुः। 'एके' तावत् 'इतः' लोकात् 'हविर्भिः' पुरोडाशादिभिर्निमित्तभूतैः 'स्वः' 'सचन्ते' स्वर्गं लोकं प्राप्नुवन्ति स्म। अथ 'एके' 'सवनेषु' यज्ञेषु सोमान् सुन्वन्तः अभिषुण्वन्तः; तेन कर्मणेत्यर्थः। 'शचीर्मदन्तः' अन्ये शच्या वाचा स्तुतिभिरेके देवान् मादयन्तः सन्तर्पयन्त इत्यर्थः। अप्यन्ये 'दक्षिणाभिः' स्वः सचन्ते इत्येतदेवानुवर्त्तते*। तच्चैवं सति, तेन तेनाभ्युद्यतेषु प्राणिषु श्रेयः प्रति यदि वयं सोमानपि भर्तॄन् सम्यक् परिचरेम। अन्येषां जपहोमादीनां कर्मणां समभावे सति। "न इत्" वयं सोमेषा मप्युप "जिह्मायन्त्यो" जिह्मं माचरन्त्यो भगवन् "नरकं पताम",—न ह्यन्यो भर्तृपरिचर्यातः स्त्रियाः कश्चन धर्मोऽस्तीत्यभिप्रायः॥

नरकशब्दं निर्ब्रवीति;—नीचैरस्मिन्नर्यते गम्यत इति नरक मथवा नास्त्यस्मिन् रमणं रतिकरं स्थान मस्य मस्तीति नरकम्। अथाप्यय मपरो निपातसमाहारो नचेत्येष इदित्येतेनैव सम्प्रयुक्तः प्रयुज्यते। केन चिदनुपृष्टे सति प्रतिवचनं भवति। तद्यथा;—कश्चित् कञ्चित् पृच्छति,—'तिष्ठन्ति वृषलाः?' इति। ततः प्रत्याचष्टे,—'तिष्ठन्ति' इति। ततो 'यदि तिष्ठन्ति, किमर्थं नागच्छन्ति?' इति पुनरनुपृष्टे ब्रवीति,—'न चेत्सुरां पिबन्त्यागमिष्यन्ति' इति; यदि सुरां न पिबन्तीत्यर्थः॥

---

* 'इत्येतदनवर्त्तते'—इति रोथ-उद्धृत मु० पाठः।

अथ "सुरा" कस्मात्? "सुनोतेः",—सा ह्यभिषूयते अनेकैर्द्रव्यैः पिष्टादिभिः।

"एव मुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः"। एव मनेन प्रकारेण उच्चावचेष्वर्थेषु बहुकारेषु समाहृताश्चान्ये एवं बहुप्रकारा निपतन्ति। प्रयुज्यमानास्ते लक्षणशास्त्र मेतच्चार्थनिर्वचनशास्त्र मुपेत्योपगम्य अनुप्रवेश्य, ईक्षितव्याः,—कः कस्मिन्नर्थे वर्त्तते? इत्येवं द्रष्टव्याः परीक्ष्या इत्यर्थः* ॥ ६ ॥

॥ इति निरुक्तवृत्तौ षष्ठाध्यायस्य तृतीयः पादः ॥ ६, ३ ॥

॥ चतुर्थः पादः ॥

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च तच्च नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद्यच्च स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि† तानि यथा गौरश्वः पुरुषो हस्तीत्यथ चेत्सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाऽऽचक्षीरन् यः कश्चाध्वान मश्नुवीताश्वः स वचनीयः स्याद्यत् किञ्चित्‡

---

* इत्तिपन्थेषु चक्षिन्नेव पादे ऽग्निमखण्डादिभागो निपाताश्चेत्यन्तः, परं सः सर्वमूलग्रन्थविरुद्धः। † "संविज्ञानानि" पाठोऽपि इत्तिकारसम्मतः। ‡ "किञ्च" घ।

तृन्द्यात् तृणं तदथापि चेत् सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः* स्यात् तचैवं स्थूणा दर्शया† वा सज्ञनी‡ च स्यात् (१२§) ॥ १ ॥

"इति"-करणेऽधिकारपरिसमाप्त्यर्थः। "इमानि चत्वारि पदजातान्यनुक्रान्तानि, नामाख्याते चोपसर्गनिपातास्च" इति। प्रतिज्ञाभ्यासो निगम इत्यर्थः। इतीमानि चत्वारि पदजातानीति व्याख्याय अनुक्रान्तानि;—पूर्वं माख्यातम्, ततो नामानि, तत उपसर्गाः, ततो निपाता इत्येव मानुपूर्व्येण क्रान्तानि वर्णितानि। व्याख्येयेति वाक्यशेषः। कतमानि पुनस्तानि? नामाख्याते चोपसर्गनिपातास्च—इति। तदपि व्याख्यात मेव॥ यच्च तदुक्तं,—'नाम्नः किञ्चिदवशिष्यते, तच्चतुर्थेन पादेन वर्णयिष्यामः'—इति (३९पृ० ३५०), तदिद मेवावसरप्राप्तं पदचतुष्टयलक्षणानन्तर मारभ्यते;—"तच्च नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयस्च"। तच्च तस्मिन्नेव पादचतुष्टये यानि नामानि तानि सर्वाण्येवाविशेषेणाख्यातजानीत्येवं शाकटायन आचार्यो ब्रवीतीति वाक्यशेषः। नैरुक्तानां चैष समयः सिद्धान्तः सर्वेषा मविशेषेण गार्ग्यवर्ज्यम्॥

आह—कः पुनरन्यथा ब्रवीति, येनैव मुच्यते,—शाकटायनो

---

* "प्रतिलम्भ"—इति निर्विसर्गपाठ एव सर्वत्र हस्तलिखित-मूलेषु।

† "दर्शया" क, ख, घ, ङ। ‡ "सज्ञनी" ख।

§ घ-ङ-च-पुस्तकेष्विच द्वादशखण्डसमाप्तिः।

ब्रवीतीति? उच्यते;—"न सर्वाणीति गार्ग्यः" ब्रवीति। किं गार्ग्य-एव ब्रवीति? नेत्युच्यते;—"वैयाकरणानां चैके" व्याकरण मधीयन्ते ये, ते वैयाकरणाः, तेषां चैके न सर्वाण्याख्यातजानि नामानीत्येवं ब्रुवत इति वाक्यशेषः॥

"तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि"—इति। तदेतत् प्रपञ्च्यते गार्ग्यपक्षेण। यान्याख्यातजानि नामानि, यानि यावन्ति, एवं पर्युपयुक्तस्तच्छब्दः। इह त्रिधा व्यवस्था नाम्नाम्। तद्यथा,—प्रत्यक्षक्रियाणि, प्रकल्पक्रियाणि, अविद्यमानक्रियाणि। तत्र, प्रत्यक्षक्रियाणि;—कारको हारक इति। प्रकल्पक्रियाणि, तद्यथा;—गौरश्व इति। अविद्यमानक्रियाणि, तद्यथा;—डित्थो डवित्थः, अरविन्दोऽर्वाङ् चन्द्र इति। तत्रैवं सति यत्र येष्वित्यर्थः। केषु नामसु स्वरसंस्कारौ; स्वरश्चोदात्तादिः, संस्कारश्च प्रकृतिप्रत्ययादिः, तौ स्वरसंस्कारौ। समर्थौ, समर्थता नामोपपत्तिरुच्यते; सङ्गतार्थौ; लक्षणशास्त्रविहितयोपपत्त्या युक्तावित्यर्थः। यथैव लक्षणाविप्रतिपत्त्या स्वरोऽवस्थितः, एवं संस्कारोऽपि। येष्वपि च प्रादेशिकेन, प्रदिश्यते द्रव्य मनयेति प्रदेशः क्रिया, या तस्मिन् द्रव्ये अवस्थिता यद्धेतुकस्तस्य नामधेयप्रतिलम्भोऽभिप्रेतः, तस्याः प्रदेशाख्यायाः क्रियायाः अभिधायको धातुः स गुण इत्युच्यते। अन्यत्र हि गुणशब्दोऽप्रधाने वर्त्तते। शेषः, अङ्गं, गुणः इति समानार्थाः। प्रधानन्तु तत्र क्रियाप्रदेशाख्या, तदभिधायको धातुः गुणाख्यः, स प्रदेशवाचकत्वात् प्रादेशिको गुण इत्युच्यते। तेन धातुरूपेणान्वितावनुगतौ स्वरसंस्कारौ स्यातां भवेताम्।

येषा माह, किन्तेषा मिति? उच्यते;—संविज्ञातानि तानि। समं विज्ञातानि ऐकमत्येन विज्ञातानीत्यर्थः। तेषु तावदविप्रतिपत्तिरेवास्माक माख्यातजानि नामानीति। तद्यथा;—कर्त्ता, कारकः; पक्ता, पाचक इति। न पुनर्यथा गौरश्वः पुरुषो हस्तीति। किङ्कारणम्? एतेषु प्रकल्प्यन्ते क्रियाः; न साक्षादुपलभ्यन्ते। अपि चैतेषु कल्पयितु मपि तावच्छक्यन्ते। तद्दिक्षादिषु पुनः कल्पयितु मपि शक्यन्ते। तस्मान्न सर्वाण्याख्यातजानि नामानीति। तच्च यदुक्तं 'सर्वाण्याख्यातजानि नामानि' इति तदयुक्तम्। रूढिशब्दे च क्रियाः केवलं शब्दव्युत्पत्तिकर्म्मण्युपलक्षणभूता निमित्तभावेनोपादीयन्ते, न वस्तुतोऽर्थक्रियास्वनुसहायभावं प्रति। तच्च शब्दस्य प्रच्युतानुपलब्धितेऽनुप्रवृत्तेऽभिधाने निर्वृत्तायां क्रियाया मुपरतसाधनव्यापारं निरूप्य क्रियाया मभिधानं वस्तुमात्रस्य प्रतिनिर्देशकं रूढिरित्यभिधीयते॥

अपरो व्याख्यामार्गः। "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्"। यत्र यस्मिन्नाम्नि स्वरसंस्कारौ, समर्थौ अष्टाध्यायीलक्षणोपपत्त्या युक्तौ, प्रादेशाभिधायिना च धात्वाख्येन प्रादेशिकेन गुणेनान्वितौ अनुगतौ, स्यातां न्यायवत्कार्मनामिकसंयुक्तेन संस्कारेण। तद्यथा;—कर्त्ता, कारकः; पक्ता, पाचक इत्येव मादि। तदाख्यातजं गुणकृत मिति प्रतीम इति वाक्यशेषः। येषु पुनरष्टाध्यायीलक्षणपराङ्मुखौ स्वरसंस्कारावनुगतौ, न च न्याय्यकार्मनामिकसंस्कारयुक्तेन प्रदेशाख्येन धातुरूपेण। किं तेषामिति? उच्यते;—"संविज्ञानानि तानि"। संविज्ञानपद मितीह शास्त्रे रूढिशब्दस्येयं सञ्ज्ञा। वक्ष्यति हि, अग्निरिन्द्र इत्येव मादीनां संविज्ञान-

पदत्वम्;—"यत्तु संविज्ञानभूतं स्यात्" इति*। तथा वृत्रहा पुरन्दर इत्येव मादीनां गुणपदत्वम्†। स एव मिहापि विभागो द्रष्टव्यः। तत्र गुणपदानि,—कारक-पाचकादीनि। संविज्ञानपदानि तानि "यथा;—गौरश्वः पुरुषो हस्ती" इत्येव मादीनि,—न ह्येषां गवादीनां अष्टाध्याय्यां व्युत्पत्तिलक्षणमस्ति, तस्माद्रूढिशब्दा एवैत इति॥

अन्ये तु प्रदेशो व्याकरणमिति व्याचक्षते। तत्र हि शब्दानां लक्षणानि प्रदिश्यन्ते। तत्कुतः? क्वचिल्लक्षणानुग्रहः लक्षणावयवो वा गुण इत्युच्यते,—प्रसिद्धो हि गुणशब्दोऽनुग्रहेऽवयवे च। तद्यथा;—'गुणे ममायं वर्त्तते' इत्युक्तेऽनुग्रहे वर्त्तते इति गम्यते; अवयवेऽपि,—'द्विगुणा रज्जुः', 'त्रिगुणा' इति चोक्ते द्ध्यवयवा अवयवेति गम्यते। शेषं समानमेव पूर्वाभ्यामर्थाभ्याम्॥

अथवा संविज्ञानानि तानि, संविज्ञातानि तानि चेत्युभावपि पाठौ। तस्मादुभयथाऽपि व्याख्यातम्;—सत्त्वं प्रदेश इति। के चिदङ्गभूता क्रिया गुण इति व्याचक्षते॥

किं चान्यत्? "अथ चेत् सर्वाण्याख्यातजानि नामानि स्युः"। तथाप्यय मपरो दोषः प्रसज्येत। आह, कतम इति? "यः कश्च तत् कर्म कुर्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्, यः कश्चाध्वान मश्नुवीत, अश्वः स वचनीयः स्यात्, यत् किञ्चित् द्रव्यात् द्रवं तत्"—इति। यः कश्चाविशेषेण प्राणी तत् कर्म कुर्यात्; यत् किञ्चिद-

---

* अत्रैवाग्रे दैवतकाण्डे १, २, ९।

† "अथेतः कर्मभिर्ऋषिर्देवताः स्तौति वृत्रहा पुरन्दर इति।" नि० दै० १, २, ९।

नेकप्राण्याश्रय मेकवदभिप्रेत्योच्यते,—तत्कर्म कुर्यादिति। सर्व मेव तं प्राणिनं तेनैवैकेन नाम्ना आचक्षीरन्। तद्यथा। यः कश्चाध्वान मविशेषेणानश्वोऽप्यश्नुवीत, अश्व इत्येवं स वचनीयः स्यात्। कस्माद्दाश्वः अश्नुवन्नश्व इत्युच्यते, अन्योऽश्नुवन्नपि नोच्यते? इति विशेषहेतुर्नास्तीति। तस्मादश्वोऽपि नैवाश्वनक्रियायोगाभिप्रायेणाश्व इत्युच्यते; किन्तर्हि? शब्दव्यवहार एवाय मर्थप्रत्यायनार्थः ईदृशः क्रियानिरपेक्षः। एव मेव, यत् किञ्चित् ढन्त्वादविशेषेण तत्सर्वं तर्दनक्रियायोगात् ढण मित्येव मुच्यते। तस्मान्न सर्वाण्याख्यातजानि नामानीति॥

किञ्चान्यत्? "अथापि चेत्" अथापि यदि। "सर्वाण्याख्यातजानि नामानि स्युः"। तथाप्यय मपरो दोषः स्यात्। आह, कतमः? उच्यते;—"यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेय-प्रतिलम्भः स्यात् तच्चैवम्"। तद्यथा;—"स्थूणा दरशया वा सज्जनी च स्यात्"। क्रियाहेतुके हि नामधेयप्रतिलम्भे सति यावद्भिर्भावैर्यावतीभिः क्रियाभिरेकं द्रव्यं संयुज्येत, तावद्भ्यो भावेभ्यः क्रियाभ्यो नामधेयप्रतिलम्भः स्यात्। किं कारणम्? न हि तत्र कामाच्चिद्व्यावर्त्तको विशेषहेतुरस्ति, अन्यासां वा नियामकः। तच्चैवं सति स्थूणा एकैव सती दरे शेते इति दरशया इत्युच्येत, न चोच्यते। तथा च सज्यतेऽस्यां वंश इति सज्जनीत्युच्येत, न चोच्येत। एव मनेकानि सत्त्वानि एकक्रियायोगादेकनामानि स्युः; एकं वानेकक्रियायोगादनेकनाम; उभयथापि च व्यवहाराप्रसिद्धिः। तस्मान्न सर्वाण्याख्यातजानि नामानि स्युः॥ १॥

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्या*चक्षीरन् पुरुषं पुरिशय इत्याचक्षीरन्नष्टेत्यश्वन्तर्हन मिति तृण मथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति प्रथनात् पृथिवीत्याहुः क एना मप्रथयिष्यत् किमाधारश्चेत्यथा-नन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्द्धान्तस्च-स्कार शाकटायन एतेः कारितश्च यकारादिश्चान्त-करण मस्तेः शुद्धश्च सकारादिश्चाथापि सत्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते (१३†) ॥ २ ॥

आह;—किमिति? उच्यते;—"यएषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्" । एषां पुरुषाश्वादिनाम्नां न्यायवान् लक्षणन्यायेन युक्तः।

आह ;—कः पुनरसाविति? उच्यते ;—कार्मनामिकः संस्कारः। कर्मकृतं नाम तत्पुनः पाचक-लावकादि, तस्मिन् भवः कार्मनामिकः संस्कारः। किञ्च । यथाचापि प्रतीतार्थानि स्युः, प्रतीतक्रियाणि स्युः तथैव नान्याचक्षीरन् जनाः ॥

आह;—कथं पुनराख्यायमानान्येतानि न्यायवता कार्मनामि-कानि संस्कारेणोपेतानि स्युः, कथं वा प्रतीतक्रियाणीति? उच्यते;—

* "तथैतान्या" ख, ङ।

† घ-ङ-च-पुस्तकेष्विद मधोदृश्यखण्डः समाप्तः ।

"पुरुषं" तावत् पुरि शय इत्याचक्षीरन्"। पुरि ह्यसौ शेते पुरिशय इति प्राप्नोति। एव मसौ न्यायवता कार्मनामिकसंस्कारयुक्तेन शब्देनोक्तः स्यात्। एवं चैष प्रतीतक्रियः शब्दो भवति। एव मेव "अष्टा इत्यश्वम्" आचक्षीरन्,—अश्नोति हि असौ इति अष्टा प्राप्नोति। एव मेव हन्यते तमिति "तर्दन मिति हणम्" आचक्षीरन्। न चैव माचक्षते। न चासति कारणे विद्यमाना क्रिया परोचीकर्तुं न्याय्या, तस्मात् न सर्वाणि आख्यातजानि नामानीति॥

"अथापि" इद मपर मप्राप्तं कुर्वन्ति; ते शाकटायनादयः। किम्? "निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति, प्रथनात् पृथिवी त्याङ्गः, क एना मप्रथयिष्यत्"—इति। निष्पन्ने, कस्मिन्? अभिव्याहरण मभिव्याहारः, तस्मिन्नभिव्याहारे; ततः पश्चादाभिमुख्येन स्थित्वा तस्याभिधानस्य, ततो विचारयन्ति।

कतमस्य धातोरत्र रूप मिति? आह;—प्रथनात्पृथिवीत्याङ्गः ते शाकटायनादयः।

आह;—ततः कि मिति? उच्यते;—तत्र वयं पृच्छामस्तावत्, यदीयं स्वभावत एव पृथिवी नाम अभविष्यत्, ततः क एना मपृथिवीं सतीं मप्रथयिष्यत्? कोऽस्याः प्रथन मकरिष्यदित्यभिप्रायः॥

अथापि कश्चिदस्याः अपृथिव्याः सत्याः प्रथनकर्त्ताभ्युपगम्येत, ततोऽपि च वय मिद मपरं पृच्छामः;—"किमाधारश्च इति"। च शब्दः समुच्चयार्थः,—सर्वस्य हि प्राणिजातस्येय मेवाधारः प्रतिष्ठा; अथ पुनर्यदेय ममथितासीत्, तदा योऽस्याः प्रथयिता स किमाधार आसीत्?—न ह्यनाधारेणाप्रतिष्ठितेन शक्येयं प्रथयितुम्, स

चाधारो नास्तीति प्रयत्नक्रियाभावः; प्रयत्नक्रियाभावे च सति क्रियाजान्येवमादीनि नामानीत्येतदयुक्तम्। तस्मान्न सर्वाण्याख्यातजानि नामानीति॥

"अथ" अपि इदं मपरं मप्राप्तं शाकटायनः कृतवान्।

आह;—किं मिति? उच्यते;—"अनन्वितेऽर्थे" इत्येव मादिर्दोषः।

आह;—वेदाङ्गानां मेकैक मनेकप्रभेदम्। तद्यथा;—निरुक्तं चतुर्दशप्रभेदम्। व्याकरणं मष्टप्रभेदम्। तत्र, केषां चिन्निरुक्तानां कैश्चिद्वैयाकरणैः साकं केषु चिच्छब्देष्वेकमत्यं केषां चिद्वैमत्यम्। तत्र, शाकटायनो नैरुक्ताश्च गार्ग्यवर्जं कानि चिद्भिधानान्यनेकैर्धातुभिरनुविदधति; कानि चिदेकेनैव। किं कारणम्? प्रति नियतो हि स्वेषु स्वेषु व्याकरणेषु शब्दानुविधानसमयः। तद्यथा;—पाणिनीया भूदिति प्रकृतिमुपादाय लडित्येतं प्रत्ययमुपाददते। ततः कृत्वा सानुबन्धलोपस्य लस्य स्थाने तिबादीनादिशन्ति*; तथा हि ते तं शब्दमनुविधातुं शक्नुवन्ति। स हि तेषां शब्दानुविधानोपायः पाणिनिना परिकल्पितः। सैषा शब्दानुविधाने तन्त्रशैलीत्येतदेवैकं प्रयोजनमुक्त्वा नान्यत् प्रयोजनमस्ति लडादीनां मध्ययने लोपे च। अपरे पुनर्वैयाकरणा लट मकृत्वैव तिबादीनेवोपाददते। तेषामपि हि शब्दानुविधाने सा तन्त्रशैली। एवं प्रतिनियतया स्वया स्वया तन्त्रशैल्या भवतीत्येवमादि समानमेव शब्दरूपं साधयन्ति। तच्चैवं शब्दानुविधानोपायविप्रतिपत्तौ सत्यां शाकटायन आचार्योऽनेकैश्च

* पा० सू० ३, ४, ७७-७८।

धातुभिरेक मभिधान मनुविहितवान्; एकेन चैक मेव। तत्र यदनेकैरनुविहितवान्, तदितरैर्गार्ग्यपाणिन्यादिभिर्न मृष्यते। किं कारणम्? अप्रसिद्धो हि स तेषां शब्दानुविधानमार्गः। धातुसमुदायमात्र मेव नामेति। अतस्ते शाकटायन माचक्षिप्यन्तः आहुः;—"अथानन्वितेऽर्थे" इति। अनन्वितेऽर्थे अननुगते शब्देनार्थे; यत्र संस्कार्यमाणोऽपि शब्दोऽर्थं मनुगन्तुं न शक्नोति। एवं धातुज(?) असमर्थो* भवति।

"अप्रादेशिके विकारे" च। यया हि क्रियया तद्द्रव्यं प्रदिश्यते, तदभिधायको यो धातुः, स तदभिधानं विगृह्यमाणं विकर्तुं न शक्नोति यत्र।

तत्र क्षीयमानप्रतिज्ञः शाकटायनः सर्वाण्याख्यातजानि नामान्युपपादयिष्यन्नसम्भवे सति काशकुशावलम्बनमिव कुर्व्वन् किमकरोदिति? "पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायनः"। पदेभ्यः आख्यातपदेभ्यः समस्तेभ्योऽवयवानुपादाय पदेतरार्द्धान् अन्यान् अन्यांश्च इतरेतराख्यान् पदावयवैरन्यैश्चान्यैश्चान्यदर्द्धं नाम्नः संस्कृतवान्॥

तद्यथा;—'सत्यम्'—इत्येतदभिधानं सञ्चस्कार। कथम्? "एतेः कारितं च यकारादिं चान्तकरणं सेः भूवृद्धं च सकारादिं च"। एतेः 'इण् गतौ (अ० प०)'—इत्यस्य कारितं एन्तं रूपं कृत्वा ततो यकार मन्त मादाय यकारान्तं कृत्वा सत्यशब्दस्यान्त मर्द्धं सञ्चस्कार; ततो 'यम्'—इति भवति। असेः भूवृद्धञ्च। 'अस् भुवि (अ० प०)'—इत्येतस्य भूवृद्ध मेव रूपं कृत्वा तकारान्त मित्यर्थः।

* "एवं धातु असमर्थो" ख, ग।

ततः सकारादिशब्दरूपं गृहीत्वा 'सत्'—इत्येतत्, 'सत्यम्'—इत्येतस्य शब्दस्य आदि मकरोदाद्य मर्थं सञ्चस्कार; तत्सदिति भवति। अत्र योऽय मस्तेस्तकारः, स यकार मधिरोहति। एव मेतदेक मभिधानं द्वयोर्धात्वोः सञ्चस्कार सत्य मिति भवति॥

अथ कोऽर्थः? सन्न मर्थ मापयति प्रत्यापयति गमयन्तीति सत्यम्। कारितं च यकारादिञ्च शुद्धञ्च सकारादिं चेति इतरस्य चेतरं चार्द्धं मिति समुच्चयार्थाश्चकाराः। एवं पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायनः; तदेतदन्याय्यं कृतवान्,—को हि नाम पदं विभज्यानेकधातुजं कुर्यात्। तदेतदकृतपूर्वं मन्यैर्विद्वद्भिः शाकटायनोऽतिपाण्डित्याभिमानादकरोत्,—यदभिनत् पदानि॥

अपि चोपजायते नः शङ्का;—ययासौ प्रवृत्तो नासौ पदेषु स्थास्यति, अपि चासौ वर्णानपि भेत्स्यति, अनेकार्थांश्च कल्पयिष्यति। यो हि पदान्यभिनत्, तस्य वर्णभेदे विशेषहेतुः को भविष्यति? तस्मादतिप्रसङ्गदोषोपपत्त्या नानेकधातुजानि नामानि, नापि सर्वाण्याख्यातजानि नामानीति॥

"अथापि" अय मपरो दोषः प्रसज्येत। कतमः? "सत्वपूर्वो भाव इत्याङः" अभियुक्तास्तद्विदः। सत्वं पूर्वं यस्मात्सोऽयं सत्वपूर्वः। किं कारणम्? सत्वाश्रय एव ह्यसौ। तत्रैवं सति, "अपरस्माद्भावात्" अपरकालीनेन भावेन क्रियया "पूर्वस्य" पूर्वोत्पन्नस्य "प्रदेशः" प्रदेशनं सञ्ज्ञा प्रतिलभ्यो "नोपपद्यते"। किं कारणम्? उत्पत्तिसहभूता हि सा, स्वेनाभिधानेन क्रियानिरपेक्षेणाभिसम्बद्ध मेव द्रव्य मुत्पद्यते,—नित्यसम्बद्धौ हि शब्दार्थौ। "इति तदेतत्" सर्वथा सर्वा-

ण्याख्यातजानि नामानीति शाकटायनमतं "नोपपद्यते"। तदनुपपत्तावस्मत्यवस्थितिः,—कानि चिदाख्यातजानि नामानि, कानि चिदनाख्यातजानीति। अथ शक्यते प्रत्यवस्थातुं प्रत्यवस्थीयतामिति परिसमाप्तो गार्ग्यपक्षः ॥ २ ॥

शाकटायनपक्षेणेदानीमेतान् दोषान् प्रतिसमाधास्यामस्तदर्थमिदमारभ्यते;—

यथो हि नु वा एतत्तद्यच्च स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति यथो एतद्यः कश्च तत्कर्म कुर्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इत्येतेनैवोत्तरः प्रत्युक्तो। यथो एतद्यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्येकपदिका यथा व्रततिर्हमूना जाद्य आट्णारो जागरूको दर्विर्होमीति। यथो एतन्निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति, भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः। प्रथनात् पृथिवीत्याहुः क एना मप्रथयिष्यत् किमाधारश्चेत्यथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः ॥ ३* ॥

* नेदं खण्डसमाप्तिर्दृश्यते घ-ङ-च-पुस्तकेषु।

"यथो हि नु वा एतत्" इति। यथेति वाक्योपादाने; यथा येन प्रकारेण। उ-कारोऽवधारणार्थः। व्याख्यात मेतद्,—"अथाप्युकार एतस्मिन्नेवार्थे (५६ पृ०)"। इतरेण येनैव प्रकारेण प्रसिद्ध माचार्येणाख्यातजत्वं प्रतिषिद्धं नाम्नः, तेनैव प्रकारेण प्रत्यनुभाष्यामीति। हि—इत्यस्यायाम्। कथं हि व्याकरिष्यतीति। नु—इत्येष हेत्वपदेशे। वै—इत्ययं यथोक्तपूर्वपक्षोपदेशार्थः। येनैव प्रकारेणासमर्था हेतव उक्ताः, तेनैव प्रकारेण प्रत्यनुभाष्य प्रतिवक्तृधर्मेण समीकरिष्यामः॥

यद्येतदुक्तं किमिति? "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्" इति। आह तत्र किमिति? उच्यते;—तदेतत् प्रत्युच्यत इत्युपयुक्तस्तच्छब्दः॥

आह,—केन पुनः प्रकारेण प्रत्युच्यत इति? उच्यते;—"सर्वं प्रादेशिक मित्येवं सत्यनुपालम्भ एष भवति"। सर्व मेव प्रादेशिकं सर्व मेव क्रियाजं नाम। आह,—ततः किम्? इत्येवं सत्यनुपालम्भ एष भवति। आह,—कथम्? शृणु। प्रदेशवाचिन आख्यातानुत्प्रेक्ष्य तदाश्रयौ स्वरसंस्कारौ यावद्गम्य मनुविधेयौ,—विभौ हि लक्षणगतिर्नैष शब्दापराधो नाप्यस्माकम्। भवत एवाय मपराधो मन्दशिक्षितत्वात्,—येनानुविधातुं स्वरसंस्कारौ विद्यमानावपि प्रदेशवाचिनि धातौ न शक्नोषि; स त्वं तावत् पुनः पुनः शिक्षस्वान्यद्व्याकरणं यावच्छक्तिस्तवानुविधातु मिति। व्याकरणेऽप्यष्टधा भिन्ने लक्षणैरेकदेशो विच्छिन्नः। कश्चित् सौत्रो धातुः, कश्चित् तुशब्द-चशब्द-वाशब्दातिरिक्ताध्याहारविभागादिगम्यः। तद्यथा। मतान्तरेष्वप्यभिन्नेषु कश्चित्

क्वचिद्विधिरुच्यते। ते च सर्व एव प्रयोग मिच्छता प्रयोगकाल उपसंहर्त्तव्याः। एव मिहापि सर्वाण्येव लक्षणशास्त्राण्युपेक्ष्याणि अखिलस्वरसंस्कारसिद्धये।—इति स त्वं तावत् शिक्षास्वनिर्घिणः, यावदखिलशब्दानां स्वरसंस्कारावनुविधातु मुपज्ञातुं सामर्थ्य मिति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"यः कश्च तत् कर्म कुर्यात्, सर्वं तत् सत्यं तथाऽऽचक्षीरन्निति"। अनेकेषा मेककियायोगादेकनामता प्रसज्येतेति॥

अत्र ब्रूमः;— न हि प्रसज्यते। त्व मपि पश्यसि, वय मपि च "पश्यामः समानकर्म्मणां" तुल्यकर्म्मणां अपि सतां कर्म्मकृतां "नामधेयप्रतिलम्भ मेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इति"। तक्षन् कश्चित् तक्षेत्युच्यते। अन्यः तक्षन्नपि न तक्षेत्युच्यते। आह,—कोऽत्र हेतुरिति? शृणु;—लोक मेव पृच्छ, त मेवोपालभस्व, न मयैष नियमः कृत इति। अथ च तद्यथा;—समान मोहमानानां कश्चिदेवार्थेन संयुज्यते, कश्चिन्न; वेदादीनाम्, एकार्थेन संयुज्यत इति अन्यैरपि संयुक्तः; सत्य मेकेन चालब्धम्। स्वभावतो हि शब्दानां क्रियाजत्वेऽपि सति का चिदेव क्रिया मङ्गीकृत्यावस्थितिर्भवतीति। अथवा क्रियातिशयकृतो नियमः स्यात्,—यो हि यदतिशयेन करोति, तस्यानेककियावत्त्वेऽपि सति तद्धेतुक एव नामधेयप्रतिलम्भो भवति॥

अयं समाधिः;—अथवा न ब्रूमो यो यत्र यदा च तक्षति, स एव तक्षेति। किन्तर्हि? यो यदा यत्र तक्षा भवति, स एव तक्षेति। तदेतल्लक्षण मनियतं, काम मन्येष्वप्यस्तु कदाचित् क्वचित् तेषा मप्यन्याः क्रिया नियततराः सन्ति, यद्धेतुको नामधेयप्रतिलम्भ इति। तेषां तु

तत्वा नियमतः तक्षतीति विशेषः। जीवन दक्षुरसः, शाकजातिर्वा। भूमिजोऽङ्गारकः।

"एतेनैवोत्तरः प्रत्युक्तः"। आह;— कतमः? यावद्भिर्भावैः संप्रयुज्येत तावद्यो नामधेयप्रतिलम्भः स्यादित्येषः। पश्यामोऽनेकक्रियायुक्तानामपि एकक्रियाकारितो नामधेयप्रतिलम्भो भवति। तद्यथा,— तक्षा, परिव्राजक इत्येतान्येवोदाहरणानि। तक्षा ह्यन्यान्यपि कर्माणि करोति। न पुनस्तस्य तत्ततो नामधेयप्रतिलम्भोऽस्ति। तच्च, यदुक्तमेकस्यानेकक्रियायोगादनेकनामता (प्रसज्येतेति। एतदयुक्तम्। न हि प्रसज्येत। यदि चोक्तमनेकेषामेकनामता, एकस्य चानेकनामता*) प्राप्नोति,—ततश्च व्यवहाराप्रसिद्धिरिति; न हि तदुभयमस्ति। अनेकेषामेकक्रियायोगे हि सति एकस्य चानेकक्रियायोगेऽपि हि सति व्यवस्थित एव शब्दनियमः स्वभावत एव लोके। तस्मान्न व्यवहाराप्रसिद्धिदोषोऽस्ति। तच्च, यदुक्तं व्यवहाराप्रसिद्धिदोषप्रसङ्गान्न सर्वाण्याख्यातजानि नामानीति; एतदयुक्तम्॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति"। अत्र ब्रूमः;—शब्दस्वाभाव्य मेतद्,— यत् तथा सर्वाण्याख्यायन्ते, यथा यथा प्रतीतार्थानि भवन्ति; न तत्राहं मपराध्ये भवतः, नापि शास्त्रम्। यथावस्थितानां हि शब्दाना मन्वाख्यानमात्र मेव क्रियते, नाहं शब्दानां कर्त्ता; य एषां प्रयोक्तारस्तानेवोपालभस्व, निराकुरु वा यदि शक्नोषि॥

---

* चन्द्रमती-चिह्नान्तर्गतपदानि क-पुस्तके न दृश्यन्ते।

आह;—कस्मात् पुनः कानि चिदाख्यायन्ते लोके ? तदभिधाने स्वाभाव्य मेव,—कानि चित् प्रतीतार्थानि, कानि चिदप्रतीतार्थानि; तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्त्तव्यानि; एतदेव शास्त्रस्य शास्त्रत्वम्,—यदप्रतीतार्थान्यपि प्रकृत्यादिना प्रतीतार्थानि सुस्थैर्नान्याचचीरन्निति आख्यायन्त एव कानि चित्, कानि चिच्छास्त्रेण प्रतीतार्थानि क्रियन्ते। रूढ्यनुविधायित्वाल्लक्षणस्य*; गुणतस्तेषु लक्षणम्। अपि च। "सन्ति" एव "अल्पप्रयोगाः" प्रतीतार्थक्रियाः केचित् "कृतः" कृत्प्रत्ययान्ताः शब्दाः "अपि" "एकपदिकाः" एकपदप्रकरणान्तर्वर्त्तिनस्तद्धुर्माणः। तद् "यथा,—व्रततिर्द्दमूना जाच्य आट्णारो जागरूको दर्विहोमीति"। व्रततिर्वृणातेर्वल्ली†। दमूना दममना वेत्येव मादि‡, अग्निरतिथिर्वा। जाच्यः§ जटावान्। आट्णारो‖ अटनशीलः। जागरूको¶ जागरणशीलः। दर्विहोमीति दर्व्या जुहोतीत्येवं प्रतीतार्थान्यपि शाकटायनाभिप्रायः। तच्च यदुक्तं—'न सर्वाण्याख्यातजानि नामानीति' तद् युक्तम्॥

"यथो एतत्"—यत् पुनरेतदुक्तम्,—"निष्पन्नेऽभिव्याहारेऽभि-

---

* "लक्षणशास्त्रस्य"—इति क।

† 'व्रततिर्वरणाच्च सयनाच्च तननाच्च' नैग० का० ९, ५, ९।

‡ 'दमूना दममना वा दानमना वा दान्तमना वापि वा; दम इति गृहनाम, तन्मनाः स्यात्' नैग० का० ४, १, ४। किञ्चान्यत्रापि—'दमूनाः चेत्तसाधाः' नैघ० का० ३, १, ३।

§ "रूपादाहतप्रशंसयोर्यप् (पा० ५, ३, ९९०)"—इत्यत्र 'अन्येभ्योऽपि दृश्यते'—इति वचनात् मत्वर्थे यपि रूप मेतत्।

‖ "आरगुदीचाम् (पा० ४, १, १३०)"—इत्यत्र 'रका सिजे अकारोच्चारण मन्येनोऽपि विधानार्थम्'—इति वचनात्। शतपथ-ब्राह्मणे च ८, ३, ९ द्रष्टव्यम्।

¶ "जागरूकः"—इति पा० ३, २, १६५।

विचारयन्तीति"। अत्र ब्रूमः;— युक्तं ते कुर्वन्ति—"भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः"। योगपरीष्टिर्नाम योगस्य परीक्षणम्॥

कथं चानुत्पन्नः सन्नभिधानयोगः परीक्ष्येत। तत्र यदुक्तं—"प्रथनात् पृथिवीत्याऊः"। "क एना मप्रथयिष्यत् किमाधारश्चेति"। वय मेवं ब्रूमः;—प्रथितेयं केन चिदतः पृथिवीय मित्याह। कथ मिय मप्रथिता सती पृथिवीत्व मापेति? उच्यते;—"अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः"। दृश्यमाना ह्येयं पृथिवी। तस्मात् यद्यप्यप्रथिता कैश्चिदन्यैस्तथापीयं पृथुदर्शनयोगात् पृथिव्येव। तत्र, यदुक्तं—'क एना मप्रथयिष्यत् किमाधारश्च?', एतद् युक्तम्; अन्यथा हि धात्वर्थो नोपपद्यत एव। तत्रैवं सति, यथा न विरोत्स्यते, तथा निर्वक्ष्यामः। तस्मादविरुद्धः शाकटायनाभिप्रायः॥ ३॥

अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते यथो एतत्पदेभ्यः पदेतरार्द्धात्सच्चस्कारेति योऽनन्वितेऽर्थे सच्चस्कार स तेन गर्हः* सैषा पुरुषगर्हा† यथो एतदपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्त्वाना मपरस्माद्भावान्नामधेयप्रतिलम्भ मेकेषां नैकेषां यथा बिल्वादो लम्बचूडक‡ इति बिल्वं भरणाद्वा भेदनाद्वा (१४§)॥ ४॥

॥ इति प्रथमाध्यायस्य चतुर्थः पादः॥ १, ४.

---

*"गर्ह्यं" घ, ङ, च।

† अतः परं "न शास्त्रगर्हा"—इत्यधिकः पाठः घ, ङ, च।

‡ "लम्बचूलक" क, ख, ग।

§ घ-ङ-च-पुस्तकेष्विह चतुर्दश-खण्डः समाप्तः।

"अध"। "अपि" च, यदि दृष्टेऽप्यस्माः पृथुत्वे न वय मुपलभ्यामहे। ननु "एवं" सति, "सर्व एव दृष्टप्रवादा उपालभ्यन्ते", न केवल मह मेव। योऽयं दृष्ट्वा ब्रवीति, स तत्र दोष एव। तथा सति, दृष्टहानं प्रसज्येत; अनिष्टं चैतत्। तस्मात् पृथुदर्शनात् पृथिवीत्युच्यते॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"पदेभ्यः पदेतरार्द्धात्संस्कारेति", अत्र ब्रूमः;—"योऽनन्विते" शब्देनानभिधेये "अर्थे" अननुगत मसम्बद्धं "संस्कार, स तेन" सम्बद्धेन संस्कारेण "गर्हः" गर्हणीयः। पुनराचार्यो योऽनुगतधातुभिरनेकैरेकाभिधानगतानर्थांस्ततः संस्कार, नैव मौढ्येन। "सैषा" तदभिप्रायापरिज्ञानात् "पुरुषगर्हा" पुरुषो हि कश्चित् अशिक्षितत्वादेकधातुज मपि न जानाति; किमुत बहुधातुजम्। अपि च, सन्ति लोके तादृशाः पुरुषाः, ये कारकहारकादीन्यपि प्रकटक्रियाणि सन्ति, कतमेभ्यो धातुभ्य एतान्यभिनिष्पाद्यन्त इति न जानते; एष पुरुषदोषो न शास्त्रदोषः,—यदनुगमयितुं शब्दैरर्थो न शक्यते। तत्र,—'यदुक्तम्, अननुगत एवार्थे संस्कार शाकटायनः, सन्त मेव ह्यर्थ मायवति गमयतीति', सत्यम्। तस्मादुपपन्न एव शाकटायनमतम्॥

अपि च, रूढिशब्दव्युत्पत्तिर्मन्त्रेष्वपि दृश्यते। यथा लक्षणं, तथा लक्ष्यं प्रवर्त्तितु मर्हति;— इतरथा हि कस्य तल्लक्षणं स्यात्। यदसर्पत् तत्सर्पिरिति मन्त्रः, यन्नवनीत मभवदिति मन्त्रः। अपि च, ब्राह्मणेनाप्यनेकधातुजान्येव कृत्वा निरुच्यन्ते। तत्र मन्त्राभिधानानि यत्परिज्ञाने च फल मुपपद्यते। आह;—"तदेतत् ऋचरꣳ हृदय मिति;

ह इत्येक मक्षर मभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येक मक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद, य मित्येक मक्षर मेति स्वर्गं लोके य एवं वेद (श० ब्रा० १४,८,४,१)"—इति। एवं हरतेर्ददातेरेतेर्हृदयशब्दः। तदर्थफलोपदर्शनार्थं ब्राह्मणेनैवं निरुक्तः। तच्च नः परं प्रमाणम्। तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान्,—यदनेकैर्धातुभिरेक मभिधानं निरुक्तवानिति।

"यथो एतत्" यत् पुनरेतदुक्तम्,—"अपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः", अत्र ब्रूमः;—"पूर्वोत्पन्नानां सत्त्वाना मपरस्माद् भावान्नामधेयप्रतिलम्भम्"। अपरस्मादपि सतो भावात्। "एकेषाम्? न एकेषाम्"। तद् "यथा",—"बिल्वादो लम्बचूड़क इति"। पश्चात्कालीनयापि चूड़ालम्बनक्रियया, भविष्यता योगेन बिल्वादनक्रियया च, पूर्वोत्पन्नस्य सत्त्वस्य नामधेयप्रतिलम्भ उपपद्यमानो दृष्टः। क्व चान्यत्र नोपपद्यते। तच्च यदुक्त मपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यते, रूढ्यैतदनेकत्वादयुक्तम्। उपपद्यत एव हि केषाञ्चिदिति॥

"बिल्वं भरणाद्वा भेदनाद्वा"। भृतं हि तद् भवति बीजानाम्; बिभर्त्ति वा दुर्भिक्षादौ भक्ष्यमाणं जनम्; भेदनाद्वा भिद्यते हि तद्वश्यं भक्षणायेति॥

आह;—किमिद मतिमध्विव किमपि पूर्वोत्तरपदसम्बद्धं नामाख्यातजल मधिकृत्योक्त मिति? उच्यते;—शिष्यबुद्धिव्युत्पाद्यार्थ मेतदुक्तम्; कथं नाम व्युत्पन्नबुद्धिः शिष्योऽप्रतिबुध्यमानः सर्वतोमुखानेव लौकिकवैदिकाञ्छब्दान्निर्ब्रूयादिति। सर्वान्येव हि व्याकर-

44436

णानि निरुक्तानि च वेदाङ्गत्वाविशेषात् प्रमाणानि। तेषा मेव फल मिदं साध्वित्येतदशक्यं तदुक्त मिति ॥ ४ ॥

॥ इति निरुक्तवृत्तौ षष्ठाध्यायस्य चतुर्थः पादः॥ ४ ॥

॥ पञ्चमः पादः ॥

अथापीद मन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेऽर्थ मप्रतियतो*नात्यन्तं स्वरसंस्कारोदेशस्तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यं स्वार्थसाधकञ्च, यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सोऽनर्थका हि मन्त्रास्तदेते† नोपेक्षितव्यं नियतवाचो युक्तयो नियतानुपूर्व्या भवन्त्यथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते। उरु प्रथस्वेति प्रथयति। प्रोहाणीति प्रोहत्यथा‡प्यनुपपन्नार्था भवन्ति। ओषधे चायस्वैनं स्वधिते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषिद्धार्था भवन्ति। एक एव रुद्रोऽवतस्थे न द्वितीयः। असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम्। अशुचिरिन्द्र§ जज्ञिषे शतं सेना अजयत्साकमिन्द्र इत्यथापि जानन्तं संप्रेष्यत्यग्नये समिध्यमानायानु ब्रूहीत्य-

---

* "मप्रतीयतो" क, ख। † "स्वदिति" क, ख, ग।

‡ "प्रोहति। अथा" ख।

§ इह मन्त्रांशे च-पुस्तकमात्रे इमानि स्वरचिह्नानि दृश्यन्ते।

थाप्याहादितिः सर्वमिति। अदितिः* द्यौरदितिरन्तरिक्षमिति†। तदुपरिष्टाद् व्याख्यास्यामोऽथाप्यविस्पष्टार्था भवन्त्यभ्यग्याहश्मिञ्जारयायिकाणुकेत्यर्थवन्तः‡ शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणं मृग्यजुर्वाभिवदतीति च ब्राह्मणम्§ ॥ ५ ॥

एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानां मेतल्लक्षणं परिज्ञायते—"अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते"। अथ शब्दोऽधिकारार्थः। द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति। अपीति सम्भावने। अपि पदेषु विभागेनावस्थितेषु लोके वेदे वा, अपि मन्त्रेषु वाक्यभावेनावस्थितेषु, यः समस्तार्थस्तस्मिन् प्रत्ययो विशेषावधारणं न विद्यते, न भवतीत्यर्थः। अपीदं शास्त्रं मन्तरेण पदार्थप्रत्ययो नास्ति। अपि वाक्यार्थ इत्यभिप्रायः॥

आह;— कः पुनः पदार्थवाक्यार्थयोर्विशेष इति? उच्यते;— साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थः। तद्यथा;—गौरित्युक्ते किमित्याकाङ्क्षा भवति, ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति; तथा गच्छतीत्युक्ते क इति साकाङ्क्षं भवति, तथा गौरित्युक्ते निराकाङ्क्षं भवति। अथेदानीं गौर्गच्छतीत्युक्ते गौर्वाहदोहादिभ्यो व्यावृत्य

---

* 'मित्यदिति' घ, ङ, च।

† नेदं स्वरचिह्नानि ङ-पुस्तके।

‡ "काणुकेति ॥ १५ ॥ अर्थवन्तः" घ, ङ, च।

§ घ-ङ च-पुस्तकेष्वस्य खण्डस्यादो नास्ति।

गमनेऽवतिष्ठते, गमनं चान्येभ्यो व्यावृत्य गव्येवावतिष्ठते । एष वाक्यार्थः । स एष प्रकरणाविरोधी वाक्यार्थः पदार्थं नियमेन लक्षयति, पदार्थश्च पदलक्षणम् । पदार्थसन्नियोगेन हि व्याकरणे पदानां प्रकृतिप्रत्ययादीनि लक्षणानि व्यादिश्यन्ते ॥

यत एव मतः "अर्थं मप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः" । अर्थं मप्रतियतोऽप्रतिपाद्यमानस्यानवधृतार्थस्येत्यर्थः । "नात्यन्तम्" । नैकान्तिकेन, एकान्तं नाम निश्चयोऽनिश्चयेनेत्यर्थः । किम्? 'स्वर-संस्कारोद्देशः' । स्वरोद्देशश्च संस्कारोद्देशश्च ; स्वरावधारणं संस्कारावधारणं नास्तीति वाक्यशेषः । किं कारणम्? न ह्यनवधृतार्थः स्वरसंस्कारावबधारयितुं शक्नुयात् ;—अर्थवशेन हि स्वरसंस्कारावबतिष्ठते ॥

"तदिदम्" एवं कृत्वा निरुक्तशास्त्रं "विद्यास्थानम्" एतदधीनत्वादर्थपरिज्ञानस्य । अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं "व्याकरणस्य कार्त्स्न्यं" कृत्स्नभावं, करोतीति वाक्यशेषः । व्याकरणे न हि स्वरसंस्कारौ चिन्त्येते । तस्मादपरिसमाप्त मेव तावद्व्याकरणं यावत् निरुक्तं नाधिगत मिति ;— न हि अनैरुक्तोऽर्थं मवधारयितु मलम्,—नानवधृतार्थः स्वरसंस्कारतत्त्वं विजानीयादिति ॥

आह ;—ननु व्याकरणस्य कार्त्स्न्यं मेतत् करोतीत्युक्ते तच्छेष मेवैतद्, गुणादिवत् ; ततश्च विद्यास्थानत्व मस्य विरुध्यत इति? नेत्युच्यते ;—"स्वार्थसाधकञ्च" । स्वार्थाजहद्वृत्त्या ह्येतदनषङ्गतो व्याकरणस्य कृत्स्नतां करोति । यथा लोके स्वार्थं मपरिहाय कश्चित्परानुग्रहं करोत्येवम् । यत्पुनरेतदुक्तं गुणादिवदिति । ते हि तन्त्रान्तर्भूता एव "उणादयो बहुलम् (पा० ३,३,१)"—इत्युक्तम्,

न पुनर्निघण्टवो बड्डल मिति। तस्मात् स्वतन्त्र मेवेदं विद्यास्थान मर्थनिर्वचनम्, व्याकरणन्तु लक्षणप्रधान मिति विशेषः॥

आह;—"यदि मन्त्रार्थप्रत्ययाय" एतदारभ्यते, हन्त, तदेव मर्थ मारभ्यमाणम् "अनर्थकम्" एव "भवतीति"। आह;—क एव माहेति? उच्यते;—"कौत्सः"। किं कारणम्? "अनर्थका हि मन्त्राः"। न हि मन्त्राणा मर्थोऽस्ति वाच्यवाचकत्वेन। तदर्थनिर्वचनायारभ्यमाण मिद मप्यनर्थक मेव भवति। तस्मान्नारभ्य मित्येवं कौत्सो मन्यते। "तत्" एतदेव मुच्यमानं कौत्सम् "एतेन" अनेन नैरुक्तेन "न" "उपेक्षितव्यम्"। उपगम्य वेदं शास्त्रञ्च ईक्षितव्यम्; किं मसौ सत्य माचष्टे उतेति वा परीक्ष्यम्। अर्थवत्त्वे मन्त्राणां यद्धेतुज्ञानं वक्ष्यमाणं तदुपगम्यार्थवत्त्वं मन्त्राणा मीक्षितव्य मिति केचिदाहुः॥

कया पुनरुपपत्त्या कौत्सो मन्त्राणा मानर्थक्य माहेति? उच्यते;—"नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति"—इति। नियतवाचो युक्तयः, निरूढवाचोयुक्तयः;—अभिधाननियता हि ते भवन्ति।—
२ १ २ २ १ २
"अग्न आ याहि वीतये (सा० सं० १,१,१,१)"—इति मन्त्रेण पुनर्विभावसो! आगच्छ पायेति। नियतानुपूर्व्या नियतनिष्ठानुपूर्वी पदप्रयोगस्य। तद्यथा,—'अग्नआयाहि' इति न पुनर्भवति 'आयाह्यग्ने' इति। इह लोकेऽर्थवतां शब्दाना मनियमेन पर्यायवचनता दृष्टा गवादिप्रयोगे, तथा न पौर्वापर्यं दृष्टम्। तद्यथा,—'गोणी मभ्याज', 'अभ्याज गोणीम्'; 'आहर पात्रम्', 'पात्र माहर' इति। न च तथा मन्त्रेषु। ततोऽर्थवच्छब्दवैधर्म्यात् पश्यामोऽनर्थका मन्त्रा इति॥

अथाप्यय मपरो हेतुरानर्थक्ये मन्त्राणाम्। आह;—कतमः? इति, उच्यते;—"ब्राह्मणेन" ते "रूपसम्पन्नाः" अपि सन्तो "विधीयन्ते" एव। यदि ह्येते अर्थवन्तोऽभविष्यन्, स्वेनैव लिङ्गेन स्व मात्मान मेते विनियोक्तुं समर्था इति ज्ञात्वा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त; विहिताश्च। तद् यथा,—"उरु प्रथस्वेति प्रथयति (श० ब्रा० १,१,६,८)* प्रथनलिङ्गो मन्त्रो विहितः प्रथनकर्मणि; तथा च,—"उरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् (य० वा० स० १, २२)"। यजुरिदम्, पुरोडाशं प्रत्युच्यते। पुरोडाश! त्वं विस्तीर्णप्रथनः सन् विस्तारप्रथाः, स्वात्मानं ते तव यज्ञपतिश्चायं यजमानः प्रजापशुहिरण्यादिभिश्चोरु प्रथतां विस्तीर्यता मिति। तथा,—"प्रोहाणीति प्रोहति (?)"—इति ब्राह्मणं द्रोणकलशप्रोहणविधावपि। "इद मह मात्मानं प्रोहामि(?)"—प्राञ्चं प्रेरयामि इति प्रोहाणीति प्रोहति, प्रोहणलिङ्गो विहितः प्रोहणकर्मणि। तस्माल्लिङ्गसम्पन्नविधानात् पश्यामो ब्राह्मणेनानर्थकस्वरूप मेव सन्तं मन्त्रं नियुक्तम्। एवं सति, मन्त्रं मन्त्रं पुनर्विदधत् ब्राह्मण मर्थवत्। अनर्थका मन्त्राः—न ह्यर्थवन्तः सन्तो दासवद् ब्राह्मणेन विधीयेरन्, विहिताश्च। तस्मादनर्थका मन्त्रा इति पश्यामः। अपि च;—ब्राह्मणस्यानर्थक्योपगम्ये देशकालकर्तृदक्षिणादिकर्माङ्गभूतं कुत उपलभ्येत? तथाच ब्राह्मणस्यानर्थक्येऽभ्युपगम्यमाने वेदैकदेशस्य मन्त्रस्यात्यन्त मेवानर्थकत्व मभ्युपगतं स्यात्;—न हि ब्राह्मणस्य विधिस्तत्यर्थावृतेऽर्थवत्ताऽस्ति, मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकाना मपि सतां विनियोगमात्रेणार्थ-

* 'उरुप्रथा इति प्रथयति यावत्कपालम्' इति का० श्रौ० सू० १, ५, १९।

वक्ता स्यात् । एतस्माच्च कारणमनर्थका मन्त्रा वाच्यवाचकत्वेन सन्तो विनियोगमात्रेणैवार्थवतो विधेयत्वात् विधायकत्वाच्च ब्राह्मणमर्थवदस्तीति ॥

"अथापि" अयमपरो हेतुरनर्थकत्वे मन्त्राणाम् । आह ;—कतमः ? इति, उच्यते ;—"अनुपपन्नार्थाः" हि एते "भवन्ति", य एतेष्वर्थो लभ्यते ;—अयमेतेष्वर्थः स्यादिति नासावुपपद्यते । तद्यथा,—"ओषधे त्रायस्व (य०वा०सं० ४,१.६,१५) एनम्"—इत्याह । न चौषधिरात्मानमपि त्रातुं समर्थाः, किमुतान्यं तक्षम् । तथा,—"स्वधिते मैनꣳ हिꣳसीः (य०वा०सं० ४,१.६,१५) इत्याह" आत्मनैव "हिंसन्" । को हि नाम एव मुक्त्वा स्वयमेव हिंस्यात् ? हिनस्ति च । लोके यान्येवंविधानि वाक्यान्युन्मत्तप्रभृतीनां तान्यनर्थकान्युच्यन्ते, तथैवेमानि । तस्मादिमान्यपनर्थकानीत्युपपद्यते ॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह ;—कतमः ? इति, उच्यते ;—"विप्रतिषिद्धार्था भवन्ति" इति । अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधो विप्रतिषेधः, इतरेतरव्याघात इत्यर्थः । तद्यथा,—"एक एव रुद्रोऽवतस्थे न द्वितीयः (?)", "असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् (य०वा०सं० १६,५४)"; "अशत्रुरिन्द्र जज्ञिषे (ऋ०सं० ८,७,२१,२)", "शतं सेना अजयत् साकमिन्द्रः (ऋ०सं० ८,५,२२,१)—इति" । एतान्युदाहरणानि । "एक एव रुद्रोऽवतस्थे न द्वितीयो रणे निघ्नन् पृतनासु शत्रून् । संसृज्य विश्वा भुवनानि गोपा प्रत्यङ् जनान्त्सञ्चुकोचान्तकाले* ॥"

---

* "जनान्त्सञ्चुकोचान्तकाले—" इति च-पुस्तकटीप्पन्याम् ।

एक एवावतस्थे रुद्रः' स्थितवान्, 'रणे' रणाय रणार्थम्, 'न' अन्यो 'द्वितीयः' कश्चिदस्ति। इति रुद्रबहुत्व-प्रतिषेधः। कथ मवतस्थे? 'नि' निश्चयेन 'घ्नन्', 'पृतनासु' स्पर्द्धनीयेषु सङ्ग्रामेषु शत्रून्'। किञ्च, स एकः 'संसृज्य' सृष्ट्वा, 'विश्वा' विश्वानि भुवनानि 'गोपा' रक्षिता; सृष्ट्वा च सर्गकालानन्तर मेव पालयिता च स्थितिकाले। 'प्रत्यङ्' प्रातिलोम्येन 'जनान्', 'सञ्चुकोच' सङ्कोचयति, 'अन्तकाले' प्रलयकाले। य एवं गुणयुक्तो रुद्रस्तं वयं स्तुमः। "असञ्ज्ञाता०—०तन्मसि*। एषा शतरुद्रियेऽनुष्टुप्। अनेन चाग्निचयने ऽर्कपर्णेनाजाक्षीरमिश्रा गवेधुकाः सप्तकृत्वो ह्रूयन्ते उत्तरस्यां श्रोणावन्यायां मिष्टकायाम्†। प्रजापते रार्षम्। 'असञ्ज्ञाता' असञ्ज्ञातानि 'सहस्राणि' बहूनीति यावदुक्तं स्यात्, केषाम्? 'ये रुद्राः' 'भूम्याम्' 'अधि' उपरि 'तेषां' 'सहस्रयोजने' अध्वनि अवस्थिताना मेव 'अव' 'तन्मसि' तनुमो 'धन्वानि' धनूंषि। अप्राप्ताना मेवास्त्रान् प्रतीत्यभिप्रायः। तावदेतानभिष्टुमो यावत्तताति तानि धनूंषि। "त्वं सिन्धून्०—०धन्वसु"‡। एतया अतिच्छन्दसा रुद्रं तुष्टाव

---

* "असञ्ज्ञाता०—० भूम्याम्। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि" य० वा० सं० १६, ५४।

† "शतरुद्रियहोमे उत्तरपक्षस्यापरस्यां सक्थ्यां परिश्रित्सर्कपर्णेनार्ककाष्ठेन श्रातयन् सञ्जातं जक्षिलमिश्रान् गवेधुकासक्तूनजाक्षीर मेके तिरश्चुदङ् नमस्त इत्यध्यायेन (य० वा० सं० १६ अ०) ह्रूनुवाकान्ते खाहाकारो जानुमाचे पश्चान्ते च नाभिमाचे प्राक् च प्रत्यवरोहेभ्यो मुखमाचे प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम्"—इति का० श्रौ० सू० १८, १, १—५। 'जक्षिलमिश्रान्' आरण्यतिलमिश्रान्।

‡ "त्वं सिन्धून् रवा सृजोऽधराचः अहन्नहिम्। अश्नुरिन्द्र जिघ्रे विश्वं पुष्यसि वार्यं तं त्वा परिष्वजामहे नभन्ता मन्यकेषां ज्याका अधि धन्वसु॥" ऋ० सं० ८, ७, २१, २॥

सुराः पैजवनः। षोड़शिनि शस्त्रे विनियुक्ता। हे 'इन्द्र!' 'त्वम्' 'अवासृजः' 'सिन्धून्' स्यन्दनान् एतान् माध्यमिकान् उदकसंस्थायान्। कथम्पुनरवासृजः? 'अधराचः' तानधिगमनान् कृत्वा सर्वानेवावासृजः, नित्यकालम् 'अहन् अहिम्' घ्नन् मेघम्। 'अशत्रुः' अशातयितव्यो 'जज्ञिषे' जायसे नित्यकालं भवसि, तस्मिन् हते मेघे। किञ्च, त्वमेतेन प्रकारेण मेघबधकर्मणा 'विश्वं' सर्वं 'पुष्यसि' पुष्णासि 'वार्यं' वारिभवं व्रीह्यादिकम्। 'तं' 'त्वा' त्वाम् एवङ्गुणसंयुक्तं वयं 'परिष्वजामहे' सर्वतः स्वजामहे। 'नभन्तां' मा भूवन् 'अन्यकेषाम्' अन्येषाम् 'ज्याका' ज्या 'अधिधन्वसु' अधिधनुःषु। किमुतान्ये के चनाभ्युद्यमाना एते स्म द्विषः अवततज्य धनुषो हतसर्वोद्यमाः सन्त्वित्यतस्त्वां परिष्वजामहे इत्यभिप्रायः। "आप्रुषः शिशान"—इत्येषा अप्रतिरथेन चिष्टुबग्निप्रणयने विनियुक्ता। अप्रतिरथस्येन्द्रपुत्रस्यार्षम्*। 'आप्रुषः' व्यापकः क्षिप्रो वा, 'शिशानः' शिशानः तीक्ष्णीकुर्वन् आयुधम्, प्रगृहीतायुधः, 'वृषभो न' वृषभ इव पुष्टो योद्धा, 'घनाघनः' जहिजहीत्येवं शब्दकारी, 'क्षोभणः', केषाम्? 'चर्षणीनाम्' प्रत्यनीकावस्थितानां मनुष्यादीनाम्, 'सङ्क्रन्दनः' समाक्रातां शत्रूणाम्, आह्वय च 'अनिमिषः' आदरवान् जयं प्रति, 'एक वीरः' एक एव विक्रान्तः अप्रतिद्वन्द्वः सङ्ग्रामेषु; 'शतं सेनाः' बह्वीः शत्रुसेनाः 'साकम्' अवस्थिताः 'अजयत्' एक इन्द्रो यः, तं वयं स्तुमः। एव मितरेतरविप्रतिषिद्धान्येतानि मन्त्रवाक्यानि। यद्येको रुद्रः, नामज्ञातानि

* "आप्रुषः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः॥" ऋ० सं० ८, ५,२२, १॥

सहस्राणि; अथामञ्छतानि, नैकः। यद्यशतुः, कथं शतं सेना अजयत्? अथ शतं सेना अजयन्, कथ मशतुः? लोके हि यान्येवंलक्षणानि वाक्यानि उन्मत्तादीनाम्, तान्यनर्थकानीति॥

"अथापि" अय मपरो हेतुर्मन्त्राणा मानर्थक्ये। कतमः? इति, उच्यते;—"जानन्तं सम्प्रेष्यति" अध्वर्युर्होतारम्। कथम्? 'अग्नये समिध्यमानायानुब्रूहीति'*। होता हि विधिज्ञ एव भवति;—न ह्यविद्वान् विहितोऽस्तीति स विजानात्येवामुष्मिन्नवधाविदं मयानुष्ठातव्य मिति। तदेतदज्ञातार्थस्य सतः सम्प्रेषण मनर्थक मेव भवति। यदेतदनर्थक मेव मन्येऽपि मन्त्रा इति॥

"अथापि" अय मपरो हेतुर्मन्त्राणा मानर्थक्ये। आह;—कतमः? इति, उच्यते;—"आह" मन्त्रनिगमः "अदितिः सर्व मिति"। आह;—किमुदाहरणम्? "अदितिर्द्यौरदितिरन्तरिक्ष मिति" "तत्" एतदुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"†। इह खेव मर्थ मिय मुदाहृता;—कथं यैव द्यौः, सा अन्तरिक्षम्? यैव माता, स एव पुत्रः, स एव पितेत्येव मादि किमपि बहुच परस्परासम्बद्ध मुच्यते? तदर्थवत्त्वे सत्युपपादयितु मशक्यम्। तस्मादनर्थका मन्त्रा इति॥

"अथापि" अय मपरो हेतुरानर्थक्ये मन्त्राणाम्। आह;—

---

* "तदु हैक आहुः। अग्नये समिध्यमानाय होतरनुब्रूहीति।"
ऋ० ब्रा० १, २, १, ३।

† "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्॥" ऋ० सं० १, ९, ११, ५।

‡ नैग० ४, ४, १।

कतमः? इति, उच्यते;— "अविस्पष्टार्थाः" अपि हि के चित् "भवन्ति"। तद्यथा,—"अम्यग्, यादृस्मिन्, जारयायि, काणुका, —इति" एव मादयः। न ह्येषां विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम्,—न च केचिदर्थवन्तः के चिदनर्थका इति न्याय्य मभ्युपगन्तुम्; अर्द्धावेशसं हि स्यात्। तस्मात् सर्व एवानर्थका इति॥ परिसमाप्तः पूर्वपक्षः॥

स्वपक्षनिदानं स्थापयिष्यामः, तदर्थ मिद मारभ्यते;—"अर्थवन्तः शब्दसामान्यात्" इति। अर्थवन्त एव मन्त्रा इति प्रतिज्ञा। हेतुरुच्यते,—शब्दसामान्यादिति। समान एव हि शब्दो लोके मन्त्रे च। तथा च, य एव गो-शब्दो लोके स्वरसंस्कारयुक्तः, स एव मन्त्रेष्वपि। तच्चैवं सति, सएवार्थवान् लोके, स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति, असति च विशेषहेतावर्थवन्त एव मन्त्राः शब्दसामान्यादित्युपपद्यते। यत्पुनरेतदुक्तम्,—प्रयोगानियमाल्लोकेऽर्थवत्त्वं प्रयोगनियमाच्च मन्त्राणा मानर्थक्य मिति; तत् प्रति वक्ष्याम एतत् लोकेऽपि हि प्रयोगनियमो दृष्टः। तद्यथा,—पितापुत्राविति॥

किञ्चान्यत्,—"एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाण मृग्यजुर्वाभिवदतीति च ब्राह्मणम् (?)"। एतदेव हि यज्ञकर्मणः समृद्धम्। तत् किम्? इति, उच्यते;—'यद्रूपसमृद्धम्' मन्त्रलिङ्गैरभिधीयते, तदेव हि समस्तवृद्ध्या युक्तं भवति, नेतरत्। एतदेव सुतरां स्पष्टीकरोति;—'यत् कर्म क्रियमाण मृग्यजुर्वाभिवदतीति च ब्राह्मण मिति'। शब्दसामान्याद् ब्राह्मणप्रामाण्याच्चेति। च-शब्दो ब्राह्मण मपि च मन्त्राणा मर्थवत्त्व मेवं दर्शयति।

अनर्थका हि मन्त्राः कथं कर्माभिवदेयुः? कथं वा ऽनभिवदन्तः समर्द्धयेयुः? अर्थवाचं वाभ्युपगतं भवता ब्राह्मणस्य? अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते इति अत्र ब्राह्मणेन मिद्धं मेवार्थवत्त्व मुक्तं मन्त्राणाम्। तदेतदुपदर्शितं मस्माभिस्तस्मादर्थवन्त एव मन्त्रा इति ॥९॥

क्रीळन्तौ* पुत्रैर्नप्तृभिरिति यथा एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति यथा एतद् ब्राह्मणेन रूपसम्पन्ना विधियन्त इत्युदितानुवादः स भवति यथा एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत यथा एतद् विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतद्यथ ऽस पत्नोऽयं† ब्राह्मणोऽनमिचो राजेति यथा एतज्ज्ञानन्तं संप्रेष्यतीति जानन्त मभिवादयते जानते मधुपर्कं प्राह‡ यथा एतददितिः सर्व मिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्राप्ताः पानीय मिति यथा एतद्विस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेन मन्धो न पश्यति पुरुषापराधः स भवति यथा जानपदेषु विद्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति (१६§) ॥१॥

प्रथमस्याध्यायस्य पञ्चमपादः ॥ १,५.

---

* ङ-पुस्तकादन्यत्र "क्रीलन्ती"-इत्येव पाठः, परं स संहितापाठविरुद्धः।
† "ऽसम्पन्नोऽयं" क, ख, ग। ‡ "प्राहेति" घ, ङ, च।
§ इत्र पोढ्यग्रखण्डः समाप्तः घ-ङ-च-पुस्तकेषु।

किं पुनः समट्टङ्रूपत्वे मन्त्राणा मुदाहरणम्? उच्यते;—"क्रीऊन्तौ"—इति। "दृहैव स्तं०—०गृहे"*। सूर्याया आर्षम्। विवाहे विनियुक्ता। अनुष्टुप्। 'दृहैव' 'स्तं' भवतं युवां, 'स्वे गृहे' 'मोदमानौ' हर्षमाणौ 'मा वि यौष्टम्' मा च वियुज्येताम्। 'विश्वं' सर्वम् 'आयुः' व्यश्नुतं क्रीऊन्तौ 'पुत्रैः' 'नप्तृभिः' पौत्रैश्च सहेत्याशीः। स्थापित मर्थवत्त्वं मन्त्राणाम्॥

अधुना परपक्षे हेतवो निराकर्त्तव्याः, तदर्थ मिद माह;—"यथो एतत्" इति। यत्पुनरेतदुक्तम्। "नियतवाचो युक्तयः, नियतानुपूर्व्या भवन्ति इति"। अत्र ब्रूमः;—"लौकिकेष्वपि" ह्यर्थवत्सु शब्देषु नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वञ्च दृष्ट मेव। "एतद्यथा,—इन्द्राग्नी पितापुत्रावितिं" च। तत्र, यदुक्तं नियतवाचोयुक्तित्वान्नियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इति। एतदयुक्तम्। लौकिकेष्वपि हि नियतप्रयोगाः सन्तः शब्दाः के चिदर्थवन्तो दृष्टाः, यथेन्द्राग्नी पितापुत्रावितिं। स एष प्रयोगनियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः। तस्मादर्थवन्त एवेति॥

"यथो एतत्" यत्पुनरेतदुक्तम्;—"ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति"। अत्र ब्रूमः;—"उदितानुवादः स भवति"। न समर्थ आत्मान मेव स्वेन रूपेण विधातु मित्यतो ब्राह्मणेन विधीयते किन्तर्हि आत्मनियोगाश्रय मुक्त मेव सन्तं मन्त्रेणार्थं ब्राह्मण मनु-

---

* "दृहैव स्तं मा वि यौष्टं विश्वं मायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥" ऋ० सं० ८, ९, १८, १।

वक्ति विस्तरेण प्रकृतार्थसन्तुष्टूषया, न ह्यनुक्तं स्तोतुं शक्यते; सोऽय मेव मुदितानुवाद एव भवति, उक्तानुवाद इत्यर्थः। अपि चानेकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति; ते ह्यदृष्टपूर्विकया एकं प्रयोगं प्रति 'खले कपोत'वत्* सम्पतन्ति, तेषां समुच्चये विकल्पे च प्राप्ते सति अभिमत एको नियमार्थं ब्राह्मणेन विधीयते। एव मुभयोरर्थवत्त्वं मन्त्रब्राह्मणयोः। तच्च यदुक्तं रूपसम्पत्त्वविधानान्मन्त्रानर्थक्यम्, मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्य मिति; एतदयुक्तम्। तस्मादुभय मर्थवत्—मन्त्राश्च ब्राह्मणञ्चेति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—'ओषधे चायस्वैनम्, स्वधिते मैनꣳहिꣳसीः,—इत्यादयः अनुपपन्नार्थाः भवन्ति। अत्र ब्रूमः;—ओषध्यधिदेवतेत्युच्यते; हे ओषधे! चायस्वैनम्; त्वत्पूर्वको ह्येष वृक्ष्च्छिद्यमानः सम्यक् छिन्नो भविष्यति, ततश्च यज्ञे विनियुक्तः। प्रतिविशिष्ट मुत्कर्षं मेतस्याः स्थावरत्वात् प्राप्स्यत इत्येतत् चाण मभिप्रेत्योक्त मोषधे चायस्वैन मिति, न छेदनं प्रतिपत्स्यतेऽल्प मित्यनेनाभिप्रायेण। तस्मादुपपन्नार्थ एवायम्। तच्च यदुक्त मनुपपन्नार्था इत्येवमादयो मन्त्रा इति, एतदयुक्तम्॥

यदपि चोक्तम्,—'स्वधिते मैनꣳहिꣳसी रित्याह हिꣳसन्निति'। तत्र ब्रूमः;—"आम्नायवचनाद्हिंसा" एषा "प्रतीयेत"। आह;—कथ महिंसा? प्रत्यक्षतो हि क्रियते वृक्षः। शृणु;—इय महिंसा, इयं हिंसा,—इत्यागमादेतत् प्रतीयते। प्रतिविशिष्टस्याथ मेव वैदिक

* इदं यथाभिः श्येनैः कपोताः, खले यथामी युगपत् पतन्ति, तथैवेति 'खले कपोत'-न्यायः। उक्तमेतत् सामान्यलक्षणाया आगदीक्षा मन्यत्रान्यत्र च।

आम्नाय आगमः, एतत्पूर्वकत्वादन्येषा मागमानाम्। स एष कृत्स्नस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन् हिंसायां कर्त्तारं विनियोक्ष्यत इति। कुत एतत् पुनरिय महिंसैव? यतोऽस्मान् नियुनक्ति कर्त्तारम्। तदेतदागमप्रत्यक्ष मेव यथेय महिंसेति। अपि चैतदोषधि-वनस्पति-पशु-मृग-पक्षि-सरीसृपाः सम्यगुपयुक्ताः सन्तो यज्ञे पर मुत्कर्षं प्राप्नुवन्ति। सोय मभ्युदय एव सम्पद्यते, न हिंसा। तच्च, यदुक्तं मैनं हिंसी रित्याह हिंसन्निति, न ह्यसौ हिनस्ति। किन्तर्हि? अनुगृह्णाति यज्ञः विनियोगार्थं विधानतः क्षिन्दन्। तस्मादुपपन्नार्थ मेव मपि। तच्च यदुक्तं मनुपपन्नार्थत्वादनर्थका मन्त्रा इति, एतदयुक्तम्॥

"यथो एतत्" यत् पुनरेतदुक्तम्;—"विप्रतिषिद्धार्था भवन्तीति"। अत्र ब्रूमः;—नैष विप्रतिषिद्धोऽर्थः,—"एक एव रुद्रोऽवतस्थे", "असङ्ख्याता सहस्राणि"—इति;—देवता हि महाभाग्ययोगादेकापि सत्यनेकधा भवति, अनेकापि चैकधा, तदुपरिष्टाद् व्याख्यास्यामो "माहाभाग्याद्देवतायाः (दै० का० ७,१,४)" इत्यत्र॥

यत्पुनरेतदुक्तम्;—"अग्निरिन्द्र जज्ञिषे", "शतं सेना अजयत् साकमिन्द्र"—इति। अत्र ब्रूमः;—"लौकिकेष्वपि" अर्थवत्सु शब्देषु "एतद्" एव मेवोच्यमानं दृष्टम्। तद् यथा;—असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति"। न हि कश्चिदसपत्नोऽस्ति लोके। उक्तं हि;—'मुनेरपि वनस्थस्य खानि कर्माणि कुर्वतः। उत्पद्यन्ते जयः पक्षा मित्रोदासीनशत्रवः'—इति। तथापि खल्वसपत्नं दृष्ट्वा केचिदेवं वक्तारो भवन्ति,—'असपत्नोऽयं ब्राह्मणः' इति। एव मेव कस्मिं-

स्विदतिप्रवृद्धे शत्रुं पातिते* मेघेऽन्येषा मसारता मभिप्रेत्येद मुक्तं स्यात्,—शत्रुरिन्द्र जज्ञिषे यस्त्वा मेत मेव मतिप्रवृद्धं महन्तहिम्—इति। यत् पुनरेतदुक्तम्,—'शतं सेना अजयत्'—इति। अत्र ब्रूमः;—कुतो हि सेनाः, या इन्द्रो जेष्यति?— न हि देवानां शत्रवः सन्ति, ये जेतव्या इति। किङ्कारणम्? विभवो देवा वशिनः अधिकरण-धर्माश्च परेण महिम्ना युक्ताः। आह;—कथन्तर्हि 'शतं सेना अजयत्' इत्येतदुक्तम्? उच्यते;—रूपकल्पनयैवैषा युद्धप्रवादात् स्तुतिः; वक्ष्यति च "अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तचोपमार्थेन युद्धवर्णा भवन्ति (नैग० का० २,५,२)"—इति। तदेतद् भवता न सम्यग् दृश्यते, सम्यगन्विष्यतां देवतातत्त्वं नैरुक्तेभ्यः, ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यसे। नैव मवाक्यतत्त्वज्ञेन मन्त्रार्थो विगाहितुं शक्यः। गम्भीर पदार्थो हि वेदः, कथ मवभोत्स्यते? वेदार्थ-विबाधविभ्रान्ता एव हि प्रवादिनः स्वबुद्धिलाघव मविर्भावयन्तो ब्राह्मणाः मन्तः सर्ववर्णसाधारणानि दर्शनान्तराणि प्रतिपेदिरे। यदुक्तं विप्रतिषिद्धार्थत्वादनर्थका मन्त्रा इति। एतदयुक्तम्। न ही मे विप्रतिषिद्धार्थाः;—भवत एव मतिविभ्रमो मन्दधिचित्तत्वात्। तस्मादर्थवन्त एव मन्त्रा इति॥

"यथो एतत्" यत् पुनरुक्तम्,—"जानन्नं सम्प्रेष्यतीति"। अत्र ब्रूमः;—लौकिकेष्वर्थवत्सु शब्देषु एतदेव स्वाभाव्यं दृष्टम्। "जानन्तम्" गुरुम् "अभिवादयते" स्वगोत्र मभिवदन्†। तथा च

* "शातिते" ख।

† तथाच "अमुमत्रिवत्ता गुरुं गोत्रेणाभिवादयते (गो० ब्रा० सू० १,२,१२)"—इत्यादि विधानं द्रष्टव्यम्।

"जानते मधुपर्कं प्राह" चिर्मधुपर्को मधुपर्को मधुपर्कः इति। तदेतदर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थशब्दसामान्यादर्थवन्तो मन्त्रा इति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथाप्याह "अदितिः सर्वमिति"। अत्र ब्रूमः;—द्विविधा हि शब्दप्रवृत्तिः, मुख्यार्था गौणी च। तत्रैवं सति यत्र मुख्यासम्भवस्तत्र गौणाश्रीयते। स एष भक्तिवादोऽदितिः; यथा कश्चिद् ब्रूयात् कश्चिदनेकोपकारे प्रवृत्तम्—'त्वमेव मे माता, त्वं मे पिता'; एव मेतदपि द्रष्टव्यम्। "लौकिकेष्वपि" चार्थवत्सु शब्देषु "एतत्" उच्यमानं दृष्टम्, "यथा;—सर्वरसा अनुप्राप्ताः पानीय मिति"। ततो हि तेषां प्रभव इत्यनया गुणवृत्त्या एव मुच्यते; एव मिहापि गुणवृत्त्या कया चिददितेः सर्वत्वमुच्यते। यदुक्त मितरेतरविरुद्धं किमपि बक्तवेति; एतदयुक्तम्। सर्वमेतदुपपद्यत एव गुणवृत्त्या। तस्मादर्थवन्त एव सर्वमन्त्रा इति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथापि "अविस्पष्टार्था भवन्तीति"। अत्र ब्रूमः,—"नैष स्थाणोरपराधः" इति। न ह्यत्र स्थाणुरपराध्यति "यदेनं" स्थाणुम् "अन्धो न पश्यति" यदचासावभिहन्यते। किन्तर्हि? "पुरुषापराधः स भवति" पुरुष एवापराधी तत्र, यदसावचक्षुष्मान्। एव मिहापि नैव मन्त्राणा मपराधो यदग्रिचितेन भवता न विज्ञायन्ते, भवत एवापराधोऽस्ति; भो भवान् सर्व मात्मीय मपराधं मन्त्रेष्वग्नासु वा संयोजयितु मिच्छति, न तव प्रज्ञास्ति किञ्चित्॥

"यथा,—जानपदीषु" कासु चित् प्रवृत्तिषु इतिकर्त्तव्यतासु

कौशलग्रिचाकृतः "विद्यातः पुरुषविशेषो भवति"। पुरुषाणां विशेषः। एव मिहापि मन्त्रार्थग्रिचाकौशलकृतः पुरुषाणां विशेषो भवत्येव। तत्रैवं सति, के चित् पुरुषा येषु विस्पष्टानपि मन्त्रान् न शक्नुवन्ति निर्वक्तुम्, अपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्त्तुम्। तदुक्तम् "उत त्वः (ऋ० सं० ८,२,२ ३,४। नैघ० का० १,६,३)" —इत्यत्र ॥

तत्रैवं सति, "पारोवर्यवित्सु तु खलु वेदिष्टेषु भूयोविद्यः प्रशस्तो भवति"—इति। य एते पारोवर्यविदो ब्राह्मणाः, पारोवर्येण विजानन्ति आचार्यपरम्परया, ते पारोवर्यविदः, न साक्षात्कृतधर्माण इत्यभिप्रायः। तेषां किम्? तेषां य एव भूयोविद्यो भवति बहुश्रुतः क्वचित् स एव प्रशस्यते। य एव मन्त्रार्थविज्ञाता प्रशस्तो भवति, नेतरो मन्दबुद्धिरग्रिचितः, स हि बहुश्रुतो बहुदृष्टत्वादनेकविषये मन्त्रार्थे न क्वचित् प्रतिबध्यते; न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति। तस्माद्धेतोः स त्वं बहु शृणु, ततः सम्यगवभोत्स्यसे मन्त्रार्थान्। तत्र यदवोचः 'अविस्पष्टार्था मन्त्राः', न हि ते अविस्पष्टार्थाः; तांश्चोपरिष्टात् स्पष्टीकृत्य व्याख्यास्यामहे। तवैष मतिं भ्रमयति सम्मोहः। तस्मादर्थवन्त एव मन्त्रा इति सिद्धम्। तस्माच्चैतदपि शास्त्रं मन्त्रार्थप्रत्ययायारभ्यमाणं मर्थवदेव भवतीति सिद्धः शास्त्रारम्भः। तत्र, यदुक्तं 'यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति', एतदयुक्तम्। इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुत्थिते च कारणे अवस्थिता मन्त्रगणस्य सार्थता, तदर्थ मेतत् खलु शास्त्रं मर्थवदिति ॥ २ ॥

॥ इति निरुक्तवृत्तौ षष्ठाध्यायस्य पञ्चमः पादः ॥ ५ ॥

॥ षष्ठः पादः ॥

अथापीद मन्तरेण पदविभागो न विद्यते। अवसाय पदते रुद्र मृळेति*। पददवसङ्गावः पथ्यदन मवतेर्गत्यर्थस्यासौ नामकरणस्तस्मान्नावगृह्णन्ति। अवसायाश्वानिति। स्यतिरुपस्पष्टो विमोचने तस्माद्वगृह्णन्ति। दूतो निर्ऋत्या इद मा जगामेति। पञ्चम्यर्थप्रेक्षा† वा षष्ठ्यर्थप्रेक्षा‡ वाः कारान्तम्§। पुरो निर्ऋत्या आ चक्ष्वेति। चतुर्थ्यर्थप्रेक्षै॥ कारान्तम्परः सन्निकर्षः संहिता पदप्रकृतिः संहिता पदप्रकृतीनि सर्वचरणानां पार्षदान्यथापि¶ याज्ञे दैवतेन बहवः प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते चेद् ब्रूयुर्लिङ्गञ्चा अच स्म इति। इन्द्रं** नत्वा शवसा देवता वायुम्पृणन्तीति। वायुलिङ्गं चेन्द्रलिङ्गञ्चाग्नेये मन्त्रेऽग्नि†† रिव मन्यो त्विषितः सहस्वेति तथा‡‡ ऽग्निर्मान्यवे मन्त्रे त्विषितो ज्वलितस्त्विषिरित्य-

---

* "मृळेति" क, ग, "मृडेति" ख, ङ।
† "पञ्चम्यर्थः प्रेक्षा" क।
‡ "षष्ठ्यर्थः प्रेक्षा" क।
§ "वाकारान्तम्" च।
॥ "चतुर्थ्यर्थः प्रेक्षै" क।
¶ "पार्षदानि। अथापि" च।
** "इनीन्द्र" ख।
†† "मन्त्रे। अग्नि" ङ, च।
‡‡ "सहस्वेत्यथा" क, ख, ग। "सहस्वेति। तथा" च।

प्यस्य दीप्तिर्नाम भवत्यथापि* ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च (१७†) ॥ १ ॥

"अथापीद् मन्त्रेण पदविभागो न विद्यते"। शास्त्रारम्भप्रयोजनाधिकारे वर्त्तमाने अपीद् मन्त्रेण मन्त्रेष्वर्थावधारणं नास्तीत्युक्ते यदि मन्त्रेत्यादिनानर्थक्यहेतुभिर्बह्वभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य, कौत्सेन, मन्त्राणा मर्थवत्तां स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः। तेषु स्थित मर्थवत्त्वं मन्त्राणाम्। तेषा मर्थनिर्वचनायेद मारभ्यमाण मर्थवदित्युपपन्न मर्थवत्त्वं निरुक्तशास्त्रस्य। तदेतत् सर्व मपि चोदकशास्त्रकारव्याजेन प्रसक्तानुप्रसक्त मुक्तं प्रज्ञाया विवृद्धये शिष्यस्य। कथन्नामा सा विवृद्धप्रज्ञा? शब्दार्थन्यायसङ्करेषु हेतुसमयानभिज्ञः परैः प्रतिबध्यमानोऽपि पदार्थान् वाक्यार्थांश्चासम्मोहेन निर्ब्रूयादिति। एवन्तावत्, एतदन्तरेण मन्त्रार्थप्रत्ययो नास्ति। अथेद मपर मारम्भप्रयोजन मित्येवं विशेषाधिकारार्थोऽय मथ-शब्दः। अपि मन्त्रार्थप्रत्यय इद मन्तरेण नास्ति, नाप्यस्ति यदिदं वक्ष्यमाणम्; इत्यपि-शब्दः एवं सम्भावने।

आह;—किम्पुनस्तद् वक्ष्यमाणम्? इति, उच्यते;—'पदविभागः'। 'एवं पदानि वक्तव्यानि'—इत्येतद् विभागपरिज्ञानं नास्तीत्यर्थः। किं कारणम्? अर्थवशेन हि पदान्यवतिष्ठन्ते, न चेद मन्तरेणार्थपरिज्ञान मस्ति। तस्मादत एव पदविभागप्रसिद्धिरिति। इद

---

* "भवति ॥ अथापि" च।

† "इदैव सप्तदशखण्डः समाप्तो घ-ङ-च-पुस्तकेषु।

मर्थवत्त्वं मन्त्राणा मन्तरेण पदविभागोऽप्यकिञ्चित्करः। प्रसिद्धश्चैष* सर्वशाखासु। तस्मात् पदविभागार्थवत्त्वाय चार्थवन्तो मन्त्रा इति केचिद् वर्णयन्ति॥

एवं प्रतिज्ञाय समानसंहितेषु ग्रन्थेष्वर्थहेतुकं पदविभागविशेषं दर्शयति, तद्यथा;—"अवसाय पदते रुद्र स्तुहेति"। "पदत्" पादवत् पादसंयुक्तम्। "अवसं गाव पथ्यदनम्" इति निगमप्रसक्तस्य पर्यायवचनम्। "अवतेर्गत्यर्थस्यासौ नामकरणः" प्रत्ययः। "तस्मात्" असमासत्वादस्य "नावग्रहन्ति" एतत्पदकारा इति शेषः। "मयोभूः ०—० रुद्र स्तुह"†। सुचरो नाम गौतमः‡ स मयोभूरित्यस्यास्त्रिष्टुभः पूर्वैस्त्रिभिः पादैः गवा माशिष माशास्योत्तमेन ताभा मेव च रुद्रात् सुख मयाचत। गवा मुपस्थाने विनियुक्ताः§। 'मयोभूः' मयोभावयिता पाश्चात्यो 'वातः', एताः 'ऊर्जस्वतीः' 'अभि वातु' अभिसुखेन वातु। किञ्च, तेन सुखभुवा वातेनानुद्वेजनीयेन स्पृश्यमानाः 'ऊर्जस्वतीः' प्रभूतरसाः 'ओषधीः' 'आ रिशन्ताम्' आखादयन्तु।

---

* एष पदविभाग इत्यर्थः। सन्त्येव सर्वास्वेव शाखासु यथा संहिताग्रन्थानि, तथैव तत्तत्पदग्रन्थानि च। तथा हि;—सामवेदीय कौथुम-शाखायाः संहिताग्रन्थारम्भवाक्यमेतत्,—"अग्न आयाहिवीतये", पदग्रन्थारम्भवाक्यञ्चैतत्,—"अग्ने। आ। याहि। वीतये"—इति। संहितापदयोः स्वरपार्थक्ये स्वरस्तत्रापीव नियामकानि।

† "मयोभूर्वातो अभि वातूषा ऊर्जस्वतीरोषधीरा रिशन्ताम्। पीवस्वतीर्जीवधन्याः पिबन्त्वनमीवाय रुद्र स्तुहि॥" ऋ० सं० ८, ८, १७ १॥

‡ 'कचीवद्गोत्रस्य ऋषेरपत्यम्'—इति सायणीय ऋग्भाष्यम्।

§ 'माः प्रतिष्ठमाना अनुमन्त्रयेत०' आ० श्रौ० १, १०।

आखाद्याखाद्य च सलवणखाद् मात्माभिप्रेते काले उदकं 'पिबन्तु'। तच्च पीत मोषधिसहित मासां तथा कोष्ठे विपच्यतां रस-शोणित-मांस-मेदो-मज्जा-ऽस्थि-क्रमेण यथैता: पीवस्वत्यो भवेयु:। 'पीवस्वती:' पीवगुणयुक्ता: स्थूला बलवत्यो बहुपयस्का: सति च बहुपयस्त्वे 'जीवधन्या:' जीवधनिन्योरोगदुष्टमाहका:(?)। हे 'रुद्र!' वयम् एतासां गवाम् एताम् आशिषम् आशास्महे। त्व मप्यस्मै गोलक्षणाय 'पशवे' 'अवसाय' पशदनाय 'मृड' सुखो भव। मैनां हिंसीस्त्व मासा मीश्वर इत्यभिप्राय:॥

"अवसायाश्वानिति"। इद मपर मुदाहरणम्। अस्मिन् पूर्वेण रूपेण सरूप मेव पद मर्थकृताद् विशेषादवगृह्यति। द्वयो: पदयो: बहूनां वा पदविच्छेदेनोच्चारणं स समास:। तयोरेवार्थविभागोपदर्शनार्थं मवच्छेदेन ग्रहण मवग्रह:। तदेतदवगृह्यते पदम्,—"स्वति:" दातु: "विमोचने" अर्थे वर्त्तते, स पुन: "उपसृष्ट:" उपसर्गेणावेत्यनेनोपसृष्ट: संयुक्त इत्यर्थ:। यतो धातूपसर्गविभागोपप्रदर्शनार्थ मेव तत् पद मवगृह्यते अवसायेत्येतत्। "योनिष्टे०—०प्रपित्वे"*। एतया चिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टाव। "योनिस्ते"। हे 'इन्द्र'! 'योनि:' स्थानं 'ते' तव यदिदं 'निषदे' निषदनाय, मया 'अकारि' कृतम्, 'तं' योनिं तत् स्थानम् 'आ निषीद' एत्य निश्चयेन सीद। कथम्पुनर्निषीद? 'स्थानो न' स्खन्यमान इव 'अर्वा' अश्व:। संग्रह्यमान इवाश्वबन्धेनाश्व: स यथा स्वे स्थाने निषीदेदेवं मया त्व मपि

* "योनिष्ट इन्द्र निषदे अकारि तं मा नि षीद स्थानो अर्वा। विमुच्या वयोऽवसायाश्वान् दृषा वशोर्वशो यस: प्रपित्वे॥" ऋ० सं० १, ७, १८, १।

श्रूयमानस्तुतिभिरेतस्मिन् मया संस्तृते स्तीर्णे बर्हिषि स्थाने निषीद। कथम्पुनर्निषीद? 'विमुच्य' एतान् 'वयः अश्वान्'। कुतः? रथात्। पुनरपि च एतान् 'अवसाय' वियोज्य रश्मिभ्योऽश्वान् लब्धोदकयवसान् कृत्वा 'दोषावस्तोर्वहीयसः' अहनि च रात्रौ च ये के चिद् वहन्ति, तेभ्योऽपि वहीयसः शीघ्रतमेन जवेन वोढृतमान् ततस्त्वं स्वस्थो भूत्वा निषीद। एतस्मिन् योनौ एतस्मिन् संस्तृते बर्हिषि 'प्रपित्वे' प्राप्ते अस्माकं त्वद्-यजनकाले मा नो विघ्नं कार्षीरित्यभिप्रायः॥ एवन्तावदिद मवगृह्य मिद मवगृह्य मित्यर्थपरिज्ञानद्वारेण "तस्माद्" एतन्निरुक्तशास्त्रात् विज्ञायते॥

यान्यपि च खल्वनवगृह्याणि पदानि समानसंहितानि, तेषा मप्यर्थकृत मेव विभागवैशेष्यं भवति। तद्यथा,—"दूता निर्ऋत्या इद माजगामेति पञ्चम्यर्थप्रेक्षा वा" अस्मिन् पदे पञ्चम्यर्थदर्शनं वेत्यर्थः, पञ्चम्यर्थोऽत्र दृश्यते? "षष्ठ्यर्थप्रेक्षा वा" षष्ठ्यर्थदर्शनं वेत्यर्थः, षष्ठ्यर्थोऽत्र दृश्यते? अत एतत् "आःकारान्तम्" पदं निर्ऋत्या इति। "देवाः कपोत०—० चतुष्पदे"*। प्रचेता नामाङ्गिरसः, तेनेयं कपोतसूक्ते दृष्टा। कपोतनिलयनशान्त्यै कपोतपदहरणएतत्सूक्तम्। चिष्टुबेषा। हे 'देवाः!' 'कपोतः' 'इषितः' प्रेषितः' निर्ऋत्याः' सकाशात्, तयैवानुप्रेषित इत्येवं षष्ठ्यर्थः। अथवा निर्ऋत्याः सकाशादित्येवं पञ्चम्यर्थः। 'यत्' कर्तुम् 'इच्छन्' 'इदम्' अस्मद्गृहम्

---

* "देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इद मा जगाम। तस्मा अर्चाम कृणवामा निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे॥" ऋ० सं० ८, ८, १९, १।

'आ जगाम'। यस्य नः पापस्य च पापकर्मणो जन्मान्तरकृतस्य एतत् कपोतगृहनिलयनं तत्पददर्शनं च कुड्यादिषु विपाकलिङ्गम्। 'तस्मै' कर्मणे तदर्थं युष्मानेव 'अर्धाम'। समर्था यूय मेतत् पापकर्म विपच्यमान मस्माक मपहर्तुं मृजु विपाकं वा कर्तुं वय मपि च तस्मै पापकर्मणे 'कृणवाम' 'निष्कृतिम्' निष्क्रमणं निर्णेजनम्, तपसा एतद्भूतानुरूपेण। यतो ब्रूमः;—'शं नः' सुखं नः 'अस्तु', 'द्विपदे चतुष्पदे' युष्मत्प्रसादेन च स्वेन तपसेत्यभिप्रायः॥

"परो निर्ऋत्या आ चक्षेति"। एतस्मिन् पदे "चतुर्थ्यर्थप्रेक्षा" चतुर्थ्यर्थदर्शनम्। अत एतत् पदम् "ऐकारान्तम्"। "अपेहि मनसस्पते०—०मनः"*। प्रचेता नाम आङ्गिरस एता मनुष्टुभ मपश्यत्। दुःस्वप्नदर्शने विनियुक्ता। मन इति विज्ञान मुच्यते, बुद्ध्यादिः तस्य पतिः मनसस्पतिरात्मा; इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः। उभावपि स्वकृतकर्मापेक्षया प्राणिनां बुद्ध्यादिविज्ञानापसंहारस्वेशाते। तयोरन्यतरः सम्बोध्यते,—हे 'मनसस्पते!' 'अपेहि' अप गच्छ। अस्मत्तो गत्वा च त्व मीषदपगम्य अस्मत्तः, समीप एव मा स्था अस्माकम्। किन्तर्हि? 'अप क्राम' दूर मपेत्य क्राम। अपक्रम्य च 'परः' परतः, अन्यचास्मत्तः 'चर' अपुनरावर्त्तमानो ऽस्मान् प्रति। किञ्च 'परः' परागत्य, यस्याः त्वं दूतः निर्ऋत्याः, तस्यै 'निर्ऋत्यै' 'आ चक्ष्व'। किमिति? 'बहुधा जीवतो मनः'। अथवा 'परः' प्रकृष्टम् आप्तस्वं तस्याः 'निर्ऋत्याः' दूतो मां प्राप्तः। अविज्ञातमरणकाल एवाति-

* "अपेहि मनसस्पतेऽपक्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः॥" ऋ० सं० ८, ८, ११, १।

सम्मोहनो ब्रवीमि। तत्रै 'निर्ऋत्यै' गत्वा 'बहुधा' अनेकप्रकारम् 'आ चक्ष्व' कथय। 'जीवतः' यादृशं मनः भवति, तादृशं मम 'मनः' बुद्ध्यादिकरणज्ञानदिनकरकिरणस्पष्टवृत्तित्वेन तावत् स मुमुर्षुरित्येतदाचक्ष्व। मुमूर्षोर्हि उपक्षीणकर्मणा नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति, न च मम तथेत्यभिप्रायः॥ एवं समानसंहितानामपि पदानां मन्त्रभेदकृतं विभागवैलक्षण्यम्। स चार्थ इदं मन्त्रेण न विज्ञायते। अत इदं मुक्तम्,—'अथापीदं मन्त्रेण पदविभागो न विद्यते' इति॥

पदविभागप्रसक्तं मधुना संहितालक्षणमाह;—"परः सन्निकर्षः संहिता (पा० १,४,१०८)"—इति। परः प्रकृष्टो यः सन्निकर्षः संश्लेषः, परस्परेण स्वराणां स्वराधिरूढानाञ्च व्यञ्जनानां सा संहितेत्युच्यते। सा च पुनरियं "पदप्रकृतिः संहिता (ऋ० प्राति० २,१)"। अत्र द्विविधा वर्णयन्ति। पदानां या प्रकृतिः, सेयं पदप्रकृतिः संहिता। किं कारणम्? संहितातो हि पदानि प्रक्रियन्ते; तस्मात् संहितैव प्रकृतिः, विकारः पदानीत्येव मेके मन्यन्ते। अपरे पुनः, पदप्रकृतिः संहितेति पदानि प्रकृतिर्यस्याः सेयं पदप्रकृतिरिति। किं कारणम्? पदान्येव हि संहत्यमानानि संहिता भवति; तस्मात् पदान्येव प्रकृतिः, विकारः संहितेति॥

एवञ्च कृत्वा "पदप्रकृतीनि सर्वचरणानां पार्षदानि"। सर्वेषां चरणानां सर्वशाखान्तराणा मित्यर्थः। किम्? पार्षदानि, स्वचरणपर्षद्येव यैः प्रतिशाखानियत मेव पदावयवप्रपञ्चक्रमसंहितास्वरलक्षणमुच्यते। तानीमानि "पार्षदानि" प्रातिशाख्यानीत्यर्थः। आह;—किं

तेषाम्? इति। उच्यते;—तानि पदप्रकृतीनि। पदं येषु संहिताया: प्रकृतित्वेन चिन्त्यते; तानीमानि पदप्रकृतीनि। तेषा मपि स एव समय इत्यभिप्राय:।

आह;—किम्पुनरत्र साधीय:,—पदानां प्रकृतित्वम्, संहिताया विकारत्वम्? उत वा विकारत्वं पदानाम्, प्रकृतित्वं संहिताया:? इति। उच्यते;—संहिताया: प्रकृतित्वं न्याय:। आह;—किं कारणम्? उच्यते;—मन्त्रोऽभिव्यज्यमान: पूर्वं ऋषेर्मन्त्रदृश: संहितयैवाभिव्यज्यते, न पदै:; अतश्च संहिता मेव पूर्वं मध्यापयन्त्यनूचाना ब्राह्मणा:, अधीयते चाध्येतार:; पदैरेव विन्ययोऽन्त मन्त्रा: कर्मसु। न चैतत् सर्वं मस्ति। तस्मादेतैर्विशेषहेतुभि: संहितैव प्रकृतिर्न पदानीति पश्याम:, समयमाच मितरत् स्वशास्त्रनियत मेव। यदुक्तं पदप्रकृतीनि सर्वचरणानां पार्षदानि, तेष्वेव हि व्याख्यायमानेषु पदानां प्रकृतित्वं भवति; न सर्वत्रैव। तस्मात् संहितैव प्रकृतिरित्येतदसाधीय इति॥

"अथापि याज्ञे दैवते न बहव: प्रदेशा भवन्ति"। अथेद मपर मारम्भप्रयोजन मस्य शास्त्रस्येत्येवं विशेषाधिकारार्थोऽय मथ-शब्द:। अपीदं वक्ष्यमाण मपि यान्युक्तानीत्येव मपि-शब्द: सम्भावने। आह;—किम्पुनस्तत्? इति। उच्यते;—यज्ञे कर्मणि प्रवर्त्तमाने दैवतेन बहव: प्रदेशा भवन्ति, दैवतेन लिङ्गेन बहवो विधिषु देशा भवन्ति। तद्यथा;—उपतिष्ठते व्युच्छन्त्या मैन्द्र्यासद:, आग्नेय्याग्नीध्रवैष्णव्या हविर्द्धान मित्येव मादि। न्यायविद: खल्वपि याज्ञिका: पठन्ति;—लिङ्गतो मन्त्राणां शेषभाव मधिकृत्य, लिङ्गक्रमसमाख्यानात्काम्य-

युक्तं समाम्नान मित्यधिकारे,—एवञ्च मन्त्रविधेरेतदाख्येयेषु ग्रिष्टत्वा दिति चैव मादि*।

तचैवं सति "ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति"। ते यद्यत्र ब्रूयुः, किमिति? लिङ्गज्ञाः, लिङ्गज्ञातारो वय मत्र एतस्मिन्नाम्नाये, लिङ्गतो वय मत्र यद्यस्मिन् देवतायां तत्र विजानीमः। विज्ञाय च तद्देवत एव कर्मणि विनियुञ्महे तं मन्त्रम्। एवञ्च सति न नो निरुक्तशास्त्रेण प्रयोजन मस्मीति लिङ्ग मस्माकं ज्ञापक मिति के चिद् वर्णयन्ति।

एवं ब्रुवतो वक्तव्याः,—यदि यूयं लिङ्गतो मन्त्रदेवतां विजानीध्वे, "इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति (ऋ०सं० ४,५, ६,२)"—इत्येतस्मिन् मन्त्रे का देवता? इति।

आह;—केन पुनरभिप्रायेणास्मिन् मन्त्रे देवता पृच्छ्यते? इति। उच्यते;—"वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे"। अथ तावदयं माग्नेयो मन्त्रः, अथ च तावदेतस्मिन् मन्त्रे इन्द्रवायू अपि श्रूयेते; तदेतद् दुःपरिज्ञानं लिङ्गमात्रेण, कतमदत्र प्रधानं देवताभिधानम्? कतमदत्र नैघण्टुकम्? इति। ते चेद् याज्ञिका लिङ्गमात्रान्निरुक्त मुपेक्ष्य मन्त्रान् कर्मसु विनियुञ्जाना गुणप्रधानभाव मजानन्तो देवताभिधानाना मेकमन्त्रगताना मन्यदेवतमन्त्र मन्यदेवते कर्मणि विनियुञ्जीरन्, ततश्चायथाकरणात् कर्मासम्पद्धिः स्यात्। न च केवलं

---

* 'तद्देवेनोपेक्षितव्यम्'—इत्यंशस्य व्याख्यानं न क्वापि पुस्तके। अतव्याख्यानत्वात् त्यक्त मित्यनुमीयते।

कर्मासम्पद्भिरेव। किन्तर्हि? अपध्वंसोऽपि स्यादेव दुरिष्टहेतुकः। तस्मात् परिज्ञेयं निरुक्तम्। तेन हि गुणप्रधानभावः शक्यते विज्ञातु मेकमन्त्रगतानां देवताभिधानाना मिति। तदेतदेवं देवतापरिज्ञान-द्वारेण पुरुषस्य प्रति विशिष्टोपकारकारि। तस्माद् युज्यते प्रारभ्तु मिति॥

"त्वाꣳहि मन्द्र०—० नृतमाः"*। भरद्वाजस्यार्षम्। आग्नेयी। प्रातरनुवाकाश्विनयोर्विनियोगः। हे 'अग्ने!' 'त्वां हि' त्वा मेव 'मन्द्र-तमं' मृदुतमं सुखाराध्यतमम्; त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतः, अतस्त्वा मेव 'वयमहे' सम्भजामहे। केन? अर्कशोकैः। एकपद-मेतत्। अर्चनैर्मन्त्रैः शोकैर्दीप्तैः यथोक्तब्रह्मचर्यजनितवीर्यैः। स 'नः' त्वं भज्यमानः तैः मन्त्रैः संसेव्यमानः 'महि' महत् स्तोत्रं तैरेव मन्त्रैर्यद्गुणानुस्मृतिमन्त्रानगर्भैरुपग्रथितं 'श्रोषि' शृणु। किञ्च, एवं त्वं महती देवता, येन 'त्वा' त्वा मेवैकं 'देवताः' अपि सर्वा 'इन्द्रं न' इन्द्रं मिव च 'वायुम्' इव च 'शवसा' बलेन बलाकृतिभिः अभ्यर्चन्ति। किम्पुनः स्वैः कर्मभिः? येऽपि च के चिदन्ये त्रिलोके नृणां मध्ये बलधनश्रुतैः 'नृतमाः' तेऽपि च त्वा मेव 'पृणन्ति' पालयन्ति पूरयन्ति वा। 'राधसा' हविर्लक्षणेन धनेन। एवं सदेवमनुष्यस्य जगतः पूज्यस्त्वं न केवल मस्माक मिति।

एव मय माग्नेयो मन्त्रः, स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधान-देवतो विनियुज्यमान ऐन्द्रे वायव्ये वा कर्मणि कर्तुरभिप्रेत-

* त्वां हि मन्द्रतम मर्कशोकैर्वयमग्ने मर्हि नः श्रोष्यग्ने। इन्द्रꣳ त्वा वृषणा वायुमृष्वा राधसा नृतमाः॥" ऋ० सं० ४, ५, ९, १।

फलसिद्धे नालं स्यात्, कर्मवैगुण्याच्च कर्त्तुरपध्वंसाय स्यात्। तस्माद् विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्त मिति॥

"अग्निरिव मन्यो त्विषितः सहस्वेति"*। यथा पूर्वस्मिन्नाग्नेये वायुलिङ्ग मिन्द्रलिङ्गं च, "तथा" एतस्मिन्नपि "मान्यवे मन्त्रे"। ("अग्निः" अग्निलिङ्गं नैघण्टुकम्। एव मनेकदेवतालिङ्गसङ्कटेषु दुरवधारं देवतातत्व मनैरुक्तेनाप्रसिद्धमन्त्र †) व्याख्यानसमयेन॥

यदुक्तं लिङ्गज्ञातारो वय मत्र लिङ्गत एव मन्त्रान् कर्मसु विनियोक्ष्यामहे, न नो निरुक्तेन प्रयोजन मस्तीत्येतदयुक्त मिति। "त्विषिरित्यस्य दीप्तिर्नाम भवति" अपठित मपि दीप्तिनामसु‡ न केवलं यान्येव पठितानि, अन्यान्यपीति॥

"अथापि" इद मपर मारभ्यप्रयोजन मस्याः। आह;—किम्? इति। उच्यते;—"ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च" ज्ञानञ्च प्रशस्यते, अज्ञानञ्च निन्द्यते। तत्रैवं सति वय मनिन्द्याः स्यामः प्रशस्यास्येति ज्ञेयं निरुक्तम्। अतो हि आध्यात्माधिदैवताधियज्ञाभिधायिनां मन्त्राणा मर्थाः परिज्ञायन्ते, ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति। तदेव मखिलपुरुषार्थोपकारसमर्थशास्त्र मिति न्याय्य मारब्धुम्॥ १॥

---

* बन्धनी-चिह्नान्तर्गतानि पदानि क-पुस्तके न दृश्यन्ते, लिपिकरप्रमाद एवात्र बीज मनुमीयते।

† अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो विमृधो नुदस्व॥' ऋ० सं० ८, ३, १९, १।

‡ "त्विषेर्वा स्याद् दीप्तिकर्मणः" दै० का० ८, १, १०।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाक मेति ज्ञानविधूतपाप्मा। यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति* कर्हिचित्। स्थाणुस्तिष्ठतेरर्थोऽर्त्तेररणस्थो† वा (१८‡) ॥ २ ॥

क्व पुनर्ज्ञानं प्रशस्यते ऽज्ञानं च निन्द्यते? इति। उच्यते;—लोके, शास्त्रे च। लोके तावद् यः कश्चिद् विद्वान् भवति, स पूज्यते पुण्यफलैर्षिभिर्जनैः, तदेतत् प्रत्यक्षत एव दृष्टम्। शास्त्रेऽपि "स्थाणुरयं भारहारः"—इत्यादि। स्थाणुर्वृक्षः, स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव सम्बध्यते,—न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः। एवञ्च "किलासावधीत्यृचं वेदं न विजानाति योऽर्थम्", तस्य वेदस्याध्ययनभारमात्र मेव ह्यसौ बिभर्त्ति। "योऽर्थज्ञ इत् सकलं भद्रं मश्नुते" य एवार्थज्ञो भवति, न ग्रन्थमात्राध्येता; स एव सकल मनवखण्डितं भद्रम् अश्नुते, अर्थपरिज्ञानफल मश्नुते प्राप्नोति। किमुनस्तव? इह लोके पूज्यता मुपेत्य शिष्टानाम्, इतो लोकादन्तकाले "नाक मेति" यत्रासुखं किञ्चिदपि नास्ति, आध्यात्मिकमाधिदैविकमाधिभौतिकं वा ॥, तत् स्थान मेति निरतिशयम्।

---

* "तज्ज्वलति" कातिरिक्तेषु सर्वत्र। "तु ज्वलति" च। † "ऽर्त्तेररस्थो" ख, ङ।

‡ इदमादशखण्डः समाप्तो घ-ङ-च-पुस्तकेषु। च-पुस्तके स्वराङ्कभेदा अपि।

§ मूलपाठविरुद्ध एष पाठः।

॥ "क मिति सुखनाम, तत् प्रतिषिद्धम्। प्रतिषिध्येत 'नु वा अमुं लोकं जगमुषु किञ्च नाकम्'। न वा अमुं लोकं गतवते किञ्च नासुखम्। पुण्यकृतो ह्येव तत्र गच्छन्ति"—इति नैरु० का० १, ४, १।

कस्मात् पुनरसावीदृशं स्थान मेति? इति। उच्यते;—इतः। यस्मादसौ "ज्ञानविधूतपाप्मा"। ये हि नाकगमनप्रतिबन्धिनः पाप्मानः, ते तस्य ज्ञानेन विधूताः; अतोऽसावेति नाकम्। युक्तञ्चान्यत्रापि;—न हि ज्ञानेन सदृशं पवित्र मिह विद्यते इति।

अथवा स्थाणुर्गर्दभः। स यथा चन्दनभारं वहत्येव, तदुपभोगै-र्नाभि सम्बध्यते; एवं किलासौ यो ग्रन्थमात्राध्येता, नार्थज्ञः। एवं तावदस्मिन् ज्ञानं प्रशस्तम्॥

अथैतस्मिन् अज्ञानं निन्द्यते;—"यद् गृहीत मविज्ञातम्"—इति *। यद् गृहीतं गुरुमुखात्, अविज्ञातं चार्थतः। किञ्च "निगदेनैव शब्द्यते" निगदमात्रेणैव नित्यकालं शब्द्यते उच्चार्यते, न पुनरर्थतो विचार्यते। आह;—किं तस्य? उच्यते;—"अनग्नाविव शुष्कैधो न तज्ज्वलति † कर्हि चित्"। शुष्कं काष्ठ मनग्नौ प्रदीप्ते नालं ज्वलनाय प्रकाशाय। एवं यो वेदार्थस्यानभिज्ञोऽध्येता स वेदाध्ययनभारमात्रेणैव सम्बध्यते, न तु तदीयेन फलेन; परिज्ञा-नन्तु श्रेयसा चाभ्युदयेन च युनक्तीति। तस्मादेतत्परिज्ञानाय अवश्यं निरुक्तशास्त्र मारब्धव्य मिति॥

स्थाणु-शब्द मर्थ-शब्दं च उदाहरणप्रसक्तौ निर्वक्ति;—"स्थाणुस्ति-ष्ठतेः"। स्थितो ह्यसौ नित्यकाल मेव भवति, न कदाचिदप्यासी-दति। "अर्थोऽर्त्तेः" गतिकर्म्मणः; अर्यते ह्यसावर्थिभिः। "अरणस्यो वा" यदास्य स्वामी अरति गच्छति इतो लोकादमुं लोकं तदाय

---

* पातञ्जलमहाभाष्ये पस्पशाह्निकेऽपीदं वचनं दृश्यते।

† "न तज्ज्वलति" इत्येव मेव पा० भा० पाठः।

मिहैव तिष्ठति, नानेनैव सहामुं लोकं गच्छति दीनारादि*रर्थः; तत्सामान्यादितरोऽपि शब्दार्थोऽर्थ उच्यते।

एवं तावत् शिष्टानुगमस्तुतौ ज्ञानं प्रशस्यते, अज्ञानञ्च निन्द्यते ॥२॥

उत त्वः पश्यन्न ददर्श वाचं मुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः। अप्येकः पश्यन्न पश्यति वाच मपि च शृण्वन्न शृणोत्येना मित्यविद्वांस माहार्थ† मप्येकस्मै तन्वं विसस्र इति स्व‡ मात्मानं§ विवृणुते ज्ञानं प्रकाशन मर्थस्याहानया वाचोपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु (सुवासाः कल्याण-वासाः कामयमाना ऋतुकालेषु)॥ यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा। तस्योत्तरा भूयसे निर्वचनाय (१९¶)॥ ३॥

न केवलं स्तुतावेव ज्ञानप्रशंसा अज्ञाननिन्दा च। किन्तर्हि? वेदेऽपि;—"उत त्वः पश्यन् (ऋ० सं० ८,२,२ ३,४)"—इति। विद्या-सूक्ते द्वे अप्येते ऋचौ बृहस्पतेरार्षम्। 'उत'-शब्दोऽपि-शब्देन समा-नार्थः। 'त्वः' एक इत्यर्थः। बह्वना मपि समानपृष्ठोदरपाणिपादानां

---

* दीनारः सुवर्णमुद्राविशेषः। "दीनारेऽपि च निष्कोऽस्त्री" अम०को० २, ना०, १४।

† "माहार्थ" क, ख, ग। ‡ "स्व" ग, ङ। § "मानं" ङ।

‖ बब्बनीचिह्नान्तर्गतपदानि क-ख-ग-पुस्तकेषु न सन्ति।

¶ द्वेऽमविंशखण्डसमाप्तिर्दृश्यते घ-ङ-च-पुस्तकेषु।

समान मेवाध्ययन मधीयानानाम् एकः कश्चित् 'पश्यन्' अपि 'वाचं' मनसा स्वभ्यस्ताध्ययनोऽपि तीक्ष्णविद्यः सन् 'न ददर्श' न पश्यत्येव अर्थानभिज्ञत्वात्। स हि तां सम्यक् पश्यति, यस्तस्या अर्थं विजानाति। अर्थपरिज्ञानकला हि वागित्यभिप्रायः। एव मेकः 'शृण्वन्' अपि 'न शृणोति' 'एनां' वाचम्। य एव हि अर्थ मवबुद्धते वाचः, तेनैव सा सम्यक् श्रुता भवति, नेतरेण; इतरो ह्यविद्वान् ध्वनिमात्र मेवोच्चारयति वाचम्। एवम् "अर्धम्" अनेनार्द्धर्चेन "अविद्वांस माह" निन्दन् मन्त्रदृक्। साम्प्रत मुत्तरेणार्द्धर्चेनार्थज्ञं प्रशंसन्नाह;—'उतो त्वस्मै' "अथेकस्मै" कस्मै चिदर्थज्ञाय 'तन्वं' शरीरं 'वि सस्रे' विस्रंसयति विवृणोतीत्यर्थः। अर्थो वाचः शरीरं तं विवृणोति आत्मानं दर्शयत्येवास्मै कस्मैचिदर्थज्ञाय "प्रकाशन मर्थस्याहानया वाचा" अनेन तृतीयेन पादेनेत्यर्थः। कथन्तर्हि विवृणुते तन्वम्? इति, अतः;—"उपमोत्तमया वाचा" उत्तमेन पादेनोच्यते;—"जायेव पत्य उशती सुवासाः"—इत्यनेन। यथा हि 'जाया' विवृतसर्वाङ्गावयवा भूत्वा 'उशती' "कामयमाना" 'पत्ये' दृष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम्। कस्मिन् काले? यदा 'सुवासाः' भवति, निर्णिक्तवासा भवति। निर्णिक्तवासा नीरजस्का "ऋतुकालेषु", तदा ह्यतितरां स्वपुरुषं प्रार्थयते। अत एतयावस्थयोपमीयते। "यथा सः" पुरुषस्ताम् "एनां" यथावत् "पश्यति" स्त्रियम्, नेतरां या ह्यनपवृताप्रावृतसर्वगात्रा*। एवं "सः" एवैतां वाचं यथावत् "शृणोतीति"। यः

* नेतरे यो ह्यनपद्प्रावृतसर्वगात्रां"—इति (?) ख।

पदशोऽवच्छिद्येतां विगृह्य वार्थं मन्त्राः पश्यति समस्तस्य मेव मन्त्रा मृचीयम् "अर्थज्ञप्रशंसा" ॥

अपीय मपरा ऋक् "तस्याः" एव "उत्तरा"* अस्यैवार्थस्य प्रकृतस्य ज्ञानप्रशंसाख्यस्य फलाभिधानद्वारेण "भूयसे" बहुतराय अमुना फलेनाभिसम्बन्धात् प्रतिविशिष्टज्ञान मित्येवं "निर्वचनाय"। निर्विविच्य निर्द्धार्य वचनं कथनं निर्वचनम्, तस्मै निर्वचनाय ॥ ३ ॥

उत त्वं सख्ये स्थिरपीत माहुर्नैनं हिन्वन्त्यपि वाजिनेषु। अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफला मपुष्पाम्। अप्येकं वाक्सख्ये स्थिरपीत माहू रममाणं विपीतार्थं देवसख्ये रमणीये स्थान इति वा विज्ञातार्थं यन्नाप्नुवन्तिवाग्ज्ञेयेषु बलवत्स्वप्यधेन्वा ह्येष चरति मायया वाक्प्रतिरूपया नास्मै कामान् दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु यो वाचं श्रुतवान् भवत्यफला मपुष्पा मित्यफलास्मा अपुष्पा वाग् भवतीति वा किञ्चित्पुष्प-† फलेति वार्थं वाचः पुष्पफल माह याज्ञदैवते पुष्पफले देवता ‡ध्यात्मे वा§ ॥ ४ ॥

---

* एवञ्च 'तस्योत्तरा'—इत्यत्र सन्धिर्वेदाङ्गत्वेन वेदवद्भावात्।

† "किञ्चित् किंपुष्प' ख।

‡ 'दैवता" इत्तिसम्मतपाठः।

§ नेह षण्डसमाप्तिः घ-ङ-च-पुस्तकेषु।

तद्यथा;—"उत त्वं सख्ये स्थिरपीत माहुः (ऋ० सं० ८,२,२४, ५)"—इति। "अप्येकम्" अपि बह्वन् विदुषः "सख्ये" सखिभावे, कतरस्मिन् "देवसख्ये" समानख्यानतायां देवसायुज्ये इत्यर्थः। वक्ष्यति हि,—"यां यां देवतां निराह; तस्यास्तस्यास्ताद्भाव्य मनुभवति (प० का० १३,१३)"—इति। अथवा, "देवसख्ये" रमणीये स्थाने। यस्मिन् देवानां सखिभावः, तद्देवसख्यं स्थानम्; तस्मिन् देवसख्ये रमणीये स्थाने, देवलोके इत्यर्थः। किम्? इति 'स्थिरम्' अविचालिनम् अप्रच्यवनधर्माणम्। क मेव माहुः? "विपीतार्थम्", आपीतार्थं गृहीतार्थ मित्यर्थः। क एव माह? इय मेव "वाक्" ऋक्संहिता। किञ्च, "नैनं हिन्वन्त्यपि वाजिनेषु"। 'एनं' वागर्थज्ञं 'न हिन्वन्ति' नानुगन्तुं शक्नुवन्ति। केषु? 'वाजिनेषु' "वाग्ज्ञेयेषु" अर्थेषु "बलवत्सु "अपि" दुर्ज्ञेयेषु दुरवघटनीयेषु; समुद्रपिहितरत्नसन्निभेषु देवतापरिज्ञानादिषु व्याकर्त्तव्येषु। स हि तान् व्याकर्त्तुं शक्नोति, नेतरे मन्दबुद्धयो बहवोऽपि समागताः शक्नुवन्ति तानर्थान् व्याकर्त्तुम्, यानसौ व्याकरोति। अत एतदुक्तम्;—"नैनं हिन्वन्त्यपि वाजिनेषु"। अपि एवं तावदर्थज्ञः प्रशस्तः॥

अथेदानी मविद्वानुत्तरेणार्द्धर्चेन निन्द्यते;—"अधेन्वा चरति" "अधेन्वा हि एष चरति"; न हि सा वाक् हिनोतीह न परत्र च, यस्या अर्थो न परिज्ञायते। तया गृहीतयैव ता मधीयान इतश्चेतश्चरति, तत् प्रधान एव सर्वतः पर्यटतीत्यभिप्रायः। किञ्च, माययैषः चरति गृहीतया। यथा हि कश्चिन्मायया सुवर्णं * बिभ्रयात्,

* "सुवर्णः" ख।

एव मयं "वाचम्" एव एतां बिभर्त्ति। सा तादृशी भ्रियमाणा "वाक्"। किं करोति? "नासै कामान् दुग्धे"। कतमान्? ये तस्या वाचो दोग्धव्याः। क? "देवतास्थानेषु मनुष्यस्थानेषु" च। "यः"। किं करोति? य एवं 'गुरुश्रुवान्' "श्रुतवान् भवति"। कथम्? "अफला मपुष्पा मिति" एवं यः श्रुतवान् भवति, एभ्यः सकाशात् श्रुत्वा च दृढग्राहेण गृहीत्वावस्थितो भवति; अध्ययनादृते नान्यदस्ति वाचि किञ्चित् मृग्य मिति। तस्मै किम्? इति "अफलैवास्मा अपुष्पा" च "वाग् भवतीति"। यथैव ह्यसौ पश्यति अफलेय मपुष्पा चेति तथैव भवतीत्यभिप्रायः। अथ "वा" "किञ्चित् पुष्पफलेति वा"। एतदुक्तं भवति,—अल्पफला मल्पपुष्पा मिति। किङ्कारणम्? अस्ति ह्यध्ययनमात्रे किञ्चिदल्पं फलम्, नासौ परिश्रमो व्यर्थ एवेति भाष्यकाराभिप्रायः*। आह;—किम्पुनर्वाचः पुष्पफलम्? इति। उच्यते;—"अर्थं वाचः पुष्पफल माहु" एतस्मिन् मन्त्रे मन्त्रदृगाह। कः पुनरसावर्थः? इति। याज्ञदैवत मध्यात्म मित्येष वाचः समासतोऽर्थः। स पुनरेष रूपकल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते,—"याज्ञदैवते" पुष्पफले "दैवताध्यात्मे वा" † इति। यज्ञपरिज्ञानं याज्ञम्, देवतापरिज्ञानं दैवतम्, आत्मन्यधि यद् वर्त्तते तदध्यात्मम्। स एष सर्वोऽपि मन्त्रब्राह्मणराशिरेवं त्रिधा विभक्तः। तत्रैवं सति,—यदा अभ्युदयलक्षणो

---

* यास्कस्याभिप्राय इत्यर्थः।

† सर्वमूलेषु स्तकविरुद्ध एष पाठः।

धर्मोऽभिप्रेयते, तदा याज्ञपुष्पं दैवतफलम्। किं कारणम्? पूर्वं हि पुष्पं भवति फलार्थम्, याज्ञमपि पूर्वं तन्यते देवतार्थम्; इत्येतस्मात् सामान्याद् याज्ञं पुष्पम्, दैवतं फलम्। यदा पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते, तदोभे एव याज्ञदैवते पुष्पत्वमेव बिभृतः। दैवते हि याज्ञमन्तर्भूतमेव तदर्थत्वात्, अतो न पृथगुच्यते। यत् पुनरधिदैवतं सर्वमपि प्रतिविशिष्टज्ञानेनोपासकेन मुमुक्षुणा निरूप्य चेतसा आत्मानमेव प्रतिसम्पाद्यते कार्यकारणाधिदेवताद्वारेण, सोऽयमेवमधिदैवतमधियज्ञं चोच्छिद्याध्यात्ममेवाभिसम्पादयति; तथा पुष्पभावमुच्छिद्य पुष्पं फलभावायेति। एवं सोऽयमात्मयाज्ञेवाभिसम्पद्यते। तत्रैवं सति,—अध्यात्मार्थत्वाद्-अधिदैवतस्य, अध्यात्मस्य च पुरुषार्थस्य निष्पन्नत्वाद्, दैवतं पुष्पम्—अध्यात्मं फलमित्युक्तम् ॥ ४ ॥

साक्षात्कृतधर्म्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्सम्प्रादु*रुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च बिल्मं भिल्मं भासन† मिति वैतावन्तः समानकर्माणो धातवो धातुर्दधातेरेतावन्त्यस्य सत्त्वस्य नामधेयान्येतावता मर्थाना मिद मभिधानं नैघण्टुक मिदं दैवताना

* "प्राऊ" क।

† "भाषण"—इति इतिग्रन्थदृतपाठः, परं सर्वेमूलग्रन्थविरुद्धः।

मप्राधान्येनेद् मिति तद्यदन्यदैवते* मन्त्रे निपतति नैघण्टुकं† तत्‡ ॥ ५ ॥

आह;—कुतः पुनरिद् मायातं निरुक्तशास्त्रं प्रधान मितराणि चाङ्गानि? इति। उच्यते;—"साक्षात्कृतधर्माण ऋषयो बभूवुः"। साक्षात्कृतो यैर्धर्मः साक्षाद् दृष्टः प्रतिविशिष्टेन तपसा, त इमे साक्षात्कृतधर्माणः। के पुनस्ते? इति। उच्यते;—ऋषयः। ऋषन्ति अमुष्मात् कर्मण एव मर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवंलक्षणं फलविपरिणामो भवतीत्यृषयः। "ऋषिर्दर्शनात् (नै० २,३,२)"—इति वक्ष्यति। तदेतत् कर्मणः फलविपरिणामदर्शन मौपचारिक्या वृत्त्योक्तम्,—साक्षात्कृतधर्माण इति। न हि धर्मस्य दर्शन मस्ति; अत्यन्तापूर्वो हि धर्मः।

आह;—किन्तेषाम्? इति। उच्यते;—"तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्सम्प्रादुः"। ते ये साक्षात्कृतधर्माणस्तेऽवरेभ्यः अवरकालीनेभ्यः शक्तिहीनेभ्यः श्रुतर्षिभ्यः। तेषां हि श्रुत्वा ततः पश्चादृषित्व मुपजायते§, न यथा पूर्वेषां साक्षात्कृतधर्मणां श्रवण मन्तरेणैव। आह;—किं तेभ्यः? इति। उच्यते;—ते अवरेभ्य उपदेशेन शिष्योपाधिकया वृत्त्या मन्त्रान् ग्रन्थतोऽर्थतश्च सम्प्रादुः सम्प्रदत्तवन्तः, तेऽपि चोपदेशेनैव जगृहुः।

---

* "अन्यदैवते" क, ख, ग। "अन्यदेवते" च।

† "निघण्टुकं" क।

‡ इहापि खण्डसमाप्तिर्न घ-ङ-च-पुस्तकेषु।

§ श्रावाश्वोपाख्यानं द्रष्टव्यम्। ऋ० सं० ५, ५, ११, १—१९ ऋचः।

अथ तेऽपि "उपदेशाय ग्लायन्तोऽवरे बिल्म-* ग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"—इति। उपदेशाय उपदेशार्थम्। कथं नामोपदिश्यमान मर्थं मेते शक्नुयुर्ग्रहीतु मित्येत मधिकृत्य ग्लायन्तः खिद्यमानास्तेष्वनुग्रहन्ति, तदनुकम्पया तेषा मायुषः सङ्कोच मवेक्ष्य कालानुरूपाच्च ग्रहणशक्तिम्। बिल्मग्रहणायेमं ग्रन्थं गवादि देवपत्न्यन्तं समाम्नातवन्तः। किमेत मेव? नेत्युच्यते;—वेदं वेदाङ्गानि च इतराणीति।

कथमुनः समाम्नासिषुः? इति, आह;—शृणु। वेदं तावदेकं सन्त मतिमहत्त्वाद् दुरध्येय मनेकशाखाभेदेन समाम्नासिषुः, सुखग्रहणाय व्यासेन समाम्नातवन्तः। तद्यथा,—एकविंशतिधा बाह्वृच्यम्, एकशतधा आध्वर्यवम्, सहस्रधा सामवेदम्, नवधा आथर्वणम्। वेदाङ्गान्यपि। तद्यथा,—व्याकरण मष्टधा, निरुक्तं चतुर्दशधा इत्येवमादि। एवं समाम्नासिषुर्भेदेन ग्रहणार्थम्। कथं नाम? भिन्नान्येतानि शाखान्तराणि लघूनि सुखं ग्रहीयुरेते शक्तिहीना अल्पायुषो मनुष्याः,—इत्येव मर्थं समाम्नासिषुरिति।

बिल्मग्रहणं भाष्यवाक्प्रसक्तं निर्ब्रवीति;— यदेतद् "बिल्मम्" इत्युक्तम्, एतद् "भिल्मम्" वेदानां भेदनम्। भेदो व्यास इत्यर्थः। "भाषण मिति वा" †। अथ वा भासन मेव बिल्म-शब्देनोच्यते ‡।

---

* अत्र सर्वत्रैव, मत्स्यादितेषु सर्वेष्वेव हस्तिपुस्तकेषु बिल्वेति वोपधः पाठो दृश्यते, परं सर्वमूलग्रन्थविरोधात् रोथ्-सम्पादितपाठानुरोधाच्च त मुपेत्य बिल्मेति मोपध एव स्वीकृतः।

† "भासन मिति वा"—इत्येव सर्वमूलपुस्तकपाठः।

‡ "बिल्मं शिरस्त्राणम्" इति महीधरः। य० वा० सं० १६, ३५।

वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इति। अत इद मुक्तं बिल्ममिति। एवं भिदेर्भासतेर्वा बिल्मशब्दः। एव मिद मृषिभ्यो निरुक्तशास्त्र मागत मितराणि चाङ्गानीति परिशेषित आगमः॥

अथेदानीं निघण्टुसमाम्नायविरचना वक्तव्या प्रकरणत्रयविभागेन सुखव्याख्यानार्थ मस्य शास्त्रस्य। सेय मुच्यते;—"एतावन्तः समानकर्माणो धातवः"—"एतावन्त्यस्य सत्त्वस्य नामधेयानि" इति। स एष पदराशिर्नैघण्टुकं नाम प्रकरणम्। एतावन्त इति याचैषु धातुषु व्याख्यातपदेषु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"गतिकर्माण उत्तरे धातवो द्वाविंशशतम् (नै० का० २,२,३)", "कान्तिकर्माण उत्तरे धातवोऽष्टादश (नै० का० २,२,३)"—इत्येव मादि। एतावन्त्यस्य सत्त्वस्येति या नामसु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः *, "हिरण्यनामान्युत्तराणि पञ्चदश (नै० का० २,३,१)"—इत्येव मादि। यत्रैतावर्था प्रायेण चिन्त्यन्ते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। एवंलक्षणं, नैघण्टुकं नाम प्रकरणम्। गवादि; प्राक् "जहा (नैग० का० ४,१,१)"—शब्दात्।

अथ पुनर्यत्र "एतावता मर्थाना मिद मभिधानम्"—इत्यर्थः प्रायेण चिन्त्यते। तद्यथा;—"आदित्योऽप्यकूपारः०—०समुद्रोऽप्यकूपारः (नैग० का० ४,३,२)"—इत्येव मादि। अनवगतसंस्काराश्च निगमाः जहादयः प्रायेण चिन्त्यन्ते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। अथ पुनर्यत्र "नैघण्टुकं", "देवतानाम् अप्राधान्येन" अस्मिन् मन्त्रे

* "इतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि"—इत्येवं यास्कीयः पाठः। नै० का० १, १, १।

"इदम्"* अन्यदत्र प्राधान्येन वर्त्तत इत्ययं विभागः प्रायेण चिन्त्यते। तदेवंलक्षणम् ऐकपदिकं नाम प्रकरणम्, जहादि; प्राक् अग्निशब्दात् (दै० का० १, ३, ६)।

दैवतं नाम प्रकरणम्, अग्निशब्दादि देवपत्न्यन्तम् (दै० का० १२, ४, १०)। तान्येतानि त्रीणि प्रकरणानि,—नैघण्टुकम्, ऐकपदिकम्, दैवतम् इति। अनेन प्रकरणत्रयविभागप्रपञ्चेनेद मवस्थितं निरुक्तशास्त्र मिति।

"तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत्"। इद मुक्तं नैघण्टुक मिदं देवताना मप्राधान्येनेद मिति, तत्र न ज्ञायते किं मिद मुक्तं भवति; तदेतल्लक्षणत उपदिश्यत इति पर्युपयुक्तस्तच्छब्दः। यद् अभिधानम् अन्यदैवते, अन्या यस्मिन् प्रधानदेवताः सोऽय मन्यदैवतः, तस्मिन् अन्यदैवते मन्त्रे यद्य मर्थ मन्यस्यां प्रधानायां मन्त्रदेवतायां निपतति निगमयति अभिप्रयुज्यमान मङ्गभावं गच्छति मन्त्रवाक्ये नैघण्टुकं तदित्युच्यते गुणभूत मित्यर्थः। सञ्ज्ञा हि तस्येय मस्मिञ्छास्त्रे ॥ ५ ॥

अश्वघ्न त्वा वारवन्तम्। अश्व मिव त्वा† वालवन्तं‡ वाला दंशवारणार्था भवन्ति दंशो दशतेः। मृगो न भीमः कुचरो गिरिष्ठाः। मृग इव भीमः कुचरो गिरिष्ठा

* मूलेऽत्र इदमिति वारद्वयं श्रूयते।
† "त्वां" च।
‡ "वालावन्तं" च।

मृगो मार्ष्टेर्गतिकर्म्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव कुचर इति चरतिकर्म्म कुत्सित मथ चेद्देवताभिधानं स्यात् न चरतीति गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वार्द्धमासपर्व देवानस्मिन् प्रीणन्तीति तत् प्रकृतीतरत्सन्धिसामान्यान्मेघस्थायी मेघोऽपि गिरिरेतस्मादेव तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवत मित्याचक्षते तदुपरिष्टाद् व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह* (२०†) ॥ ६ ॥

तद्यथा ;—"अश्वन्न त्वा ०—० अध्वराणाम्"‡। अस्या ऋचि अग्नेा नैघण्टुकः, अग्निः प्रधानम्। स्तुतःशंसस्यार्षम्। गायत्री। वारवन्तीयानुशंसने विनियुक्ता। साम्नश्च वारवन्तीयस्य§ एषा योनिः॥। 'अश्वं न त्वा' अश्व मिव त्वां हे अग्ने! 'अग्निम्' अग्ने नेतारं देवानां, 'वारवन्तं' वालवन्तं वृषाश्वम्। स हि अतितरां वालवान् भवति।

---

* "नैगमानीह" च-पाठः, परं नैष समीचीनः; अध्याय-समाम्नावन्तिमपदादिद्विरुक्ति-व्यवहारस्य सर्वत्र वैदिकग्रन्थेषु दर्शनात्।

† इहैव विंशखण्डः समाप्तो घ-ङ-च-पुस्तकेषु। एव मेव खण्डच्छेद आदरणीयो भवेद्, अनुपदवक्ष्यमाणसमाम्नायादिखण्डप्रतीकावलिपाठसामञ्जस्यानुरोधात्।

‡ "अश्वन्न त्वा वारवन्तं वन्दध्या अग्निन्नमोभिः। सम्राजन्तमध्वराणाम्॥" ऋ० सं० १, ९, ११, १।

§ सा० सं० गे० गा० १, १, २०।

॥ सा० सं० ऋ० आ० १, १, ९, ७।

वन्द्यते परिचर्यते च। न तथान्ये। त मिव त्वां 'वन्दध्यै' वन्दामहे स्तुमः। 'नमोभिः' नमस्कारैः, अन्नैर्वा हविर्भिरुद्यतैः। क्व पुनरवस्थितम्? कथं वा वन्दामहे?, इति 'सम्राजन्तं' दीप्यमानम् 'अध्वराणां' यज्ञानां मध्येऽवस्थित मुत्तरवेद्यादिषु धिष्ण्येषु अभिप्रेतार्थसिद्धये वन्दामहे॥

वाल-शब्दस्य निगमप्रसक्तस्य निर्वचनम्;—"वाला दंशवारणार्था भवन्ति"। तैर्हि दंशादयो निवार्यन्ते। दंश-शब्दस्य प्रसक्तस्य निर्वचनम्;—"दंशो दशतेः" इति। दशति ह्यसौ॥

द्वितीय मुदाहरणम्;—"मृगो न भीमः०" इति *। गयो नामेन्द्रपुत्रः, तस्येय मार्षम् †। त्रिष्टुप्। वैमृधस्य हविषो याज्या (आ० सू० २,१०)। इन्द्रोऽस्य प्रधानम्, मृगो नैघण्टुकः। 'मृगो न' मृग इव; व्याघ्रो वा सिंहो वा। 'भीमः' भीषणः। 'कुचरः' कुत्सितचरणः हिंस्रः, प्राणिवधजीवनः। 'गिरिष्ठाः' पर्वताश्रयः। स यथा कञ्चिदन्यं प्राणिविशेषं हन्ति। तैरनभिभूयमान इह कर्मणि हे 'इन्द्र!' एतदस्मद्वचः कुरु। 'सकम्', यः शत्रुकार्येषु सक्तुं शक्नोति। 'परावतः' परस्मात् अतिदूरस्थानात्, 'परस्याः' दिवः सम्बन्धिनः 'आ जगन्थ' आगच्छ। एतदर्थं मागत्य च ते 'पविं' वज्रं 'संशाय'

---

* "प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥" ऋ० सं० १, २, २४, १। किञ्च, "मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः। सकं संशाय पविं मिन्द्र तिग्मं वि शत्रून् ताळ्हि वि मृधो नुदस्व॥" ऋ० सं० ८, ८, २८, १।

† एवद्वाष्टमिकैषाऽऽ, (८, २८, १)।

तिक्ष्णीकृत्य 'तिग्मं' क्षेदनायोत्साहवन्तं सुनिशितं कृत्वा ततो 'वि ताड्हि' विताड़य, एतानस्मच्छत्रून् ('शत्रून्') एकप्रहारवर्जितदेहान् कुरुष्व। यानपि च न हि हिनस्मि कथञ्चित् तानपि 'मृधः' हिंसकान् 'वि नुदस्व' नानाप्रकारं प्रेरयस्व दूर मपुनरागमनाय॥

"अथ चेद् देवताभिधानम्" एतत् कुचर इति, ततः "क्वायं न चरतीति" सर्वत्र चरतीति। "गिरिष्ठा मेघस्थायी" इति च। अनुपक्षीणशक्तयो हि विभवो वेदशब्दा यथाप्रज्ञं पुरुषाणा मर्थाभिधानेषु विपरिणममानाः सर्वतोमुखा अनेकार्था न ह्रुवन्ती ह्येतदनेन प्रदर्शितं भवतीत्यथ चेद् देवताभिधान मिति॥

मृगादिशब्दान् निगमप्रसक्तान् निर्ब्रवीति;—"मृगो मार्ष्टेर्गतिकर्मणः" नित्यं ह्यसौ गच्छति। "भीमो बिभ्यत्यस्माद्" सर्व एव ह्यस्माद् बिभेति। भीष्मशब्दं सारूप्यप्रसक्तं निराह;—"भीष्मोऽप्येतस्मादेव" इति। "कुचर इति, चरति कर्म कुत्सितम्" चरति ह्यसौ कर्म कुत्सितम्, व्याघ्रो वा सिंहो वा। "क्वायं न चरतीति" देवताभिधानत्वे। "गिरिः पर्वत"। "समुद्गीर्णो भवति" समस्तो ह्यसावुद्गीर्ण इव भूमौ भवति॥

पर्वत-शब्दं पर्यायाख्यानप्रसक्तं निराह;—"पर्ववान् पर्वतः" इति। शिला-शिखर-सन्धिभिरसौ तद्वान् भवति। पर्व-शब्दं विग्रहप्रसक्तं निराह;—"पर्व पुनः पृणातेः" पूरणार्थस्य। पूरयन्ति हि ते शिलाशिखरसन्धयोऽखिलं पर्वतम्। "प्रीणातेर्वा" तर्पणार्थस्य। तत् पुनरेतत् "अर्द्धमास-पर्व"। किं कारणम्? "देवान् अस्मिन्" हविर्भिः "प्रीणन्तीति"। "तत्प्रकृतीतरत्-सन्धिसामान्यात्"

कालसन्धिश्च शिलासन्धिश्च समानं सन्धित्व मिति दैवताभिधानपक्षे "मेघस्थायौ" गिरिष्ठाः। "मेघोऽपि गिरिरेतस्मादेव" असावपि समुद्गीर्णो भवति अन्तरिक्षलोके ॥

"तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां, तद्दैवत मित्याचक्षते। तद् उपरिष्टाद् व्याख्यास्यामः। नैघण्टुकानि नैगमानि दृह दृह"। तदेतदुच्यते;—सामान्यलक्षणोपलक्षितप्रकरणचय-विभागेनावस्थितेा गवादिर्देवपत्यन्तः समाम्नायोऽय मानुपूर्व्या व्याख्यास्यत इति पर्युपयुक्तः तच्छब्दः। यानि नामानि प्राधान्यस्तुतीना मग्न्यादीनाम्; प्रधानभावेन याः स्तूयन्ते निपातभाक्तेन ता एता प्राधान्यस्तुतयेा देवताः, तासां यानि नामान्यग्न्यादीनि देवपत्यन्तानि, तानि सर्वाण्यपि समुदितानि सन्ति। एतयैकया सामान्यया प्रकरण-सञ्ज्ञया आचक्षते आचार्याः। कतमया? उच्यते;—दैवत मित्येतया। निरूढाद्धीय मेतस्मिन् नैघण्टुकशब्दसमुदाये सञ्ज्ञेत्यभिप्रायः। तत् पुनरेतद् दैवतं प्रकरण मुपरिष्टाद्* व्याख्यास्यामोऽस्य शास्त्रस्य। आह;—किङ्कारणम्? उच्यते;—गुणपदेषु व्याख्यातेषु प्रधानदेवता-पदानि सुखं व्याख्यास्यन्त इत्यनेनाभिप्रायेण। देवतापरिज्ञानं तत्-फलाभिधाननिष्ठं च कथं नामेदं शास्त्रं स्यात्? इति;—यानि पुनर्नै-घण्टुकानि गवादीनि†, नैगमानि च जहादीनि‡, तानीह प्रकरणद्वये नैघण्टुके चैकपदिके च; व्याख्यास्याम इत्येतदेवानुवर्त्तते। त एते गवा-दयेा देवपत्यन्ताः§ निघण्टवः, तदेकदेशेा नैघण्टुकं प्रकरणमिति निघण्टु-

---

* उत्तरषट्के, उत्तरार्द्धे वा। † १भा०, ६ पृ०—१८८ पृ०।
‡ १भा०, १८६ पृ०—४५८पृ०। § १भा० १पृ०—४९७ पृ०।

सञ्ज्ञया व्यवहारो लोके *;—'निघण्टु मधीमहे', 'निघण्टु मध्यामहे' इति । शास्त्रे† खल्वपि नैघण्टुकं प्रकरण मिति‡ । नैगम मित्यैकपदिकम्§ । नैघण्टुकानि नैगमानि पदानि चेह॥ प्रकरणद्वये व्याख्यास्यामः॥ अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास इति॥६॥

॥ इति निरुक्तवृत्तौ षष्ठाध्यायस्य¶ षष्ठः पादः॥ ६ ॥

इति निरुक्तटीकायां जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ षष्ठोऽध्यायः (प्रथमोऽध्यायः) समाप्तः ॥१॥

(समाम्नायस्तच्चतुष्टयमतोऽन्येऽथनिपातावायुर्वात्वाननूनंनूनंसातक्रूचान्वोऽक्षण्वन्तोनिष्ट्वक्रासोहविर्भिरितीमान्यथापियोययोहिन्वथापीद्मर्थवन्तोऽथापीद्ंस्थाणुरयमुतत्वःपश्यन्नुतत्वंसख्ये विंशतिः** ॥)

॥ इति निरुक्ते पूर्वषट्के प्रथमोऽध्यायः ॥ १ ॥

---

* प्रथमभागस्य । एतन्मूलग्रन्थस्येति यावत् ।

† यास्ककृतेऽस्मिन् निघण्टुभाष्ये इति यावत् ।

‡ द्वितीयाध्यायादि तृतीयाध्यायान्त मध्यायद्वयम् ।

§ चतुर्थाध्यायादि षष्ठाध्यायान्त मध्यायत्रयम् ।

‖ पूर्वषट्के, पूर्वार्द्धे वा ।

¶ निघण्टुनाममूलग्रन्थीयैः पञ्चभिरध्यायैः सह षड्लक्षणयास्य भाष्यप्रथमाध्यायस्य षष्ठत्व मिति बोद्धव्यम् ।

** क-ख-ग-च-पुस्तकेषु नास्येतत् खण्डसङ्ग्रहवाक्यम्, इतिग्रन्थविरुद्धञ्च ; पर मादरणीय मेव तथैवाधापकाध्ययनव्यवहाराच्छिष्टाप्रष्टतिष्ठ्येव मेव दर्शनाच्च । एतदनुसारत एव खण्डच्छेदाय स्वीकार्य्याः । बोद्धव्याश्च ते सर्वत्र बम्बनीचित्रा-म्गंगनाङ्कानुसारैस्वगतत्स्थानीयटीप्पनीपाठाश्च ।

॥ अथ द्वितीयाध्यायः ॥

तच,

॥ प्रथमपादः ॥

ॐ३म् *। अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ † स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केन चिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत, विषयवत्यो ‡ हि वृत्तयो भवन्ति यथार्थं विभक्तीः सन्नमयेत् प्रत्त मवत्त मिति धात्वादी एव शिष्येते § ॥ १ ॥

"अथ निर्वचनम्"। नामाख्यातोपसर्गनिपातलक्षण मुक्त्वा शास्त्रारम्भ-प्रयोजनानि च वेदाङ्गव्यूहं च सप्रयोजनं निघण्टुसमाम्नायविरचनां च प्रकरणत्रयविभागेनोक्त्वा दैवत मुक्त्वा च नैघण्टुकनैगमे प्रकरणे पुरस्कृते नैघण्टुकानि नैगमानीहेति। ते पुनरेते निर्वचनलक्षण मनुक्त्वा न शक्येते व्याख्यातुं यस्मात्, 'अथ' एतस्मात् कार-

---

* "ॐ" क। "ॐ ३" ङ। ख-ग-च-पुस्तकेषु नास्त्येव।

† "विकारेणान्वितौ" क, ख, ग, घ; परं वृत्तिविरुद्धः।

‡ "विषयवत्यो" क, च।

§ घ-ङ-च-पुस्तकेषु नेह खण्डसमाप्तिः।

णात् 'निर्वचनम्' लक्षणतो व्याख्यास्याम इति शेषः। अपि हि तस्यार्थस्य परोक्षवृत्तावतिपरोक्षवृत्तौ वा शब्दे निःक्षिप्य विगृह्य वचनं निर्वचनम्। स एष निर्वचनाभ्युपाय इत्युच्यते॥

इह द्विधा शब्दाः,— समर्थस्वरसंस्काराश्च असमर्थस्वरसंस्काराश्च। "तत्" तत्रैवं सति, "येषु" तावत् "पदेषु" "स्वरसंस्कारौ समर्थौ" अवैपरीत्येन "प्रादेशिकेन" च "गुणेनान्वितौ स्याताम्"। प्रदेशाभिधायिना धातुरूपेणान्वितौ सम्बद्धावनुगतावभिधेयस्थे धातुरूपे स्याताम्॥

"तानि" तावत् "तथा" एव यथालक्षणमेव मेषु नैरुक्तो "निर्ब्रूयात्"। तन्मा भूदित्यत इदमुच्यते;—"येषु पदेषु स्वरसंस्कारौ समर्थौ स्यातां तथा तानि निर्ब्रूयात्" इति॥

"अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केन चिद्वृत्तिसामान्येन"। अथ पुनरनन्वितेऽर्थे न्याय्यस्वरसंस्कारयुक्तेन शब्देन यत्र निपुणमन्विष्यमाणः शब्दोऽर्थो वा कल्पयितुं* न शक्यते; अन्यथैवार्थो व्यवतिष्ठते,—अन्यथैव शब्दः। प्रादेशिकेन विकारेण विक्रियमाणेऽपि चासौ शब्दो विपरिणम्यमानः अप्रादेशिक एव स्यादसमर्थ एव। तां प्रदेशाख्या मभिधेयसत्त्वस्थां क्रिया मभिधातुमाह। तत्र किं कर्त्तव्यम्? इति। उच्यते;—तत्रैवं सति अर्थनित्यो भूत्वा, अर्थप्रधानः। तद्यथा,— मुद्गनित्य मेवास्य भोजन मित्युक्ते मुद्गप्रधान मिति गम्यते, एव मिहापि अर्थनित्य इत्युक्ते अर्थप्रधान

---

* "शब्दोऽर्थवान् कल्पयितुं" ख।

इति गम्यते; अर्थप्राधान्येनानादृत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधानं बुद्ध्वा केन चिदर्थवृत्तिसामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थसामान्य मत्रास्तीति? ततस्तर्कयित्वा सामान्यं तेन निर्ब्रूयात्। अर्थो हि प्रधानम्, तदङ्गभूतं शब्दः। तस्मात् अर्थसामान्यं बलीयः शब्दसामान्यात्॥

अथ पुनर्यत्रार्थसामान्य मपि नास्ति, तत्र? "अविद्यमाने(ऽर्थ-)सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात्, न संस्कार माद्रियेत; विषयवत्यो हि वृत्तयो भवन्ति, यथार्थं विभक्तीः मन्त्रमयेत्"। स्वरवर्ण सामान्येनापि निर्ब्रूयादेव,—अमुष्मिन् धातावयं स्वरो वर्णो वा मया दृष्टः, स एव यस्मिन्नभिधाने लक्ष्यते इत्येव मुत्प्रेक्ष्य स धात्वर्थः सूचबद्ध इव तस्मिन्नभिधाने आहृत्य* स्फारीकृत्य कृत्स्नः प्रकाशयितव्यः। एव मविद्यमानेऽर्थसामान्ये स्वरवर्णसामान्यमात्रेणापि निर्ब्रूयादेव। न त्वेव निर्ब्रूयात्, इतरथाह्यनर्थक मेव निरुक्तशास्त्रं स्यात्। तन्माभूदित्यत इद मुच्यते लक्षणपराङ्मुखेषु शब्देषु † न संस्कार माद्रियेत।

किन्तर्हि अर्थसामान्य माद्रियेत, शब्दसामान्यं वा? तद्यथा,—प्रवीणोदारनिस्त्रिंशशब्दा उत्कृष्टस्वार्थाभिधेयसम्बन्धाः सन्तः क्रियागुणं सामान्यं हेतुमात्र माश्रित्यान्येष्वेवार्थान्तरेषु वर्त्तते।

तद्यथा,—प्रकृष्टो वीणायां प्रवीणो गान्धर्वे; अत्र ह्यस्य मुख्या वृत्तिः। स एव स्व मर्थ मभिधेय मुत्सृज्यैव गान्धर्व मभ्यासपाटव-

---

* "आहत्य" ख।

† "शब्देषु" नास्त्येतत् ख-पुस्तके।

मात्रसामान्य माश्रित्य सर्वत्रैवाभिप्रवृत्तः; यो हि यस्मिन् कृतयत्न उत्पन्नकौशलो भवति, स तत्रोच्यते प्रवीण इति। तद्यथा,—'प्रवीणो व्याकरणे', 'प्रवीणो निरुक्ते' इति।

एव मेवोदार इति। प्रागारसन्निपातात्* आकूतेनैवा† सारथ्यो वहत्यश्वोऽनड्वान् वा स उद्गतारत्वादुदारः। तत्र हि समञ्जसा वृत्तिरस्य शब्दस्य। स एष उत्सृज्यैव स्वमर्थमाकूतानुविधायित्वमात्र मेव सामान्य माश्रित्य प्रवृत्तो यो हि कश्चित् कस्मै चिदाकूतं लक्षयित्वा प्रागेव प्रार्थनात् ददाति, स उदार इत्युच्यते।

एव मेव निस्त्रिंशः। त्रिभिः प्रदेशैर्द्वाभ्यां धाराभ्या मग्रेण च निशितः श्यतीति निस्त्रिंशः खड्गः, मुख्यग्रहणात्; तत्र ह्यस्य शब्दस्य समञ्जसा वृत्तिः। स एष छेदनसमानरूपं क्रौर्यसामान्य माश्रित्य सर्वत्रैव प्रवृत्तः। यो हि लोके क्रूरो भवति, स निस्त्रिंश इत्युच्यते। एव मेते क्रियागुणसामान्यमात्रेण वर्त्तन्ते।

यथैते, एव मन्येऽन्यभ्यूहितव्याः। अभ्यूह्य च एव मर्थसामान्येन निर्वक्तव्याः। स्वरवर्णसामान्ये तु प्रचुराण्येवोदाहरणानि। सर्व एव हि नैगमाः शब्दा जघादयः स्वरवर्णसामान्यमात्रेणैव निरुच्यन्ते॥

न च निरुक्ते कारक-हारक-लावकादिशब्दा व्युत्पाद्यन्ते; सुबोधैव हि तेषां व्युत्पत्तिः प्रसिद्धैव च व्याकरणे इति। य एव दुर्बोधाः परोक्षातिपरोक्षवृत्तयः बिल्मकदरोदारवैतसपर्वशब्दादेयः, त एव हि

---

* आरशब्दः प्रान्तभागसामान्ये वर्त्तते, इह अश्वादिचालनकशा-प्रान्तभागे। तथा च पृष्ठादौ कशा-प्रान्तभागसम्बन्धतः पूर्वं मेवेत्यर्थः।

† आकूतम् अभिप्रायः। इति हेमचन्द्रः।

व्युत्पाद्य निरुच्यन्ते। तेषु हि विशेषेणार्थवत्ता निरुक्तस्य। तान्येव अर्थसामान्येन वा शब्दसामान्येन वा निब्रूयात्, न तेषु संस्कार मादृियेतेति।

आह;—किं कारणम्? इति। उच्यते;—"विषयवत्यो* हि उक्तयो भवन्ति"। हिरयं हेत्वर्थे। तस्माद् विषयवत्यो बहुसंशयवत्यः† शब्दाना मर्थेषु उक्तयो भवन्ति, नानाभावेनार्थेषु अवस्थिता प्रवृत्ति-रिति एवं स्यान्नैवं स्यादिति‡ विचारयन्तः सन्तः प्रतिपत्तसम्मोहा-च्छेरत इवास्मिन्निति विषयः§ संशय इति।

अत्र,—केचिदर्थसामान्येन क्वचिद् वर्त्तन्ते शब्दाः, केचित् स्वरसा-मान्येन, केचिद् वर्णसामान्येन; यत एवम्, अतो विभक्तीरपि यथार्थ मेव सन्नयेत् विपरिणमयेत्, पूर्वोत्तरपदप्रकरणाविरोधेन। किं कारणम्? तासा मपि हि व्यत्ययो भवत्येव;— सुपां स्थाने सुपो भवन्ति इति हि वैयाकरणाः पठन्ति‖। दर्शयिष्यति चाय मपि विभक्तिविपरिणामम्। तद्यथा,—"हृत्सु शोकै०—०हृदयानि शोकैः (दै०का० ८,३,१२)"—इत्येव मादि।

अधुनैव मुक्ता विषयवत्यो¶ भवन्तीति, अर्थवशेन व्याकरणेऽपि शब्दविपरिणामो भवतीत्येवं दर्शयति;—"प्रत्त मवत्त मिति धात्वादौ एव शिष्येते" इत्येव मादि। 'डु दाञ् दाने (जु० उ०)'; तस्य

---

* "विशयवत्यो" क।
† "विषयबहुसंशयवत्यः" क।
‡ "एवं स्यादिति" ख।
§ "विशयः" क।
‖ "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः। पा० ७, १, ३९।
¶ "विशयवत्यो" क।

प्र-पूर्वस्य प्रत्त मिति। अत्र दकार आकारस्य धातुः, परो निष्ठाप्रत्ययस्तकारः; तत्रैवं* सति 'दो दद् घोः (पा० ७,४,४६)'—इति वर्त्तमाने 'अत्र उपसर्गात् तः (पा० ७,४,४७)'—इति आकारस्य तकारो भवति, 'झरो झरि सवर्णे (पा० ८,४,६५)'—इति धात्वन्तस्य तकारस्य लोपे कृते, 'खरि च (पा० ८,४,५५)'—इति तकारस्य चर्त्वे कृते 'परः सन्निकर्षः संहिता (पा० १,४,१९)'—इति धातु-तकारः प्रत्यय-तकारेण संयोगता मुपैति 'हलोऽनन्तराः संयोगः(पा० १,१,७)'—इति; ततः प्रादिसमासे† कृते 'प्रत्तम्'—इति भवति। एव मेव 'दो अवखण्डने (दि० प०)'—इत्यस्याव-पूर्वस्य 'अवत्तम्'—इति। अत्रापि दकार ओकारस्य धातुः, परो निष्ठातकारः। अत्र 'आदे च उपदेशेऽशिति (पा० ६,१,४५)'—इत्योकारस्याकारे कृते तभाव-लोप-चर्त्व-परगमन-प्रादिसमासाः पूर्ववदेव। एव मनयोर्द्धात्वोरादौ एव शिष्येते। यथानयोरेव मन्येषा मपि दृष्ट्वा यथासम्भव मनुविधेयम् ॥१॥

अथाप्यस्तेर्निवृत्तिस्थानेषादिलोपो भवति स्तः सन्तीत्यथाप्यन्तलोपो भवति गत्वा गत मित्यथाप्युपधालोपो भवति जग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति राजा दण्डीत्यथापि वर्णलोपो भवति तत्त्वा‡ यामीत्यथापि

---

* 'क्तक्तवतू निष्ठा" पा० १, १, २६।

† "कुगतिप्रादयः" पा० २, २, १८।

‡ "तत्वा" ख, ग, घ, ङ।

दिवर्णलोपस्तृच इत्यथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाज्य* इत्यथाप्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्क्वित्यथा†प्यन्तव्यापत्तिर्भवति ‡॥ २॥

"अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति, स्तः सन्तीति"। 'अस् भुवि (अदा० प०)'—इत्यस्य निवृत्तिस्थानेषु गुणवृद्धिनिवृत्तिस्थानेषु क्ङिति वर्त्तमाने 'असोरल्लोपः (पा० ६,४,१११)'—इत्यादिलोपो भवति। योऽयं धात्वादावकार एवं लुप्यते, तस्मिन् लुप्ते प्रयोगः स्तः सन्तीति। एव मन्येषा मपि दृष्टानुविधेयं यथासम्भवम्॥

"अथाप्यन्तलोपो भवति, गत्वा गत मिति"। अत्र, गमेः (भ्वा० प०) क्त्वा-प्रत्यये, निष्ठा-प्रत्यये च परतोऽनुनासिकलोपो भवति, अनुदात्तोपदेशेत्यधिकृत्य क्ङितीति §। एव मन्येष्वपि द्रष्टव्य मनुविधेयं च यथासम्भवम्॥

"अथाप्युपधालोपो भवति, जग्मतुर्जग्मुरिति"। अत्र, गमेः (भ्वा० प०) अलोपः। 'अलोन्त्यात् पूर्व उपधा (पा० १,१,६५)'—इत्युपधा सञ्ज्ञा, तस्य 'गमहनजनखनघसां (पा० ६,४,६८)'—इत्युपधालोपः। एव मन्येषामपि द्रष्टव्य मनुविधेयं यथासम्भवम्॥

---

* "बीज" क, ग।

† "स्तथा" क।

‡ घ-ङ-च-पुस्तकेष्वित्र प्रथमखण्डसमाप्तिः। खण्डपाठसम्मता चैषा, मञ्जिलितडीपन्या मप्यस्या मेतदनुसारत एव खण्डाङ्का अवगता भवन्ति परं दृष्टिविषया।

§ "अनुदात्तोपदेशवनतितनोत्यादीना मनुनासिकलोपो झलि क्ङिति" पा० ६, ४. २७।

"अथाप्युपधाविकारो भवति, राजा दण्डीति"। राजन्, दण्डिन् इति स्थिते 'नोपधायाः (पा० ६,४,७)'—'सर्वनामस्थाने चासम्बुद्धौ (पा० ६,४,८)'-इति दीर्घत्वम्;—दण्डिन्नित्यत्रापि 'इन्हन्पूषार्यम्णां शौ (पा० ६,४,१२)'—'सौ च (पा० ६,४,१३)'—इति दीर्घत्वम्, 'न-लोपः प्रातिपदिकान्तस्य (पा० ८,२,७)'—इत्युभयोरपि नकार-लोपे कृते राजा दण्डीति। एव मुपधाविकारो भवति॥

"अथापि वर्णलोपो भवति, तत्त्वा यामीति"। अत्र चकारलोपः। याचामीत्येव मेतद् द्रष्टव्यम्। अयञ्च छान्दस एव। अतएव च छान्दसत्वादेव मेव याच्ञाकर्मस्थं पठितो "यामि (१भा० ३५३ पृ०)", "मन्महे (१भा३५२ पृ०)" इति। भाषायां याचे इति भवति॥

"तत्त्वा यामि*"—इत्यनया त्रिष्टुभा उपाकृतः पुनःशेपो वरुणं तुष्टाव। आज्याकृतिरनया साग्निकेषु क्रतुषु समिष्टयजुष उत्तरकालं हूयते। चतुर्मास्येषु च वरुणप्रघासेषु वारुणस्य हविषो याज्यैषा †। हे 'वरुण!' 'तत्' अहं 'त्वा' वरुणं 'यामि' याचे इत्यर्थः। किम्? यत् ममाभिप्रेतम्। कथम्पुनर्याचे? 'ब्रह्मणा' ऋग्यजुःसामाख्येन 'वन्दमानः' स्तुवन्। किञ्च यदेव त्वं मया याच्यसे,

---

* तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः॥" ऋ० सं० १, २, १५, १। किञ्च "तत्त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥" ऋ० सं० ५, ७, २९, ४।

† एवञ्च प्राथमिकैषा।

'तद्' एव अय मपि 'यजमानः' 'हविर्भिः' संस्कृतैः सान्नाय्यादिभिः 'आशास्ते'। तावावां भवन्त मेक मेवार्थं याचावहे, स्तुतिभिर्हविर्भिश्च। स त्वम् 'अहेळमानः' अक्रुध्यन्। सर्वो हि याच्यमानः क्रुध्यतीत्यत एव मुच्यते॥ हे 'वरुण!' 'बोधि' बुध्यस्व। बुद्धा चैत मावयोरभिप्रेतार्थं कुरु। उरुशंसेत्येकं पदं सम्बोधनञ्च। हे 'उरुशंस' बहुस्तुत्य! वरुण! 'मा' 'नः' अस्माकं याचमानानाम् 'आयुः' 'प्र मोषीः'। कुरु नोऽभिप्रायसिद्धं मित्यभिप्रायः॥

"अथापि द्विवर्णलोपस्तृच इति" अत्र ऋवर्णरेफयोर्लोपः * * * *। स लुप्यते ऋवर्णेन साकम्*॥

"अथाण्णादिविपर्ययो भवति, ज्योतिर्घनोबिन्दुर्वाय्य इति"। 'द्युत दीप्तौ (भ्वा०आ०)', तस्यादिव्यापत्त्या ज्योतिः। 'हन हिंसागत्योः (अदा०प०)', तस्य घन इति। 'भिदिर् विदारणे (रु०उ०)', तस्य बिन्दुः। 'भट भृतौ (भ्वा०प०)'। तस्य वाय्यः॥

"अथाण्याद्यन्तविपर्ययो भवति, स्तोका रज्जुः सिकतास्तर्किति"। 'स्तुतिर् चरणे (भ्वा०प०)', तस्याद्यन्तविपर्ययेण स्तोकाः। 'सृज विसर्गे (दि०आ०,तु०प०)', तस्य रज्जुः। 'कस विकसने (भ्वा०प०)', तस्य सिकता। 'कृती छेदने (तु०प०), तस्य तर्कुः॥

"अथाप्यन्तव्यापत्तिर्भवति——"॥ २॥

---

* "छन्दसि चेवर्णरेफादिलोपश्च छन्दसि" इति का० वा० (पा० १, १, २५)। 'छन्दसि किं ज्ञाप्यते?' सि० कौ० वै० १अ०।

ओघो* मेघो नाधो गाधो वधू†र्मध्वित्यथापि वर्णोपजन आस्य द्वारो‡ भरूजेति तद्यच स्वरादनन्तरान्तस्थान्तर्द्धातु भवति§ त द्विप्रकृतीनां॥ स्थान मिति प्रदिशन्ति तच सिद्धाया मनुपपद्यमानाया मितरयोपपिपादयिषेत्तचाप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारु मित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते द्मूनाः क्षेचसाधा इत्यथापि नैगमेभ्यो भाषिका उष्णं घृत मित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु**॥ ३॥

"ओघो मेघो नाधो गाधो वधूर्मध्वित्ति"। 'वह प्रापणे (भू० प०)', तस्यान्तव्यापत्त्या ओघः। 'मिह सेचने (भू० प०)', तस्य मेघः। 'णह बन्धने (दि० उ०)', तस्य नाधः। 'गाङ् विलोड़ने (भू० आ०)', तस्य गाधः। 'वह प्रापणे (भू० उ०)', तस्य वधूः। 'मद तृप्तौ (चु० आ०)', तस्य मधु॥

"अथापि वर्णोपजनः, आस्य द्वारो भरूजेति"। 'अस् क्षेपणे (दि० प०)', तस्य आस्यत्। 'दृङ् सम्भक्तौ (क्या० आ०)', तस्य द्वारः। 'भ्रस्ज पाके (तु० उ०)', तस्य भरूजः॥

---

* "आघो" च। † "वधो" ख। ‡ "आस्यद् द्वारो" च।
§ "०न्तर्द्धातुर्भवति" क, ख, ग। परं हरिविरुदः। "०न्तर्द्धा तु भवति" च।
॥ "तद्धि प्रकृतीनां" ख। "तद् द्विप्रकृतीनां" च।
¶ एतावदेव घ-पुस्तकं खण्डितम्।
** ख-च-पुस्तकयोरिदं न दृश्यते।

एवं व्याकरणेऽपि लक्षणप्रधाने सति अर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः, किं पुनर्निरुक्ते यदर्थप्रधान मेव। तस्मात् साधूक्तम्,—"अथानन्वितेऽर्थेऽपादेशिके विकारेऽर्थनित्यः परीक्षेत केन चिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्०—०", "विभक्तीः" अपि "यथार्थं" "सन्नमयेत्" इति (१४७पृ०)॥ एव मय मादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विवर्णलोप आदिविपर्यय आद्यन्तविपर्ययो वर्णोपजनश्छन्दसि भाषायाञ्च द्रष्टव्याः, दृष्ट्वा च यथासम्भव मनुविधेयम्॥

अतः परं सम्प्रसारणचिन्ता वर्त्तिष्यते, तदर्थ मिद मारभ्यते;—"तद्यत्र खरादनन्तरान्तस्थान्तर्धातु भवति, त द्विप्रकृतीनां स्थान मिति प्रदिशन्ति"। सम्प्रसार्यप्रकृतयश्चासम्प्रसार्यप्रकृतयश्चोभयप्रकृतयश्च धातवः। तत्रैवं सत्युभयप्रकृतिषु शास्त्रविषयगतं यद् वक्तव्यं 'तत्' इद मुच्यत इति पर्युपयुक्तस्तच्छब्दः।

आह;—इद मेव तावदुच्यता मुभयप्रकृतीनां किंलक्षणम्? इति। उच्यते;—'यत्र' यस्मिन् धातौ 'खरात्' अकारादेः 'अनन्तरा' अनन्तर्हिता अन्येन व्यञ्जनेन परा वा पूर्वा वा 'अन्तस्था' य-र-ल-वाना मन्यतमो वर्णः 'अन्तर्धातु' धातुमध्ये भवति। किं तत्र? 'तत्' एतदेव लक्षणं धातुरूपं हि 'द्विप्रकृतीनां' द्विस्वभावानां शब्दानां 'स्थानम्' आश्रयः 'इति' एव माचार्याः 'प्रदिशन्ति' प्रविभागेनोपदिशन्ति।

तद्यथा;—'यज देवपूजासङ्गतिकरणदानेषु (भ्वा० उ०)'—इति। अत्र द्वे शब्दप्रकृती भवतः। सम्प्रसारणपक्षे तावत्,—इष्टवान्, इष्टः,

द्रष्टा ; एताः शब्दप्रकृतयो भवन्ति । असम्प्रसारणपक्षे पुनः,—यष्टा, यष्टुं, यष्टव्य मित्येताः ॥

"तत्र सिद्धाया मनुपपद्यमानाया मितरयोपपिपादयिषेत्" । 'तत्र' एवं सति एकप्रकारेण 'सिद्धायाम्' अर्थसिद्धौ 'अनुपपद्यमानायाम्', 'इतरया' 'उपपिपादयिषेत्' उपपादयितु मिच्छेत् । अर्थे * द्वयोः सम्प्रसारणासम्प्रसारणप्रकृत्योरर्थयेवोपपद्यतेऽर्थतस्तथैवोपपादयेत् । अथवोभयथाप्यनुपपद्यमानेऽर्थे स्वय मुत्पाद्य निर्द्धार्य यथा यथोपपद्येतार्थः तथा तथोपपादयेत्, अपि तल्लक्षणशास्त्रविहितेनार्थसाधनोपायेन ; अर्थस्य प्रधानत्वात् ॥

"तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति" । 'तत्रापि' एतस्मिन्नपि सम्प्रसारणलक्षणे सति "एके" धातवः 'अल्पनिष्पत्तयो भवन्ति' अल्पेषु शब्दरूपेषु सम्प्रसारणप्रकृतिरभिनिष्पद्यते । तदप्युपेक्षितव्यम् ॥

"तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारु मिति" । 'तद्यथा' एतदुदाहरणजातम्,—ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति । अवतेर्गत्यर्थस्य (भू० प०) क्ति-प्रत्यये परतः "च्छ्वोः शूडनुनासिके च (६,४,१९)"—इति वर्त्तमाने "ज्वरत्वरस्रिव्यविमवा मुपधायाश्च (६,४,२०)"—इत्यूठ्भावः क्रियते ; तत ऊतिरिति भवति‡ । 'मृद मर्दने (भू० आ०)', तस्य मृदुः§; रेफः सम्प्रसार्यमाण ऋकारो भवति । एव मेव 'प्रथ प्रख्याने (भू० आ०)', तस्य पृथुः॥ । 'प्रुष

* "अर्थे" ख ।

† "तथोपपादयेल्लक्षणशास्त्रविहिते" ख ।

‡ १ भा० ४०८ पृ० द्रष्टव्यम् ।

§ १ भा० २५० पृ०, २८० पृ० द्रष्टव्यम् ।

॥ १ भा० ११ पृ०, ४१२ पृ० द्रष्टव्यम् ।

दाहे (भू० प०)', तस्य पृषतः* । 'कणः शब्दार्थः (भू० प०)', कुणारुः† ॥

एव मपि सम्प्रसार्यासम्प्रसार्यविशेषपरिज्ञेपशब्दान् निर्ब्रुवता पुंसा "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते"। 'अथापि' इद मपर मुपेक्षितव्य मागमशब्दान् निर्ब्रुवता। आह;—किम्? इति। उच्यते;—'भाषिकेभ्यो धातुभ्यः' भाषायां ये प्रायेण प्रसिद्धप्रयोगास्ते भाषिकास्तेभ्यः। 'नैगमाः' छन्दोविषयाः। 'कृतः' कृत्प्रत्ययान्ताः शब्दाः। 'भाष्यन्ते' विक्रियन्ते निरुच्यन्त इत्यर्थः॥

तद्यथा,—"दमूनाः क्षेत्रसाधा इति"। 'दम उपशमे (दि० प०)'; तस्य, भाषायां दाम्यति अनड्वान्, दमयति अनड्वाहम्, दान्तः अनड्वान् इत्येवमादयः प्रयोगा भवन्ति; छन्दसि पुनः दमूना अग्निरुच्यते स भाषासामान्येन केन चिन्निर्वक्तव्यं दममना इत्येवमादिना‡। एव मेव साध्यतेर्भाषाप्रायोक्तेः साधाः§ इति। "मित्रं न क्षेत्रसाधसम् (ऋ० स० ६,२,४०,४)"—इत्येवमादयो मित्र मिव क्षेत्रसाधस मित्येवमादिना प्रकारेण निर्वक्तव्याः॥

"अथापि नैगमेभ्यो भाषिकाः"। निगमे छन्दसि ये प्रायोक्त्या प्रसिद्धाः, तेभ्यः सामान्यं गृहीत्वा 'भाषिकाः' कृत्प्रत्ययान्ता भाष्यन्ते विक्रियन्ते।

तद्यथा,—"उष्णं घृत मिति"। 'उष दाहे (भू० प०)'; एष

---

* १ भा० १५५ पृ० द्रष्टव्यम्।
† १ भा० ४२७ पृ० द्रष्टव्यम्।
‡ १ भा० ३९० पृ० द्रष्टव्यम्।
§ १ भा० ३८ पृ० द्रष्टव्यम्।

प्रायेण छन्दसि प्रसिद्धः,—"प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः (य० वा० सं० १,७)"—इत्येवमादि। भाषायां पुनरूष्ण मिति श्रूयते। स एषौ नैगमशब्दसामान्येन निर्वक्तव्यः। एव मेव 'घृ क्षरणदीप्त्योः (भू० प०)'; तस्य, छन्दसि "आ त्वा जिघर्मि (य० वा० सं० ११, २३)"—इत्यादिषु सिद्धः प्रयोगः; भाषायां पुनर्घृत मिति * श्रूयते। स एवं जिघर्त्तेरेव छान्दसस्य सामान्ये निर्वक्तव्यः। एवं भाषाविषयेभ्यश्छन्दोविषया निर्वक्तव्याः, छन्दोविषयेभ्यश्च भाषाविषयाः॥

अथापीद मपर मुपेक्षितव्य मनेन शब्दान् निर्ब्रुवता। आह;—किम्? इति। उच्यते;—"अथापि प्रकृतय एवैकेषु भाष्यन्ते, विकृतय एकेषु"। एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते, विकृतय एकेषु। धातोराख्यातपदभावेन यः प्रयोगः, सा प्रकृतिः। नामीभूतस्य तस्यैव यः प्रयोगः, सा विकृतिः॥ ३॥

शवतिर्गतिकर्मा कम्बोजेषेव भाष्यते† कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकार मस्यार्येषु‡ भाषन्ते शव इति दातिर्लवनार्थे§ प्राच्येषु दाच मुदीच्येषेव मेकपदानि निर्ब्रूयादथ तद्धितसमासेषेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वं॥ मपर

---

* घृ-धातोर्भाषायां चय एव प्रयोगा भवन्ति,—घृतं घृणा घर्मेति क्लप्तम् (पा० ७, १, ९५) सूत्रे भाष्यकारः।

† "भाषते" ख, ग, ङ। इत्तिपुस्तकयोश्च।

‡ "विकार मस्यार्थेषु" क ख, ग, ङ।

§ "दातिर्लवणार्थे" क, ख, ग।

॥ "तद्धितसमासेष्वेकपर्वसु च पूर्वंपूर्वं" च।

मपरं प्रविभज्य निर्ब्रूयाद् दण्ड्यः पुरुषो * दण्ड मर्हतीति † वा दण्डेन सम्पद्यत इति वा दण्डो ददते ‡ र्द्वारयतिकर्म्मणोऽक्रूरो ददते § मणि मित्यभिभाषन्ते. दमनादित्यौपमन्यवो दण्ड मस्या कर्षतेति॥ गर्हायाम्¶ ॥ ४ ॥

"शवतिर्गतिकर्मा" गत्यर्थो धातुः। "कम्बोजेष्वेव भाष्यते" म्लेच्छेषु प्रकृत्या प्रयुज्यते, आख्यातपदभावेन। शवति गच्छतीत्यर्थः। उदाहरणविशेषप्रसक्तः कम्बोज-शब्दो निरुच्यते ;—"कम्बोजाः कम्बलभोजाः" ते हि प्रायेण कम्बलानुपभुञ्जन्ते, हिमप्रायत्वात्तस्य देशस्य। "कमनीयभोजा वा" कमनीयानि प्रार्थनीयानि चैते हि द्रव्याणि उपभुञ्जन्ते प्रचुररत्नो हि स देश इति। कम्बल-शब्दं विग्रहप्रसक्तं निर्ब्रवीति ;—"कम्बलः कमनीयो भवति" प्रार्थनीयो हि स शीतार्त्तैर्भवति। "विकार मस्यार्येषु भाषन्ते शव इति" आर्येषु जनपदेषु अस्यैव शवतेर्विकारं भाषन्ते, मृतकनामधेयभूत मेवं प्रयुञ्जते ; कथम्? शव इति। एव मेकेष्वाख्यातस्य एव प्रयुज्यते, नामीभूत एकेषु ;—इत्येतत् प्रकृतित्वं विकारत्वं च। अथवा चेतनावत्येकेषु

---

* "दण्ड्यः पुरुषो" क।
† "दण्ड्यः पुरुषो दण्डपुरुषो दण्ड मर्हतीति" ङ च।
‡ "ददाते" क, ख, म।
§ "अक्रूरो दधाते" ख।
‖ "कर्षतीति" क, ख, ग, ङ।
¶ ङ-च-पुस्तकयोर्नेहापि खण्ड-समाप्तिः।

गमनक्रियायोगिनि द्रव्ये प्रयुज्यते, एकेषु पुनश्चेतनारहित एव;—इत्येतत् प्रकृतित्वं विकारत्वञ्च ॥

द्वितीय मुदाहरणम्।—"दातिर्लवनार्थे प्राच्येषु"। दातिर्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते। तद्यथा,—व्रीहीन् दाति; यवान् दाति। अथ मेव नामीभूतः "उदीच्येषु" जनपदेषु प्रयुज्यते "दात्रम्" इति। दीयते अनेनेति दात्रम्, लूयत इत्यर्थः॥

"एव मेकपदानि निर्ब्रूयात्" अनेन प्रकारेण एकपदानि निर्ब्रूयात्;—भाषानिगमव्यवस्थया, देशभाषाप्रसिद्धिविभागेन च॥

आह;—एवं तावदतद्धितयुक्तेषु पदेषु असमासयुक्तेषु च निर्वचनम्। अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि, तानि कथं निर्वक्तव्यानि?—तानि किं तद्धितयुक्तेषु पदेषु पूर्वपदार्थो निर्वक्तव्यः उत तद्धितार्थसमासयुक्तेष्वपि? किं पदार्थः पूर्वम् उत समासार्थो वा पूर्वम्? इति। उच्यते;—"अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वं मपर मपरं प्रविभज्य निर्ब्रूयात्"। अथ-शब्दो विशेषाधिकारार्थः। 'तद्धिताः (पा० ४,१,७६)'—इत्यधिकृत्य ये प्रत्यया विहिताः, ते तद्धिताः; 'समर्थः पदविधिः (पा० २,१,१)'—इत्यधिकृत्य ये विहिताः, ते समासाः। तेषूभयेष्वपि तद्धितसमासेषु अविशेषेण एकपर्वसु चानेकपर्वसु च एकपदेषु चानेकपदेषु च। तद्यथा;—दण्डी इत्येकपदस्तद्धितः, वार्ष्यायणिरित्यनेकपदः। अनेकानि ह्येष पदानि स्वात्मन्यन्तर्णीय प्रवर्त्तते। तद्यथा,—वृषस्यापत्यं वार्ष्यः, वार्ष्यस्यापत्यं वार्ष्यायणः, तस्यापि वार्ष्यायणिरिति। एवं समासेष्वप्येकपदेषु चानेकपदेषु चैवं निर्ब्रूयात्।

यथा वक्ष्यामः,—एकशेषः एकपदः समासः। 'सरूपाणा मेकशेष एकविभक्तौ (पा० १,२,६४)'—इति। तद्यथा,—पुरुषश्च पुरुषश्च पुरुषौ, पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः इत्येवम्।

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः॥"*

एतेऽनेकपदाः समासाः। पाणिनेः सूत्रम्,—'सङ्ख्यापूर्वो द्विगुः (पा० २,१,५२)'। पञ्चमूली, पञ्चरथी, दशरथी इत्येव मादि। सूत्रम्,—'चार्थे द्वन्द्वः (पा० २,१,२८)'। स च पुनर्विभाषयैकवद् भवति†। तद्यथा,—प्लक्षन्यग्रोधौ, अहिनकुलम्, भीमार्जुनवासुदेवाः इत्यादि। उपसर्गनिपातपूर्वकोऽव्ययी भावः‡। तद्यथा,—उपमणिकम्, अनुसमुद्रम्, व्यभ्रम् इत्येव मादि। तुल्यविभक्तिलिङ्गयोरुभयोः पदयोः समानाधिकरणः कर्मधारयः§। तद्यथा,—कृष्णमृगः, रक्तोऽश्वः, श्वेतपताका इत्येवमादि। एतेष्वेकपदेषु चानेकपदेषु च तद्धित-समासेषु पूर्वं पूर्वं मेव निर्ब्रूयादपर मपर मेव प्रविभज्य विग्रहेत्यर्थः। पूर्वं तद्धितार्थं निर्ब्रूयात्, पश्चात् पदार्थम्। समासेष्वपि,—पूर्वं समासार्थम्, पश्चात् पदार्थम्॥

---

* "समासस्तु चतुर्धेति प्रायोवादस्तथापरः"—इत्यपि मतम (वै०भू०सा०सं०) अत्र तत्पुरुषे एव द्विग्-कर्मधारययोर्निवेशः स्वीकार्यः। तथाहि,—'पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। * * *। तत्पुरुषविशेषः कर्मधारयः। तद्विशेषो द्विगुः।'—इति सि० कौ० सं०। तथाह्यन्यत्रैव स्त्रीत्वं वक्ष्यति,—"सुपां सुपा तिङां माना धातुनाथ तिङां तिङा। सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।" वै० भू० सा० सं०।

† "सर्वो द्वन्द्वो विभाषयैकवद् भवति" प० शे० ३७।

‡ "अव्ययीभावः" पा० १. १, ५।

§ "विशेषणं विशेष्येण बहुलम्" पा० १, २ ५७।

तदेतत् उदाहरणैरेव दर्शयति; तद्यथा,—"दण्ड्यः पुरुषो दण्ड मर्हतीति वा दण्डेन सम्पद्यत इति वा"। दण्ड्य इत्येष तद्धितः; पुरुषशब्दविशेषणम्। पूर्वं तावत् तद्धितार्थं निर्वक्ति;—कस्मिंश्चिदपराधे दण्ड मर्हतीति दण्ड्यः, दण्डेन वा कार्षापणादिना यः सम्पद्यते संयुज्यते स दण्ड्यः।

अधुना पदार्थनिर्वचनम्;—"दण्डो ददतेर्द्धारयतिकर्मणः"। ददतेः धारयत्यर्थे वर्त्तमानस्य; धार्यते ह्येषोऽपराधेषु राजभिः।

आह;—दृष्टः पुनः क्वचित् ददतेः धारयत्यर्थे? इति। उच्यते;—दृष्टो वेदे लोके च। वेदे तावद्,—"विश्वे देवाः पुष्करे मा ददन्त (ऋ० सं० ५,३,२४,१)"—इति। "अक्रूरो ददते मणि मित्यभिभाषन्ते"। तथा लोके;—'अक्रूरो ददते मणिम्'। अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः, स ददते मणिं स्यमन्तकनामानं शिरसा *। लोकेऽप्येवं ददतिर्द्धारणार्थे भाष्यते।

"दमनादित्यौपमन्यवः" आचार्यो मन्यते। तेन हि अदान्तो दम्यते राजभिः, तेनादान्तान् दमयेदित्युक्तम्; लोके हि प्रसिद्धो यः कश्चिददान्तो भवति, तं मधिकृत्य वक्तारो भवन्ति।—"दण्ड मस्याकर्षतेति गर्हायाम्"। दण्ड मस्याकर्षत हे सभासदः! तेन सम्प्रति मयं ततो दान्तो भविष्यति;—इत्येव मयं गर्हायां दृष्टः। एवं दमनाद् दण्डः,-इत्यौपमन्यव आचार्यो मन्यते ॥ ४ ॥

---

* 'मणिः स्यमन्तको हस्ते भुजमध्ये तु कौस्तुभः'—इति हेमचन्द्रः। विष्णुरतस्तु भागवत-दशमे स्यमन्तकोपाख्याने। स च मणिः दक्षिणबंधर-अफलक-पुत्रस्य गान्दिनीगर्भजस्याक्रूरस्य सन्निधौ शतधन्वना रक्षितः।—ब्रह्मपुराणे द्रष्टव्यम्।

कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः क्ष इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः कि मस्मिन् ख्यान मिति कषतेर्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य* राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः† पुरि शयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुष मभिप्रेत्य। यस्मात्परन्नापर मस्ति ‡ किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्§। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्व मित्यपि निगमो भवति ॥ ५ ॥

तद्धितस्त्वेव द्वितीय मुदाहरणम्;—"कक्ष्या रज्जुरश्वस्य"—इति। कक्ष्या इत्येष तद्धितः। आह;—कः पुनरियं कक्ष्या? इति। उच्यते;—या अश्वस्य सन्नाहरज्जुः, सा कक्ष्येत्युच्यते।

एवं कक्ष्या-शब्दस्य तत्त्व मुक्त्वाधुना तद्धितार्थं ब्रवीति;—"कक्षं सेवते"। सा हि कक्षं सेवते, कक्षसंयुक्ता भवति। कक्षे भवा वा कक्ष्या‖।

अधुना पदार्थं निर्वक्ति;—"कक्षो गाहतेः" विलोडनार्थस्य (भू० आ०)। कक्षयोरेव हि विलोड़यति * * * द्रष्टव्यम्¶। अत्र पुनः,—"क्ष इति नामकरणः"। सर्व मन्यदाद्यन्तविपर्ययादि यथोपदर्शितं यथासम्भवं योज्यं तत्र तत्र। "ख्यातेर्वानर्थकोऽभ्यासः" ककारः,

---

* इदमेव द्वितीयखण्डसमाप्तिः ख च।
† 'पुरिशादः" क घ। पुर्षादः" ख। 'पुरिषदः" ङ० क०।
‡ "नापरं" च। § "कञ्चित्" ङ, च।
‖ 'शरीरावयवाच्च' पा० ४ १ ५५।
¶ 'क्लीदंश्यादि द्रष्टव्यम्' क, 'क्लीदंश्यादि द्रव्यम्' ख।

कण्डूः यत् कच्चं इत्युच्यते। अर्थवानेव वा ककारः। कथम्? "किं मस्मिन् स्थान मिति"। एवं किं मस्मिन् स्थापनीय मस्ति? न किञ्चिदपि, अदर्शनीयत्वात्; गूहनीयोऽय मित्यर्थः। स एष एवं सति किं स्थः यत् कच्च इत्युच्यते? "कषतेर्वा (भू० प०)" नित्यकालं स्रावी खेदशीलत्वात् कण्डूं ददाति, ततो नखैः कष्यते यतः, तस्मात् कषणक्रियायोगात् कच्च इत्युच्यते। "तत्सामान्यान्मनुष्यकच्चः"। स्त्रीकच्चस्य सामान्यात् मनुष्यकच्चोऽपि कच्च इत्युच्यते। "बाङ्मूलसामान्यादश्वस्य"। अश्वस्यापि यो बाङ्मूलप्रदेशः, स कच्च इत्युच्यते। तं सेवत इति कच्चा।

अन्ये तु ब्रुवते;—"पूर्वं पूर्वं मपरं मपरं प्रविभज्य निर्ब्रूयात्*" पूर्वं पदं पूर्वं मेव प्रविभज्य निर्ब्रूयात्, अपरं पद मपर मेवेति। एतस्मिन् अर्थे कल्प्यमाने पदाना मेव पौर्वापर्ये निर्वचने तद्धितसमासयोस्त्वनियमः पूर्वं पश्चादेति। पूर्व एव त्वर्थः साधीयान्॥ उक्तं तद्धित-निर्वचनलक्षणं सोदाहरणम्॥

अधुना समासोदाहरण मुच्यते;—"राज्ञः पुरुषो राजपुरुषः"। राज्ञ इत्युक्ते सर्वं स्वं गम्यते, षष्ठीसामर्थ्यात्। तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते, निर्देशसामर्थ्यात्। अथेदानीं राजपुरुष इत्युक्ते, राजा पुरुष मन्येभ्यः स्वामिभ्यो विनिवर्त्त्य स्वात्मनि संयुनक्ति; पुरुषोऽपि राजान मन्येभ्यः स्वेभ्यो विनिवर्त्त्य स्वात्मना संयुनक्ति। तौ उभावप्यन्योन्यविमिश्रपदार्थकौ मिथः संसृष्टपदार्थौ समस्येते। अथेदानीं राजपुरुष आनीयता मित्युक्ते न राजान मानयन्ति, नापि पुरुष-

* १९१ ऋ० १७ सं०।

मात्रम्, नाप्युभयम्; किन्तु राजस्वामिकं पुरुष मानयन्ति*। एवं समानार्थः। कुतः पुनरेतत् राजस्वामिक मिति? प्रधानोपसर्जने हि सहभूते विवक्षिते मेक मर्थं ब्रूतः॥

"राजा राजतेः"। राजतेर्दीप्त्यर्थस्य (भू० उ०)। दीप्यते ह्यसौ पञ्चानां लोकपालानां वपुषा। "पुरुषः पुरिषादः"। पूः शरीरं बुद्धिर्वा; तयोरसौ विषयोपलब्ध्यर्थं सीदतीति पुरिषादः, पुरुषः। "पुरिशयः" अथवा तयोरसौ शेते विशेषेणास्ते इति पुरिशयः सन् पुरुष इत्युच्यते। "पूरयतेर्वा" पूर्णं मनेन पुरुषेण सर्वगतत्वात् जगदिति पुरुषः। "पूरयत्यन्तरित्यन्तरपुरुष मभिप्रेत्य"। अन्तरित्यन्तरपुरुषाभिप्रायेणैव मुच्यते प्रासङ्गिकम्।

निगमश्च भवति;—"यस्मात् परं नापरं मस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्"। यस्मात् परं मपरं वा न किञ्चिदस्ति, यस्माच्च न किञ्चिदणीयो नापि ज्यायोऽन्यदस्ति, स एव सर्वं मित्यभिप्रायः। वृक्ष इव स्तब्धो नित्यसङ्कोचविकाशधर्मादिविद्योतनवति स्वात्मनि सर्वविभागेन तिष्ठति यः, तेन पुरुषेणेदं पूर्णं सर्वं जगदिति॥ ५॥

विश्वकद्राकर्षो वीति चकद्र इति श्वगतौ भाष्यते द्रातीति गतिकुत्सना कद्रातीति द्रातिकुत्सना चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति

* "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इत्यादि वै० भू० सा० स० द्रष्टव्यम्।

विश्वकद्रः कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेरेवं तद्धितसमासान्निर्ब्रूयान्नैकपदानि निर्ब्रूयान्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञानेऽस्रूयोपसन्नाय तु निर्ब्रूयाद्यो वाक्यं विज्ञातुं स्यान्मेधाविने तपस्विने वा(३*) ॥ ६ ॥

समासस्यैव द्वितीय मुदाहरणम्;—"विश्वकद्राकर्षः" इति। विश्वकद्र माकर्षतीति विश्वकद्राकर्षः।

आह;—कः पुनरयं विश्वकद्र इति? "वीति चकद्र इति श्व-गतौ भाष्यते"। वीति चकद्र इति शब्दद्वयं श्व-गतौ भाष्यते। श्वभिः साकं यो गच्छति मनुष्यः, तस्मिन् भाष्यते। "द्रातीति गति-कुत्सना"। अत्र पुनः द्रातीति गतिकुत्सना। 'द्रा कुत्सायाम् (अदा० प०)'—इत्युक्तम्, इदं हि तस्य कुत्सितगतित्वम्, यदस्य श्वभिः सह राति। "कद्रातीति द्रातिकुत्सना"। इदानीं कद्रातीति द्रातिकुत्सना कुत्सितकुत्सनेत्यर्थः। इद मपरं कुत्सिततरम्, यद् गत्वा श्वभिः सह निहन्ति; तस्मात् कद्रातीति कुत्सितकुत्सनेत्युपपद्यते। "चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः"। अथेदानीं च इत्येष कद्रातीति एव मेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः। यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति। "तदस्मिन्नस्तीति विश्वकद्रः"। तदस्मिन् द्वितय मप्यस्ति,—कुगतित्वं, कुत्सिततरगतित्वञ्च; नानाप्रकार मिति

* इत्र तृतीयखण्डसमाप्तिः ङ, च।

विश्वकद्रः श्व-जीवनः पुरुषः। त मपराधे कस्मिंश्चित् वर्त्तमान मन्योन्य आकर्षति, स विश्वकद्राकर्षः॥

अन्ये तु ब्रुवते;— श्वैव विश्वकद्रः; अस्यैव हि स्वभावत एव हिंस्रत्वाद् गतिः कुत्सिता; स च पुनः पादविकलः, अतस्तस्य कुत्सितकुत्सितत्वम्। वीत्युभयोरर्थयोर्मत्वर्थः, त माकर्षति यः पुरुषः, स विश्वकद्राकर्षः॥

अधुना रूपसमासं दर्शयति;—"कल्याणवर्णरूपः, कल्याणवर्णस्येवास्य रूपम्"। कल्याणवर्णं सुवर्णम्, तस्येव यस्य रूपं स कल्याणवर्णरूपः। अग्निरन्यो वा कश्चित्।

कल्याणादिशब्दान् विग्रहप्रसक्तान् निर्ब्रवीति;—"कल्याणं कमनीयं भवति"। प्रार्थ्यते तत् सर्वेणैव। "वर्णो वृणोतेः"। आवृणोति हि स आश्रयम्। "रूपं रोचतेः"। तद्धि रोचते, तद्धि रोचिष्णुः भवति।

"एवं तद्धितसमासान्निर्ब्रूयात्"—इत्युपसंहारवचनम्॥

"नैकपदानि निर्ब्रूयात्" प्रकरणोपपदविहितानि सन्ति तानि*; केवलान्येव परेणाभिद्रोहब्रुद्धा पृच्छमानानि न निर्ब्रूयात्, न निर्वक्तव्यानीति। किङ्कारणम्? तेषां प्रकरणादुपपदाद्वा अर्थः शक्यतेऽवधारयितुम्, सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात्; ततश्च प्रत्यवायेन योगादपहारश्च स्यात्। तद्यथा;—'जहा (१भा० ३८८ पृ०)'—इत्येकं पदं प्रकरणोपपदरहितम्; न विज्ञायते, किं हन्तेः

* "सन्दिग्धानि" ख।

(अदा० प०) उत "श्रो हाक् त्यागे (जु० प०)'—इत्यस्य धातोः स्यात्? इति। तत् पुनरेतत्—"मा नु एकस्मिन् (ऋ० स० ६,२, ४८,४)"—इत्येतस्या सृचि * यदेतन्मा वधीरिति पदम्, एतस्माद् गम्यते हन्तेः स्यादिति। किङ्कारणम्? विज्ञातप्रकरणोपपदस्य हि समञ्जसं ह्यर्थ-करणं † न्याय्य मित्येव मनवगतसंस्काराणा मेकपदानां प्रकरणादर्थावधारण मुपपदाद्वा शक्यते कर्त्तुम्। अत इद मुक्तम्,—"नैकपदानि निर्ब्रूयात्"—इति॥

नावैयाकरणायेति। उक्तं निर्वचनलक्षणम्, अधुना यस्मै निर्वक्तव्योऽय मुक्तनिर्वचनलक्षणः समाम्नायः, तस्य लक्षणं वक्तव्य मिति तदर्थ मिद मारभ्यते,—"नावैयाकरणाय"। यस्तावद्वैयाकरणः, तस्मै न निर्वक्तव्योऽयं समाम्नायो न ह्यसावलक्षणज्ञत्वात् व्युत्पाद्य निरुच्यमान मेतद् बुद्धेत, ततो व्यर्थ एव श्रमः स्यादिति।

किञ्च "नानुपसन्नाय" ‡। किं मतिमद्दद्भुत मनेन कृतं यद् व्याकरण मधीत मिति,—एतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात्; धर्मो हि सर्वथैवापरित्याज्यः, तस्माद् वैयाकरणायापि सम्यगुपसन्नाय § परां शिष्यवृत्ति माश्रिताय निर्ब्रूयात्।

नैव मेव; किञ्च "अनिदंविदे वा"। अवैयाकरणोऽपि जडः कश्चिदसमर्थ एव वेदितुं स्यात्; बहु वेदितव्य मचास्ति, देवतादि किञ्चित् तस्मै वैयाकरणायापि इदं वेदितु मसमर्थाय अनिदंविदे

* "मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा पूर्व भूरिषु॥"
† "ह्यर्थः करणं" क। "ह्यथाकरणं" ख।
‡ "नानुसम्पन्नाय" क, ख।
§ "सम्यगुपसम्पन्नाय" क।

नैव निर्ब्रूयात्। अथ वा। इद मित्यात्मपर्यायवाचि। इदंविदे आत्मविदे, योगिने। स ह्यात्मज्ञान*विधूतकल्मषोऽल्पेनैव यत्नेन बोद्धुं सूक्ष्मानर्थान् शक्त इति इदंविदे निर्ब्रूयात्। अथ वा। यत्किञ्चिच्छास्त्र मिद मिति निर्दिश्यते। येन ह्यन्यत् किञ्चिदश्रुतं पूर्वशास्त्रम्, तस्मै न निर्ब्रूयादिदं निरुक्तशास्त्र मनास्फालितहृदयकुड्मलाय॥

किङ्कारणम्? "नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया"। यो हि न विजानाति नावबुध्यते, तस्याविज्ञातुर्नित्यकाल मेव विज्ञाने असूया; स ह्यनवबुद्धमान आत्मीयं दोष माचार्य एवावसृजति;—स्वय मेव तावदयं न बुद्धते किमस्मान् बोधयिष्यतीति। एतस्मात् कारणादश्रुतपूर्वान्यशास्त्राय अखिन्नमनसे† नेदं निर्ब्रूयात्॥

"उपसन्नाय तु निर्ब्रूयाद्, यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा"। य एव तु मेधावी स्यात्,—अन्यजन्मान्तरानुभावितया प्रज्ञया युक्तः, यो वा तपस्वी; कामं ताभ्या मवैयाकरणाभ्या मपि निर्ब्रूयादेव;—न हि तयोरसाध्यं किञ्चिदस्ति;—तपसा हि स्वय मपि वेदार्थः प्रादुर्भवेदेव। पूर्वेषा मृषीणां मेधाव्यपि च स्वय मुत्प्रेक्षितुं शक्नुयात्, कि मुतोच्यमान मवबोद्धुम्। यो वान्यः कश्चिदलं पर्याप्तो विज्ञातु मेतच्छास्त्रं भवेद्, दृढग्राही स्थिरबुद्धिः, तस्मै निर्ब्रूयादेव सर्वथा। अनुपसन्नाय नैव निर्ब्रूयात्; यद्यपि तपस्वी, मेधावी, दृढग्राही वा।

---

* "स ह्यात्मज्ञान" ख।

† "अविच्छिन्नमनसे" क।

उक्तं हि;—"यश्चान्यायेन निर्ब्रूयाद्यश्चान्यायेन पृच्छति। तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति"* ॥ ६ ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि। असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्॥ य आतृणत्त्यवितथेन† कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन्। तं मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत्‡ तमचनाहः॥ अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्॥ य मेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्§। यस्ते न द्रुह्येत्तमचनाहः॥ तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति निधिः शेवधि॥ रिति (४**)॥ ७॥

॥ इति द्वितीयाध्यायस्य प्रथमः पादः॥ २, १.

---

* "अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति। तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति॥" म० सं० २, १११।

† 'नृथेत्' क।

‡ 'द्रुह्येत्' च।

§ 'र्योपपन्नम्' ङ, च।

॥ यस्तेनेत्यादिषु स्वरचिह्नाभावः ङ-च-पुस्तकयोः।

¶ "शेवधि" ङ।

** ङादिपुस्तकेष्वित्थमेव चतुर्थखण्डसमाप्तिः।

अथाप्येत मर्थं मधिकृत्योदाहरन्ति ;—"विद्या ह वै ब्राह्मण मा जगाम"—इति। विद्या किल कामरूपिणी भूत्वा विद्याधिदेवता संयतात्मानं विदितवेदाङ्गवेदार्थं ब्राह्मणं प्रति कञ्चिदा जगाम। त मेत्य प्रक्रीभूतेवाच,—किम्? इति। "गोपाय मा" रक्ष माम्। ततः "ते" "अहं" गुप्ता सती "सेवधिः" * भविष्यामि, सुख-निधान मित्यर्थः। आह ;—कुतः पुनस्त्वां रक्षामि? "असूयकायानृ-जवेऽयताय"। असूयकः, परापवादशीलः। अनृजुः, यस्य मनोवाग्-देहेषु असमाः प्रवृत्तयः। अयतः, विप्रकीर्णेन्द्रियः ;—यत्किञ्चन कायाशुचिः। एवंलक्षणाय "न मा ब्रूयाः" त्वम्। किन्तया भविष्यति? "वीर्यवती तथा" अहं तव "स्यां" भवेय मित्यर्थः॥

"य आह्रणत्त्यवितथेन कर्णा"। अधुना शिष्योपदेश माह ;—य आ ह्रणत्ति, आ भिनत्ति, अपिहितावि सन्तौ कर्णौ विवृणोति। अवितथेन, सत्येन ब्रह्मणा। कथम्पुनरा ह्रणत्ति? "अदुःखं कुर्वन्नमृतं सम्प्रयच्छन्"। यो हि किञ्चिदा ह्रणत्ति, स दुःखयति; अयं पुनः सुख मा ह्रणत्ति। किञ्च अमृतत्वप्राप्तिहेतुज्ञानं सम्प्रयच्छन्। य आ ह्रणत्ति तस्मै किम्? इति। उच्यते ;—"तं मन्येत पितरं मातरञ्च" नेतरौ मातापितरा वित्यभिप्रायः। उक्तञ्च,—"उत्पादक-ब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् (म० सं० २,१४६.)"। "तस्मै" मातापितृभूताय गुरवे "न द्रुह्येत्"। "कतमच्चनाह";—कदाचिदपि आपद्यपि कष्टाया मित्य-भिप्रायः॥

* मूलपाठस्य श्रेवधिरिति तालव्यादिः।

अधुना इतरान् दुष्टशिष्यान् अभिशपन्नो विद्या इद माह;—

"अध्यापिता ये गुरुं नाद्रियन्ते" इत्यादि। अध्यापिताः सन्तो ये गुरुं प्रति नाद्रियन्ते, नादरं कुर्वन्ति। के पुनस्ते? इति। उच्यते;—"विप्राः" मेधाविनः सन्तो गृहीतविद्याः। कथम्पुनर्नाद्रियन्ते? "वाचा मनसा कर्मणा वा"। आह;—किं तेषाम्? इति। उच्यते;—"यथैव" "ते" तस्य "गुरोः" "न" "भोजनीयाः" न भोज्याः, न भोजनार्हाः, "तथैव" "तान्" "तत्" "श्रुतम्" अपि "न भुनक्ति" न पालयन्ति; श्रुतफलेन न संयुनक्तीत्यर्थः॥

अधुना यस्मै वक्तव्या, तस्य लक्षणं ब्रवीति;—"य मेव" "विद्याः" जानीयाः तम्। "शुचि मप्रमत्तम्" यमनियमेषु। "मेधाविनं" च "ब्रह्मचर्येणोपपन्नम्"। किञ्च; "यः ते न द्रुह्येत्" न द्रोह मुपगच्छेत्। "कतमच्चनाह" कदाचिदपि सर्वास्ववस्थासु "तस्मै मा ब्रूयाः" "त्वम् "निधिपाय" गोप्त्रे "ब्रह्मन्!"॥

आह;—"निधिः" कः? इति। उच्यते;—"शेवधिः" इति। शेव इति सुखनाम*; सुखनिधान मित्यर्थः। ब्रह्मलोको हि निधिः सुखानां कृत्स्नस्य जगतो यज्ञद्वारेण; अत इद मुक्तं "निधिः शेवधिरिति"॥ ७॥

इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ निरुक्तव्याख्यायां सप्तमस्याध्यायस्य† प्रथमः पादः॥ १॥

---

* १ भा० ६१८ पृ०।

† "द्वितीयाध्यायस्य" क।

॥ द्वितीयः पादः ॥

अथातोऽनुक्रमिष्यामो गौरिति पृथिव्या नामधेयं यद् दूरङ्गता भवति यच्चास्यामूतानि गच्छन्ति गातेर्वौकारो नामकरणोऽथापि पशुनामेह भवत्येतस्मादेवाथाप्यस्यान्ताद्वितेन कृत्स्नवन्निगमा भवन्ति गोभिः श्रीणीत मत्सर मिति पयसो मत्सरः सोमो मन्दतेस्तृप्तिकर्म्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति पयः पिबतेर्वा प्यायतेर्वा क्षीरं क्षरतेर्घसेर्वेरोनामकरणं उशीर मिति यथा। अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणोंऽशुः श्र मष्टमाचो भवत्यननाय शमभवतीति वा चर्म्म चरतेर्वोद्वृत्तं भवतीति वाथापि चर्म च श्लेष्मा च। गोभिः सन्नद्धो असि वीलयस्वेति* रथस्तुतावथापि स्नाव च श्लेष्मा च। गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ। ज्यापि गौरुच्यते गव्या चेत्तद्धित मथ चेन्न गव्या गमयतीषूनिति॥ १(५)॥

"समाम्नायः समाम्नातः, स व्याख्यातव्यः"—इति प्रतिज्ञातम् (२भा० ७पृ०)। सा च पुनरियं व्याख्या सामान्या वैशेषिकी च। तच्च सामान्या;—सर्वेषां नाम्ना मिदं सामान्यलक्षणम्, † इद माख्या-

* "वीड्यस्वेति" क।

† १च० १पा० १ख०—१ङ०। ७५०—१०५०।

तानाम्*, इद मुपसर्गाणाम्†, इदं निपातानाम्‡ इति। सोऽय मनयैव प्रक्रियया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः, तदनुपक्रान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि§, आगमश्च परिशोधितः॥, वेदो वेदाङ्गव्यूहश्च सप्रयोजन उक्तः¶, निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयविभागेन**, निर्वचनलक्षणञ्चानेकप्रपञ्च मुक्तम्††।

अथेदानीं विशेषव्याख्यया प्रतिपद मयं समाम्नायो व्याख्यातव्यः, तदधिकारार्थोऽयम् "अथ"-शब्दः। "अतः"-शब्दः क्रमे हेतौ वा। सामान्यव्याख्यानादनन्तरं विशेषव्याख्यान मेवावसरप्राप्त मित्येवं क्रमे। अथ वा हेतौ। यस्मात् सामान्यतः समाम्नायो व्याख्यातः अत इदानीं विशेषतः "अनुक्रमिष्यामः" आनुपूर्व्येण क्रमिष्यामो वर्णयिष्यामः, व्याख्यास्यामीति शेषः।

आह;—किंलक्षणा पुनरसौ व्याख्या? इति। उच्यते;—तत्त्वपर्यायभेद-सञ्ज्ञा-सन्दिग्ध-सन्दिग्धोदाहरण-तन्निर्वचनविभागेन यदाख्यानं सा व्याख्या निघण्टुप्रकरणे। तद्यथा। तत्त्वम्,—"गौ रिति पृथिव्या नामधेयम्"‡‡—इत्येव मादि। पर्यायवचनम्, प्रसिद्धेनाभिधानेना-

---

* १अ० १पा० १ख०—२ख०। ७पृ०—१०पृ०।
† १अ० १पा० ४ख०—५ख०। १०पृ०—४२पृ०।
‡ १अ० २पा० १ख०—२पा० ९ख०। ४२पृ०—८३पृ०।
§ १अ० ४पा० १ख०—५पा० १ख०। ८३पृ०—१०५पृ०।
‖ १अ० ५पा० १ख०—२ख०। १०५पृ०—११८पृ०।
¶ १अ० ६पा० १ख०—४ख०। ११९पृ०—१२०पृ०।
** १अ० ६पा० ५ख०—९ख०। १२०पृ०—१४१पृ०।
†† २अ० १पा० १ख०—७ख०। १४७पृ०—१७२पृ०।
‡‡ २अ० २पा० १ख० १७५ पृ० १ पं० (पृ० १७७ पृ०)।

प्रसिद्धस्यार्थस्य ख्यापनम्; तद्यथा,—पृथिव्या नामधेयं गौरिति। भेदो व्युत्पत्तिरिति समानार्थः; तद्यथा,—"यद् दूरं गता भवति *"—इत्येव मादि। सङ्ख्या; तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः †"। सन्दिग्धम्,—"तत्र निर्ऋतिर्निरमणाद्वृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते ‡"—इत्येव मादि। सन्दिग्धोदाहरणम्,—"य इमं चकार §"—इत्येव मादि। तन्निर्वचनम्,—"बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः ॥"—इत्येव मादि। एवम्प्रकारया व्याख्यया इदं नैघण्टुक-प्रकरणं व्याख्यास्यते ॥

"गौरिति पृथिव्या नामधेयम्"। आह;—यस्मात् कारणात् द्रव्ये शब्दनिवेशो नैरुक्तानां, तदुच्यतां कारणं, केन कारणेन गोशब्दः पृथिव्यां सन्निविष्टः? इति। उच्यते;—"यत्" यस्मात् इयं "दूरम्" अध्वानं प्रति "गता भवति" न ह्यस्या अन्त उपलभ्यते, "यत्" यस्मात् "च" "अस्यां भूतानि गच्छन्ति" आधारभूतायाम्। एवं कर्त्तृकारक मधिकरणं वा योज्यम्। "गातेर्वा" 'गाङ् गतौ (भू० आ०)'—इत्यस्य धातोः "औकारो नामकरणः" प्रत्ययः।

"अथापि" गौरित्येतत् "पशुनाम" "भवति" "दृह" एव कारकद्वये; "एतस्मादेव" धातुद्वयाद् गमेर्गातेर्वा। "अथाप्यस्याम्" एव पशुगवि "तद्धितेन" प्रयोगेनाकृत्स्नायां सत्यां "कृत्स्नवन्निगमा

---

* २अ० २पा० १ख० १७५ पृ० ४ पं० (१७७ पृ०)।
† २अ० २पा० ३ख० १८५ पृ० ११ पं० (१८७ पृ०)।
‡ २अ० २पा० ३ख० १८५ पृ० १३ पं० (१८७ पृ०)।
§ २अ० २पा० ४ख० १८८ पृ० ९ पं० (१८९ पृ०)।
॥ २अ० २पा० ४ख० १८८ पृ० ८ पं० (१८९ पृ०)।

भवन्ति"। तद्यथा,—"गोभिः श्रीणीत मत्सर मिति" गोरेकदेशस्य "पयसः" क्षत्स्नवत् प्रयोगः। तदेतच्छिष्यबुद्धिव्युत्पादनार्थं मनेकप्रकारं शब्दवृत्तिविषयोपप्रदर्शनं क्रियते, कथन्नामोपप्रदर्शितशब्दवृत्तिविषयोऽसम्मुह्य न मन्त्रार्थान् निर्ब्रूयादिति॥

"आधावत०—०मत्सरम्"*। इमां गायत्रीं मयास्य आङ्गिरसोऽपश्यत्। गायत्रस्तुतौ विनियुक्ता। हे अध्वर्यवः! एभिः गोभिः! संस्कृत एष सोमः। ते यूयं हे 'सुहस्त्यः'. सुवर्णेनालङ्कृतहस्ताः! किम्? 'आ धावत'। 'गृभ्णीत' गृह्णीत, एतौ 'शुक्रा'-'मन्थिना ग्रहावनतिक्रान्तकालम्। किञ्च, 'गोभिः' गोभ्योऽभिनिष्पन्नेन रसेन 'श्रीणीत' एनम् 'मत्सरं' मादयितारं सोमं मैत्रावरुणग्रहानुपगतम्। "गृतगृतेन तृतीयसवने वा पूतभृत्याग्निरेण ततोऽनतिक्रान्तकालं जुहुत" एवं मन्त्रविधानाद्गव्यत्वाच्च गोभिः अपणस्य गव्येन पयसेति गम्यते॥

"मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः" तृप्यन्ति हि अनेन देवताः॥

शब्दसामान्यप्रसङ्गप्रसक्त मुच्यते;—"मत्सर इति लोभनामाभिमत्त एनेन धनं भवति"। तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति॥

पर्यायाख्यानप्रसक्तं निरुच्यते;—"पयः पिबतेर्वा" पानार्थस्य (अदा० प०); पीयते हि तत्। "प्यायतेर्वा" वृद्ध्यर्थस्य (भू० आ०); तेन हि वर्द्धन्ते प्राणिनः॥

प्रसक्तानुप्रसक्तं निरुच्यते;—"चीरं चरतेः" स्योतनार्थस्य (भू०

* "आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम्॥", ऋ० सं० ७, १, २, ४।

आ०); श्योतते हि तदूधसः। "घसेर्वैरेा नामकरणः" अदेर्घस आदेशः क्रियते, अतस्तेनैव सिद्धरूपेण निर्दिश्यते। धात्वन्तर मिति वा केचित्। ज्ञापकञ्च ददाति;—"उशीर मिति यथा"। 'वश कान्तौ (अदा० प०)', तस्य कृतसम्प्रसारणस्य ईरप्रत्ययेनोशीर मिति भवति। तद्धि सौगन्ध्याक्रान्तं भवति॥

"अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः"। कस्यवदभिधायकः। "ते सोमादो०—०वृषायते" *। एषा जगती। अर्बुदो नाम काद्रवेय ऋषिः, तस्यार्षम्। गावस्तुतौ विनियुक्ता। 'ते' एते गावाणः 'सोमादः' सोमभक्षयितारः यदाभिषवकर्मणि प्रवर्त्तन्ते, अथ तदा 'हरी इन्द्रस्य' अश्वौ, यज्ञागमनार्थं मेतेषां शब्द मुपश्रुत्य संस्कृतं सोमं मन्वानौ, रथे योग मिच्छन्तौ, आत्मना ऋजीषं भक्षयिष्यन्तौ, इन्द्रं च सोमं पाययिष्यन्तौ, स्वय मेव 'निंसते' नीचैर्नामेते युक्तौ आवाहे;—'इन्द्र! गच्छ यज्ञायतनं संस्कृतः सोमः' इति। तदैव च ऋत्विजोऽपि त्वरमाणा इन्द्रो यज्ञस्थानकाल मभ्यर्णमन्वानाः 'अंशुं' सोमांशम् अभिषुत्य 'दुहन्तः' प्रपूरयन्तः। 'गवि अधि' गोरुपरि गोरवयवे अधिषवणचर्मणि। एतत् कर्म कुर्वाणा इदं प्रतीक्षमाणा 'आसते'। अथ स 'इन्द्रः' एत्य 'तेभिः दुग्धम्' ऋत्विग्भिः प्रचारितं 'पपिवान्' पीतवान् 'सोम्यं मधु' सोममयं तेन दृप्तः। ततोऽनन्तरं 'वर्द्धते' वीर्येण। अथ तेन च शरीरेण 'प्रथते' विस्तीर्यते, विस्तीर्णश्च स्वेन वीर्येण मेघं विदार्य 'वृषायते' वर्षं

† "ते सोमादो हरी इन्द्रस्य निंसते शुभं दुहन्तो अध्यासते गवि। तेभिर्दुग्धं पपिवान् सोम्यं मधविन्द्रो वर्धते प्रथते वृषायते॥" ऋ० सं० ८, ४, १०, ४।

। प्रवर्त्तयते। तदिदं सर्वमपि वर्षादि जगदनुग्राहकमैन्द्रं कर्म *। अभिषवद्वारेण, सोमाभिषवो गावाधीन मित्येवं गावस्तुतिः॥

निगमप्रसक्तं निरुच्यते;—"अंशुः शं मदृमाचो भवति"। व्याप्तमाचो हि यजमानेन तस्यैव शं भवति, सुखी भवति। इष्टसोमो ह्यनृणोऽहमिति विगतमनोदुःखो भवति। "अननाय शं भवतीति वा"। अननाय जीवनाय शं सर्वेषां भूतानां भवति, सुखी भवतीति वा। यज्ञो हि वर्षे प्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुखं जीवन्ति॥

व्याख्यानप्रसक्तं निरुच्यते;—"चर्म चरतेर्वा" चरितं हि तत्सर्वस्मिन् शरीरे गत मित्यर्थः। "उच्चृत्तं भवतीति वा" उच्चृत्तम् उत्कर्त्तितं शरीरादिति वा॥

"अथापि चर्म च श्लेष्मा च" गो-शब्देनोच्यत इति शेषः। "गोभिः सन्नद्धो असि वीलयस्वेति † रथस्तुतौ" स हि चर्मणावनद्धो भवति, श्लेष्मणा च तस्यारादयः संश्लेषिता भवन्ति॥

"अथापि स्नाव च श्लेष्मा च" गो-शब्देनोच्यत इति शेषः। "गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ ‡" सा हि स्नावना वेष्टिता भवति, श्लेष्मणा च संश्लेषिता॥

---

* "अथास्य कर्म,—रसानुग्रहाय वृष्टयर्थो वा च का च वसुजातिरिन्द्रकर्मैवतत्" दै० का० ७, २, १।

† "वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेतवानि॥" ऋ० सं० ४, ७, २५, १। य० वा० सं० २९, ५१। अथ० सं० ६, १२५, १।

‡ सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यं मिघवन् शर्म यंसन्॥ ऋ० सं० ५, १, २१, १। य० वा० सं० २९, ४७।

"ज्यापि गौरुच्यते"। सा पुनः "चेत्" यदि "गव्या ताड्यितम्" अभिधानम्, "अथ" पुनः "न चेत् गव्या, गमयतीषूनिति" गौरन्यद्रव्य मपि;—॥ १ ॥

वृक्षेवृक्षे नियतामीमयद्गौस्ततो वयः प्र पतान् पूरुषादः। वृक्षेवृक्षे धनुषिधनुषि दृक्षो व्रश्चना*न्नियतामीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्म्मा ततो वयः प्र पतन्ति पुरुषानदनाय विरिति शकुनिनाम वेतेर्गतिकर्म्मणोऽथापीषुनामेह भवत्येतस्मादेवादित्योऽपि गौरुच्यते। उतादः पुरुषे गवि। पर्ववति भास्वतीत्यौपमन्यवोऽथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्य मादित्यतोऽस्य दीप्तिर्भवतीति। सुषुम्णः† सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति। सोऽपि गौरुच्यते। अचाह गोरमन्वतेति तदुपरिष्टाद् व्याख्यास्यामः सर्वेऽपि रश्मयो गाव उच्यन्ते ॥ २ (६) ॥

"वृक्षेवृक्षे०—०शिश्रियत्"‡। वसुक्रस्येन्द्रपुत्रस्येद मार्षम्। त्रिष्टुबैन्द्री। महाव्रते मरुत्वतीये शस्यते। इन्द्रो भगवानैश्वर्ययोगात्

* "वृक्षो व्रश्चनाद् वृक्षा वा तिष्ठतीति वा वा क्षीयते निवासकर्मणो नियता" क, च। अत्र 'वृक्षा'—इत्यादिपाठोऽधिकः।

† "सुषुम्ण" क, "सुषुम्नः" क, च, ट०—क, ख।

‡ 'वृक्षेवृक्षे नियतामीमयद् गौस्ततो वयः प्र पतान् पूरुषादः। य ईं वसुक्र ऐन्द्रः पुत्रस्ते ह शिश्रियत् ॥" ऋ० सं० ७, ७, १९, १।

सङ्ग्रामेष्वनेकबाऽभूत्वानेकानि धनूंष्यादत्ते; तानि मन्त्रकृद्-दृष्ट्वैव माह;—"वृत्रेवृत्रे" वृत्रावयवे "धनुषिधनुषि" यावन्तीन्द्रेण गृहीतानि धनूंषि, तेषु सर्वेषु; प्रत्येकं "नियता" निबद्धा, "गौः" गव्या, गमयित्री वा शराणाम्; इन्द्रबाङ्काङ्कृष्टा "अमीमयद्" मीमयति "शब्दं करोति"। जात्यभिप्रायेणैकवचनम्। "ततः" शब्दकरणानन्तर मेव 'प्र पतान्' "प्र पतन्ति" "वयः"। अथवा 'ततः' ततो धनुषः 'वयः' पक्ष्यवयव-पत्र-सम्बन्धात् दृषवोऽपि 'वयः' पक्षिणः। अथवा "वेतेर्गतिकर्मणः"। साक्षादेव दृषवो 'वयः' न गुणवृत्त्या। ते 'प्र पतान्' प्र पतन्ति "पुरुषानदनाय" भक्षणाय; ते हि शत्रूणां प्राणान् भक्षयन्ति। अथ अथ मेव मतिप्रभाव इन्द्र इति ज्ञात्वा 'विश्वं' सर्वं 'भुवनं' भूतजातं यावत् किञ्चिदविकृतं कर्मणि 'भयते' बिभेति। अथ बिभ्यत् किं करोति? 'इन्द्राय' इन्द्रार्थं 'सुन्वत्' अभिषवम् उचिते काले कुर्वन् 'ऋषये च' ऋत्विजे 'शिक्षत्' दक्षिणां ददते। इन्द्रोन्मुख मादरवदास्ते। सर्वं मन्यत् परिहाय य एवम्प्रभाव इन्द्रः, तं वय मभिप्रेतार्थसिद्धये स्तुमः॥

निगमप्रसक्तं निराह;—"वृत्रो व्रश्चनात्" इति। स हि वृश्च्यते क्षिप्यते दम्भनार्थम्।

अत्र व्याख्याने गतार्थत्वात् न शेषो विवियते। एवं तावदेकदेशे कृत्स्नवदभिधानं भवतीति प्रदर्शितम्॥

अथेदानी मन्त्रेष्वर्थान्तरेषु गोशब्दोऽभिप्रसृतो बहुधित्येतत् प्रसङ्गतो दर्शयति। एतद्धैकपदिके वक्तव्य मिह तु गोशब्दप्रसक्त मुच्यते;—"आदित्योऽपि गौरुच्यते" एतस्मिन् मन्त्रे।—

"उताद:०—०रथीतम:" *। भरद्वाजऋषेय मार्षम्। गायत्री। पौष्णी। पूषा पुनरादित्यो नैरुक्तानां दृष्ट्या, अन्यत्र दृयं वै पूषेति भूमिरुच्यते। 'उताद:' उत, अपि, अथ इति छन्दसि समानार्था:। अपि त्वक्रमीरप:, अपि रसानादत्ते, अपि तमांस्यपहन्ति। 'अद:' अमुष्मिन् आदित्यमण्डले 'पर्वषि' पर्वभिस्तद्वति। अथवा भास्वति, भाषा तद्वतीति। अहोरात्रादि पर्व तद्वतीत्यौपमन्यव:। 'गवि' गमनशीले मुहूर्त्त मप्यनवस्थायिनि 'सूर:' सूर्य: अवस्थित:। पूषा आदित्यमण्डलान्त:पुरुष:, तदेव पर्ववत् भास्वद् वा। 'चक्रं' चक्रनं क्रमणं वा गमनशीलं मण्डलं 'हिरण्ययं' तेजोमयं चक्रं चक्राकृति:। 'न्यैरयत्' नियतगमनवृत्तिना मार्गेण नित्यकाल मीरयति। उदयास्तमयमध्यन्दिनकालोपलक्षणार्थम्। अथवा अमुष्मिन् मण्डलेऽवस्थित:, पर्ववति मण्डलान्त:पुरुष: सूर्यो भगवान्। 'चक्रं' लव-क्षण-निमेष-त्रुटि-मुहूर्त्ताहोरात्रार्द्धमास-मासर्त्वयन-संवत्सरलक्षणं कालं चक्रं सर्वभूतहारि 'हिरण्ययं' हिरण्मयं सर्वभूतविनाशस्थितिहेतुं 'न्यैरयत्' नित्य मीरयति। कीदृश: पुन: स सूर्याय ईरयति? रथीतम: अन्येऽपि रथिन: सन्ति, अयन्तु मुहूर्त्त मप्यनवस्थितरथ इत्यतो रथीतम:। स एवङ्गुणयुक्त: पूषा, तं वय मभिप्रेतार्थसिद्धये स्तुम:॥

"अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते"। एको रश्मिरादित्यस्य सुषुम्णो नाम, चन्द्रमसं प्रत्यवस्थितो दीप्यते। "तदेतेन"

---

* उताद: पर्वषे गवि सूर ऽऽचक्रं हिरण्ययम्। न्यैरयद्रथीतम:॥" ऋ० सं० ४, ८, ११, १।

मन्त्रार्थविदो मन्त्रानुपेत्य "ईक्षितव्यम्" द्रष्टव्यम् । सेय मस्य चन्द्रमसो "दीप्तिः" ज्योत्स्ना इत्ययम् "आदित्यतः" आदित्यस्य अनुग्रहादेव "अस्य भवतीति"* । अस्मादुपरि यच्चन्द्रमसो मण्डलं तत्तेजःसम्बन्धाद् दीप्तिमद् भवति, ततः सर्वा दिशः प्रकाशयति ।

यथा चैतदेवं तथा "सुषुम्णः† सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति" राष्ट्रभृत्सु‡ । अथय मथन्ये बहव इत्यपिशब्दः । 'सुषुम्णः' सुष्ठुसुख इत्यर्थः । सर्वाणि भूतानि नित्य मसौ ह्लादयति । कोऽसौ ? इति । 'सूर्यरश्मिः' सूर्यान्निःसृत्य चन्द्रमसं प्रति गतः 'चन्द्रमाः' । 'गन्धर्वः' सति सुषुम्णगमने गोशब्दवाच्यता । 'तस्य' गन्धर्वस्य सतः चन्द्रो धारयिता गन्धर्वसहितस्य प्रतिष्टा । 'स न इदं' सोऽस्माक मिदं 'ब्रह्म क्षत्रं च 'पातु' रक्षतु । किञ्च 'तस्मै' सुषुम्णाय सूर्यरश्मये 'स्वाहा' सु शोभन मिद माभिमुख्येनाह, हविराज्यलक्षण मस्तु । स चेदं 'वाट्' वेतु पिबत्वित्यर्थः ॥

"सोऽपि" सुषुम्णो रश्मिरेक एव "गौः"—इति "उच्यते" । यथामौ गौस्तयेद मुदाहरणम्;—"अचाह गोरमन्वतेति" । "तत्" पुनरेतत् "उपरिष्टाद्" ऐकपदिके‡ "व्याख्यास्यामः" ।

"सर्वेऽपि रश्मयो गाव उच्यन्ते" । यथैतदेवं तथेय मुदाहरणम्;—॥ २ ॥

---

* एवञ्च वैदिककाले विज्ञात मेवैतत्, न केवलं सम्प्रत्येवेति ।

† "सुषुम्न."—इति पाठो द्वित्रिपुस्तकयोः सर्वत्र; ङ-च-पुस्तकयोश्चैव मेव; संहितायां तु "सुषुम्णः"—इत्येवंत्येष एवादृतः ।

‡ "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥" य० वा० सं० १८, ४० ।

‡ नैग० का० ४, ४, १ ।

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पद मव भाति भूरि॥ तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो बहुशृङ्गा* भूरीति बहुनो नामधेयं प्र भवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शमातेर्वा शरणायोद्गत मिति वा शिरसो निर्गत मिति वायासोऽयनात्त च† तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्द्धस्थ मव भाति भूरि पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः‡ प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येव मन्येषा मपि सत्त्वानां सन्देहा विद्यन्ते तानि चेत्समानकर्म्माणि समाननिर्वचनानि नानाकर्म्माणि चेन्नानानिर्वचनानि यथार्थं निर्वक्तव्यानीतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि तच निर्ऋतिर्निरमणाद्वृक्षतेः क्षच्छापत्तिरितरा सा पृथिव्या सन्दिह्यते तयोर्विभागुस्तस्या एषा भवति॥ ३(७)॥

"ता वां वास्तूनि"—इति §। दीर्घतमस आर्षम्। वैष्णवी। त्रिष्टुप्। यूपावधाने विनियुक्ता, सोमातिरेकशस्त्रे च। वा मिति

---

* "भूरिशृङ्गा बहुशृङ्गा" ङ, च।

† "त्यनात्त च" क, ख, म।

‡ "पशुपादः प्रकृतिः" क, ख, म।

§ ऋ० सं० १, १, १४, ९।

दम्पतीत्यभिप्रेत्य द्विर्वचनम्। 'ता' "तानि" "वां" युवाभ्यां मर्त्याय "वास्तूनि" निवासस्थानानि 'उश्मसि' "कामयामहे"। 'गमध्यै' "गमनाय" "यत्र" येषु स्थानेषु। किम्? "गावः" रश्मयः। 'भूरिशृङ्गाः' "बहुशृङ्गाः" बहुदीप्तयः 'अयासः' अयनाः मुहूर्त्तं मप्यनवस्थायिनः*। किञ्च; 'अत्रा ह' तेषु स्थानेषु 'तत्' पदम् 'उरुगायस्य' उरुगमनस्य महागतेः भगवतो 'वृष्णः'† "विष्णोः" 'परमं पदम्' आदित्यमण्डलं स्थानम्। स्थाने हि पदसञ्ज्ञा, पदस्य इति लोकेऽपि वक्तारो भवन्ति। 'अव भाति' अर्वागिदं सर्वं कृत्वा भाति दीप्यते। भूरि बहित्यर्थः। इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"भूरीति" एतद् "बहुनो नामधेयम्"। "प्र भवति" हि तद् बहुधापि दीयमानम्। "शृङ्गं श्रयतेः" तच्छ्रितं भवति शिरसि। "शृणातेर्वा" हिंसार्थस्य। तेन हि हिनस्ति। "शिरसो निर्गत मिति वा" शृङ्गं परमेऽर्द्धे स्थितं परार्द्ध्यम्। अथवा परमर्द्ध्या युक्ते स्थाने स्थितं परार्द्ध्यम्। "पादः पद्यतेः" गत्यर्थस्य। पद्यते हि तेन। "तन्निधानात् पदम्" यदुत्पद्यते, तत् सरूप मेव पार्श्वे अन्यच्च वा तत् पद मित्युच्यते पशोर्मनुष्यस्य वा। "पशुपादप्रकृतिः" चतुर्भागसामान्यात्। "प्रभागपादः" दीनारादिपादः। "प्रभागपादसामान्यादितराणि पदानि" ग्रन्थपदानि श्लोकपदानि वा। विभागो हि तेष्वपि समान एव॥ प्रसक्तानुप्रसक्त मिद मुक्तम्॥

---

* "अयासः अयना गन्तारोऽतिविस्तृताः। यद्वा, यासो गन्तारः, अतादृशाः; अत्यल्पप्रकाशयुक्ता इत्यर्थः॥" सायणः।

† "कामानां वर्षितुः" सायणः।

अधुनोपसंहरति;—"एव मन्येषा मपि सत्वानां सन्देहा विद्यन्ते" न केवलं गो-शब्दे पद-शब्दे वा। तेषु हि त्वेतदौत्सर्गिकं निर्वचनं लक्षणं द्रष्टव्यम्,—"तानि" "चेत् समानकर्माणि" यदि सामान्यक्रियया युक्तानि, ततः "समाननिर्वचनानि" एव कर्त्तव्यानि। अथ पुनः "नाना-कर्माणि" ततो "नानानिर्वचनानि"। एवं "यथार्थं निर्वक्तव्यानीति"॥

अधुनैव मुक्तोदाहरणैरेव तच्च सन्देहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शय-न्नाह;—"इमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि"। "तच्च निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा"। लोके हीदं सर्वभूत-जात मन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते, तेषां च पृथिवी प्रथमा; तस्मात् तत आरम्भः। एकविंशति रिति सङ्ख्या (२१)। पृथिवीनामधेयानि, स्वार्थे धेय-प्रत्ययः *; नामैव नामधेयम्। अनुक्रान्तानि, आनुपूर्व्येण पठितानीत्यर्थः। एकविंशतिर्यान्यनुक्रान्तानि, एभ्योऽन्यान्यपि यानि कानि चित् स्युः, तान्युपलभ्य निर्वक्तव्यानि। तद्यथा;—कु-इत्येतदसमाम्नातम् पृथिव्या नामधेयम्। उक्तं हि;—'नाग्निश्चिन्नरकं याति न सत्पुत्रो न कुप्रदः'—इति। तच्चैतस्मिन्नेकविंशके गणे "निर्ऋतिः" इत्येतदभिधानम्। "निरमणात्" निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी। रमेर्धातोः (भू० आ०)। "ऋच्छतेः (तु० प०)" "इतरा" "कृच्छ्रा-पत्तिः" दुःखसञ्ज्ञका, निर्ऋतिः पाप्मा। "सा" पुनरियं समानना-मधेयत्वात् समानश्रुतित्वात् "पृथिव्या सन्दिह्यते"। "तयोः" समान-नामधेयत्वेऽपि सति एष कर्मकृतो "विभागः",—एका निविष्टानां

* "भागरूपनामभ्यो धेयः" पा० ५, ४ २५;—वा०।

भूतानां रमयित्री, एका पुनः कुच्छ्रं मापादयित्री। एवं नानाकर्माण्यभिधानानि निर्वक्तव्यानि ॥

"तस्याः" कुच्छ्रापत्तेः पृथिव्या अपि "एषा" निर्वाचिका ऋग् "भवति";— ॥ २ ॥

य ईं॰ चकार न सो अस्य वेद य ईं॰ ददर्श हिरुगिन्नु तस्मात्। स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिं मा विवेश। बहुप्रजाः कृच्छ्रं मापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ता य ईं चकारेति करोतिकिरती सन्दिग्धौ वर्षकर्मणा न सो अस्य* वेद मध्यमः स एवास्य वेद मध्यमो यो ददर्शादित्योपहितं† स मातुर्योनौ मातान्तरिक्षं निर्मीयन्तेऽस्मिन् भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुनाय मपीतरो योनिरेतस्मादेव परियुतो भवति बहुप्रजा भूमि मापद्यते वर्षकर्मणा शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति‡ तस्मै देवतोभयलिङ्गा§ प्रादुर्बभूव तान्न ॥ अज्ञे तां पप्रच्छ विविदिषाणि त्वेति सास्मा एता मृच मादिदेशैषा महेवतेति ॥ ४(८) ॥

---

* "सोऽस्य" च। "सोस्य" ङ।
† "आदित्योऽपहितं" च।
‡ "आमानीति" ख, ग।
§ "देवतोभयलिङ्गाः" क, ख, म।
॥ "तान्" च। "तान् चि" म।

"य ईं चकार"—इति *। दीर्घतमस ऋषिः। त्रिष्टुप्। महाव्रते वैश्वदेवे शस्त्रे शस्यते। "अयं स शिङ्क्ते" †—इतीयमपि तथैव समानार्षविनियोगा। जगती। द्वे ऋचेते ऋग्वामीये। कश्चिद् "बहुप्रजाः" बह्वपत्यो दरिद्रः पुरुषः स दुष्पोषत्वादपत्यानां व्यापन्नत्वात् "कृच्छ्रं" दुःखम् "आपद्यते"। सा या तस्य कृच्छ्रापत्तिः, सैवैतस्यां मयि निर्ऋतिशब्देनोच्यते "इति" एष "परिव्राजकाः" परिव्राजकाना मस्यां मयि सञ्ज्ञेयोऽर्थः॥

स एष विस्तरेण प्रदर्श्यते।—'यः' 'चकार' करोति 'ईम्' गर्भं 'न सः' 'अस्य' गर्भस्य तत्त्वं 'वेद', केवलं त्वसौ कामार्त्तः पुत्रार्थी वा करोत्येव गर्भम्। 'यः ईं ददर्श' यश्चैनं पश्यति 'हिरुग्' अन्तर्हित मेतस्मिन् जठरे, एतस्मिन् वा शरीरे। 'ईं नु' जन्तुम्। 'तस्मात्' तस्यैव एष गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या, नेतरस्य गर्भकर्त्तुः। 'सः' पुनरेष गर्भो 'मातुर्योनौ' गर्भाशयस्थाने 'अन्तः' उदरे पुष्यति, स मातुरशित-पीत-लीढ-भक्षितेन चतुर्विधाहारपरिणामे ततः 'परिवीतः' जरायुणा परिवेष्टितो यथाकालं जायते। अथैवं 'बहुप्रजाः' बहुशः प्रजायमानः स गर्भकर्त्ता गर्भतत्त्व मजानानो 'निर्ऋतिं' दुःखम् 'आ विवेश' आ विशतीत्यर्थः। एवं गर्भतत्त्वापरिज्ञानात् यो गर्भं करोति स दुःख मापद्यते, यस्तु अध्यात्मदृष्ट्या गर्भतत्त्वं वेद, स गर्भकर्मणो निवर्त्तते, स निर्ऋतिं नापद्यते। एव मस्यां मयि निर्ऋतिदेवतेत्येष परिव्राजकार्थः॥

---

* ऋ० सं० १, १, १०, १।

† ऋ० सं० १, १, १९, ४।

अन्ये तु ब्रुवते*;—यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहुषु प्रजायमानो जन्ममरणसन्तानानुभवविद्धां निर्ऋतिं माविशति। यो रेतः सिञ्चति, तद्रूपो भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसन्तानाननुभवतीत्युक्तम्।

"वर्षकर्मेति नैरुक्ताः" वर्षकर्मैतदुच्यते। निर्ऋतिश्चात्र भूमिरुच्यते। एवं नैरुक्ता मन्यन्ते। यः करोति वर्षं, यो वा किरति क्षिपति। कः पुनरसौ? मेघः। स हि वर्षस्य कर्त्ता विक्षेप्ता वा। मेघाद्धि वर्षं प्रवर्त्तते। किं तस्य? न सोऽस्य वर्षस्य तत्त्वं "वेद", यो ददर्श यः पश्यति "आदित्योपहितम्" आदित्यस्य रश्म्यन्तर्गतं वर्ष मनभिव्यक्तम्। कस्यासौ अन्तर्गतः? प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजाः बहुशः प्रजायमाना निर्ऋतिं भूमि माविशतीति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"करोति-किरती सन्दिग्धौ" धात्वं "वर्षकर्मणा" सम्बध्येते। उभयथा ह्युपपद्यते,—यः करोति यो वा क्षिपति। "मातान्तरिक्षम्" एतस्मिन् हि "भूतानि" "निर्मीयन्ते"। एतच्चावकाशदानेन विशिष्ट मुपकारं करोति। भूतानां जायमानानां "योनिरन्तरिक्षम्", आकाशस्यैव प्रदेशविशेषः कश्चित्। स वायुसंयुतः सन् उदकयोनिभावं पुष्णाति। तदेतद् "वायुना" तस्य सम्बन्धं दृष्ट्वोक्तम्,—"परिवीतो" भवति। इति शब्दसारूप्यप्रसक्त मुच्यते;—"अथ मपीतरः" स्त्री-योनिः "एतस्मादेव"। असावपि "परियुतः" एव "भवति" स्नायुना मांसेन च॥

---

* "च गर्भवासक्लेशपूर्वकजननप्रतिपादनेन तत्परिहारायात्मा ज्ञातव्य इत्यर्थात् प्रतिपाद्यते। * * *। एव मात्मविदा मभिप्रेतोऽर्थः॥"—इति ऋग्भाष्यायां सायणः।

एव मेतस्मिन् मन्त्रे, नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते, परिव्राजकानां कृच्छ्रापत्तिः। तदेवं मन्त्रेषु शब्दगतिविभुत्वादुभय मप्युपपद्यत एव। तद्यथा,—"दधिक्राव्णो अकारिषम् (ऋ० स० २,७,१२,६)"—इत्येष मन्त्रः, अग्न्युपस्थाने अग्निहोत्रे*; अय मेव चाग्निष्टोमे "दधिक्राव्णो अकारिष मित्याग्नीध्रे दधि भक्षयन्ति (आ० सू० ६,१२)"—इति दधिभक्षणे; तथाचाश्वमेधे "दधिक्राव्णो अकारिष मित्युत्तियां सर्वा जपन्ति"-इत्यश्वसन्निधावेनं पत्न्यो जपन्ति महिष्या मुत्तितायाम्†। तच्चैवं सति प्रतिविनियोग मन्यान्येनार्थेन भवितव्यम्। त एते वक्तुरभिप्रायवशादन्यत्र मपि भजन्ते मन्त्राः; न हि एतेषु अर्थस्येयत्तावधारण मस्ति; महार्था ह्येते दुःपरिज्ञानाश्च। यथाश्वारोहवैशिष्ट्यादश्वः साधुः साधुतरश्च वहति, एव मेते वक्तृवैशिष्ट्यात् साधून् साधुतरांश्चार्थान् स्रवन्ति।

तच्चैवं सति लक्षणोद्देशमात्र मेवैतस्मिञ्छास्त्रे निर्वचन मेकैकस्य क्रियते। क्वचिच्च आध्यात्माधिदैवाधियज्ञोपदर्शनार्थः। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्—आधिदैवाध्यात्माधियज्ञाश्रयाः सर्व एव ते योज्याः, नात्रापराधोऽस्ति॥

एव मेव सन्देहाधिकार मुपजीवन्नाह;-"शाकपूणिः सङ्कल्पयाञ्चक्रे,—सर्वा देवता जानामीति"। शाकानि यः पूणयति संहन्ति, स शाकपूणः; तस्यापत्यं शाकपूणिः आचार्यः। स सङ्कल्पयाञ्चक्रे, सङ्कल्पं कृतवान्। किम्? इति। सर्वा देवता जानामीति। "तस्मै" सङ्कल्प मेवं कृतवते

---

* दधिक्राव्णो अकारिष मा दधिक्राः अवसा पञ्चकृष्टीः" आ० सू० १, ११।

† "महिषी मुत्थाय पुरुषा दधिक्राव्ण इत्याऽः" का० सू० १०, १, ११।

"देवतोभयलिङ्गा" स्त्रीपुंल्लिङ्गा; अथवा मध्यस्थानलिङ्गा द्युस्थानलिङ्गा च "प्रादुर्बभूव"। "तां" पुरतोऽवस्थितां सतीं "न जज्ञे" न ज्ञातवान्,—किं मियं स्त्री स्यादथवा पुरुष इति; अथवा किं मियं मध्यस्थाना अथवा द्युस्थानेति। "ताम्" अजानन् "पप्रच्छ" "विविदिषाणि त्वा"। वेदितुमिच्छामि त्वाम्,—किं मयि पुरुषः अथवा स्त्री? इति; अथवा किं मयन्तरिक्षस्थाना अथवा द्युस्थाना? इति। "सा" एवं पृष्टा सती "अस्मै" शाकपूणये "एता मृचम्" "आ दिदेश" आदिष्टवती। किम्? इति। "एषा मद्देवतेति" अस्या मृचि अहं देवतेति, तच्च नैरुक्तः मा मेतस्या ऋचः सकाशादर्थावगत्यावधारयेति—॥ ४ ॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वंसनावधि श्रिता। सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥ अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति मायुं शब्दङ्करोति माय मिवादित्य मिति वा वागेषा* माध्यमिका ध्वंसने मेघेऽधिश्रिता सा चित्तिभिर्निकरोति† मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिं वव्रिरिति रूपनाम वृणोतीति सतो वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ॥ ५(६) ॥

इति द्वितीयाध्यायस्य द्वितीयपादः ॥ २, २.

---

* "मिति वागेषा" ख, ग, ङ।

† "चित्तिभिः कर्मभिर्नीचैर्निकरोति" ङ, च।

कतमा पुनरसावृग्? इति। उच्यते;—"अयं स शिङ्क्ते"—इति *। "अयं स शब्दायते" स एव मेघः शब्दं करोति। येन मेघेन किङ्कृतम्? इति। 'येन गौरभीवृता' येन माध्यमिका वागभिप्रच्छादिता सती "मिमाति मायुं" निर्मिमीते निर्वर्त्तयति मायुम्, "शब्दं करोति" इत्यर्थः। "मायुः, काकुत्"—इति च वाङ्नामसु पठितम्†। अथ वा मायुरादित्यो भवति, सर्वभूतनिर्माता। त मिवात्मानं निर्मिमीते। क्वावस्थितः? "ध्वंसने" उदकध्वंसने उदकसंसने मेघे "अधिश्रिता"। अयं तावदर्ङ्चो मेघान्तर्वर्त्तिन्या वाचो व्यक्तविद्युद्रूपाया अभिधायकः; मेघरूपत्वात् पुरुषत्वाभिप्रायः। अथवाय मुत्तरस्त्रीत्वाभिप्रायः। यैवंलक्षणा वा कर्मस्वरूपा, मेघशरीरा वा। 'सा चित्तिभिः' चटचटाशब्दकर्मभिः 'नि हि चकार' नीचैः करोति 'मर्त्यं' मनुष्यम्। सर्वो हि विभ्यत्तस्या आसीदति अवनमति च। कदा पुनर्निकरोति मर्त्यम्? इति, उच्यते;—"विद्युद् भवन्ती" इति, विद्युदात्मना ख्याख्येनाभिनिर्वर्त्तमाना; तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयङ्करम्; न तथा विद्युद्रहितः। सैव मात्मान माविष्कृत्य विद्युद्रूपेण विच्छिद्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीम्। ततो वर्षक्षुपरमे "प्रति" 'औहत' "ऊहते" "वम्रिम्" प्रत्युपसंहरति रूप मात्मीय मदृश्यं करोतीत्यर्थः। "वम्रिरिति रूपनाम"‡ तद्व्यावृत्त्य स्व मात्मयं वर्त्तते। यस्मिंस्तु पक्षे मध्यस्थान-

* ऋ० सं० १, ३, १९, ४।
† १भा० ७३ ख० १० मं०।
‡ १ भा० ३१९ ख० (१)।

लिङ्गा द्युस्थानलिङ्गा वेति तस्मिन् पक्षे मेघरूपत्व मविवक्षितम्, मेघवाचो विद्युद्रूपत्वञ्च। किन्तु एतावद् विवक्षितम्,—मेघाश्रया शब्दवती भूत्वा माध्यमिका वाक् विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्ष मुदकरूपभूतं जलाशयेभ्यश्चादित्यात्मना स्थित्वा पुनरादत्ते; विद्युदात्मना मध्यस्थाने स्थित्वा वर्षति, आदित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः। वक्ष्यति हि,—"त्रेधाभावाय पृथिव्या मन्तरिक्षे दिवि (दै० १२,२,८)'—इति॥

सेय मेकैव देवता मध्यस्थाना विद्युद्रूपा, मध्यस्थाना वाऽऽदित्यरूपा; इत्यय मेवंलक्षणो देवतातत्त्वसन्देह उपेक्षितव्यो मन्त्रदर्शनाच्च निर्वक्तव्य इत्ययं मन्त्रसङ्क्षेपार्थः॥

सा पृथिव्या सन्दिह्यत इत्यनेन सन्देहसामान्येनोदाहृत मिद मत्र मतं शाकपूणेरित्येव मादि॥

अनुक्रमणं लक्षितम्। तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थम्; इतराण्यभ्यूह्य निर्वक्तव्यानि। तद्यथा,—'गमा' * गमनात्, अस्यां गच्छन्ति भूतानि; 'जमा' † जमनात्, जमन्ति गच्छन्ति अस्यां भूतानि;—इत्येव मादि॥

नैघण्टुकांस्तु याञ्छब्दान् प्रत्यर्थगणसंस्थितान्।
छन्दोभ्योऽन्विष्य तत्तार्थान् निर्ब्रूयाद् यौगतस्तु तान्॥

॥ इति निरुक्तस्य सप्तमाध्यायस्य द्वितीयः पादः॥ २॥

---

* १ भा० ७ ६०।
† १ भा० ८ ६०।

हिरण्यनामान्युत्तराणि पञ्चदश हिरण्यं कस्माद्ध्रियत आयम्यमान मिति वा ह्रियते जनाञ्जन मिति वा ह्रितरमणं भवतीति वा* हर्यतेर्वा स्यात् प्रेप्साकर्म्मणोऽन्तरिक्षनामान्युत्तराणि षोड़शान्तरिक्षं † कस्मादन्तरा क्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षय मिति वा तच्च समुद्र इत्येतत्पार्थिवेन समुद्रेण सन्दिह्यते समुद्रः कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येन मापः सम्मोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा ‡ तयोर्विभागस्तच्चेतिहास माचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष त मूचुर्ब्राह्मणा अधर्म्मस्त्वया चरितो ज्येष्ठं भ्रातर मन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति स शन्तनुर्देवापिं शिशिक्ष राज्येन, त मुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति तस्यैतद्दर्षकामसूक्तं तस्यैषा भवति ॥

॥ १ (१०)॥

---

* इतोऽनन्तरं "हृदयरमणं भवतीति वा"—इत्यधिकम् क-च-पुस्तकयोः ।

† "षोलशान्तरिक्षं" क, "षोढशान्तरिक्षं" ङ ।

‡ "समुनत्तीति वा" ग ।

"हिरण्यनामान्युत्तराणि पञ्चदश" *। हिरण्यस्य नामान्युत्तराणि। कुतः? प्रकृतेभ्यः पृथिवीनामभ्यः; पृथिव्या मेव हिरण्य मुत्पद्यत इत्यतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि। कियन्ति पुनस्तानि? पञ्चदश, पञ्च च दश च पञ्चदश। यानि समाम्नातानि। असमाम्नातान्यपि सन्ति,—हाटक-सुवर्ण-चामीकरण-जातकुम्भादीनि। कतमानि पुनस्तानि समाम्नातानि? इति। उच्यते;—"हेम, चन्द्रं, रुक्मम्"-इत्येव मादीनि †। हितं ममेद मिति सर्व एवैतन्मन्यते, तस्माद्धेम। चन्द्रम्, चदतेः कान्तिकर्मणः; सर्व एव ह्येतत् कामयते। रुक्मम्, रोचतेर्ज्वलनार्थस्य; तद्धि रोचिष्णुर्भवतीति। एव मूहितव्यं सर्वत्र निर्वचनम्॥

आह;—"हिरण्यं कस्मात्"? उच्यते;—"ह्रियते आयम्यमान मिति वा"। आयम्यमानं ह्रियत एव शिल्पिभिः; कटक-रुचक-स्वस्तिकादिभावेन विस्तीर्यमाणम्। "ह्रियते जनाज्जन मिति वा"। तेन हि व्यवहारः क्रियते। ततस्तन्नैकत्रावतिष्ठते, ह्रियत एव सर्वदा। "हितरमणं भवतीति वा"। यस्य हि तद् भवति, तस्य हितञ्च दुर्भिक्षादिषु, तद् भवति रमणञ्चेति। तेन गृहीतेन मूषिकोऽपि रमते, किं मुत मनुष्यः। "हर्यतेर्वा स्यात् प्रेप्साकर्मणः"; तद्धि सर्वैरेव प्रार्थ्यते लोकानुक्रमेणैव ‡॥

"अन्तरिक्षनामान्युत्तराणि षोडश" §। षट् च दश च षोडश।

---

* १ भा० १८ पृ०—१ ख०।
† १भा० १८—१४५पृ०।
‡ १भा० १९पृ० (५) द्रष्टव्यम्।
§ १भा० १४५पृ० २ख०।

कतमानि पुनस्तानि? "अम्बरं, वियद्, व्योम"—इत्येव मादीनि*। अम्बर मम्बुमद् भवति। नानाभावेन सर्वतो वियन मिति वियत्। नानाप्रकार मेतदवति भूतानीति व्योम। एव माद्यभ्यूहितव्यम्॥

आह;—"अन्तरिक्षम्" एव तावत् "कस्मात्"? उच्यते;—"अन्तरा" ह्येदं द्यावापृथिव्योरवस्थितम्; "चान्तं" च "भवति", पृथिव्यन्त मित्यर्थः। अथ "वा", "अन्तरा" "इमे" द्यावापृथिव्यौ क्षियति निवसति "इति" अन्तरिक्षम्। अथ "वा", "शरीरेषु" एतदेव "अन्तर्" मध्येऽवस्थितम् "अक्षयम्"। इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम्†॥

"तच" तस्मिन् षोड़शके अन्तरिक्षनामसमुदाये "समुद्रः इत्येतत्" अभिधान मुभयाभिधानम्। उभयाभिधायित्वात् "पार्थिवेन समुद्रेण" एतेन जलाशयेन "सन्दिह्यते" एतदत्र सन्देहपदम्।

आह;—"समुद्रः कस्मात्"? इति। उच्यते;—"समुद्द्रवन्त्यस्मादापः" वीचितरङ्गभीकरणादिभावेन। "समभिद्रवन्त्येन मापः" सर्वा एव ह्यापो निम्नानुसारित्वात् समुद्र मेवाभिमुख्येन द्रवन्ति; स हि निम्नो भवति। "समोदन्तेऽस्मिन् भूतानि" संहृष्यन्ति जलचराणि सत्वानि, बहूदकत्वात्। "समुदको भवति"। उद्र इत्युदकनाम‡, तदस्मिन् संहत मिति समुद्रः। "समुनत्तीति वा" सङ्-

---

* १भा० १५—२१५०।

† १भा० १७५० (१) द्रष्टव्यम्।

‡ "उदित्य मुदकवन्तम्" दै० का० १०, १, १२।

क्लेदयतीत्यर्थः। अतो हि प्रकृतैरम्भोभिः सर्वं मिदं सङ्क्लिद्यते *। "तयोर्विभागः" ॥

यस्मिन्नुदाहरणे लक्ष्यते, "तच्च" "इतिहास माचक्षते" आचार्याः †। निदानभूतः 'इति ह स्माह'—इति य उच्यते स इतिहासः। कतमः पुनरसौ? इति। उच्यते;—"देवापिश्चार्ष्टिषेणः" इत्येव मादीनि। देवापिश्चार्ष्टिषेणः, "शन्तनुश्च" आर्ष्टिषेण एव "कौरव्यौ" कुरुवंशप्रभवौ "भ्रातरौ बभूवतुः"। तयोरेको यः "कनीयान्" "शन्तनुः" नाम, "सः" आत्मानम् "अभिषेचयाञ्चक्रे" अभिषेचितवानित्यर्थः। सोऽभिषिक्तः सन् राजा बभूव; इतरः पुनर्ज्येष्ठो "देवापिस्त्वपः प्रतिपेदे"। स किल तीव्रेण तपसा ब्राह्मण्य मापेदे, विश्वामित्रवत्। "ततः" तेनापचारेण ज्येष्ठातिक्रमजेन "शन्तनोः" "राज्ये" राष्ट्रे "द्वादश वर्षाणि देवो न ववर्ष"। अवर्षति देवे "तं" शन्तनुम् "ऊचुः" उक्तवन्तो "ब्राह्मणाः",—"अधर्मस्त्वया चरितः",—"ज्येष्ठं भ्रातरम्" "अन्तरित्य" अतिक्रम्य "अभिषेचितम्" अभिषेक आत्मनः कारितो यतस्त्वया, "तस्मात्" तेन मर्यादातिक्रमेण "ते" तव राज्ये "देवो न वर्षति" प्राप्तकालं प्रतिपद्यस्व—"इति"। "सः" एव मुक्तः "शन्तनुः", "देवापिं" "शिश्रिये" पुनः पुनः शश्वास अभिगमितवानित्यर्थः। कथम्? "राज्ञेन" अभ्युद्यतेन। अर्थ्यमानो "देवापिरुवाच" काम महं "पुरोहितस्ते" "अस्मानि" भवानि "याजयानि च" "त्वा" त्वां वार्षिकेन कर्मणा। न च राजा भविष्यामि, भवानेवास्तु राजेत्यभिप्रायः ॥

---

* १भा० १०।५० (१५) द्रष्टव्यम्। † शत० ब्रा० १३, ३, ९, १।

"तस्य" देवापेः "एतद् वर्षकामसूक्तम्" आविरभूत् *। तत्र, "तस्य" समुद्राभिधानसन्दिग्धस्य प्रविभागोपदर्शनाय "एषा" निर्वाचिका ऋग् "भवति",—॥ १ ॥

आर्ष्टिषेणो ह्येच मृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्। स उत्तरस्मादधरं समुद्र मपो दिव्या असृजद्वर्ष्या अभि। आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा समानगतिर्वा पुत्रः पुरु चायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा ह्येच मृषिर्निषीदन्नृषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्तदृषीणा। मृषित्व मिति विज्ञायते देवापिर्देवाना माप्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान्‡। स उत्तरस्मादधरं समुद्र मुत्तर उद्वततरो भवत्यधरोऽधोरोऽधो न§ धावतीत्यूर्ध्वगतिः प्रतिषिद्धा तस्योत्तरा भूयसे निर्वचनाय ॥ २ (११) ॥

---

* 'तथाचानुक्रान्तम्—दृष्टस्यतेर्दाशराष्टिषेणो देवापि र्देष्टिकामो देवांस्तुष्टाव'—इति दशममण्डलीयाष्टनवतितमसूक्तव्याख्योपक्रमे सायणः।

† "स्वयम्भ्वभ्यानर्षन्न ऋषयो भवन्ति तदृषीणा" क। "स्वयम्भ्वभ्यानर्षन्न ऋषयो ऽभवंस्तदृषीणा" च।

‡ "चेतनवान्" च।

§ भवत्यधरोऽधो न" क।

"आर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः, दृषितसेनस्येति वा"। अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शन्तनोर्वर्षार्थीये कर्मणि होतृत्वे वृतो 'होत्रं' कर्म प्रति 'निषीदन्' उपविष्टवान्। ततोऽपि "देवापिः" नाम नाम्ना "देवसुमतिं" देवानां कल्याणीं मति सुदकसम्प्रदानाभिमुखीं कर्तुं "चिकित्वान्" जानानः। स हि तथाऽस्तौत्, यथा देवाना सुदकसम्प्रदानाभिमुखो मतिरभूत्। ततः परितुष्टेषु देवेषु 'सः' देवापिः 'उत्तरस्मात्' अन्तरिक्षात् समुद्राद् 'अधरं' समुद्रं पार्थिवं प्रति। एष विभागः समुद्रयोः। 'अपो दिव्याः' प्रशस्ताः सस्यसम्पत्करीः 'असृजत्' अचारयत्। किंलक्षणाः? 'वर्ष्याः' वर्षभूताः, 'अभि' सर्वभूतानां मुपरि। स देवाप्यधिकारे * वर्त्तमान एतदकरोत्। अन्यस्मिन् कल्पेऽपि देवापिर्ममाप्येतदेवास्त्वित्येवं वर्त्तमानेनाभिसम्बध्यत इति समस्तार्थः †॥

अथैकपदनिरुक्तम्।—ऋष्टिरायुधविशेषः, तद्वद्बला सेना यस्य, सोऽयं ऋष्टिषेणः। दृषितसेनो वा नित्य मेव प्रेषितसेनः शत्रून् प्रति। "सेना, सेश्वरा"। दृनेतीश्वरनाम ‡, तेन हि सा नित्यमेव संयुक्ता भवन्ति। "समानगतिर्वा" समान मेक मर्थ मुद्दिश्य जयाख्य मेतीति सेना। "पुत्रः, पुरु त्रायते" बहूपि यत् पित्रा पापं कृतं भवति, ततोऽयं त्रायति पुत्रः। "निपरणाद्वा" निपृणाति निर्ददाति ह्यसौ पिण्डान् पितृभ्यः इति पुत्रः। अथ वा "पुम्" इति "नरकं" नरकस्थान मुच्यते, "ततस्त्रायत इति वा" पुत्रः §। "ऋषिर्दर्शनात्"

---

* "देवाद्यधिकारे" क। † ऋ० सं० ८, ५, १२, ५।
‡ १भा० २८२ पृ० (४)। § म० सं० ९, १९८।

पश्यति ह्यसौ सूक्ष्मानर्थान्। "स्तोमान् ददर्शेत्यौपमन्यवः"। मन्त्राः स्तोमाः, तानसौ तारकेण ज्ञानेन पश्यतीति "औपमन्यवः" आचार्यो मन्यते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति;—"तद्यदेनां-स्तपस्यमानान् ब्रह्म०"-इत्यादि। 'तत्' एतत्। उच्यते;—यत्-कृतं मृषीणां मृषित्वम्। 'यत्' यस्मात् 'एनान्' तपस्यमानान् तप्यमानान् 'ब्रह्म' ऋग्यजुःसामाख्यं 'स्वयम्भु' अकृतकम् अभ्यागच्छत्; अनधीत मेव तत्त्वतो ददृशुः तपोविशेषेण। 'तद्दृषीणां मृषित्वम्' —इत्येवं ब्राह्मणेऽपि "वि" विचार्यमाणं "ज्ञायते"। "देवापिः, देवानां माप्त्या" स हि स्तुतिभिर्देवानाप्नोति, हविःसम्प्रदानेन च। "उत्तरः, उद्गततरः उद्गततरो भवति" उपरिष्टादवस्थानात्। "अ-धरः, अधोरः"। किं मुक्तं भवति? अध एवासौ चरति। "अधः" पुनः "न धावति"। तस्य ह्यधोगतित्वादेव "ऊर्द्धगतिः प्रतिषिद्धा"॥

"तस्योत्तरा भूयसे निर्वचनाय"। किं मुक्तं भवति? 'तस्य' एवार्थस्य प्रकृतस्य यथोत्तरस्मात् समुद्राद् वृष्टिं मयाचत देवेभ्यो देवापिः, यथा च पौरोहित्यं मकरोत्; यथा वा अयाजयच्छन्तनुः वर्षार्थी, येन कर्मणा। 'भूयसे' बहुतराय 'निर्वचनाय' 'उत्तरा' एषा—॥ २॥

यद्देवापिः शन्तनवे पुरोहितो होचाय कृतः क्रपय-न्नदीधेत्। देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचं मस्मा अयच्छत्॥ शन्तनुः शं तनोऽस्त्विति वा श मस्मै-तन्वा अस्त्विति वा पुरोहितः पुर एनं दधति होचाय

ऋतः कृपायमाणोऽन्वध्यायद् देवश्रुतं देवा एनं शृण्वन्ति वृष्टियाचिनं* रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत् सोऽस्मै वाचं मयच्छद् बृहदुपव्याख्यातम्॥ ३ (१२)॥

इति द्वितीयाध्यास्य तृतीयः पादः॥ २, ३.

यद्देवापिरिति†। 'यत्' यस्मात् 'देवापिः', 'शन्तनवे' राज्ञे "पुरोहितः" पुरोहितो ह्येवाग्निकर्मणि व्याप्रियते; स पुरोहितः सन् देवापिः "होत्राय" होत्रकर्मणे वर्षार्थीये कर्मणि "ऋतः" सन् 'कृपयन्' "कृपायमाणः" राज्ञः 'अदीधेत्' "अन्वध्यायत्" वृष्टिर्भवेदिति। तं "देवश्रुतं" देवापिमेनं 'वृष्टिवनिं' "वृष्टियाचिनं" "रराणः" अददत्। "बृहस्पतिः" तस्मिन्नेव कर्मणि "ब्रह्मा आसीत्" ब्रह्मत्वेऽवस्थितः। "सः" "अस्मै" वर्षसाधिकां "वाचम्" "अयच्छत्" अददित्यर्थः। तया वाचा तदनुगृहीतया देवान् स्तुत्वा तेभ्यो वर्षं मलभतेति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शन्तनुः" कस्मात्? इति। उच्यते;—स हि कच्चिद्रोगार्त्तं दृष्ट्वा ब्रवीति हि "तनोः शं" तव "अस्तु इति"; ततोऽसावगदो भवति। अथ "वा" "श मस्मै तन्वा अस्खिति" एव मसावाशास्ते। श मिति सुखनाम‡। तनूः शरीरं तदस्मै नित्यं शरीरायाशास्ते। "पुरोहितः" शान्तिकपौष्टिकाभिचारिकेषु कर्मसु "पुर एनं दधति" राजानः पुरस्कुर्वन्तीत्यर्थः।

---

* "वृष्टिवनिं वृष्टियाचिनं" ङ, च।

† ऋ० सं० ८, ५, १२, १।

‡ १भा० ११८ पृ० (१९)।

"देवश्रुतं", "देवाः" हि "एनं" स्तुतीरुच्चारयन्तं "शृण्वन्ति" इति देवश्रुत्, तं देवश्रुतम्। "रराणः" इति "रातिः" दानार्थः* "अभ्यस्तः" ॥

"बृहदुपव्याख्यातम्"। "बृहदिति महतो नामधेयम्,† परिवृढं भवति"‡ इति। मन्त्रनिदानद्वारेण धर्मोऽत्र मत्र दर्शितः। ज्येष्ठे तिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमः। धर्मातिक्रमे च देवो न वर्षतीति। निरुक्तपक्षे,— ऋष्टिषेणो मध्यमः, तदपत्य मत्र मग्निः पार्थिव आर्ष्टिषेणो देवापिः, स मन्त्रनवे सर्वस्मै यजमानायेति योज्यम्। बृहस्पतिर्वाचस्पतिरिति मध्यमः। स्तनपित्नुलक्षणां वाच मित्यर्थः ॥ ३ ॥

॥ इति निरुक्तवृत्तौ सप्तमाध्यायस्य तृतीयः पादः ॥ ३ ॥

---

* १भा० २५५ पृ० (४)।
† १भा० ३०० पृ० (४)।
‡ १भा० ९१३० १९ पं०।

॥ चतुर्थः पादः ॥

साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च यानि त्वस्य प्राधान्येनोपरिष्टात्तानि व्याख्यास्याम आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषा मादीप्तो भासेति वादितेः पुच इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य मादितेय मन्यासा* मपि देवताना मादित्यप्रवादा स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येत्यथापि मित्रावरुणयोः। आदित्या दानुनस्पती दानुपती। अथापि मित्रस्यैकस्य। प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेनेत्यपि निगमो भवत्यथापि† वरुणस्यैकस्य। अथा वय मादित्य व्रते तव। व्रत मिति कर्म्मनाम वृणोतीति सत इद मपीदरद् व्रत मेतस्मादेव निवृत्तिकर्म्म वारयतीति सतो ‡ ऽन्न मपि व्रत मुच्यते यदावृणोति शरीरम् ॥ १ (१३) ॥

---

* "मादितेय मदितेः पुच मेव मन्यासा" ङ, च।

† "भवति। अथापि" ख, च।

‡ "व्रत मिति कर्म्मनाम निवृत्तिकर्म्म वारयतीति सत इद मपीतरद् व्रत मेतस्मादेव वृणोतीति सतो" क, ख, ग, च। "निवृत्तिः कर्म्म" क, च।

लोकाभिधानाधिकारेणेद मुच्यते;—"साधारणान्युत्तराणि षट्, दिवश्चादित्यस्य च" इति। समानं म्रियन्ते इति 'साधारणानि' नामानीत्यधिकारो वर्त्तते। अतएव 'उत्तराणि' प्रकृत मपेक्ष्य। किञ्चात्र प्रकृतम्? अन्तरिक्षनामानि (१भा० २४पृ०)। तेभ्य इमान्युत्तराणि (१भा० ३२पृ०)। कियन्ति पुनस्तानि? 'षट्'(६)। कयोः पुनः साधारणानि? 'दिवश्चादित्यस्य च'। कतमानि पुनस्तानि? "द्यौः, पृश्निः, नाकः"—इत्येव मादीनि*। "यानि वस्य" आदित्यस्य "प्राधान्येन" वर्त्तन्ते प्रधानस्तुतिभाञ्जि नामानि,—"सविता, भगः, सूर्यः, पूषा"—इत्येव मादीनि (१भा० ४९०पृ०), "तानि उपपरिष्टाद् (दै० का० ६,२,१—३; ६) व्याख्यास्यामः" सप्तदशेऽध्याये†। इमानि तु नैघण्टुकानि संसृष्टरूपाणि च द्युनामभिः साकमित्यत इह नैघण्टुक-प्रकरणे निरुच्यन्ते॥

आह;—"आदित्यः" एव तावत् "कस्मात्?" इति। उच्यते;—शृणु। "आदत्ते" ह्यसौ "रसान्" रश्मिभिरित्यादित्यः। "आदत्ते भासं ज्योतिषाम्" तदुदये हि चन्द्रादीनां प्रभानाशो भवत्येव; यदपेक्ष मेतत्। "आदीप्तो भासेति वा" सर्वतो ह्येष भासा आदीप्त आवृतो भवति। "अदितेः पुत्र इति वा" अदितिर्देवमाता,‡ तस्याः पुत्रः, सोऽय मादितेयः सन्नादित्य इत्युच्यते।

"अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य मादितेयम्"

---

* १भा० ९२पृ० ४ख०।

† निघण्टुनाममूलग्रन्थीयैः पञ्चभिरध्यायैः सह सङ्कलनयाऽस्य भाष्यस्य द्वादश एवाध्यायः सप्तदश उच्यते।

‡ "अदितिर्दीना देवमाता" निरु० नैग० का० ४, ४, १।

इति। 'अल्पप्रयोगम्' अल्पविषयम्। 'तु' शब्दो विशेषणार्थः; एतदेवाल्पप्रयोगविषयम्, इतराणि सवितृ-भग-पूषादीनि बहुप्रयोगविषयाणि 'अस्य' आदित्यस्य। कात्स्न्यप्रयोगविषयम्? 'आर्चाभ्यान्नाये' ऋचो यस्मिन्नभ्युपर्युपर्यान्नाताः, सोऽस्य मार्चाभ्यान्नायो दाशतयः *, तस्मिन्नल्पप्रयोगविषयम्। एतददितेः पुत्रत्वाभिप्राय मभिधानम्। आदितेय इति 'सूक्तभाक्' एव चैतदभिधानम्, न हविर्भाक्; न ह्यादितेय इत्यनेन नाम्ना हविराध्वर्यवे चोदितपूर्वं मस्ति †। यथा त्वेतत् सूक्त मेव नैघण्टुकवृत्त्या भजते, तथेद मुदाहरणम्,—'सूर्य मादितेयम्' इति "यदेदेन मदधुर्यज्ञियासः (ऋ० सं० ८,४, १२,१)"—इत्यस्या मृचि‡। अन्ये तु मन्यन्ते,—आदित्य इत्येतदेवाल्पप्रयोग मिति। तत्र त्वेतद् विरुद्ध्यते,—सूक्तभागिति। हविरपि ह्यनेनाभिधानेन चोद्यते,—"आदित्यं बहुरूप मालभत" —इति। "तस्य च पशोरेतत् षड्वं मादित्यो देव उदगात् पुरस्तात्"—इति। अथ चैव मन्यथा वाक्यद्वयविभागेन स्यात्;—अल्पप्रयोगं त्वस्यैतदार्चाभ्यान्नाये आदित्य इति हविर्भाक्, न सूक्तभाक्§; अल्पं हविः, सूक्तभाग्विषय मित्यर्थः। इदन्वन्यत्;—सूक्त मेव नैघण्टुकवृत्त्या भजते, कदाचिदपि हविः। तद्यथा—"सूर्य मादितेयम् (ऋ० सं० ८,४,१२,१)"—इति॥

आदित्यशब्दप्रसक्त माह;—एवम् "अन्यासा मपि देवतानाम्"

---

* दृग्मण्डलात्मक ऋक्संचिनोत्यन्थः।

† दै० का० ७, १, ६ द्रष्टव्यम्।

‡ दै० का० ७, १, ६ द्रष्टव्यम्।

§ "हविर्भाक् सूक्तभाक्" ख।

इति। देवता यज्ञ मपेक्ष्येद मुच्यते;—"आदित्याभिधानप्रवादाः स्तुतयो भवन्ति"। "तद्यथा एतद्" उदाहरणजातम्;—"मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्य इति"। "इमा गिरं आदित्येभ्यो घृतस्नूः"—इत्यस्या मृचि सर्व एवादित्यप्रवादाः स्तुत्या स्तूयन्ते * ॥

"अथापि मित्रावरुणयोः" आदित्यप्रवादाः स्तुतयो भवन्ति। तद्यथा;—"आदित्या दानुनस्पती†। दानपती"। "ता सम्राजा०—० वक्षरम्"‡। गायत्रीयं मृत्समदेन दृष्टा। अभिप्लवस्य षड्हस्य द्वितीयेऽहनि प्रउगं नाम शस्त्रम्, तत्र "अयं वां मित्रावरुणा सुतः सोमः (ऋ०सं० २,८,७,४)"—इत्येष ऋचः § शस्यते, तस्योत्तमा॥ एषा। 'ता सम्राजा' तौ सन्दीप्तौ "घृतासुती" तौ हि घृत मुदक मासुवाते, वर्षकर्मणा जनयतः। 'आदित्या' अदितेः पुत्रौ 'दानुनस्पती' दानाना मीशाते तौ यजमानैः सम्यक् स्तुतिभिर्हविभिश्च संसेवितौ सन्तौ 'सचेते' प्रतिसंसेवेते यजमान मभिमतैर्दानैः। 'अनवक्षरम्' अनवरुध्यमानावित्यर्थः। यजमानविशेषणं वा युक्तम्। न क्षतघ्नौ, शक्तौ च दातु मित्येवं मित्रावरुणावत्र स्तूयेते ॥

---

* "इमा गिरं आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ ऋ० सं० २, ७, ९, १।

† ऋ० सं० २, १, २९, २. किञ्च २, ८, ८, १।

‡ "ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवक्षरम्॥" ऋ० सं० २,८, ८, १।

§ ऋ० सं० २म० ४१सू० ४, ५, ६ ऋ०।

॥ अन्त्या, दनीयेति यावत्। ऋ० सं० २म० ४२ सू० ६ ऋक्।

"अथापि मित्रस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति। तद्यथा,—"प्र स मित्र०—०दूरात्" *। अथ मध्यमे बहवो निगमा इत्यपिशब्दः। प्र स मित्रेति विश्वामित्रेण दृष्टा, त्रिष्टुप्। मैत्रस्य चरोः पुरोऽनुवाक्या। 'प्र अस्तु' प्रकर्षेणास्तु भवतु। हे 'मित्र!' 'आदित्य' अदितेः पुत्र। 'स मर्त्तः' स मनुष्यः 'प्रयस्वान्' अन्नवान्। यः किं करोति? 'यः' 'ते' तुभ्यं 'शिक्षति' ददाति 'व्रतेन' कर्मणा, निर्वपणप्रोक्षणादिना संक्षेपेत्येदं हविश्चरुलक्षणम्। किञ्च, एव मतिप्रभावस्त्वं येन स मर्त्तो यस्तव यष्टा 'त्वोतः' त्वत्परिग्रहे वर्त्तमानः, त्वया रक्षितः 'न' केनचित् प्रत्यनीकभूतेनातिबलेनापि शत्रुणा 'हन्यते' हिंस्यते। 'न' चाहतोऽपि स च 'जीयते' वशीक्रियते केनचित्। न च केवलं शत्रूणा मनाधृष्यः? 'न' 'एनं' त्वोतं सन्तम् 'अंहः' अपि पाप मपि 'अश्नोति' व्याप्नोति यद् 'अन्तितः' अन्तिकात् समीपात्, यत् स्व-शरीरादेव वाङ्मनसेष्टानिमित्त मुत्पद्यते पापम्, तदुत्पत्तिसमकाल मेव त्वदनुग्रहादपध्वस्यते, ततस्त्वैनं न व्याप्नोति। न च केवलं यदन्तिके उत्पद्यते, तदेवैनं न व्याप्नोति; किन्तर्हि? यदपि 'दूरात्' पुत्रभ्रातृजायादिद्वारेणैव मास्कन्दति, तदपि 'न' एनम् अभिव्याप्तुं शक्नोति त्वोतं सन्तम्। एवं महानुभावस्त्वम्, ततस्त्वां स्तुमः इत्यभिप्रायः॥

"अथापि वरुणस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति। तद्यथा,—"अथा वय मादित्य व्रते तवे" इति। "उदुत्तमं वरुण०——०तये

---

* प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वोतो नैनं अंहो अश्नोत्यन्तितो न दूरात्॥ ऋ० सं० २, ४, ५, १।

स्याम"*। अनया त्रिष्टुभोपाक्तः शुनःशेपो वरुणं स्तुतवान्, आत्मानं मोचयिष्यन्†। वरुणप्रघासेष्ववभृथेष्टौ वारुणा मिक्षां हविषः पुरोऽनुवाक्येयम्। हे 'वरुण!' त्रिषु स्थानेषु— अधो मध्ये उपरिष्टाच्च, 'वयम्' आवद्धाः खैः पाशैर्यतो ऽतो ब्रूमः।—स्तुत्या हविषा चोपस्पृशन्त्र मस्माभिरतस्तावत् 'उत्तमं' 'पाशम्' उपरिष्टादवस्थितम् 'अस्मत्' अस्मत्तः 'उत् अथाय' ऊर्द्धं क्षिपय। उच्छ्रित्य च विमुञ्चास्मानपीड़यन्। योऽपि चायं 'अधमः' ते पाशः अस्मासु वर्त्तते, एनम् अर्वाञ्चम् 'अव' अथय अवमुञ्च। तथाच योऽप्ययं 'मध्यमः' ते पाशोऽस्मन्मध्ये वर्त्तते, एन मपि तथैवावस्थितस्य मनभिसर्जयन् ऊर्द्धं मधो वा अदुःखयन्नस्मान् 'वि' अथय विमुञ्च। अथैवं त्वया 'वयं' सर्वविमुक्तपाशाः सन्तो हे 'आदित्य' अदितेः पुत्र! वरुण! 'अनागसः' अपापाः संशुद्धसर्वकिल्बिषाः। एतदेव हि यौष्माकीणं पाशत्रय मागः, तेनावमुक्ताः सन्तः 'तव' एव 'व्रते' तवैव परिचरणकर्मणि 'अदितये' चात्मनोऽदीनत्वाय अनुपक्षयाय आदरवन्तः स्थिताः 'स्याम' इत्याशीः॥

निगमप्रसक्त मुच्यते।—"व्रत मिति कर्मनाम (१भा० १६५ पृ०), "वृणोतीति"। एवं कर्त्तरि कारके "मतः" वृणोतेः; तद्धि कर्म शुभञ्च कृतं सदावृणोति कर्त्तारम्। "इद मपीतरद् व्रत मेत-

---

* "उदुत्तमं वरुण पाश मस्मदवाधमं वि मध्यमं श्रथाय। अथा वय मादित्य व्रते तवानागसो, अदितये स्याम॥" ऋ० सं० १, २, १५, ५।

† "तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसीति, त मेवोपधावेति; स वरुणं राजान मुपससार तं उत्तराभिरेकचिंशता (ऋ० सं० १, २, १४, १—१९, ५ऋ०)" ऐ० ब्रा० ७, २, ४।

स्मादेव", "निरुक्तिकर्म" यमनियमाख्यं वर्हिर्वेदिकं मान्तर्वेदिकं वा; यदग्निसन्निधावुपेयते, तत्पुनः "वारयतीति" एवं "मतः"; तद्विषयेषु प्रवर्त्तमानं* पुरुषं स्त्र्यादिषु वारयति, तदनुस्मृत्य स पुरुषो निवर्त्ततेऽवकीर्णी†, भविष्यामीत्येतस्माद् भयात्। "अन्न मपि व्रत मुच्यते; यदाप्नोति शरीरम्"। रस-शोणित-मांस-मेदो-मज्जास्थिभावेन विपरिणममानम्॥ आदित्यशब्दप्रसक्तानुप्रसक्त मिद मुक्तम्॥ १॥

स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान्त्स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता‡। पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्पृष्टा§ रसान्त्संस्पृष्टा॥ भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च¶। नाक आदित्यो भवति** नेता भासां ज्योतिषां प्रणेयोऽथ द्यौः क मिति सुखनाम तत्प्रतिषिद्धं प्रतिषिध्येत। न वा अमुं लोकं जग्मुषे किञ्च नाकम्। नवा अमुं लोकं जग्मुषे†† किञ्च नासुखं पुण्यकृतो ह्येव तच्च गच्छन्ति‡‡

---

* "वर्त्तमानं" रोथ्-मु०।
† "ऽवकीर्णो" रोथ्-मु०।
‡ क-ख-ग-पुस्तकेषु दृश्यैव द्वितीयखण्डसमाप्तिः।
§,॥ "संस्पृष्टा" ख, ग, ङ।
¶ क-ख-ग-पुस्तकेषु दृश्यैव तृतीयखण्डसमाप्तिः।
** इतोऽनन्तरं "नेता रसानां"—इत्यधिकः पाठः ङ, च।
†† "लोकं मनवते" ङ, च।
‡‡ क-ख-ग-पुस्तकेषु दृश्यैव चतुर्थखण्डसमाप्तिः।

गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेऽथ द्यौर्यत् पृथिव्या अधि दूरङ्गता भवति यच्चास्यां ज्योतींषि गच्छन्ति *। विष्टवादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषा माविष्टो भासेति वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च †। नभ आदित्यो भवति‡ नेता भासां ज्योतिषां प्रणयोऽपि § वा भन एव स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥ ॥ २ (१४) ॥

इति द्वितीयाध्यायस्य चतुर्थः पादः ॥ २,४.

अधुना प्रकृत मेवोच्यते ;—"स्वरादित्यो भवति"¶। "सु अरणः" सुगमन इत्यर्थः। अथ वा सुष्ठु तमांसि ईरयतीत्यर्थः। अथ वा विशेषणविशेष्यभावेन एते वाक्ये स्याताम्। किं सुष्ठं भवति—सु अरणः? इति। उच्यते; "सु ईरणः" इत्येव। "स्वृतो रसान्" सुष्ठु रसानादातु स्वृतो भौमान् आन्तरिक्षांश्च। "स्वृतो भासं ज्योतिषाम्" सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भास मादातु स्वृतो गतः। "स्वृतो भासेति वा" सुष्ठु परिगतो भासेति वा; सर्वतो ह्येष परिगतो दीप्त्या भवति ॥

---

* क-ख-ग-पुस्तकेषु दृष्टैव पञ्चमखण्डसमाप्तिः।
† क-ख-ग-पुस्तकेषु दृष्टैव षष्ठखण्डसमाप्तिः।
‡ इतोऽनन्तरं "नेता रसानां" इत्यधिकः पाठः क, च।
§ "ज्योतिषां प्रभवोऽपि" ख, ग, क।
॥ क ख-ग-पुस्तकेषु दृष्टैव सप्तमखण्डसमाप्तिः।
¶ १भा० ६७७ पृ० (१)।

। "एतेन द्यौर्व्याख्याता"। उक्तं हि 'तानि चेत् समानकर्माणि समाननिर्वचनानि (१८५पृ० १ ०पं०)'—इति। सापि हि सु अरणा शोभनगमना भवति, शोभनं वा अस्या मर्यत इत्येव मादि यथासम्भवं योज्यम्॥

"पृश्निरादित्यो भवति" *। आह;—कस्मात्? उच्यते;—"प्राप्नुत एनं वर्ण इति नैरुक्ताः"। 'प्राप्नुते' प्रकर्षेण व्याप्नोति 'एनम्' आदित्यं 'वर्णः' प्रोज्वलः 'इति' 'नैरुक्ताः' मन्यन्ते। "संस्पृष्टा † रसान्" स हि नित्यकाल मेव रसानां संस्पृष्टा भवति। तस्य तदेव कर्म; वक्ष्यति,—"अथास्य कर्म रसादानम् (दै० का० ७,३,४)"—इति। "संस्पृष्टा भासं ज्योतिषाम्"। आदित्यसंस्पर्शादेव ग्रहनक्षत्रचन्द्रमसां भासो नश्यन्ति। "संस्पृष्टो भासेति वा" दीप्त्या ह्येष सर्वतः संस्पृष्टो भवति॥

आह;—"द्यौः" कस्मात् पृश्निः? उच्यते;—सापि हि "संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च"॥

"नाक आदित्यो भवति" ‡। आह;—कस्मात्? उच्यते;—"नेता भासां" सर्वासु दिक्षु। "ज्योतिषां" च "प्रणयः"; अस्यैव हि भगवतो रश्मिजालप्रान्तोपलग्नं ज्योतिश्चक्रं बभ्रमीति॥

"अथ द्यौः" कस्मान्नाकः? इति। उच्यते;—"क मिति सुखनाम (१भा० ३१८पृ०)"। आह;—ततः किम्? इति। ब्रूणु;—

---

* १भा० ३७७ पृ० (१)।
† "संस्पृष्टा" इ०-क, ख।
‡ १भा ३७८ पृ० (१)।

"तत्प्रतिषिद्धं" सत् पुनरपि "प्रतिषिध्येत"। किम्? इति। उच्यते;—तत्प्रतिषिद्धमानम् 'अकम्' भवति, असुख मित्यर्थः; पुनरपि च प्रतिषिद्धमानं 'नाकम्' भवति। ततो द्विः प्रतिषेधः प्रकृत मापादयति; नाक मित्युक्ते सुख मिति प्रतीयते। ब्राह्मण मपि चैतस्मिन्नर्थे भवति;—"न वा अमुं लोकं जग्मुषे किञ्च नाकम्"—इति। आह;—किमुक्तं भवति? "अमुम्" एव "लोकं" द्युलोकं "जग्मुषे" गतवते "न" "किञ्च" किञ्चित् नाकं "नासुखम्" इत्यर्थः। किङ्कारणम्? य एव हि "पुण्यकृतो" भवन्ति, ते "एव हि" "तत्र गच्छन्ति" न च पुण्यकृतां दुःखेन भवितुं न्याय्यम्॥

"गौरादित्यो भवति" *। आह;—कस्मात्? उच्यते;—"गमयति" ह्यसौ "रसान्" आत्मानं प्रति, उपचयं वा गमयति। किञ्च, "गच्छत्यन्तरिक्षे" स एवात्मना॥

"अथ द्यौः" कस्माद् गौः? इति। उच्यते;—"यत्" यस्मादियं गौः "पृथिव्याः" "अधि" उपरि "दूरम्" अध्वानं "गता भवति"। किञ्च, "यत्" यस्मात् "च" "अस्यां" "ज्योतींषि" ग्रहनक्षत्रतारकादीनि "गच्छन्ति" तस्माद् गौः॥

"विष्टवादित्यो भवति" †। आह;—कस्मात्? उच्यते;—आभिमुख्येन हि एष "रसान्" भौमानान्तरिक्षांश्च "आविष्टः" प्रविष्टो रश्मिभिरादातुम्। किञ्च, आभिमुख्येन "आविष्टो भासं" "ज्योतिषां"

---

* १भा० ३७८ पृ० (४)।
† १भा० ३७९ पृ० (५)।

ग्रहादीनाम्। अथ वा अथ मेवाभिमुख्येन "आविष्टो भासेति वा" सर्वतो ह्येष सन्दीप्तो भवति ॥

"अथ द्यौः" कस्माद् विष्टप्? इति। उच्यते;—इय मपि हि "आविष्टा" "ज्योतिर्भिः" ग्रहनक्षत्रादिभिः, ये चान्ये पुण्यकृतस्तैश्च तस्माद् विष्टबिति ॥

"नभ आदित्यो भवति" *। आह;—कस्मात्? उच्यते;—"नेता" ह्येष "भासां" सर्वासु दिक्षु, "ज्योतिषां" च "प्रणयः" व्याख्यात मेतत्। "अपि वा भन एव स्यादिपरीतः" भनः भासनः सन् नभ इत्युक्तो विपर्ययेण। "न न भातीति वा" न न भाति, भात्येवेति नभः ॥

"एतेन द्यौर्व्याख्याता" सापि ह्यादित्यवन्नेत्री भासा मित्यादि योज्यम् ॥ २ ॥

॥ इति निरुक्तटीकायां सप्तमाध्यायस्य चतुर्थः पादः॥ २,४.

---

* २भा० २०९ प० (१)।

॥ पञ्चमः पादः ॥

रश्मिनामान्युत्तराणि पञ्चदश रश्मिर्यममात्तेषामादित्यः साधारणानि पञ्चाश्वरश्मिभिर्हिङ्कारमान्युत्तराण्यष्टौ दिशः कस्माद्दिशतेरासदनाद्दिशतेर्वाभ्यशनात्* तच्च काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति† काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्त्यादित्योऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्याज्यन्नोऽपि‡ काष्ठोच्यते क्रान्त्वा स्थितो भवत्यापोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति स्थावराणाम्॥ १ (१५)॥

आदित्यसम्बन्धेनैव "रश्मिनामान्युत्तराणि पञ्चदश"§। "रश्मिर्यमनात्" उदकस्य अश्वानां वा। "तेषां" "पञ्च" यानि "आदित्यः" तानि "साधारणानि" "अश्वरश्मिभिः"। कतमानि पुनस्तानि? "खेदयः, किरणाः"—इत्येवमादीनि॥। खे दयन्ते खे गच्छन्ति इति खेदयः; किरणा विच्छिन्ना भवन्ति॥

---

* "वाभ्यसनात्" ख।
† "सत्त्वस्य नाम भवति" ङ, च।
‡ "भवत्याज्यन्नोऽपि" ङ।
§ १भा० २२५० ५ख०।
॥ १भा० २२—२६ ५०।

"दिङ्नामान्युत्तराण्यष्टौ" *। आदित्योपलक्षणा एते हि दिश इत्यादित्यनामभ्यः उत्तराणि दिङ्नामानि। कियन्ति पुनस्तानि? अष्टौ। कानि पुनस्तानि? "आताः, आशाः, उपराः"—इत्येवमादीनि †। आताः, आगता ह्येतास्तं तं मर्थं प्रति भवन्ति। आशाः, अभ्यश्नुवते ह्येताः सर्वमेव यदस्ति किञ्चित्। उपराः, सर्वमेव ह्येता उपरम्य रता भवन्तीत्युपराः॥

आह;—"दिशः कस्माद्"? "दिशतेः" अतिसर्जनार्थस्य (तु० उ०); अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम्। अथ वा "आसदनात्" तं तं मर्थं प्रत्येता आसन्ना भवन्ति। "अपि वाभ्यश्नात्" अभ्यश्नुवते ह्येतास्तं तं मर्थम्॥

"तच्च काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति"। तद्यथा;—"काष्ठा दिशो भवन्ति" ‡। आह;—किङ्कारणम्? इति। उच्यते; "क्रान्त्वा स्थिता भवन्ति" क्रान्त्वा ह्येतास्तं तं मर्थं प्रति गत्वा स्थिता भवन्ति; न हि तदस्ति, यत्रेमा न सन्ति। "काष्ठा उपदिशो भवन्ति"। "इतरेतरं क्रान्त्वा स्थिता भवन्ति" ता अपि ह्येतरेतरं क्रान्त्वा दिग्भिः साकं स्थिता भवन्ति। "आदित्योऽपि काष्ठोच्यते"। "क्रान्त्वा स्थितो भवति" असावपि स्वस्थानं क्रान्त्वा गत्वा स्थितो भवति। "आज्यन्तोऽपि काष्ठोच्यते; क्रान्त्वा स्थितो भवति"। आज्यन्तोऽपि अरपथान्तः काष्ठोच्यते; असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति। "आपोऽपि काष्ठा उच्यन्ते"। ता पुनर्द्रव्यः,—

* १भा० ३९४० ९ख०।
† १भा० ३९—४२४०।
‡ १भा० ४१४० (५)।

स्थावराश्चास्थावराश्च। तत्र, "क्रान्त्वा" गत्वा जलाशय मेता: "स्थिता भवन्तीति स्थावराणाम्" काष्ठात्वम्। अस्थावराणां पुनः क्रामन्ते चैता:, न क्वचित् तिष्ठन्तीति काष्ठा मेधा आपः॥ १॥

मन्त्रोऽपि चैतस्मिन्नेवार्थे भवति;—

अतिष्ठन्तीना मनिवेशनानां काष्ठानां मध्ये-निहितं शरीरम्। वृचस्य निण्यं वि चरन्त्यापो दीर्घं तम् आ शयदिन्द्रशत्रुः॥ अतिष्ठन्तीना मनिविशमानाना मित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शृणातेः* शम्नातेर्वा वृचस्य निण्यं निर्णामं† विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदा शेते‡ रिन्द्रशत्रु रिन्द्रोऽस्य§ शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुस्तत्को वृचो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका॥ अपाञ्च ज्योतिषश्च मिश्रीभावकर्म्मणो वर्षकर्म्म जायते तचोपमार्थेन युद्धवर्णा भवन्त्यहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च विवृध्या शरीरस्य स्रोतांसि निवारयाञ्चकार तस्मिन् हते प्रशस्यन्दिर आपस्तदभिवादिन्येषर्ग् भवति॥२॥(१६)॥

* "मेघः शरीरं शरीरं शृणातेः" क, ख, ग। "मेघशरीरं शृणातेः" घ।
† "वृचस्य निर्णामं" क, ख, ग।
‡ "०शयदा शयते" क, ख, ग।
§ "इन्द्रो यस्य" क, ख।
॥ "०स्त्वाष्ट्रोऽसुर इत्यैतिहासिका" क-ख-ग-पुस्तकेषु नेतद् दृश्यते।

'अतिष्ठन्तीना मिति *। हिरण्यरूपस्येय मार्षम्, दासपत्नी-रिति † च। त्रिष्टुभावेते। अग्निष्टोमे निष्केवल्यं नाम शस्त्रम्, तच्च निविद्धानीय मेतत् सूक्तम्, तच्च द्वे अपि शस्येते। न तिष्ठन्तीत्यति-ष्ठन्त्यः, तासाम् "अतिष्ठन्तीनाम्" मेघोदरान्तर्गताना मपाम्; ता हि मेघे गच्छति गच्छन्त्येव तदाधारत्वात्। 'अनिवेशनानाम्' "अनि-विशमानानाम्" न हि ताः क्वचिन्निविशन्ते, यावज्जलाशयं नाप्नुवन्ति। तासा मेवंविधानां "काष्ठानां मध्ये" अवस्थितानां वाह्यतो मेघाख्यं "निहितम्" अवस्थापितं धात्रा "शरीरम्" आवृत्य अपः, तासा मेव गुप्तये। ताः पुनः 'आपः' तस्य "वृत्रस्य" मेघस्य "निण्यं निर्णामं" येनासौ नीचैर्नमति तं प्रदेशं "विजानन्ति" इव। यत्तेन प्रदेशेन "विचरन्ति" प्रचरन्ति निम्नानुसारिण्यो हि ताः। असावपि वृत्र-स्तासु प्रचरन्तीषु तत्प्रचरणनिरोधं चिकीर्षुः स्वशरीरवितत्या 'दीर्घं तमः'; स हि तमः स्वत एव, धूमादिप्रभवत्वात्। यावन्तं प्रदेशं निम्न मनुसरन्त्यो मेघस्य ताः स्रुता भवन्ति, निपित्यन्त्यस्ततो बहु-तर मसौ वर्द्धते। तदवरुत्यया एवं दीर्घं तम आवृत्य 'आ शयत्' आ शेत इत्यर्थः। कः पुनरेव माशयत्? 'इन्द्रशत्रुः' इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शरीरं शृणातेः (१भा०२८४पृ०)" हिंसार्थस्य, हिंस्यते हि तत्। "शक्नातेर्वा (१भा०२८४पृ०)" हिंसा-र्थस्य। "दीर्घं द्राघतेः (भू०आ०)" वृद्ध्यर्थस्य; वृद्धं तद् भवति। "तमः तनोतेः (तना०उ०)"; तेन हि सर्वं मेव ततं भवति।

---

* ऋ० सं० १, २, ३७, ५।

† इत उत्तरस्मिन् सूक्ते।

"आ ग्रयत्" "आङ्"-पूर्वस्य "ग्रेतेः"। "इन्द्रशत्रुः, इन्द्रोऽस्य ग्रमयिता वा" इन्तेत्यर्थः "ग्रातयिता वा" इन्ता वा; धात्वन्यत्व मर्थैकत्वम्॥

इह मन्त्रे वृत्र इत्येतच्छ्रुतं तदेतत् नैगमानुप्रसक्तं विचार्य्यते इत्युपयुक्तस्तच्छब्दः। आह;—"को वृत्रः?" उच्यते;—"मेघ इति नैरुक्ताः*; त्वाष्ट्रोऽसुर इत्यैतिहासिकाः"। निरुक्त मधीयते नैरुक्ताः। आह;—यदि मेघो वृत्रो य एष मन्त्रेषु, यत्र सङ्ग्रामे श्रूयते † तत्र कः समाधिः? इति। उच्यते;—"अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"। 'अपां च' मेघोदरान्तर्गतानां 'ज्योतिषश्च' वैद्युतस्य उद्भूतवृत्तेः 'मिश्रीभावकर्मणो वर्षकर्म जायते' तेन हि वैद्युतेन ज्योतिषा वाय्वा वेष्टितेन इन्द्राख्येनोपताड्यमाना आपः प्रस्यन्दते—वर्षभावाय कल्प्यन्ते। 'तत्र' एवं सत्युदकतेजसोरितरेतरप्रतिद्वन्द्वभूतयोः 'उपमार्थेन' रूपकल्पनया 'युद्धवर्णा भवन्ति'—इति युद्धे रूपकानीत्यर्थः;। न ह्यत्र यथाभूतं युद्ध मस्ति; न हीन्द्रस्य शत्रवः के चन सन्ति। मन्त्रोऽपि चैतस्मिन्नर्थे अस्ति नेन्द्रस्य शत्रवः,—"यदचरस्तन्वा वावृधानो०—० विवित्से" ‡। वामदेवपुत्रस्य बृहदुक्थस्यार्षम्। त्रिष्टुप्। व्यूढस्याष्टमेऽहनि निष्केवल्ये शस्यते। 'यद्' 'अचरः' त्वं नानाप्रकारं 'तन्वा वावृधानः' शरीरेण विग्रहवान् भूत्वा वावृधानः पुनः पुनः वर्द्धमानः। कथं पुनरचरः?

---

* १मा० ७१४० (१८)।

† "इन्द्रो वै इदं सर्वमनिष्यन्सर्वा देवता अब्रवीत् (ऐ० ब्रा० ३, १, ९)"—इत्यादि।

‡ "यदचरस्तन्वा वावृधानो बलानीन्द्र प्रवृणाणो अर्जुन। मायेत्सा ते यानि युद्धान्याहुर्नारिरत्र मनवे गृणो पुरा विवित्से॥" ऋ० सं० ८, १, १५ १।

"बलानीन्द्र प्रत्नुवाणो जनेषु"। 'बलानि' आत्मीयानि वीर्याणि, हे 'इन्द्र!' 'प्रत्नुवाणः' इव। क? 'जनेषु'। किं त्वं तथैव? न। "मायेत्सा ते यानि युद्धान्याहुः"। 'यानि युद्धान्याहुः' ऐतिहासिकाः, नानारूपाण्युपप्रदर्शयन्तः, 'सा' अपि च 'ते' तव 'माया इत्' मायैव *। किं कारणम्? 'नाद्य' शत्रुः तवास्ति प्रत्यनीकभूतः, 'न नु पुरा' नापि पुरा कश्चिदासीत्; यावद् वीर्यं किञ्चित् क्वचिदस्ति सर्वं तत् त्वय्येव। "वीर्यं वै प्रावीर्यमिन्द्र इति ह विज्ञायते"। क्व ते शत्रुः? येन साकं युयोधिथ। एतत् त्वमपि 'विवित्से' वेत्त्येव †; न केवलमहमेवेत्यभिप्रायः। एव मेतन्मन्त्रे मायात्व मेव युद्ध मिति श्रूयते। विज्ञायते च "तदाहुर्नैतदस्ति यदेवासुर मिति"। तस्मात् साधूक्तम्,—"अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"॥

आह;—किं वृत्रवदेव रूपाणि भवन्ति? नेत्युच्यते;—"अहिवत्तु खलु‡ मन्त्रवर्णा ब्राह्मणवादाश्च"। चः समुच्चयार्थो द्रष्टव्यः। वृत्रवच्चाहिवच्चेति मन्त्रवर्णा भवन्ति, ब्राह्मणवादाश्च शाखान्ते भवन्ति; तदप्युपेक्षितव्यम्*। "तस्मिन् हते" वृत्राख्ये मेघे हते "प्रसस्रुन्दिर आपः"॥

"तदभिवादिनी एषा" ***—॥ २॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपाम्बिल मपिहितं यदासीद्वृत्रं जघन्वाँ अप-

---

* 'भवेत्यर्थे" सायणः।

† "शत्रुं हन्तव्यं न विवित्से न लभसे" सायणः।

‡ अहिर्भैचः १भा० १६ ख० (२१)।

तद्वार ॥ दासपत्नीर्दासाधिपत्यो दासो दस्यतेरुपदास-यति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरय-नादेत्यन्तरिक्षेऽय मपीतरोऽहिरेतस्मादेव निर्ह्रसितो-पसर्ग आ हन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग् भवति पणिः पणनाद्वणिक् पण्यं † नेनेक्ति। अपां ‡ बिल मपिहितं यदासीत्। बिलं भरं भवति बिभर्त्तेर्वृचञ्जघ्निवानपववार तद् वृचो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा यद्वृणोत्तद् वृत्रस्य वृत्रत्व मिति विज्ञायते यद्वर्त्तत तद् वृत्रस्य वृत्तत्व मिति विज्ञायते यद्वर्द्धत तद् वृत्रस्य वृत्रत्व मिति विज्ञायते ॥ ३ (१७) ॥

॥ इति द्वितीयाध्यास्य पञ्चमः पादः ॥ २, ५.

दासपत्नीति §। 'अपां' 'यद्' 'बिलं' निर्गमद्वारम् 'अपिहितम्' 'आसीत्' तेन मेघेन; 'तद्' यदा इन्द्रः तं 'वृत्रं' मेघं 'जघन्वान्' निजघ्निवान् अहत॥, हत्वा च 'अप ववार' अपावृतवान्। अथ तदा तस्मिन् निहते अपावृते च द्वारे ताः आपः प्रस्यन्दिरे वर्षा-भावेनेति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"दासपत्नीः दासाधिपत्यः" दासः कर्म-

---

* उपगम्य ईक्षितव्यं वोढव्य मिति यावत्।

† "वणिक् वण्यं" ङ।

‡ "नेनेक्त्यपां" ङ।

§ ऋ० सं० १, ३, ३८, १। ऋष्यादिकं पूर्वत्र द्रष्टव्यम् (११८ पृ० ४पं०)।

॥ 'प्र मू महित्वम्'—इत्यस्या ऋचो व्याख्यानावसरेऽपि वक्ष्यतेऽय मेवार्थः,—"इवरुन मेघवचनम्"—इति। दै० का० ७, ५, १।

करः, तं हि ता अधिष्ठाय पान्ति रक्षन्ति। स हि कर्मणा श्रान्तः, तासु पीतासु विश्रान्त आप्यायितो भवति। विग्रहप्रसक्तं निरुच्यते ;—"दासो दस्यतेः (दि० प०)" स हि "उप दासयति" उपक्षयति क्षय्यादीनि "कर्माणि"। "अहिगोपाः" "अहिना गुप्ताः"। "अहिः" कस्मात् ? उच्यते ;—"अयनात्" ; "एति" हि असौ "अन्तरिक्षे"। शब्दसामान्यान्निरुच्यते ;—"अय मपीतरोऽहिः" सर्पः "एतस्मादेव" असावपि हि एति। अथ वा "निर्हसितोपसर्गः" स्यात्। कथम् ? "आ हन्ति" असौ भोगेनेत्यादिः। आङ्-पूर्वस्य हन्तेः (अदा० प०), स पुनरय मुपसर्गं निर्हृत्य ह्रस्वं कृत्वा अहिरुच्यते। "पणिर्वणिग् भवति"—इति पर्यायेण तत्त्ववचनम्। "पणिः पणनात्" पणिति ह्यसौ व्यवहारं करोति। पर्यायप्रसक्तं निरुच्यते ;—"वणिक् पण्यं" वणिजो यत् द्रव्यं तत् पण्यम्, तदसौ "नेनेक्ति" नित्यकालं शुचीकरोति मूल्यार्हं स्यादिति। "बिलं भरं भवति", "बिभर्त्तेः (जु० प०)" धातोः; भृतं हि तदुदकादिभिः। "वृत्रो वृणोतेर्वा (स्वा० उ०) वर्त्ततेर्वा (भू० आ०) वर्द्धतेर्वा (भू० आ०)"—इत्येषां धातूनां मन्यतमस्य। ब्राह्मण मपि चैतस्मिन्नर्थे भवति ;—"यद्वृणोत्" अन्तरिक्षं मुदकं वा, महत्त्वात् "तद् वृत्रस्य वृत्रत्वम्"—"इति" एवं ब्राह्मणोऽपि "विज्ञायते" विचार्यमाणो ज्ञायते। अथ वा "यद्-वर्त्तत" इन्द्रेण हतो वृत्रो मेघः अपां बिले अपावृते अपः वृष्टिभावेन अवर्त्तयत् प्रावर्त्तयत्, "तद् वृत्रस्य वृत्रत्वम्"। अथ वा "यद् अवर्द्धत" असावतिमात्रप्रमाणम्, "तद् वृत्रस्य वृत्रत्वं" स्यादिति * ॥ २ ॥

॥ इति निरुक्तवृत्तौ सप्तमाध्यायस्य पञ्चमः पादः॥ २, ५.

* १भा० ७२५० (१८) द्रष्टव्यम्।

॥ षष्ठः पादः ॥

रात्रिनामान्युत्तराणि त्रयोविंशती रात्रिः कस्मात् प्ररमयति भूतानि नक्तञ्चारीण्युपरमयतीतराणि ध्रुवी करोति रातेर्वा स्याद्दानकर्मणः प्रदीयन्तेऽस्या मव-श्यायो उषो नामान्युत्तराणि षोडशोषाः * कस्मा-दुच्छतीति सत्या राचे रपरः कालस्तस्या एषा भवति ॥ १ (१८) ॥

"काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति (२ १ ५ पृ० ५ पं०)"—इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्त मुक्तम्; प्रकृत मिदानी मुच्यते;—"रात्रिनामान्युत्तराणि त्रयोविंशतिः" † । रात्रेर्नामानि 'रात्रिना-मानि' । 'उत्तराणि' इति प्रकृतेभ्यो दिङ्नामभ्यः; तमः-सतत्त्वा हि रात्रिः, तस्य च तमसो दिक्ष्वेवात्मलाभो भवति, अतो दिङ्ना-मभ्य उत्तराणि रात्रिनामानि । कियन्ति पुनस्तानि ? 'त्रयोविंशतिः' त्रीणि च विंशतिश्च त्रयोविंशतिः (२ ३) । कतमानि पुनस्तानि ? "श्यावी, क्षपा, शर्वरी"—इत्येव मादीनि ‡ । श्यावर्णा हि रात्रि-रिति श्यावी । स्वैः स्वैः कर्मभिः अहनि त्रीणान् प्राणिनः द्वयं क्षपेन पातीति क्षपा; अस्यां हि सुप्ताः पुनर्नवा इव प्राणिनः प्रात-

---

* "षोडशोषाः" क, ख ।

† १भा० ४१ पृ० ७ख० ।

‡ १भा० ४१—४८ पृ० ।

रुत्तिष्ठन्ति। शरण मस्यां स्वापार्थं त्रियत इति शर्वरी। इत्येव मादि सर्वत्र योज्यम्॥

आह;—"रात्रिः कस्मात्?" इति। उच्यते;—इयं ह्यागच्छन्ती प्रकर्षेण रमयति। कानि? "भूतानि नक्तञ्चारीणि" * पिशाचादीनि; तानि हि विगतेऽहनि रात्र्या सुपस्थितायां प्राप्तोऽयं विहारसमयः इति प्रकर्षेण रमन्ते। "उपरमयतीतराणि ध्रुवीकरोति" इतराण्यपि दिवाचारीणि सैवोपरमयति; तस्यां ह्युपस्थितायां दिवाचराणि भूतानि मनुष्यादीनि इतिकर्त्तव्यताभ्यः उपरमन्ति, उपरम्य च स्थिरीभवन्ति निवासाय। "रातेर्वा स्यात् दानकर्मणः" दानार्थस्य †। आह;—किं मस्यां प्रदीयते? उच्यते;—"प्रदीयन्तेऽस्या मवश्यायाः" अवश्य मायन्तीत्यवश्यायाः, तुषारा इत्यर्थः; ते हि रात्रौ निपतन्ति॥

"उषोनामान्युत्तराणि षोडश" ‡ उषसो नामानि। रात्रेरेव ह्यपरः कालः उष आख्यो भवतीति रात्रिनामभ्य 'उत्तराणि उषोनामानि'। कियन्ति पुनस्तानि? 'षोडश' (१६)। षट् च दश च षोडश। कतमानि पुनस्तानि? "विभावरी, सूनरी"—इत्येव मादीनि §। विविधां भियं भासं वृणोतीति विभावरी। शोभनं नराणां मस्यां सुत्यानं भवतीति सूनरी। इत्येव मादि निर्वचनं योज्यम्॥

---

* "नक्तञ्चराणि" इ० क, ख।
† १भा० ३५५इ० (४)।
‡ १भा० ४८इ० ८ ख०।
§ १भा० ४८—५४इ०।

आह;—"उषाः कस्मात्?" इति। उच्यते;—"उक्तीति सत्याः"। 'उक्षी विवासे (भू०प०)'; विवासयति ह्येषं तमांसि तस्मादुक्तीत्येव सत्या एतस्मिन् कर्मणि सत्याः कर्त्तरि कारके भाव उषा इत्येतदभिधानं भवति। आह;—का पुनरियं सुषाः? इति। उच्यते;—"रात्रेरपरः कालः" स उषा इत्युच्यते। आह;—कथ मेतदुच्यते रात्रेरपरः कालः उषाः? इति। उच्यते;—"तस्याः" उषसः रात्र्यपरकालत्वम्। "एषा" निर्वार्चिका ऋग् "भवति"— ॥ १ ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवाय एवा रात्र्युषसे योनिमारैक्॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततम मजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्* स्थानं स्त्रीयोनिरभियुत† एनां गर्भस्तस्या एषापरा भवति ॥ २ (१९) ॥

इदं श्रेष्ठ मिति‡। आङ्गिरसस्य कुत्सस्येय मार्षम्, उत्तरा च। उभे अपि त्रिष्टुभावेते, प्रातरनुवाकाश्विनयोः शस्येते। "इदम्" उषोलक्षणं "ज्योतिः", "श्रेष्ठम्" आदित्यादीनां "ज्योतिषाम्" इति

* "मरिचित्" क।
† "रनियुत" क।
‡ ऋ० सं० १, ८, १, १।

निर्द्धारणे षष्ठी। आदित्यो हि तापकः प्रकाशकः, चन्द्रमा अथ निशीतः प्रकाशकश्च, इदं पुनर्नात्युष्णं नातिशीतं प्रकाशकञ्च। इत्येव मादित्यादीनां मिद मेव श्रेष्ठम्। 'आगात्' "आगमत्" आगच्छतीत्यर्थः। "चित्रं"* चायनीयं पूजनीयं वा† श्रेष्ठत्वादेव, 'प्रकेतः' "प्रकेतनं प्रज्ञाततमम्" ‡ "अजनिष्ट" जात मित्यर्थः। जातं सदागच्छति सर्वासु दिक्षु। 'विभ्वा' "विभूततमम्" § इद मतिमहत्त्वाद् विभूततमं § विस्तीर्णतमम्; इतराणि परिच्छिन्नतराणि ज्योतींषि अपेक्ष्य। किञ्च; "यथा प्रसूता" प्रकर्षेण सूता प्रसव मनुप्राप्ता। सूतिशब्दः प्रसवार्थः। "रात्रिः" "सवितुः" "आदित्यस्य" 'सवाय' ‖ "प्रसवाय", आदित्योत्सृष्टे देशे जायते। "एवम्" 'एव' "रात्री" ¶ रात्रिः उषसो जन्मार्थं "योनिं" "स्थानम्" अवकाशम् "उषसे" आत्मलाभाय 'आरैक्' "अरिचत्" आरेचयति, ददातीत्यर्थः**। यद्योषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वात्, एवं रात्रिरुषसो जन्मनो हेतुः; इत्येव मस्या मृचि रात्रेरेव वापरः कालः उषः-सञ्ज्ञित इति गम्यते। स्थानं योनिशब्देनोच्यते†† । यद्धि

---

* "चित्रः"—इत्येव मन्त्रपाठः सायणव्याख्यातश्च।

† १भा० ५०४० (५)।

‡ १भा० ११५ (१)।

§ "विभूतम" क।

‖ 'छन्दसि जवसवो वक्तव्या विति निपातनादच्। चित्त्वादन्तोदात्तत्वम्। अणो प्रगृह्यत्वात्सानुनासिक इति संहितायां मकारः सानुनासिकः'—इति सायणः।

¶ 'रात्रेश्चाजसाविति ङीप्। यस्येति चेतीकारलोपः'—इति सायणः।

** "प्रारिचत् प्रादात्" नैघ० का०, १, ६।

†† १भा० ६, १० (१४)।

यस्मिन् विधीयते, तत् तेन साकं युतं भवति मिश्रीभूत मित्यर्थः। * इय मपीतरा—"स्त्रीयोनिः" एतस्मादेव। किङ्कारणम्? "अभियुतः" हि "गर्भः" "एनाम्" भवति, आमिश्रीभूत इत्यर्थः। पूर्वत्र *,—"अय मपीतरो योनिः, एतस्मादेव। (किम्?) परियुतो भवति" इति परियवन-क्रियासामान्येन निरुक्तो योनिशब्दः; इह पुनः 'अभियुत एनां गर्भः' इति मिश्रीभाव-सामान्येन उभयलिङ्गत्वं चास्योपदर्शितम्;—इह स्त्रीलिङ्गम्, तत्र पुंलिङ्गम् इति। "तस्याः" उषसः "एषा" "अपरा" ऋग् "भवति"—(अस्यैवार्थस्य दृढ़तायै रात्रेरपरः काल उषा उच्यत इति)॥ २॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः। समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने। रुशद्वत्सा† सूर्यवत्सा‡ रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः सूर्य मस्या वत्स‡ माह साहचर्याद्रसहरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वेतते रिरिचत् कृष्णा सदनान्यस्याः-कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णोऽथैने संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची इतीतरेतर§ मभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया

* १८८ पृ० १२ पं०।
† "रुशद्वत्सा सूर्यवत्सा" ख।
‡ "वत्स" ख।
§ "वनूची अनूचावितीतरेतर" ङ, च।

चरत इति * स्यादाभिनाने † अन्योन्यस्याध्यात्मं कुर्वाणे अहर्नामान्युत्तराणि द्वादशाहः कस्मादुपाहरन्त्यस्मिन् कर्माणि तस्यैष निपातो भवति वैश्वानरीयाया ऋचि ‡ ॥ ३ (२०) ॥

रुशद्वत्सेति §। "रुशद्वत्सा" रोचिष्णुवत्सा; सूर्यो हि रोचिष्णुः, तं "सूर्यम् अक्षा वत्स आह" मन्त्रदृक्। "साहचर्यात्"। आदित्यसहचरो हि वत्सो भवति, अयमपि चानयोषसा सह चरतीत्येतस्मात् सामान्याद् वत्स उच्यते। "रसहरणाद्वा"। यथा हि मातुरूधसः क्षीराख्यस्य रसस्याहर्त्ता ॥ भवति वत्सः, एव मेघोऽप्योषधिकानां नवशस्याख्यानां रसानां आहर्त्ता भवति रश्मिभिः,—इत्येतस्मात् सामान्याद् वत्सत्वम्। "रुशती" रोचनशीला आत्मनापि। "श्वेत्या" "श्वेतते:" धातोः (भ्वा० आ०)। श्वेतो वर्ण एत्यस्याम्, श्वेतवर्णेत्यर्थः। या चैवंलक्षणा उषाः, सा "आगात्" आगच्छति। आगतायास्तस्याः 'आरैक्' "अरिचत्" आरेचयति। "कृष्णा" "कृष्णवर्णा रात्रिः"। किं मारेचयति? "सदनानि" स्थानानि। "अक्षाः" उषसः। येष्विव सुषा स्थानेषु आगता सती आसीदति, तान्यारेचयति रात्रिः। एवं तावदयमर्द्धर्चो रात्र्युषसोर्विभक्तस्तुतिः; "अथ" अनेनोत्तरार्द्धर्चेन "एने" रात्र्युषसौ "संस्तौति"।

---

* "क्षया सह चरत इति" ङ, च।

† "दाभिनाने आभिख्याने" ङ, च।

‡ "ऋचिः" च।

§ ऋ० सं० १, ८, १, १। ऋष्यादिकं पूर्वं मुक्तम् (२२९ पृ० १९ पं०)।

॥ "रसस्य हर्त्ता" रोथ्स-मु०।

—"समानबन्धू" एते रात्र्युषसौ, "समानबन्धने" समान मनयोर्बन्धनम्। आदित्यस्येयं ह्यस्तमयं प्रति रात्रिर्बद्धा संश्लिष्टा, उदयं प्रत्युषाः; एवं समानबन्धू। "अमृते, अमरणधर्माणौ"; न हि रात्र्युषसौ म्रियेते। "अनूची इतीतरेतर मभिप्रेत्य" इतरेतरं संश्लिष्टे ह्येते। "द्यावा वर्णं चरतः"। "ते एव" रात्र्युषसौ। "द्यावौ द्योतनात्" उषा हि स्वेन प्रकाशेन द्योतते, रात्रिरपि स्वेन तमोवीर्येण नक्षत्रगणेन वा स्व मधिकारं प्रति द्योतते। एवं हि द्यावेति द्विवचनम् "अपि वा" इतीयान्त मेकवचन मेतत् स्यात्,—द्यौः, तया "द्यावा" 'सहयुक्ते (पा० २,३,१९)'। "तया" सह स्पर्द्धमाने "चरतः" गच्छतः। कथम्पुनश्चरतः? "आमिनाने"। आङ् अर्थे *। उषा अपि रात्रेरधि आत्मानं निर्मिमीते, रात्रिरप्युषसः; इतरेतरसंश्लिष्टे ह्येते रात्र्युषसौ। तस्मादेव मुच्यते;—"अन्योऽन्यस्याधात्मं कुर्वाणे" इति॥

उषः-शब्दतत्त्वावधारणार्थं प्रसक्तावेतौ मन्त्रौ उपवर्णितौ; प्रकृत मिदानी मुच्यते;—"अहर्नामान्युत्तराणि द्वादश" †। अहो नामानि, 'अहर्नामानि', 'उत्तराणि' प्रकृतेभ्य उषोनामभ्यः; उषस एवानन्तर मेहर्भवति, तस्मादुषोनामभ्य उत्तराणि अहर्नामानि। कियन्ति पुनस्तानि? 'द्वादश'। द्वे च दश च द्वादश (२९)। कानि पुनस्तानि? "वस्वोः, द्यु, भानुः"—इत्येव मादीनि ‡।

* 'तुदस्येव शरणे या मुचस्य। तुदस्येव शरणेऽधि मदन्ति"—इति ऋ० ५, १, ५।

† १भा० ५४५० (९)।

‡ १भा० ५४—५८ पृ०।

ज्योतिरेतदिति वस्योरित्युच्यते। यथैव हि श्रुतं मन्त्रे तथैवेह समाम्नातम्। द्युः, द्योतते ह्येतत् ज्योतिषा। भानुः, भासते ह्येतत् ज्योतिषेत्येव मादि योज्यम्॥

आह;—"अहः कस्मात्"? उच्यते;—"उपाहरन्त्यस्मिन् कर्माणि" न हि तथा रात्रावनुतिष्ठन्ति कर्माणि कर्मकराः, यथाहनि॥

"तस्य" अङ्गः "एष निपातो भवति"*। नैघण्टुकवृत्त्या। "वैश्वानरीयायाम्" वैश्वानरदेवतायाम् "ऋचि"—॥ ३॥

अहश्च कृष्णमहरर्जुनञ्च वि वर्त्तेते रजसी वेद्याभिः। वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि॥ अहश्च कृष्णं रात्रिः शुक्लञ्चाहरर्जुनं विवर्त्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभि†र्वैश्वानरो जायमान इवो‡द्यन्नादित्यः सर्वेषां ज्योतिषां राजावाहन्नग्निर्ज्योतिषा तमांसि मेघनामान्युत्तराणि चिंश्नन्मेघः कस्मान् मेहतीति§ सत आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिरुपर उपलो मेघो भवत्युपरमन्तोऽस्मिन्नभाण्युपरता आप इति वा तेषा मेघा भवंति॥ ४ (२१)॥

---

* "निपाता भवन्ति" ट०-क।
† "वेदितव्याभिः" क।
‡ "वैश्वानरो इवो" क।
§ "मेहतीति" क, ख, ग। "महतीति" च।

अहः-शब्दो हि रात्रि महश्चोभय मभिधत्ते, अतः सन्देहपदम्, तस्यैष विभागोऽस्मा न्मन्त्रि उपपदविशेषात् प्रदर्श्यन्ते;—अहश्च कृष्ण-मिति *। भरद्वाजस्येय मार्षम्। त्रिष्टुप्। पृष्ठस्य षष्ठेऽहन्याग्निमा-रुते शस्त्रे शस्यते। "अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनम्"। अर्जुनशब्दो हि शुक्लपर्यायः। "विवर्त्तेते" विपर्ययेण वर्त्तेते। रात्रिरतीता, अह आयातम्; अहरतीतं, रात्रिरायाता; इत्येवम्। "रजसी" रञ्जके। ज्योतिषा हि भूतान्यहो रञ्जयति, तमसा रात्रिः। "वेद्याभिः" "वेदितव्याभिः प्रवृत्तिभिः"; न हि तासां प्रवृत्तीना मन्तोऽस्ति; अहनि च रात्रौ च प्राणिना मन्तस्ता वेदि-तव्या एव भवन्ति, बहुत्वात्; न हि विदिताना मन्ताः कदाचित्। किञ्च, "वैश्वानरः" अग्निः 'अवातिरत्' "अत्राहन्" अपहन्ति, स्वेन "ज्योतिषा तमांसि"। कथम्पुनरपहन्ति? 'जायमानो न राजा' "जाय-मान इव", "उद्यन्" "सर्वेषां" सर्वभूतानां "राजा" "आदित्यः"। यथा ह्युद्यन्नादित्यस्तमांसि अपहन्ति दिवा, एवम् "अग्निः" अपि रात्रावपहन्तीत्यग्निरादित्येन तम उपघातं प्रत्युपमीयते॥

"मेघनामान्युत्तराणि चिंशत्"†। मेघानां नामानि तानि उत्त-राणि, प्रकृतेभ्योऽहर्नामभ्यः, मेघा ह्यहनि रात्रौ चाशेषेण भवन्त्यतो रात्र्यहर्नामभ्य उत्तराणि मेघनामानि। कतमानि पुनस्तानि? "अद्रिः, गावा, गोत्रः"—इत्येव मादीनि‡। अद्रिः, आदरयितव्यो

* ऋ० सं० ४, ५, ११, १।
† १भा० ५८ पृ० १०ख०।
‡ १भा० ५८—७५ पृ०।

भवति ह्यसावुदकार्थ मित्यद्रिः। गावा, गृणातेर्वा गृह्णातेर्वा; गृणात्यसौ शब्दं करोति, गृहीतस्नेहोदक मनेनेति। गोत्रः, गोर्वा-गत्र। इत्येवमाद्यभ्युद्धितव्यम्; पर्वतनामत्वेऽपि यथासम्भवं योज्यम्॥

आह;—"मेघः कस्मात्"? उच्यते;—"मेहतीति" सिञ्च-त्यसौ। एवं कर्त्तरि कारके "मतः" अस्येतदभिधानं भवति। तेषां मेघनाम्नाम् "आ उपर उपल इत्येताभ्यां" प्राक् उपर उपल इत्ये-ताभ्यां यानि नामानि, तानि "साधारणानि पर्वतनामभिः" तदेषां प्रकरणोपपदाभ्यां विशेषोऽवधार्यः। 'आ उपर इत्येतस्मात्'—इति वक्तव्ये "आ उपर उपल इत्येताभ्यां" युक्तम्; उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन् निरुक्ते निरुक्तौ भविष्यत इति, रलोश्चाविशेषख्यापनार्थम्। "उपर उपलो मेघो भवति" उपर इति च उपल इति च मेघ उक्तो भवति। उपरशब्दादारभ्य मेघनामान्येव, न पर्वतनामानि*॥

आह;—उपरः कस्मात्? उच्यते;—"उप" गम्य "रमन्ते" "अस्मिन् अभ्राणि"। अथ "वा"। "उप" गम्य "रताः "आपः" भवन्ति "इति"। उपलोऽप्येतस्मादेव रलोरविशेषेण॥

आह;—कथं पुनर्गम्यते उपरशब्देन मेघ एवोच्यते, न पर्वतः? इति† उच्यते;—"तेषां" मेघानाम् उपरशब्दवाच्यत्वे विशेषलिङ्ग-वाचिका "एषा" ऋक् "भवति"—॥ ४॥

---

* १भा० ९८ पृ० (१८), (१९)।

† 'पर्वतानामान्वेषणीयः'—इत्युक्तं पुरस्तात्। १भा० ९९ पृ० ८ पं०।

देवानां माने प्रथमा अतिष्ठन् कृत्तचादेषा मुपरा उदायन्। चयस्तपन्ति पृथिवी मनूपा ह्रा बृबूकं वहतः पुरीषम्॥ देवानां निर्माणे प्रथमा अतिष्ठन्माध्यमिका* देवगणाः प्रथम इति मुख्यनाम प्रतमो† भवति‡ विकर्त्तनेन मेघाना मुदकं जायते चयस्तपन्ति पृथिवी मनूपाः। पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुवपन्ति लोकान्स्वेन स्वेन कर्मणाय मपीतरोऽनूप एतस्मादेवानूप्यत उदकेनापि वान्वाविति स्याद्यथा प्रागिति। तस्यानूप इति स्याद्यथा प्राचीन मिति। ह्रा बृबूकं वहतः पुरीषम्। वाय्वादित्या उदकं बृबूक मित्युदकनाम ब्रवीतेर्वा शब्दकर्मणो§ भ्रंशतेर्वा पुरीषं पृणातेः पूरयतेर्वा॥ ५ (२२)॥

इति द्वितीयाध्यायस्य षष्ठः पादः॥ २, ६॥

देवानां मान इति॥। वसुक्रस्येन्द्रपुत्रस्येय मार्षम्। त्रिष्टुप्। महाव्रते मरुत्वतीये शस्यते। 'देवानां' दानादिगुणयुक्तानां 'माने' विमाने निर्माणे। यदा देवाः सृष्टाः प्रजापतिना, तदैत एव माध्यमिका देवगणाः 'प्रथमाः अतिष्ठन्' एतेऽपि हि दानादियोगाद् देवा उच्यन्ते। प्रथमाः प्रकृष्टतमा मुख्या इत्यर्थः। मेघाभावे हि

* "माध्यमका" क, ख, ग।
† "प्रथमो" क, ख, ग।
‡ इत उत्तरं "छन्नाच मन्तरिक्षं विकर्त्तनं मेघाना"-इत्येतदधिकं ङ-च-पुस्तकयोः।
§ "ब्रवीतेः शब्दकर्मणो" क, ख, ग।
॥ ऋ० सं० ७, ७, १९, ३।

सर्व मेवेदं जगद् वर्षाभावान्न स्यात्। तस्मादेत एव प्रकृष्टतमाः अतिष्ठन् स्थितवन्तः। सृष्टौ हि सर्वदेवाना मेत एवाग्रे सृष्टा इत्यभिप्रायः। किञ्च; 'उत्तत्रात्' उत्क्रान्तात् प्रदेशात् 'एषां' मेघाना मिन्द्रेण 'उपराः' आपः 'उदायन्' आगतवत्यः, आगच्छन्ति च। किङ्कारणम्? विकर्त्तनेनैव हि मेघाना मुदकं जायते। उपरशब्देनात्रोदक मुक्तम्, तात्थ्यात्तच्छब्दो मञ्चाः क्रोशन्त इति वत्; उपरेषु मेघेषु* या आपः, ता उपचारादुपरा इत्युच्यन्ते। किञ्च; यदा 'ताभिः' उपराभिरद्भिरोषधयः प्रोक्षिता भवन्त्यथ तदा 'चयः तपन्ति' चयः पर्जन्यादयः† तपन्ति। 'पृथिवीं' पृथ्वीलोकम्। 'अनूपाः' ते ह्यनुवपन्ति लोकान् स्वेन स्वेन कर्मणा यथाकाल मनुगच्छन्ति। एतदनुवपनं लोकानां यद् वर्षादिभिः पर्जन्यादयो यथार्थं मोषधीः पाचयन्ति। किञ्च; 'दा ह्रबूकं' वहतः पुरीषम्' द्वौ वाय्वादित्यौ वहतः आक्षिपत इतः पृथिवीलोकात् ह्रबूक मुदकम्। किंलक्षणम्? पुरीषम्; प्रीणयित्र पूरयित्र वा‡ सतः॥

"अथ मपीतरोऽनूपः" नद्यनूपः समुद्रानूपो वा। "एतस्मादेव" वपतेर्धातोः अषावपि हि "अनूप्यते" अनुप्रकीर्यते नित्यकालम् "उदकेन"। "अपि वा" एव मन्यथा स्यात्,—आप्नोतेः; अन्वाप्यतेऽसावुदकेनेति "अन्वाप्"। पुरस्तादञ्चतीति "प्राक्", "तस्य" अन्वाबित्येतस्य सतः "अनूप इति" एष शब्दः "स्यात्", "यथा प्राचीन मिति"; प्रागित्येवं सतः प्राचीनम्। "ह्रबूक मिति उदकनाम",

* १भा० १८ पृ० (१८)।

† "पर्जन्यो वायुरादित्यः" १२१ पृ० १पं०।

‡ "पुरीषं इष्यतेः पूरयतेर्वा" १२१ पृ० ११पं०।

इति* । पर्यायवचनेन तत्त्वाभिधानम् । "ब्रवीतेर्वा" शब्दार्थस्य (अदा० उ०) शब्दकारि हि तद् भवति। "भ्रंशतेर्वा" भ्रंशति (दि० प०) हि तन्मेघादिति ॥ ५ ॥

निरुक्तव्याख्यायां सप्तमाध्यायस्य † षष्ठः पादः ॥ ६ ॥

॥ सप्तमः पादः ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशद् वाक् कस्माद्वचेस्तच ‡ सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति तद्यद् देवतावदुपरिष्टात्तद् व्याख्यास्यामोऽथैतन्नदीवत् ॥ १ (२३) ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत् § । मेघनामप्रसक्तौ "देवानां मानें"—इत्येष मन्त्रो व्याख्यातः ॥ । प्रकृत मिदानी मुच्यते,—वाङ्नामानीति। वाचो नामानि 'वाङ्नामानि', 'उत्तराणि' प्रकृतेभ्यो मेघनामभ्यः। मेघेष्वेव हि भूयसी वाग् भवति इति ततो वाङ्नामानि भवन्ति। कियन्ति पुनस्तानि? 'सप्तपञ्चाशत्' सप्त च पञ्चाशच्च सप्तपञ्चाशत् (५७)। कतमानि पुनस्तानि? "श्लोकः, धारा, इडा"—इत्येव मादीनि ¶ । श्रूयते इति श्लोकः। ध्रियते तं त मर्थं मवधारयितु मिति धारा। तं त मर्थं प्रति ईट्टे गच्छतीति इडा। इत्येव माद्यभ्यूहितव्यम् ॥

---

* १भा० १०४ (१९)।
† 'द्वितीयाध्यायस्य' क।
‡ "वचतेश्च" ङ, च।
§ १भा० ७४ पृ० ११अ०।
॥ इतः पूर्वमिमेव खण्डे (२२१ पृ०)।
¶ १भा० ७४—८५ पृ०।

आह;—"वाक् कस्मात्"? उच्यते;—"वचेः" धातोः (अदा० प०)। उच्यतेऽनयेति वाक्*। "तच्च, सरस्वतीत्येतस्य" तच्च तस्मिन्, सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम "नदीवद् देवतावच्च निगमा भवन्ति" नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः†। "तत्" तच्चैवं सति, "यद्" अभिधानं "देवतावत्", "तद्" अधिकृत्य "उपरिष्टाद् व्याख्यास्यामः" षोडशेऽध्याये "पावका नः सरस्वती (ऋ० सं० १,१,६,३)"—इत्येतस्मिन् मन्त्रे‡। "अथ" पुनः यत् "एतद्" "नदीवत्", तद् व्याख्यायते—॥ १ ॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणान्तविषेभिरूर्मिभिः। पारावतघ्नी मवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः॥ इयं शुष्मैः§ शोषणैः शुष्म मिति बलनाम शोषयतीति सतो बिसं बिस्यतेर्भेदनकर्मणो दृङिकर्मणो वा सानु समुच्छ्रितं भवति समुन्नुन्न॥ मिति वा महद्भिरूर्मिभिः पारावतघ्नीं पारावारघातिनीं पारं परं भवत्यवार मवर मवनाय सुप्रवृत्ताभिः॥ स्तुतिभिः** सरस्वतीं†† कर्मभिः परिचरेमोदकनामा-

---

* १भा० ७५ पृ० द्रष्टव्यम्।
† १भा० ८१ पृ० (११)।
‡ दै० का० ११, २, ४-५-७।
§ "शुष्मेभिः" ङ, च।
॥ "समुनुन्न" क।
॥ "सुप्रवृत्ताभिः" क, ख, ग।
** "स्तुतिभिः शोभनाभिः" ङ। "शोभनाभि स्तुतिभिः" च।
†† "सरस्वतीं नदीं" ङ, च।

न्युत्तराण्येकशत मुदकं कस्मादुनन्तीति सतो नदीना-मान्युत्तराणि सप्तचिंशन्नद्यः कस्मान्नदना भवन्ति* शब्दवत्यो बहुल मासान्नैघण्टुकं वृत्त माश्वर्य मिव प्राधान्येन तचेतिहास माचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव विश्वामित्रः सर्व-मित्रः सर्वं संसृतं सुदाः कल्याणदानः पैजवनः पिजव-नस्य पुत्रः पिजवनः पुनः स्पर्द्धनीयजवो वामिश्री-भावगतिर्वा स वित्तं गृहीत्वा विपाट्छुतुद्र्योः सम्भेद मायथावनुययुरितरे † स विश्वामित्रो नदी स्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत् तद्वद् द्विवदुपरिष्टात्तद् व्याख्यास्यामो ऽथैतद् बहुवत् ॥ २ (२४) ॥

इयं शुष्मेभिरिति । भरद्वाजस्यार्षम्, जगती ‡ । 'इयं' सरस्वती नदी § 'शुष्मेभिः' बलैः । किङ्करोति ? "बिसखा इवारुजत्" यथा बिस-खानको बिस मनादरेणैव मृदुत्वात् खनति, एव मिय मनाद-रेणैव यदपि 'सानु' भवति समुच्छ्रितं वज्रसङ्घातकल्पं 'गिरीणां' 'सानु' शिखरं तदपि 'तविषेभिः' बिसखानक इवानादरेणैव 'रुजति' भनक्तीत्यर्थः। येय मेवङ्गुणविशिष्टा ता मेतां वयं 'पारावतघ्नीं' पारावारघातिनीं, सा हि 'ऊर्मिभिः' पारं चावारं च उभे अपि

* "नदना इमा भवन्ति" क, च।
† "मायथो। अनुययुरितरे" क।
‡ ऋ० सं० ४, ८, १०, १।
§ १भा १४१ पृ० (१०)।

हन्ति। 'अवसे' अवनाय रक्षणाय। आत्मनः कथन्नाम रक्षेदसाव-स्मानित्येव मर्थं पुरस्कृत्य 'सुदक्तिभिः' सुप्रवृत्ताभिः स्तुतिभिः स्वर-सौष्ठवादियुक्ताभिः। किम्? 'सरस्वतीम् आविवासेम धीतिभिः' सरस्वती माभिमुख्येनावस्थिताः परिचरेम, 'धीतिभिः' "कर्मभिः"* स्तुतिभिस्त्वानेकप्रकाराभिस्त्वेत्यर्थः। एष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"प्रु शमिति बलनाम" तद्धि "शोषय-तीति सतः" सत इति कारकावधारणम्। विपर्ययेणापि ह्यभिधा-नानां मर्था भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि† सदेतदभिधान मेव माह प्रुषा मिति बलनामेति। "बिसं, बिस्रते-र्भेदनकर्मणः‡ तद्धि भिद्यते "वृद्धिकर्मणो वा" वर्द्धते हि तत्। "सानु" समस्तं हि तत् "उच्छ्रितं भवति, समुन्नुन्न मिति वा" अथ वा अर्द्धं नुन्नं प्रेरितं भवति। "पारं परं भवति" अवरस्मात् कूलात्, "अवारम् अवरम्" भवति परस्मात् कूलात्॥

अस्रा स्रुचि तविषेभिः, ऊर्मिभिः, पारावतघ्नीम्—इत्येतद् विशेष्यलिङ्गं नदीसत्त्वं पश्यता भाष्यकारेण "अथैतन्नदीवत्"—इत्यु-क्त्वा§ इय मृगुपात्ता। सरस्वतीशब्दस्य नद्यभिधायकत्वे इयं पुन-र्नैचाय्यणीयके॥ "उतस्यान्: सरस्वती" —इत्यस्य षडर्चस्योक्तमा¶। एतच्च पुनः षडर्चानुक्रमेण च "सारस्वतीं धेनुष्टरी मालभेत यः

* अकुलिनामसु च दृश्यते १भा० १९१ (७)।
† १भा० २१८ पृ० (११)।
‡ १भा० २४१ पृ० (११)।
§ २२५ पृ०, ८ पं०।
॥ यजुर्वेदीयशाखाविशेषे।
¶ ऋक्संहितायान्तु "दृषदद्दाद्"—इति सप्तम्य द्वितीया (१, ५, ११, २)।

क्षेत्रे पशुषु वा विवदेत"—इत्येतस्य पशोः सम्पद्यते। सेय मनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति *। एवञ्च सति इयमपि देवतावदित्येव समुपपद्यते; न त्वदेवता दृश्यते। तदेवं कृत्वा भाष्यकारेण यदुक्तं "तद्यद्देवतावदुपरिष्टात् तद्व्याख्यास्यामोऽथैतन्नदीवत्"—इति†, तदिरुध्यते? तत्रोक्तः समाधिः,—विभवो ह्यनुपचीणशक्तयो मन्त्रशब्दाः। प्रदर्शनमात्र मेतत् क्रियते। सर्वथैतन्मन्त्रशब्दानां योऽर्थ उपपद्यते स योज्यो यथासम्भव मिति। देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक्, सा गिरीणां मेघानां सानूनि भञ्जयत्यूर्मिभिः पारावारे द्यावापृथिव्यो रन्तीति योज्यम्। तविषेभिरूर्मिभिः महद्भिरित्येवमादि च योज्यम्। "सुप्रकृत्तामिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरेम" गतार्थम्॥

"उदकनामान्युत्तराणि एकशतम्"‡। उदकस्य नामानि 'उदकनामानि', 'उत्तराणि' प्रकृतेभ्यो वाङ्नामभ्यः। मेघाश्रया हि वाक्, मेघोत्थं चोदकम्,—स्तनयित्नुशब्दपूर्वकञ्चेति वाङ्नामभ्य उत्तराण्युदकनामानि। कियन्ति पुनस्तानि? 'एकशतम्' एकञ्च शतञ्च एकशतम् (१०१)। कतमानि पुनस्तानि? "अर्णः, चोदः, चक्र"—इत्येवमादीनि§। अरणशील मर्णः। क्षिप्र सुनत्तीति चोदः। क्षीरिण मन्नं करोतीति चक्र। इत्येव माद्यभ्युहितव्यम्॥

---

* "इय मित्येतदाद्यन्तु सूक्तं सारस्वतं जपेत्। द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान्" ऋग्विधा १, १२। "इयमदाद्भस सृणच्युत मिति प्रजगम्"—इति आश्व० ८, १।

† १२५ पृ० ८ पं०।

‡ १भा० ९९, ९७ पृ० ११ च०।

§ १भा० ९९—१२० पृ०।

आह;—"उदकं कस्मात्"? उच्यते;—"उनत्तीति सतः" तद्धि यत्र गच्छति तत्र उनत्ति क्लेदयति। 'उन्दी क्लेदने (स्वा० प०)'। सत इति कारकावधारणं पूर्ववत् (२३२पृ० ५पं०)॥

"नदीनामान्युत्तराणि सप्तचिंशत्" *। नदीनां नामानि 'नदीनामानि', 'उत्तराणि' इति प्रकृतेभ्य उदकनामभ्य उत्तराणि; नदीनामानि। कियन्ति पुनस्तानि? 'सप्तचिंशत्'(२७)। कानि पुनस्तानि? "अवनयः, यह्वः, खाः, सीराः"—इत्येव मादीनि †। अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः। क्षयन्त्यो यान्तीति‡ यह्वः। ख्यातव्या भवन्तीति खाः। सरन्तीति सीराः। एव मादि योज्यम्॥

आह;—"नद्यः कस्मात्"? उच्यते;—"नदनाः" ह्येताः "भवन्ति", "शब्दवत्यः" शब्दसंयुक्ताः। किञ्च; "बऋलम्" "आसां" नदीनाम्, अन्यदेवतेषु मन्त्रेषु "नैघण्टुकं वृत्तम्" अप्रधानम्। "आश्वर्यं मिव प्राधान्येन" क्वचिदेव नदीदेवतो मन्त्रः स्यात्। "तत्रेतिहास माचक्षते"। यस्मिन् सूक्ते प्रधाना नद्य एव, तत्रेमं निदानभूत मितिहास माचक्षत इति आचार्याः॥

"विश्वामित्रः" नाम "ऋषिः"। "सुदासः पैजवनस्य" राज्ञः "पुरोहितो बभूव"। "विश्वामित्रः सर्व मित्रः" सर्वस्यैव हि स मित्रं, सर्व मेव वा तस्य मित्र मिति विश्वामित्रः §। "सर्वम्"—इति किमुक्तं भवति? उच्यते;—तद्धि "संहतं" भवति,—सङ्गतं भवत्येकस्मिन्।

---

* १भा० १३० पृ० १३ ख०।

† १भा० १३०—१४३ पृ०।

‡ 'यावयन्त्यो यान्तीति' क, 'यावयन्त्योपरञ्जीति' ख।

§ 'विश्वस्य च वै मित्रं विश्वामित्र आस'—इत्यादि ऐ० ब्रा० ९, ४, ७।

"सुदाः कल्याणदानः" तस्य हि नित्य मेव प्रशस्तं दानं भवति। "पैजवनः पिजवनस्य पुत्रः"। "पिजवनः पुनः स्पर्द्धनीयजवः" तस्य हि स्पर्द्धार्हो जवो वेगः। अथ "वा" "अमिश्रीभावगतिर्वा" न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिः, अतिशैघ्र्यात्। तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव। "सः" पौरोहित्येोपार्जितं "वित्तं" धनं "गृहीत्वा" "विपाट्छुतुद्र्योः" नद्योः* "सम्भेदं" सङ्गमम् "आ ययौ" आगतवान्, यत्र विपाट्छुतुद्र्यौ इतराभिः सिन्ध्वादिभिर्नदीभिः सम्भिन्ने एकीभूते इत्यर्थः। "अनु ययुः" "इतरे" तदनुयायिन-स्तत्करा वा। "स विश्वामित्रः" तास्तितीर्षुः "नदीः तुष्टाव"—"गाधाः" स्वल्पोदकाः यूयं "भवतेति"। एत मर्थं पुरस्कृत्य कथं पुनस्तुष्टाव? "अपि द्विवत्" द्विवचनसंयुक्तैर्मन्त्रैः, "अपि बभ्रुवत्" बभ्रुवचनसंयुक्तैर्मन्त्रैः। "तत्" तत्र, एवं सति "यद् द्विवत्" द्विव-चनवत्, "तत्" "उपरिष्टात्" चतुर्दशाध्याये† "प्र पर्वतानाम् (ऋ० सं० २,२,१२,१)"—इत्येतस्या मृचि "व्याख्यास्यामः"। "अथ" पुनः "एतद् बभ्रुवत्" व्याख्यायते—॥ २ ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्त्त मेवैः।
प्र सिन्धु मच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥
उपरमध्वं मे वचसे सोम्याय सोमसम्पादिन ऋता-वरीर्ऋतवत्य ऋत मित्युदकनाम प्रत्यृतं भवति मुहूर्त्त मेवैरयनैरवनैर्वा मुहूर्त्तो मुहूर्ऋतुर्ऋतुरर्त्तेर्गतिकर्मणो

* १ मा० ७७ सू० (२१)। † दै० का० ९, ४, ५।

मुहुर्मूल्ह इव* कालो यावदभीक्ष्णञ्चेत्यभीक्ष्णं मभिक्ष्णं भवति क्षणः क्षणोतेः प्रक्षणुतः कालः कालः कालयतेर्गतिकर्मणः प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशिको राजा बभूव क्रोशतेः शब्दकर्मणः क्रंशतेर्वा स्यात् प्रकाशयतिकर्मणः साधुविक्रोशयितार्थाना मिति वा नद्यः प्रत्यूचुः ॥ ३ (२५) ॥

रमध्वं मे वचस इति†। त्रिष्टुभ एताः‡। "उप रमध्वं मे" उपेत्यय सुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्व मित्यनेन क्रियापदेन योजितः §। उप रमध्वं मम "वचसे" "सोम्याय सोमसम्पादिने"; सोमा हि अनेनास्मद्वचसा देवताना मन्नभूता बहवः सम्पादिताः, ता यूय मस्मै प्रतिविशिष्टाय वचसे सत्यतार्थम्,—कथन्नाम सत्य मिदं स्यादित्येव मर्थं सुपरमध्वम्, मन्दवेगा गाधाश्च भवतेत्यभिप्रायः। हे "ऋतावरीः" उदकवत्यः। कियन्तं पुनः काल सुपरमध्वम्? "मुहूर्त्तम्"; न च नित्य मेव मन्दवेगतां गाधोदकतां वा प्रार्थये; किन्तर्हि? यावदुत्तरेय महं तावदेवेत्यभिप्रायः। "एवैः" एभिरुदकैरतिप्रवृद्धैरुपरमध्वम्। "अवनैर्वा"

* "मूढ इव" च।

† ऋ० सं० ३, १, ११, ५।

‡ एतदादिखण्डचयाणा माद्यास्तिस्र ऋच इति यावत्। तथा हि—"रमध्वं (२४१ पृ०)"—इत्येका, "इन्द्रो (२४४ पृ०,"—इति द्वितीया, "आ वे (२४६पृ०)"—इति तृतीया।

§ "छन्दसि परेऽपि। अवहिताश्च।"—इति सूत्राभ्याम्। पा० १ ४, ८१—८१।

कामैरेतैरस्मत्प्रार्थनाविशेषैः—उत्तरेम, गृहान् गच्छेम, वित्तं प्राप्नुयेम, इत्येवमादिभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम्। अथ वा "अयनैः" चित्रैर्गमनैर्वेगवद्भिर्यैर्यूयं मभि प्रवृत्तास्तैरुपरमध्वम् मुहूर्त्तम्। यदैव मविशेषेणोच्यमाना न शुश्रुवुः, तदैका मुद्दिश्य प्रवर्तते वक्तुम्,—'सिन्धु मच्छ'। अच्छ् अभेः स्थाने *। 'अक्षे''—इत्येतत् पद माकृष्य "प्रं अभि क्षयामि" इत्येवं योजितं भाष्यकारेण। किं प्राभिक्षयामि? "सिन्धुम्"। कया? 'बृहती मनीषा' "बृहत्या मनीषया", "मनस ईषया" मनः-पूर्विकया "स्तुत्या" इत्यर्थः। अथ "वा" "प्रज्ञया"। क मर्थं मिच्छन् अभिक्षयामि? 'अवस्युः' अवन मिच्छन्, गमन मित्यर्थः। "कुशिकस्य सूनुः" अहं मिति। पितुरपि गौरवान्मम गौवर मेताः कुर्युः॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"चत मित्युदकनाम" †। तद्धि देशं देशं "प्रत्यृतं भवति" गत मित्यर्थः। "मुहूर्त्तो मुहूर्चतुः" एवं विगृह्य चतुशब्दं तावन्निर्ब्रवीति;—"चतुरर्त्तेः", "गतिकर्मणः" गत्यर्थे वर्त्तमानस्य ‡। स हि गच्छत्येव। अधुना मुहूः-शब्दं निर्ब्रवीति;—"मुहूर्मूढ्ह इव कालः" अल्पत्वात्। मूढ इव यः काल चतुः, स मुहूर्त्त इत्युच्यते। किञ्च "यावद्" एव "च अभीक्ष्णं" तावन्मुहूर्त्तः, यावांश्च मुहूर्त्तस्तावदभीक्ष्ण मित्यर्थः। सारूप्यप्रसक्तं निरुच्यते;—"अभीक्ष्ण मभि क्षणं भवति" तद्धि क्षण माभिमुख्येन स्थितं भवति। "क्षणं क्षणोतेः" हिंसार्थस्य (तना० उ०)। स हि

* "अच्छाभेराप्त मिति शाकपूणिः" नैरु० का० ५, ५, ४।
† १भा० १२१ सू० (६८)।
‡ १भा० १५१ सू० (७८)।

"प्रक्षुणत:" प्रकर्षेण हिंसित: "काल:" अल्पत्वात्। "काल: कालयतेर्गतिकर्मण:" *। स हि सर्वाण्येव भूतानि कालयति क्षयं नयतीत्यर्थ:। "कुशिको राजा"—इति तच्चवचनम्। "क्रोशते:" वा शब्दार्थस्य (भ्व० प०) †; स हि साध्वेव क्रियता मिति नित्यकाल मेव क्रोशति। "क्रंशतेर्वा स्यात्" प्रकाशयत्यर्थस्य ‡; स हि प्रकाशयिता साधूनां धर्माणा मात्मनैव प्रकाशक:। अथ "वा" "साधुविक्रोशयितार्थाना मिति" साधुषु ब्राह्मणेषु विक्रोशयिता अर्थानां दातेत्यर्थ:॥

एव मुक्तवन्तं "नद्य: प्रत्यूचु:"—॥ ३॥

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम्। देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥ इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनति कर्मापाहन्वृत्रं परिधिन्नदीना मिति व्याख्यातम्। देवो नयत्सविता सुपाणिः। कल्याणपाणिः पाणिः पणायतेः पूजाकर्मण: प्रगृह्य पाणी देवान् पूजयन्ति। तस्य वयं प्रसवे याम उर्वीः। उर्व्य ऊर्णोतेर्वृणोतेरित्यौर्णवाभः प्रत्याख्यायान्तत आशुश्रुवः॥ ४ (२६)॥

इन्द्रो अस्माँ अरददिति §। "अरदत्" अखनदित्यर्थ:। "रदतिः

* १भा० १४१ पृ० (१८)।
† १भा० ७२ पृ० (३०) क्रोश:"।
‡ "किंशुकं क्रंशतेः प्रकाशयतिकर्मण:"—इति दै० का० ११, १, ८।
§ ऋ० सं० २, १, १२ व०, १ ऋ० ८१, २, ४ स्व०, ५ ऋ०।

खननिकर्मा"। कथमुनरखनत्? "अपाहन् वृत्रम्" अपाबधीत् मेघम्। "परिधिं नदीनाम्" नदनाना मपाम्*। स हि नियतं तीरयोर्निरुणद्धि, त मिन्द्रो वज्रेण हन्ति; तस्मिन् हते पृथिवीं प्राप्यापो यथानिम्नानुसारिण: खातानि कुर्वन्त्यो वहन्ति; तै: खातै-र्वयं गच्छाम:। एवं कृत्वा 'अस्मान् इन्द्र: अरदत्'। एवञ्च कृत्वा स एव इन्द्रो 'देव:', 'सविता' सर्वार्थप्रसविता वर्षद्वारेणास्मान् 'अनयत्' समुद्रम्। 'सुपाणि:' प्रशस्तपाणिरित्यर्थ:। यत एव सोऽस्माकं खनिता नेता च, अत: 'तस्य' इन्द्रस्य 'प्रसवे' अनुज्ञाया मादेशे वर्त्तमाना वयं 'याम:' गच्छाम: 'उर्वी:' ऊर्णुवत्य: सम्भज-माना वा। तानि तानि देशान्तराणि अम्भोभि:। सोऽस्माक मीश्वर:। स एवास्मानाज्ञापयितु मर्हति, न त्व मित्यभिप्राय:॥

"पाणि: पणायते:" पूजार्थस्य †। "प्रगृह्यपाणी" संयतौ कृत्वा ततो "देवान् पूजयन्ति" इति॥

"प्रत्याख्याय" एवं त मृषिं तत्सूक्तस्य ‡ "अन्तत:" अन्ते अन-र्चा§? "आ प्रुश्रुव:" ता नद्य: श्रुतवत्य इत्यर्थ:— ॥ ४ ॥

---

* १२७ पृ० १ पं, तद्व्याख्यातञ्च १४० पृ० १० पं द्रष्टव्यम्।

† १भा० ३२१ पृ० (३१)। 'अग्रिपणाय्यो वड़ायलुकौ च (उ० सू० ४, १२४)'-इति पणायतेरिण् आयलुक् च।

‡ प्रपर्वताना मित्यस्येत्यर्थ: सूक्तस्यैतत् ऋ० सं० २, ११। वसुतोऽज 'सङ्गमेस्व'—इत्येव वक्तव्यम्। तथा चाच खण्डे प्रदर्शिता "इन्द्रो अस्मा"—इत्येषा यद्वर्गस्या-दिमा, तस्येवेय मन्या "आ ते कारो"—इति सम्यगुपपद्येतान्यत इति; अन्यथा "आ ते कारो"—इत्यस्यान्यत्वं नोपपद्येत; प्र पर्वताना मिति हि सूक्तं त्रयोदशर्चम्, अच दशमी "आ ते कारो"—इति, नान्येति स्फुटम्।

§ अनुपदं वक्ष्यमाणया "आ ते कारो"—इत्यनयेत्यर्थ:।

, आ तें कारो शृणवामा वचांसि यय्राथ दूरादनसा-रथेन*। नि तें नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै तें॥ आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वाश्वनामान्युत्तराणि षड्विंशतिस्तेषा मष्टा उत्तराणि बहुवदश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा तच्च दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा तस्याश्ववद् देवतावच्च निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत्॥ ५ (२७)॥

आ ते कारो† इति। तदा श्रुतं भवति, यदा तद् वचः क्रियते; श्रूयमाण मपि हि तन्नैव श्रुतं भवति, यन्न क्रियते। 'आ ते कारो शृणवाम' आभिमुख्येनावस्थिताः सत्यः शृणवाम हे 'कारो' स्तोमानां कर्त्तः! किं मा शृणवाम? 'वचांसि'। अतो ब्रूमः,—"ययाथ" याहि त्वम्। 'अनसा' शकटेन सह 'रथेन' च। कस्मात् पुनरेव मादरवत्यो ब्रूमः याहीति? इतः;—यस्माद् 'दूरात्' आयातस्त्वं परिश्रान्तः, तस्मात् कारुण्यं नस्त्वयि। तेन वय मेता 'नि ते नंसै' "निनमाम ते"। नीचैर्नमाम गाधोदका भवामेत्यर्थः। कथम्पुनर्निनमाम? 'पीप्यानेव

* "रथने" च।

† ऋ० सं० १, २, १२ व०, ५ अ०=२, २, ४ व०, १० अ०।

योषा' "पाययमानेव योषा पुत्रं" यथा निनमेदेवं वयं तव निनमाम। एव मुक्ता पुत्रोपमया कदाचिदयं क्रोध मियादिति मन्वानाः सत्यः पतिकन्यासम्बद्धा मन्या मुपमा मुपादद्रिरे ;—"मर्याये व कन्या श्रश्वचै ते"। 'मर्याय' मनुष्याय 'कन्या' नवोढ़ा 'श्रश्वचै ते' "परिष्वजनाय"; कथं नाम परिष्वजेत मा मय मित्यभिप्रायेण यथा सा निनयेदेवं वयं तव निनमाम। "निनमा इति वा" यदि वा निनमा इत्येवं परिणामः निनंसै इति एतस्य पदस्य अथ वा निनमै इति॥

अश्वनामान्युत्तराणि षड्विंशतिः *। अश्वस्य नामानि 'अश्वनामानि', 'उत्तराणि' प्रकृतेभ्यो नदीनामभ्यः; अजा एव ह्यश्वाः। एवं ह्युक्तम्;—"अप्सु जाता अश्वाः खादेवैतान् योनेर्जनयन्ति" इति †। तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि। कियन्ति पुनस्तानि? 'षड्विंशतिः' षड्धिका विंशतिः (२६)। कतमानि पुनस्तानि? "अत्यः, हयः, अर्वा"—इत्येव मादीनि ‡। अतति गच्छतीत्यत्यः। हयति गच्छतीति, हन्ति वाध्वान मिति हयः। ईरणवानर्वा, § गमनवानित्यर्थः। एव मादि॥

"तेषाम्" अश्वनाम्नाम् "अष्टौ" यानि "उत्तराणि" अव्ययय इत्येव मादीनि ‖, तानि "बहुवत्" बहुवचनसंयुक्तानीत्यर्थः॥

---

* १भा० १४२ पृ० १४ ख०।
† "यदक्रन्दः"—इति चयोदशर्चं सूक्तं द्रष्टव्यम्। ऋ० सं० १, ११, ७।
‡ १भा० १४४—१५१ पृ०।
§ "अर्वेरणवान्" है० का० १०, ३, ७।
‖ १भा० १५० पृ० (१८)—१५१ पृ० (१९)।

आह;—"अश्वः कस्मात्"? उच्यते;—"अश्नुतेऽध्वानं" व्याप्नोतीत्यर्थः। "महाशनो वा भवति इति" स हि बहु भुङ्क्ते। "तत्र" तस्मिन् षड्विंशके अश्वाभिधानगणे "दधिक्रा इत्येतत्" पदं * सन्दिग्धम्। तत् पुनरेतत्—"दधत् क्रामतीति" धारयन्नय मश्वारोहं क्रामतीति दधिक्राः? अथ "वा" "दधत्" धारयन्नय मश्वारोहं "क्रन्दति" शब्दं करोति "इति" दधिक्राः? अथ "वा" "दधत्" धारयन् अय मश्वारोहम् "आकारी" आकारवान् "भवतीति" दधिक्राः?—स हि अधिरूढेऽश्वारोहे आकुञ्चितग्रीवो विपुष्पितसर्वगात्र आकृतिमान् भवति॥

"तस्य" दधिक्रा-शब्दस्य "अश्ववत्" अश्वसंयुक्ताः, "देवतावत्" देवतासंयुक्ताः "च" "निगमा भवन्ति"। "तत्" एतदुच्यते;—"यद् देवतावत्" अस्य दधिक्रा-शब्दस्य, "तत्" "उपरिष्टात्" पञ्चदशेऽध्याये † "आ दधिक्राः शवसा (ऋ० सं० १०,६,१६,१)"—इत्यस्या ऋचि "व्याख्यास्यामः"। "अथ" पुनर्यद् "अश्ववत्" अस्य, तद् "एतत्" व्याख्यायते—॥ ५॥

‡उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि। क्रतुं दधिक्रा अनु संतवीत्वत् पथा मङ्कांस्यन्वापनीफणत्॥ अपि स वाजी वेजनवान्

---

* १भा० १४९ पृ० (७)।

† याख्येयेऽस्मिन् दशमे इति यावत्। तथा च १०, २, ९।

‡ क पुस्तके इतः पूर्वं "हंसः शुचिषद्"—इत्यादिः 'निर्वचनाय'—इत्यन्तः खण्डेको वर्तते; लिपिकरप्रमाद एव तत्र मूलं प्रतिभाति, अध्याय्यान्नाखण्डसमाप्तिवाक्यविरोधात्। हंसः शुचिषदित्यादिखण्डस्तु त्रयोदशे वक्ष्यते (प० का० १२,४,१.)।

क्षेपण मनु तूर्ण मश्नुतेऽध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापि कक्ष आसनीति व्याख्यातम्। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा। अनुसन्तवीत्वत्। तनोतेः पूर्वया प्रकृत्या निगमः। पथा मङ्कांसि पथां कुटिलानि पन्थाः पततेर्वा पद्यतेर्वा पन्यतेर्वाङ्कोऽञ्चतेरापनीफणदिति फणतेश्चर्करीतवृत्तं दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्यज्ञानाय ज्वलतिकर्म्माण उत्तरे धातव एकादश तावन्त्येवोत्तराणि ज्वलतो नामधेमानि नामधेयानि* ॥ ६ (२८) ॥

उत स्य वाजीति†। गोतमपुत्रस्य वामदेवस्येयं मार्षम्। जगती। वाजपेये वाजियुक्तं रथं मधिरुह्य यजमानोऽनुवाकं जपति‡; तच्चैषा§। "उत स्यः" "अपि सः" इत्यर्थः। "वाजी वेजनवान्"। 'ओ विजी भयचलनयोः (रु० प०)'। भयवान् परेभ्यो भयदाता; परेषां हि तं दृष्ट्वा भय मुत्पद्यते। चलनवान् वा; स हि नित्यं चलनशीलः। 'क्षिपणिं' "क्षेपणम् अनु" कशाघात मनु "तुर्ण मश्नुतेऽध्वानम्" व्याप्नोतीत्यर्थः। अपि कशाप्रहार मनु 'तुरण्यति' अप्यनाहत एवेत्यपिशब्दः। किञ्च "ग्रीवायाम्" उरसि बन्धेन "बद्धः" ॥।

---

* "नामधेयानि"—इति सकलदेव च-पुस्तके।

† ऋ० सं० १. ७. १४, ४। य० वा० सं० ९, १४।

‡ तथाहि कात्यायनः—"देवस्याहं मिति यजुर्युक्त मारोहति यजमानः" १४, १, १८। देवस्याहं मित्याद्यनुवाकस्तु मन्त्रब्राह्मणात्मकः।

§ अन्तिमा, तृतीयेति यावत्।

॥ 'ग्रीवाया मुरोवन्धेन बद्धः'—इति महीधरः। य० वा० सं० ९ १४।

"अपि कक्षे" कक्ष्यया*। अथ "आसनि"† मुखे खलीनेन बद्धः‡। एव मनेकेषु स्थानेषु बद्धः। तथापि तुरण्यत्येव। अन्यो हि एकस्मिन्नपि प्रदेशे बद्धः चलितु मपि न शक्नोति, कि मुत त्वरितुम्। किञ्च; "क्रतुम्" आत्मीयं गमनं "कर्म वा प्रज्ञां वा" अश्वारोहस्य सन्तनोति काम मभिप्रेतार्थेन शीघ्रगामित्वाद् "दधिक्राः" अश्वः अनुसन्तनोतीत्यर्थः। किञ्च; यान्यपि च कानि चित् "पथां" मार्गाणाम् "अङ्कांसि" अञ्चितानि कुटिलानि सन्ति, तान्यपि अनुलोमानीव कुर्वन् आशुगामित्वात्। आभिमुख्येन पुनः पुनर्भृशं वा फणति गच्छतीत्यर्थः॥ एष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"ग्रीवा, गिरतेर्वा" गिलनार्थस्य (तु० प०); तथा हि गिलत्यन्नम्। "गृणातेर्वा" शब्दार्थस्य (क्रया० प०); तथा हि शब्दो गीर्यते। "गृह्णातेर्वा" (क्रया० उ०) तया ह्युदकादि गृह्यते, यः गृह्णुलीक्रियते। "अनुसन्तवीत्वत्" इति, "तनोतेः" धातोः (त० प०) "पूर्वया प्रकृत्या निगमः"। षड्विधो हि धातुः। "प्रकृत्यन्तः, सनन्तश्च §, यङन्तो, यङ्लुगेव च। एन्तो, एन्तसनन्तश्च, षड्विधो धातुरुच्यते॥" आसां षण्णां धातुप्रकृतीनां या पूर्वा प्रकृतिस्तयैष निगमः, न सन्प्रकृतीत्यादीना मन्यतमया। "पन्थाः, पततेर्वा पद्यतेर्वा पन्थतेर्वा" त्रयोऽपि ह्येते गत्यर्थाः, ॥ एषा मन्यत-

---

* 'कक्षं पर्यायदेशः। तत्र सन्नाहरज्ज्वा बद्धः'—इति मद्दीधरः। य० वा० सं० ९, १४।

† ७१४० ५ पं०, तदुत्तिश्च ७१४० १८पं०।

‡ 'कविकया बद्धः'—इति मद्दीधरः। य० वा० सं० ९, १४।

§ "सनंतश्च" क। "सनन्तश्च" ख।

॥ पतति भू० प०। पद्यते दि० आ०। पन्थयति वा पन्थति चु० प०।

मस्य। "अङ्कः अञ्चतेः" गत्यर्थस्य *। "आपनीफणदिति" "फणतेः" गत्यर्थस्य † चर्करीतान्तत्वेन वृत्तम् ॥

"दश" यानि "उत्तराणि" नामानि, तान्यश्वनामसम्बन्धेनैवोच्यन्ते तान्यपि ह्यश्वाना मेवेति। तानि पुनः "आदिष्टोपयोजनानि"—"इति" एवम् "आचक्षते" आचार्याः। इद मिन्द्रस्याश्वानां नाम, इद मग्नेः, इद मादित्यस्य,—इत्येव मादिष्टोपयोजनानि। कतमानि पुनस्तानि? "हरी इन्द्रस्य"—इत्येव मादीनि‡। हरी हरितवर्णौ इन्द्रस्याश्वौ। "रोहितोऽग्नेः" रोहितवर्णः। इत्येव मादि §॥

"ज्वलतिकर्माण उत्तरे धातव एकादश" ॥। य एव ह्यश्ववन्तो भवन्ति, त एव ज्वलन्तीव तेजसा; ततोऽश्वनामभ्य उत्तरे ज्वलत्यर्था धातवः। कतमे पुनस्ते? इति। "भ्राजते, भ्राजते, भ्राष्यति"—इत्येव मादयः ¶ ॥

"तावन्त्येवोत्तराणि" "जमत्, कल्गलीकिनम्, जङ्गणाभवन्"—इत्येव मादीनि "ज्वलतो नामधेयानि" **। जमति गच्छतीति

---

* १भा० २२९ सू० २२पं०।
† १भा० २५० सू० (७१)।
‡ १भा० १५२ सू० १५ ऋ०।
§ १भा० १५३—१५५ सू०।
॥ १भा० १५९ सू० १९ ऋ०।
¶ १भा० १५९—१५८ सू०।
** १भा० १५८ सू० १७ ऋ०।

"जमत्"। क मह्यं मलिनं शोधयामीति "कल्मलीकिनम्"। जनं भावयतीति "जञ्जणाभवन्"। इत्येवमादि * ॥

अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः ॥ ६ ॥

॥ इति निरुक्तवृत्तौ सप्तमाध्यायस्य † सप्तमः पादः ॥ ७ ॥

॥ इति जम्बुमार्गनिवासिनः आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ सप्तमोऽध्यायः (द्वितीयोऽध्यायः) समाप्तः ॥२॥

(१ अथ २ निर्वचनमौघो ३ राज्ञो ४ विद्याह ५ वा अथातोऽनुक्रमि-
६ ष्यामो ७ दृष्टेष्टे ८ तावांवास्तू ९ नियद्वैंचकारायंसञ्जिङ्क्ते १० हिरण्य
११ नामान्यार्ष्टिषेणो १२ यद्देवापिः १३ साधारणानि १४ स्वरादित्यो १५ रश्मि
१६ नामान्यतिष्ठन्तीनां १७ दासपत्नीरा १८ चिनामानीदं १९ श्रेष्ठं २० रुशद्व-
२१ त्साह २२ श्वकृष्णं २३ देवानांमानेवाङ् २४ नामानीयं २५ मुष्मेभीरमध्वं-
२६ मद्रुन्द्रोऽस्मा २७ नातेकारो २८ उतस्योऽष्टाविंशतिः ‡ ॥)

॥ इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः ॥ २ ॥

---

* १भा० १५९—१६२ पृ०।

† १४९ पृ० "१" द्रष्टव्यम्।

‡ १४९ पृ० "**" द्रष्टव्यम्।

॥ अथ तृतीयाध्यायः ॥

तत्र,

॥ प्रथमपादः ॥

ॐ३म्। कर्म्मनामान्युत्तराणि षड्विंशतिः कर्म कस्मात् क्रियत इति सतोऽपत्यनामान्युत्तराणि पञ्चदशापत्यं कस्मादपतनं भवति नानेन पततीति* वा तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः† ॥ १ ॥

"कर्मनामान्युत्तराणि षड्विंशतिः"‡। कर्मणो नामानि 'कर्मनामानि', 'उत्तराणि'—इति प्रकृतेभ्यः। ज्वलत्येवासौ कर्माणि क्रियन्त इति ज्वलन्नामभ्यः उत्तराणि कर्मनामानि। कियन्ति पुनस्तानि? 'षड्विंशतिः' षड्धिका विंशतिः (२६)। कतमानि पुनस्तानि? "अपः, अग्नः, दंसः"—इत्येव मादीनि§। आप्यते पुरुषेणैतत्, आप्नोति वा पुरुष मेतदिति "अपः"। "अग्नः"—इत्येतदप्याप्नोतेरेव। एव मादि योज्यम् ॥

आह;—"कर्म कस्मात्"? उच्यते;—"क्रियत इति सतः"। सत इति कारकावधारणार्थ मिति ॥

---

* "पतन्नीति"—इति हलिसम्मतः पाठः।

† "ऋचाबुदाहरिष्यामः"—इति हलिसम्मतः पाठः।

‡ १भा० १९३ पृ० १ब०।

§ १भा० १९३—१०१ पृ०।

"अपत्यनामान्युत्तराणि पञ्चदश"*। अपत्यस्य नामानि 'अपत्य-नामानि', 'उत्तराणि'—इति प्रकृतेभ्यः कर्मनामभ्यः। सर्वकर्मणां ह्यपत्योत्पादनकर्मैव प्रधानं ऋणापाकरणद्वारेणेति कर्मनामभ्य उत्तराणि अपत्यनामानि। कियन्ति पुनस्तानि? 'पञ्चदश'। कतमानि पुनस्तानि? "तुक्, तोकम्, तनयम्"—इत्येव मादीनि†। "तुक्" तकतेर्द्रुतो-स्तुज्यतेर्वा। "तोकं" तुद्यतेः। "तनयं" तनोतेरितिवक्ष्यति ‡॥

आह;—"अपत्यं कस्मात्"? उच्यते;—"अपततं भवति" पितुः सकाशादेत्य पृथगिव ततं भवति। अथ "वा" "अनेन" जातेन सता पितरो नरके "न पतन्ती"ति—इत्यपत्यम्॥

अत्र पुनर्विवदन्ते;—द्वयोः सन्निपाते किं खेचिणोऽपत्य मुत बीजिनः? इति। "तद्" एतदुच्यते;—"यथा जनयितुः" एव "प्रजा" भवति, "एव मर्थीये ऋचावुदाहरिष्यामः;—॥ १॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम। न शेषो अग्ने अन्यजात मस्त्यन्तानस्य मा पथो वि दुक्षः॥ परिहर्त्तव्यं हि नोपसर्त्तव्य मरणस्य रेक्णोऽरणोऽपार्यो भवति रेक्ण इति धननाम रिच्यते§ प्रयतो नित्यस्य रायः पतयः स्याम॥। पित्र्यस्येव धनस्य

* १भा० १७१ सू० २च०।
† १भा० १७१—१७९ सू०।
‡ दै० का० १०, १, ७।
§ "रिच्यते:" क।
॥ "पतयस्याम" क, ख।

न शेषो अग्ने अन्यजात मस्मि। शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुष इति तस्योत्तरा भूयसे निवचनाय ॥ २ ॥

"परिषद्यं हि", "न हि वयमाय"—इति च (२,३ख०)। एते चिष्टुभौ। वसिष्ठाग्निसंवादे वसिष्ठेन हृतपुत्रेण अग्निरभ्यर्थितः,—पुत्रं मे देहीति। तेन किलासौ प्रत्युक्तः,—क्रीतक-कृत्रिम-दत्तकादीनां पुत्राणां मन्यतमं कुरुष्व पुत्र मिति। स एव मुक्तः, एताभ्यां मृग्भ्यां मन्यजान् पुत्रान् निन्दन्नौरसं पुत्रं ययाचे। "परिषद्यं०—०विदुषः" *। 'परिषद्यं' "परिहर्त्तव्यं" परिहरणीयं परित्याज्य मित्यर्थः। किम्पुनस्तत्? "अरणस्य रेक्णः" 'अरणस्य' अपगतार्णस्य अपगतोदक-सम्बन्धस्य परकुलजातस्य 'रेक्णः' यदपत्याख्यं धनं, तत् परिहर्त्तव्यम्; न पुत्रत्वेन परिकल्पयितव्य मित्यर्थः; न हि तत् पुत्रत्वेन कल्प्य-मान मपि पुत्रकार्येष्ववतिष्ठति, परकीयत्वात्। यत एव मतो ब्रूमः;—"नित्यस्य रायः पतयः स्याम", "पित्र्यस्येव धनस्य"। यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति, तस्यैव ह्युपरि अगौणं स्वामित्वं भवति। एवं यदेव स्वयञ्जात मपत्यं भवति, तदेव मुख्यं भवति; नेतरत्—क्षेत्रजं वा क्रीतकं वा। यत एव मतो ब्रूमः;—यदेव नित्य मात्मीय मगौणं स्वय मुत्पादितं पुत्राख्यं रायः धनम्, तस्यैव वयं पतयः पालयितारः स्याम; मा परकीयस्येत्यभिप्रायः। कस्मात् पुनरेवं ब्रूमहे? इतः,—यस्मात् "न शेषो अग्ने अन्यजात मस्मि"। 'न

* ऋ० सं० ५, २, ९, २।

अस्ति शेषः' नास्यपत्य मन्येन जातं हे 'अग्ने!', य एव जनयति तस्यैव हि तद् भवति, नेतरस्येत्यभिप्रायः। 'अचेतानस्य' य एव हि अचेतयमानो भवति, अविद्वान्, प्रमादी, तस्यैव "अचेतयमानस्य", "प्रमत्तस्य" अश्रुतवतो धर्मात् परितोषमात्रं "भवति",—ममेद मपत्य मिति, न अपत्यकार्येऽवतिष्ठते। यत एव मतो ब्रूमः;—'मा पथो विदुषः' मास्मानेतत् पितृपितामहप्रपितामहानुसन्ततात् 'पथः' मार्गात्, येन केन चित् प्रत्याख्यानद्वारेण "विदूदुषः"। त्वं देहि नः पुत्र मौरस मित्यभिप्रायः॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"अरणोऽपार्णः"* अपगतोदकसम्बन्ध इत्यर्थः। "रेक्ण इति धननाम"†; तद्धि "रिच्यते" अतिरिच्यते इतो लोकादमुं लोकं "प्रयतः" म्रियमाणस्येत्यर्थः। "शेष इत्यपत्यनाम"‡; तद्धि "शिष्यते" इहैव लोकेऽवतिष्ठते पितुरमुं लोकं 'प्रयतः' गच्छत इत्यर्थः॥

एव मस्या मृचि 'न शेषो अग्ने अन्यजात मस्ति'—इत्यनेन विशेषलिङ्गेन उपपन्न मेतद् भवति;—जनयितुरेव प्रजा भवति न चेत्रिणो नापि क्रेतुरन्यस्य वा कस्यचिदिति। एवञ्चैष शब्दार्थ उपपद्यते,—यस्मादेवापेत्य ततं भवति, तस्यैवापत्य मिति॥

अनेनैव चापत्यशब्दनिर्वचनप्रसङ्गेनैष मन्त्रो व्याख्यातः, उत्तरञ्च सावशेष मपत्यशब्दे प्रसक्तानुप्रसक्त मेवोच्यते;—"तस्य उत्तरा भूयसे निर्वचनाय"—॥ २ ॥

---

* अरणे 'निर्गमने" दै० का० ११, ४, १२।
† १भा० २२२ धा० (२)।
‡ १भा० १०२ धा० (१)।

न हि ग्रभायारणः सुश्रेवोऽन्योदर्यो मनसा मन्तवा उ। अधा चिद्रोकः पुनरित्स एत्या नो वाज्यभीषाळेतु* नव्यः ॥ न हि ग्रहीतव्यो अरणः † सुसुखतमोऽप्यन्योदर्यो मनसापि न मन्तव्यो ममाय मित्यथ ‡ स ओकः पुनरेव तद्देति यत आगतो भवत्योक इति निवासनामोच्यत एतु नो वाजी वेजनवानभिषहमाणः सपत्नान्नवजातः स एव पुत्र इत्यथैतां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके ॥ ३ ॥

न हि ग्रभायेति §। "न हि ग्रहीतव्यः" नाङ्गीकर्त्तव्यः, पुत्रो ममाय मित्यनेनाभिप्रायेण। कः पुनरसौ नात्मियीकर्त्तव्यः? "अरणः" अपार्णः, अपगतोदकसम्बन्धः, अन्यकुलजः। यद्यपि "सुश्रेवः" एव स्यात् "सुखतमः"॥ परिचरितो हितैषी, तथा "अपि" "अन्योदर्यः" अन्येनोदीरिताद्रेतसो जातः, अन्यजायोदरसम्भूतो वा; यो हि स्वस्यां जायायां सम्भवति, स स्व एवोदरे सम्भूतो भवति। "अर्द्धो ह वा एष आत्मनो यज्जायेति विज्ञायते"। तस्माद् योऽन्यजायोदरसम्भूतः, सः "मनसापि न मन्तव्यो ममाय मिति", किमुतः पुत्रत्वेन परिकल्पयितव्य इति। किङ्कारणं मनसापि न मन्तव्य इति? "अधा

---

* "षाळेतु"—क, ख, ग, ङ. छौ च।
† "ग्रहीतव्योऽरणः" ङ, च।
‡ 'ममायं पुत्र इत्यथ" ङ, च।
§ ऋ० सं० ५. १, ९, १।
॥ "श्रेवम्" १भा० ११८ सू० (१०)।

चिदोकः पुनरित्स एति"। अथशब्दोऽयशब्दस्यार्थे वर्त्तते, स च हेत्वर्थः। यस्मात् "ओकः" स्वं निवासस्थानं स्वं वंशं बहुनापि कालेन स एति—तद्वंश्य एव भवति, तस्मादपुत्र एवासौ। यत एव मतो ब्रवीमि;—'आ नो वाज्यभीषाळेतु नव्यः'। "ऐतु" आगच्छतु, "नः वाजी वेजनवान्", परेभ्यो भयदाता 'अभीषाट्' "अभिषहमाणः" अभिभवन् "सपत्नान्", 'नव्यः' "नवजातः" शिशुरित्यर्थः। "स एव पुत्रः" आगच्छतु, न परकीयैः पुत्रैः सङ्कल्पितैरित्यभिप्रायः॥

"अथैतां दुहित्र-दायाद्य उदाहरन्ति"। इदं मुक्तम्,—अपेत्य यस्मात् पितुः सकाशात् ततं भवति, तस्मादपत्य मिति तदिद मुभयोरपत्यं प्राप्नोति दुहितुः पुत्रस्य च; दुहितापि ह्यपेत्येव तता भवति पितुः सकाशात्। तच्चैवं सति उभयोर्दुहित्रपुत्रयोरपत्यकार्याणि दायाद्यादीनि अविशेषेण प्राप्नुवन्ति, तदिदं विचार्यते। तदधिकारार्थोऽय मथशब्दः। एता मृचं शासदङ्गिरित्यादि या वक्ष्यमाणा (४ख०) ताम्, दुहितुर्दायाद्ये अर्थे उदाहरन्ति धर्मविदः। अस्या मृचि वक्ष्यमाणायां (४ख०) दुहितुरपि दायाद्यत्व मस्तीति दृश्यते॥

"पुत्रदायाद्य इत्येके" एके पुनर्द्धर्मविदो मन्यन्ते यत् पैतृकं वित्तं तत् पुत्रस्यैव दायाद्यं न दुहितु रिति॥

यथा दुहितापि दायाद्य मर्हति, तथेय मृग् निरुच्यते;—॥३॥

शासद्वह्निर्दुहितुर्नप्त्यङ्गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन्। पिता यत्र दुहितुः सेकं मृञ्जन्त्संशम्येन मनसा

दधन्वे॥ प्रशास्ति वोल्हा* सन्तानकर्मणे दुहितुः पुत्र-भावं दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नप्तार मुपागमद् दौहित्रं पौत्र मिति विद्वान् प्रजननयज्ञस्य रेतसो वा अङ्गादङ्गात्† सम्भूतस्य हृदयादधि जातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति तदेतदृक्-श्लोकाभ्या मभ्युक्तम् (४‡)। अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे। आत्मा वै पुत्रनामासि स जीव शरदः शत मित्यविशेषेण पुत्राणां दायो भवति धर्म्मतः। मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्॥ न दुहितर इत्येके तस्मात् पुमान् दायादोऽदायादा स्त्रीति विज्ञायते तस्मात् स्त्रियं जातां परास्यन्ति न पुमांस मिति च स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः पुंसोऽपीत्येके शौनःशेपे दर्शनात्। अभ्रातृमतीवाद इत्यपरम्। (अमूर्या यन्ति जामयः सर्वा लोहितवाससः।§) अभ्रातर इव योषास्तिष्ठन्ति हृतवर्त्मनः। अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदा-

---

* "वोदा" च, इतिसम्मतम्।

† "वाङ्गादङ्गात्" ङ, च।

‡ क-ख-ग-पुस्तकेषु इह चतुर्थखण्डसमाप्तिर्दृश्यते परं खण्डसङ्ख्यावैषम्यविरोधा-दुपेक्षणीयम्।

§ नैतच्छ्लोकार्द्धं ङ-च-पुस्तकाभ्यां मन्यते।

नाय हतवर्मान इत्यभ्रातृकाया अनिर्वाह्य औपमिक स्तस्योत्तरा भूयसे निर्वचनाय ॥ ४ * ॥

शासद्वह्निरिति†। एषा त्रिष्टुप्। ऐन्द्रे सूक्ते वक्ष्यामित्री। माध्यन्दिने सवने उक्थपर्याये अच्छावाकस्य यच्छस्त्र मभिजिद्विश्वजिदादिष्वहीनकेष्वहःसु अहीनसूक्तं नाम‡, तच्चेयं शस्यते। "न जामये तान्वं (५ख०)"—इतीय मपि अनयैव समानार्षविनियोगदैवतच्छन्दस्का। 'शासद् वह्निः' "प्रशास्ति" प्रख्यापयति प्रज्ञापयतीत्यर्थः। कः पुनरसौ प्रशास्ति? किं वा प्रशास्ति? इति। "वोढा" य उद्वोढा स्त्रिया भवति सः; तस्यां या जायते दुहिता, तस्याः पुत्रभावं प्रशास्ति;—"सन्तानकर्मणे" अर्थाय। "दुहिता, दुर्हिता"; सा हि यत्रैव दीयते, तत्रैव दुर्हिता भवति, "दूरे" सती सा पितुः "हिता" पथ्या भवतीति दुहितेत्युच्यते। "दोग्धेर्वा" सा हि नित्य मेव पितुः सकाशात् द्रव्यं दोग्धि प्रार्थनापरत्वात्। आह;—कथं पुनर्गम्यते प्रशास्ति वोढा सन्तानकर्मणे दुहितुः पुत्रभावम्? इति। उच्यते;—इतः। यस्मात् 'नप्त्यङ्गात्' "नप्तार मुपागमत्" उपागच्छति चेतसा। "दौहित्रम्" दुहितृ-पुत्रम्। "पौत्र मिति" पुत्रो ममाय मिति एव मुपागच्छति। न चापुत्रस्य पौत्रः स्यात्, उपागच्छति च दुहितुः पितां ममाय मिति दौहित्रम्। तस्माद् दुहितापि पुत्र एव, यस्याः पुत्रः पौत्रो ममाय मित्येवं चेतसा उप-

---

* क-ख ग-पुस्तकेष्वित्र पञ्चमखण्डसमाप्तिः, एव मुत्तरत्रापि बोद्धव्यम्।

† ऋ० मं० १, २, ५, १।

‡ 'अस्मा इदु प्रतरसे-शासद्वह्निरितीतरा वहीनसूक्ते'—इति आ० ७, ४।

गम्यते। 'विद्वाँ ऋतस्य दीधितिं सपर्यन्'। 'विद्वान्', कस्य? 'ऋतस्य', "प्रजननयज्ञस्य"। ऋत इत्येतदपठितं यज्ञनाम। 'दीधितिं' विधानमित्यर्थः। प्रजननयज्ञविधानमविशेषेण 'सपर्यन्' पूजयन्नित्यर्थः। यथैव हि पुत्रजनने प्रजननयज्ञस्तन्यते तथैव हि दुहितृजननेऽपि,—यैरेव मन्त्रैर्यैनैव च विधानेन पुत्र-गर्भ आधीयते, तैरेव मन्त्रैस्तेनैव च विधानेन दुहितृगर्भोऽपि। अथ "वा" ऋत-शब्देन रेत उच्यते*। तत् "अङ्गादङ्गात्" यत् सम्भूतं तत् सर्व-गात्रेभ्यः हृदयानुस्मरणनिमित्तेन गर्भजनने "मातरि" प्रत्यृतं प्रवृत्तं भवति रेतः, तस्य "रेतसः" "विधानं न विशेषेण पूजयन्" स वोढा दौहित्रं पौत्रो ममाय मित्येव मुपगच्छति चेतसा। येनैव हि विधानेन पुत्रजनने रेत उत्सृज्यते, तेनैव हि दुहितृजननेऽपि; तत्रैवं सति रेत उत्सर्गविध्यविशेषात् प्रजननयज्ञाविशेषाद्वा अवि-शेषेण मिथुनाः पुरुषाः स्त्रियश्च उभयेऽपि दायादा इत्येव मेके धर्मविदो मन्यन्ते। तदेतद् "ऋक्-श्लोकाभ्याम्" "अभि" आभि-मुख्येन "उक्तम्",—"मिथुनाः पुत्रा दायादा इति", "अङ्गाद-ङ्गात्सम्भवसि (गो०ब्रा०सू०२, ८,२१)" -"अविशेषेण पुत्राणाम् (?)"—इत्येताभ्याम्॥

'शासद्वह्निः'—इत्येतस्या ऋचः प्रथमोऽर्द्धर्चो व्याख्यातः, "पिता यत्र दुहितुः"—इत्ययं द्वितीय उपरिष्टादस्य पादस्य† व्याख्यास्यते।

---

* 'ऋतम्' १भा० १९० पृ० (६८)—'रेतः' १भा० १०४ पृ० (१६)।

† 'उपरिष्टादस्य खण्डस्य'—इत्येव वक्तुं युक्तितम्, अस्मिन्नेव पादे इत उपरिष्टादेव खण्डे तद्व्याख्या नदर्शनात्। परस्तात् २७२ पृ० १६ प० द्रष्टव्यम्॥

अनयोरर्द्धर्चयोरन्तरा तदेतदृक्-श्लोकाभ्या मभ्युक्त मित्यत (२५८पृ० ६पं०) आरभ्य प्रसक्तानुप्रसक्तं दायाद्यधर्माश्रित मेव पूर्वोत्तरपक्ष-सम्बन्धादाचारगतं बभ्रु व्याख्यायते मन्त्रविषयख्यापनाय, ईदृशोऽपि मन्त्राणां विषयो भवतीति धर्मसंविज्ञानाय च। सर्व एवाय मेवं प्रकारो धर्मो मन्त्रेभ्य एव निर्बभावित्येतदेतेन ख्यापितं भवति॥

"अङ्गादङ्गात् सम्भवसि"—इत्येता मृचं प्रवासादेत्य पुत्रस्य मूर्द्धनि जपन् जिघ्रति *। अनुष्टुबेषा। स पुत्र उच्यते;—हे 'पुत्र!' 'अङ्गाद् अङ्गात् सम्भवसि' त्वं 'हृदयात्' च 'अधिजायसे' यत्तदुक्तम्—"अङ्गादङ्गात्सम्भूतस्य हृदयादधिजातस्य (२५८पृ० ४पं०)"—इति। तदनेनापि स्पष्टार्थतरेण मन्त्रेणोच्यत इति पूर्वस्यास्पष्टार्थतायां स्पष्टार्थीकरणार्थं मन्त्रः। तच्च हि 'ऋतस्य दीधितिं सपर्यन्'—इत्यत्र 'ऋतस्य' "प्रजननयज्ञस्य रेतसो वा" "विधानं" "विशेषेण पूजयन्"—इत्युक्तम् (२५८पृ० ५पं०), तत्पुनरेतदस्पष्टम्; इह पुनरङ्गादङ्गात् सम्भवसि हृदयादधिजायसे इत्येव मुच्यते। तत्रैवं सति यथैव पुमान् अङ्गादङ्गात् सम्भवति हृदयाच्चाधिजायते, तथैव दुहितापीत्यविशेष उपपद्यते। तस्मात् साधूक्तम्—"अविशेषेण मिथुना: पुत्रा दायादा इति (२५८पृ०५पं०)"। 'आत्मा वै पुत्र नामासि' यस्मादङ्गादङ्गात् सम्भूतस्त्वं हृदयादधिजातस्तस्मादात्मैव त्वं ममैवावयवभूत इत्यभिप्राय:। केवलं तु पुत्र नामा त्वम्, अहं पितृनामा, एतावानावयोर्विशेषो नाममात्रं भिन्न मित्यभिप्राय:। 'स:' त्वं 'जीव शरद:

* "विप्रोष्य ज्येष्ठस्य पुत्रस्योभाभ्यां पाणिभ्यां मूर्द्धानं परि गृह्य जपेद् यदा वा पितास इति विद्यादुपेतस्य वाङ्गादङ्गात् संभवसीति" गो०गृ० २प्र० ८ख० ११सू०।

शतम्'—इत्याशीः। सर्वस्मिन्नपि संवत्सरे शरदे बहुजीवाः प्रचुररोगा भवन्ति, तस्माच्छरदः, तस्माच्छरदेवोपलक्ष्य संवत्सरशत मेतदायु-राशास्यते॥

'अविशेषेण पुत्राणां दायो भवति धर्मतः मिथुनानाम्'। क एव माह? 'मनुः' 'स्वायम्भुवः' स्वयम्भुवोऽपत्यं स्वायम्भुवः *। कस्मिन् काले स एव माह? 'विसर्गादौ' सृष्ट्यादावित्यर्थः। पूर्वं मर्द्धं श्लोकस्य पठ्यते। एव मेताभ्यां मृक्-श्लोकाभ्यां मुक्त मविशेषेण पुत्रस्य दुहितुश्च दायादत्वम्॥

"न दुहितर इत्येके" न दुहितरो दायाद्य मर्हन्तीत्येव मेके धर्मविदो मन्यन्ते। ब्राह्मण मपि चैतस्मिन्नर्थे दर्शयति,—"तस्मात् पुमान् दायादः, स्त्री अदायादा;—इति" "विज्ञायते" एतस्मिन् ब्राह्मणे विचार्यमाणे ज्ञायते; न दुहितरो दायाद्य मर्हन्ति, पुमानेवार्हतीति। "तस्मात् स्त्रियं जातां परास्यन्ति, न पुमांस मिति च"। एतदपरं दर्शनं दुहितुरदायादत्वं लिङ्गतो दर्शयति;—"अथ यत् स्थालीं परास्यन्ति हवनकर्मणो न तया जुह्वति, न दारुमयं परास्यन्ति हवनकर्मणः दारुमयेनैव जुह्वति; तस्मात् स्त्रियं जातां परास्यन्ति परस्मै प्रयच्छन्ति; न पुमांसम्"†। तस्मात् पुमानेव पैतृकस्य वित्तस्येष्टे, न दुहिता। किञ्च स्त्रीणां दानविक्र-यातिसर्गा विद्यन्ते, न पुंसः। प्रदीयते हि परस्मै स्त्री, विक्रीयते

---

* तथाहि—"यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।"—इति म० ९, १३०। किञ्च १३२, १३९ श्लोकौ च द्रष्टव्यौ।

† रोथ्स-मुद्रित-पुस्तके तु नैवं पाठः।

च वैवाहिकेन शुल्केन। "विक्रयस्याय मपत्यस्य मतिमान् को न मंस्यते। स्वल्पो वाथ बहुर्वापि विक्रयस्तावदेव सः॥" इति भगवता वासुदेवेनोक्तं सुभद्राहरणे। तथा च ब्राह्मणमपि दर्शयति,—"चातुर्मास्येष्वनृत वा एषा करोति, या पत्युः क्रीता सती अन्यया-न्येश्वरति" इति; तस्माच्छुल्केन प्रदानं विक्रयः कन्याया इत्युप-पद्यते*। अतिसर्गः परित्यागः, परित्यज्यते हि कन्या स्वबन्धुभिः, स्वयम्वरे योऽवलिप्तः स गृह्णातु, यो वा तुभ्यं रोचते तं वृणीष्वेति। स एष क्षत्रियाणा मेव स्वयम्बरधर्मो नेतरेषां वर्णाना मिति; स पुनरय मितरेषा मपि वर्णाना मदायाद्यार्हत्वे कन्याया लिङ्गं भवति। तस्मान्न दायाद्य मर्हति कन्येति॥

"पुंसोऽपीत्येके, शौनःशेपे दर्शनात्"। यदुक्तं दानविक्रयाति-सर्गैर्हेतुभिरदायादत्वं स्त्रिया इति, अनेकान्त एषः; पुंसोऽपि दान-विक्रयातिसर्गा विद्यन्त एव। पुरुषोऽपि हि परस्मै दीयते। एवं ह्युक्तम्—"दत्तक्रीतकृत्रिमलेचजौरसाः पुत्राः" इति†। तथा च शौनःशेपे दर्शनात्" शौनःशेपे आख्याने ब्रह्मचानाम्‡; भारते च शुनःशेपस्य विक्रयो दृष्टः,—'विक्रीतं मध्यगं मन्ये' इत्येव मादि। तथा च परित्यागोऽपि दृष्टः,—यथा विश्वामित्रेण मधुच्छन्द आदी-

* "शुल्कसञ्ज्ञेन मूल्येन ह्यं दुहितृविक्रयम्"—इति मनुः ९ अ० १०० श्लो०।

† मनुः ९अ० १५८, १५९, १६० श्लो०।

‡ "सोऽजीगर्तं सौयवसि ऋषि मशनया परीत मरण उपेयाय। तस्य ह त्रयः पुत्रा आसुः, शुनःपुच्छः, शुनःशेपः, शुनोलाङ्गूल इति। तं होवाच,—ऋषेऽहं वै शतं ददाम्यत मेषा मेकेनात्मानं निष्क्रीणा इति। स ज्येष्ठं पुत्रं निरुवाच, नास्मि मिति नो, कनिष्ठं माता, तौ ह मध्यमे सम्पादयाञ्चक्रुः शुनःशेपे; तस्य ह शतं दत्वा स त मादाय सो ऽरण्याद् ग्राम मेयाय।"—इति ऐ० ब्रा० ७, १, १।

नाम्*। तस्मादनैकान्तिकत्वादेवैषां हेतूना मुभयोरपि दायाद्यत्व मित्येके मन्यन्ते॥

"अभ्रातृमतीवाद इत्यपरम्" आचार्यमत मिति वाक्यशेषः। यैवाभ्रातृका भवति कन्या, सैव पित्र्यं धन मर्हति, नेतरा सभ्रातृका; पुरुषेषु हि पितुः पिण्डदातृषु तिष्ठत्सु न स्त्री धन मर्हति; सा हि परकीयं वंशं वर्द्धयति, न स्वम्, तस्मादसौ नार्थभागिनी। अभ्रातृकायां पुनरयं विशेषः,—अभ्रातृकायाः पितुरन्यः पुत्रो नास्तीति दौहित्रः पिण्डदानादिषु कार्येष्ववतिष्ठते इति भवत्यर्थभागिनी अभ्रातृका दुहिता। तदुक्तम्,—'पितोत्सृजेत् पुत्रिका मनपत्योऽग्निं प्रजापतिं चेष्ट्वाऽस्मदर्थं मपत्य मिति संवाद्याभिसन्धानमात्रं पुत्रिका' इत्येकेषा मिति॥

निगम मप्येतस्मिन्नर्थे उदाहरन्ति,—"अभ्रातर इव योषास्तिष्ठन्ति हृतवर्त्मनः"—इति। निगमस्य समासतोऽर्थ माह,—"अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हृतवर्त्मान इति"। अस्या मृचि "अभ्रातृकायाः" कन्यायाः "अनिर्वाहः" अनिर्वहणं विवाह-निषेध इत्यर्थः। "औपमिकः" उपमया दर्शितः, अभ्रातर इवेति। "अमूर्या यन्ति जामयः सर्वा लोहितवाससः। अभ्रातर इव योषास्तिष्ठन्ति हृतवर्त्मनः (अ० स० १,१७,१†)॥" इय मृग्वर्णा प्रसव-

---

* "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः,—पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत् कनीयांसः; तद् ये ज्यायांसो न ते क्रशलं मेनिरे, मानमुव्याजहारात्मान्वः प्रजा भक्षीष्टेति। त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः।"—इति ऐ० ब्रा० ७, १८, ४।

† इत्र शाखाभेदेन पाठभेदोऽस्ति।

मार्गवहनरोगिणी या स्त्री भवति, तस्या तत्प्रतिकारकर्मणि विनियुज्यते। 'अमूर्याः' 'यन्ति' स्रवन्ति नाड्यो रक्त मजस्र मविरताः स्त्रिय इवातिलोहितवस्त्राः 'सर्वाः' एताः तिष्ठन्तु उपरमन्तु हतलोहितवहनमार्गाः, अस्य मन्त्रस्य वीर्येण। कथमुनस्तिष्ठन्तु? 'अभ्रातर इव योषाः' यथा काश्चिदभ्रातृका योषा हतभर्तृवंशमार्गास्तिष्ठन्ति सन्तानकर्मणि पिण्डदानाय, एव मेता नाड्यः तिष्ठन्त्विति। 'एव मस्या स्त्रचि अभ्रातृकाया अनिर्वाह उपमया लिङ्गतो दर्शितः॥

"तस्य" अनिर्वाहस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "निः" निर्विविच्य "वचनाय"—॥४॥

अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्। जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः॥ अभ्रातृकेव पुंसः पितृनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय नयति* गर्त्तारोहिणीव धनलाभाय दाक्षिणाजी† गर्त्तः सभास्थाणुर्गृणातेः सत्यसङ्करो भवति तं तच्च यापुचा यापतिका सारोहति तां तचाक्षैराघ्नन्ति‡ सा रिक्थं लभते श्मशानश्च्वयोऽपि गर्त्त उच्यते गुरते§ रपगूर्णो भवति श्मशानं श्मशयनं श्म शरीरं शरीरं शृणातेः शम्नातेर्वा श्मश्रु लोम श्मनि श्रितं भवति॥

---

* "न पतिं" ख, ङ, च।

† "दाक्षिणाधाजी" ख, ग। इत्तौ—"दाक्षिणात्या स्त्री"।

‡ "तचाक्षेणाघ्नन्ति" क, ख, ग।

§ "गुरते" च रोथस्-दृष्टेषु दक्षिणग्रन्थेषु च।

॥ "शृतं भवति" क, ख, ग।

लोम लुनातेर्वा लीयतेर्वा नोपरस्याविष्कुर्याद् यदु-पैरस्याविष्कुर्याद्गर्त्तेष्ठाः * स्यात् प्रमायुको यजमान इत्यपि निगमो भवति। रथोऽपि गर्त्त उच्यते गृणाते स्तुतिकर्मणः। स्तुततमं यानम्। आ रोहथो वरुण मित्र गर्त्त मित्यपि निगमो भवति। जायेव पत्ये कामय-माना सुवासा ऋतुकालेषूषा हसनेव दन्तान् विदृणुते रूपाणीति चतस्र उपमा नाभ्राची मुपयच्छेत † तोकं ह्यस्य तद्भवतीत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षः पितुश्च प्रत्यभावः पिता यच्च दुहितुरप्रत्ताया रेतः-सेकं प्रार्ज्जयति सन्दधात्यात्मानं सङ्गमेन मनसेत्यथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति ज्येष्ठं पुत्रिकाया इत्येके ॥ ५ ॥

अभ्रातेव पुंस इति‡। दीर्घतमःपुत्रस्य कक्षीवत आर्षम्। त्रिष्टुप्। औषसौ। प्रातरनुवाकाश्विनयोः शस्यते। 'आभ्रातेव पुंसः' यथा अभ्रातृका कन्या दत्तापि सती पित्रा, स्वीकृतापि भर्त्रा, पुनः 'प्रतीची' "पितॄन्" एव पितृवंश मेव "अभिमुखी एति" "सन्तानकर्मणे पिण्डदानाय नयति" पतिवंश मित्यर्थः। सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्द्धयति, न भर्तृवंश मिति; तस्मादभ्रातृका

* "गर्त्तेष्ठा" क, ख, ग।
† "नाभ्रातृका मुपयच्छेत" ख० इत्यिसम्मतश्च।
‡ ऋ० सं० १, १, ८, १।

पैतृकं दायाद्य मर्हतीत्युपपद्यते। "गर्त्तारूगिव सनये धनानाम्"। "गर्त्तारोहिणी इव" काचिद् "दाक्षिणात्या स्त्री", सा यथा "गर्त्तः सभास्थाणुः" त मारोहति 'सनये' लब्धये 'धनानाम्'। एवम् 'उषाः' अपरकाले रात्र्यां नभ आरोहति *। किञ्च 'जायेव पत्य उशती सुवासाः'। यथा जाया पत्येभर्त्रे सुवासा भूत्वा ऋतुकाले आत्मानं दर्शयति, एव मुषा आत्मानं दर्शयति जनानाम्। किञ्च 'उषा हस्रेव निरिणीते अप्सः'। यथा हसना हसनस्वभावा दन्तान् आत्मनो दर्शयति, एव मुषा अपि आत्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विदृणते; शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि प्रकाशोदकेन धौतानीव करोति॥

"चतस्रः" एताः "उपमाः" अस्या ऋचि।—अभ्रातेव पुंस इत्येका। गर्त्तारोहिणीवेति द्वितीया। जायेव पत्य इति तृतीया। हस्रेवेति चतुर्थी। अत्र प्रथमोपया अभ्रातेव पुंस इत्यनया अभ्रातृकाया अनिर्वाहो लिङ्ग्यते; यथा अभ्रातृका पितृनेव प्रत्येति न पतिम्, एव मुषा आदित्य मेव प्रत्येति। एव मभ्रातृका कन्या यस्मिन्नेव वंशे उत्पन्ना भवति, त मेव प्रकाशयति वर्द्धयति, न भर्तृवंशम्। इत्येव मुपमया नासौ वोढ्येतदुपप्रदर्शितं भवति; पुत्रार्थत्वाद् विवाहस्य। तस्मादवर्द्धयित्रत्वाद् भर्तृवंशस्य, वर्द्धयित्रत्वाच्च पितृवंशस्य, अभ्रातृका पितृदायाद्य मर्हतीत्युपपद्यते॥

---

* "गर्त्त इति गृहनाम। छदिरो गर्त्त इति तन्नामसु पाठात्। ऋचीत्येन राजपुरुषैर्न्यायनिर्णेतृभिश्चाधिष्ठितं स्थान मुच्यते।"—इति, "गर्त्त साकाशं सूर्यनिवासस्थानम्"—इति च सायणः (ऋ० सं० १, १, ८, १)।

निगमप्रसक्तस्य तत्त्व माचष्टे ;—"गर्त्तः सभास्थाणुः" इति, अक्ष-निर्वपणपीठ मित्यर्थः। "गृणातेः (क्रया० प०)" स हि "सत्यसङ्गरो भवति" सङ्गीर्यते हि तत्र सत्य मिद मत्र पतित मिद मत्र न पतित मित्येवं प्रायेण कितवा स्तत्रानृतं ब्रुवते। "तम्" एवंलक्षणं गर्त्तं मारोहति या स्त्री, सा गर्त्तारुगित्युच्यते। तदेतद्गर्त्तस्य सभास्थाणोः-रारोहणं रिक्थलाभहेतुर्दाक्षिणात्येषु अपुत्राया अपतिकायाः स्त्रियाः प्रसिद्धम् *। तयैव प्रसिद्ध्या निरुच्यते। देशसमाचारव्यवस्थयापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति। "तत्र या अपुत्रा अपतिका सा आरोहति" तं सभास्थाणुम्, तत्र कितवमध्ये अवस्थितं या अपुत्रा स्त्री, या अपतिका, सा आरोहति तस्मिन्नुपविशतीत्यर्थः। ततः "सा" भर्तृबन्धुभ्यः सकाशात् "रिक्थं लभते" यस्तस्या भर्तृसको धनांशस्तम्। एव मसौ सनये लब्धये धनानां गर्त्तं मारोहति॥

गर्त्तप्रसक्त मुच्यते ;—"श्मशानसञ्ज्ञयोऽपि गर्त्त उच्यते"। "गुरतेः (तु० आ०)" उद्यमनार्थस्य। स हि लोकविनाशायाभ्युद्यत इव भवति। यानि हि तत्र पिशाचादीनि सत्त्वान्याश्रितानि भवन्ति। तानि जनमरण माशासते; म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति। "श्मशानं, श्म-शयनम्" इत्याख्यानप्रसक्त मुच्यते। तत्र हि श्म शेते ऽत्रेति श्म-शयनं सत् तत् श्मशान मित्युच्यते। श्म-शब्दार्थ

---

* "यथा लोके काचिद् गतभर्तृका योषिद् धनानां स्वकीयरिक्थानां सनये लाभाय गर्त्तं मारोहति। तां तु सभ्या विचार्य यद्दीयं रिक्थं लभते चेद्दत्तैः सभ्याय मद्दीयं धनं विसरन्ति।"—इति सायणः (ऋ० सं० १, १, ८, १)।

माह;—"श्म शरीरम्" इति। तद्धि तत्र शेते; तत्र हि तन्निक्षिप्यते मृतस्य सतः *। "शम्नातेर्वा" कृतव्याख्यान मपि † पुनराह मुख्यत्वादस्य। तत्र ‡ औपमिकं वृत्रसम्बन्धात्; न हि वृत्रस्य मुख्यं शरीरम्? §। श्म-शब्दप्रसक्तं निराह;—"श्मश्रु लोम" इति, तद्धि "श्मनि" शरीरे "श्रितं भवति"। पर्यायप्रसक्तं निराह;—"लोम लुनातेः (क्रया० उ०)" तद्धि लूयते। "लीयतेर्वा (दि० आ०)" तद्धि शरीरे लीयते॥

तत्र निगम मपि चोदाहरन्ति;—श्मशानमञ्चयोऽपि गर्त्त इति "नेापरस्याविष्कुर्याद् यदुपरस्याविष्कुर्याद् गर्त्तेष्ठाः स्यात् प्रमायुको यजमानः" इति। उपर इति यूपस्यातष्टप्रदेश उच्यते; "पञ्चमभागोऽपरा यूपाः"—इति ह्युक्तम्। तदतष्टं यूपस्य नाविष्कुर्यादित्यर्थः। पांसुभिस्तद्वच्छादनीयं वर्हिषा च। यदि पुनरुपरस्य कञ्चिदप्यवयव माविष्कुर्याद् 'गर्त्तेष्ठाः' गर्त्तप्रतिष्ठः श्मशानप्रतिष्ठः, 'प्रमायुकः' प्रमरणधर्मायुरेव यंथाविहितादायुषो यजमानः स्यात्। "इत्यपि निगमो भवति" अथय मथन्ये बहव इत्यपिशब्दः॥

"रथोऽपि गर्त्त उच्यते"। "गृणातेः" स्तुत्यर्थस्य। तद्धि "स्तुततमं यानम्" अश्वादिभ्यो यानेभ्यः सुखतरं हि तेन गम्यते। रथोऽपि गर्त्त इत्यस्मिन्नर्थे "आरोहथो वरुण मित्र गर्त्त मित्यपि निगमो

---

* "श्मशाने वा निचखनु"—इति अथ० सं० ५, २१, ८।

† २१७ पृ० ९ पं०। तद्टीका च २१९ पृ० २पं०।

‡ ऋ० सं० १, ३, ३७, ५ ऋचि।

§ २१७ पृ० २ऋ० द्रष्टव्यम्।

भवंति"। "हिरण्यरूपं ०—० दितिञ्च"*। श्रुतविदाचेय एतया त्रिष्टुभा मित्रावरुणावस्तौत्। राजसूयेऽभिषेचनीयो नाम क्रतुः, स तत्र यजमानस्य रथ मारुरुक्षतः ग्रहीतेषुधनुष्कौ बाहू अनया अभिमन्त्र्येते †। तावेवाच मित्रावरुणावधिदेवताभिप्रायेण। एवं ह्याह,—मित्रोऽसीतीय मभिमन्त्रयति मित्रस्य ह्येतद्रूपम्, वरुणोऽसीतीमं वरुणस्यैतद्रूप मिति, तावुच्येते ‡। हे 'मित्र! वरुण!' 'हिरण्यवर्णम्' 'उषसो व्युष्टौ' उषसो व्युच्छेदनकाले 'उदिता' च उदयकाले 'सूर्यस्य' यौ युवा मेतस्मिन् काले एवंरूपम् 'अयःस्थूणम्' अयोमयं गर्त्तं स्थूणं स्थं 'गर्त्तं' रथम् 'आरोहथः', तौ युवां ब्रवीमि ममाप्येवं रथं गर्त्तं मेतस्मिन् विधावङ्गभूतं तत्स्वरूप मेव साम्प्रत मारोहतम्, 'अतः' एन मारुह्य 'चक्राथे' कुरुत मित्यर्थः। 'अदितिं दितिञ्च' अदीन मनुपक्षीण मात्मपक्षं दीनञ्चोपक्षीण मभिन्नपक्ष मित्यर्थः॥

"गर्त्तः सभास्थाणुः §"—इत्यत आरभ्य प्रसक्तानुप्रसक्त मुक्तम्॥

"जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः"—इति। अय मप्यर्द्धर्चः पूर्व मेव॥ व्याख्यातो भाष्यकारव्याख्यानुक्रमं भित्त्वा अस्माभिः, तथा ह्यृग्वाक्यस्याप्येकवाक्यता न विच्छिन्ना भवेदिति॥

---

* "हिरण्यरूप मुषसो व्युष्टावयःस्थूण मुदिता सूर्यस्य। आरोहथो वरुण मित्र गर्त्तं मतश्चक्राथे अदितिं दितिं च॥"—इति ऋ० सं० ४, ६, ११, ६।

† "बाहू उद्गृह्णाति हिरण्यरूपा इति"—इति का० श्रौ० १५, ५, १८।

‡ ऐ० ब्रा० ३, १, ४ एवमादि। द्रव्यदेवतयोः रूप मिति याज्ञिकानां पारिभाषिकी सञ्ज्ञा।

§ १९१ पृ० १४ पं०।

॥ १९८ पृ० ४ पं०।

"चतस्र उपमाः"—इति यदुक्तं भाष्यकारेण, तदपि परिसञ्चाय ताः उपपादिताः अस्माभिः*। एवम् "अभ्रातेव पुंस एति प्रतीची"—इत्यनेन पादेनास्या ऋचि अनिर्वाहो दर्शितः॥

अन्यत्रापि चोक्तम्,—"नाभ्रातका † सुपयच्छेत तोकं ह्यस्य तद् भवति—इति"। अथ मस्मिन् वाक्ये 'नाभ्रातका सुपयच्छेत'—इति प्रत्यक्ष एवोपयमनप्रतिषेधो विवाहार्थं पाणिग्रहणप्रतिषेध इत्यर्थः। पूर्वयोर्हि मन्त्रयोरुपमया लिङ्गतो विवाहप्रतिषेधो दर्शितः, एतस्मिंस्तु वाक्ये साक्षादेव प्रतिषेधः आहत्य विधानेनैव नाभ्रातका सुपयच्छेतेति। अत इदं सुकरम्,—"उपयमनप्रतिषेधः प्रत्यक्षः"—इति ‡॥

आह;—किं सुपयमनप्रतिषेध एव? नेत्युच्यते;—"पितुश्च पुत्रभावः" प्रत्यक्षः श्रूयते। कथम्? "तोकं ह्यस्य तद् भवति"—इति। तोकमित्यपत्यनाम §। यदपत्यमभ्रातकायाः पितुर्भवति, नेतरस्य वोढुः; इत्येवमितरस्य विवाहप्रतिषेध एव नेत्युच्यते पुत्रभावादितरस्य च पुत्रिकापितुरपत्यप्राप्तिरिति। तस्मादुपपन्नं भवति,—यैवाभ्रातमती, सैव पैतृकं धनमर्हति नेतरेति॥

अधुना योऽसौ शासदक्षि रित्यस्या ऋचः॥ उत्तरोऽर्द्धर्च उत्सृष्टः, स एवाभ्रातकावादपक्षेणैव निरुच्यते। पूर्वोऽपि च शासदक्षि रित्यय मभ्रातमतीवादपक्षेणैव योजयितव्यः। एष एव हि स्थितः पक्षः।

---

* १९८ पृ० ११ पं०।

† "नाभ्राती"—इत्येव बङ्गभूखपुस्तकपाठः।

‡ "यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता। नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया॥" म० स्मृ० ११।

§ १भा० १७१ पृ० (१)।

॥ उक्तं पुरस्ताद् व्याख्यास्यत इति १११ पृ० १९ पं०।

तस्या एव ह्यभ्रातृमत्या यः पुत्रो भवति, त मेव पुत्रिकाविधानेन कृताभिसन्धित्वात् पौत्रो ममाय मिति अपुत्रः सन् मातामह उपगच्छति, नेतरान् भ्रातृमतीपुत्रान्; अन्यथा सर्व एव हि वोढारो अपुत्राः स्युः, ततो विवाहपरिश्रमो व्यर्थ एव स्यात्। अथवा सर्व एव लोको ह्यामुष्यायण * एव स्यात्। किञ्च पुत्रिकापितुरपि या भार्या सान्यस्य दुहितेति तस्या मपि या जायते सा मातामहस्यैव, नेतरस्य पुत्रिकापितुः स्यात्। अनिष्टं चैतत्स्यादेवम्। तस्माद् यैवाभिसन्धिपूर्वकं धर्मेण पुत्रिका क्रियते, तस्या एव पुत्रो मातामहस्य भवति, न सर्वस्या इति; सैव च दायाद्यार्हा, नेतरा भ्रातृमती। अत इद मुच्यते;—"पिता यत्र दुहितुः" इति। 'पिता' 'यत्र' यस्मिन् काले 'दुहितुः' "अप्रदत्तायाः" प्राक् प्रदानादित्यर्थः। "रेतः-सेकं" रेतसः सेकारं यो दुहितरि रेतः सिञ्चति तं जामातरं "प्रार्जयति" प्रसाधयति, प्रकल्पयति, उपवर्त्तयतीत्यर्थः। तदा तस्मै तां दुहितरं ददत् किं करोति? "संशग्म्येन मनसा दधन्वे" "सन्दधाति" अभिसन्दधाति "आत्मानम्" यदपत्य मुत्पत्स्यते तन्ममेति। कथमुनरभिसन्दधात्यात्मान मिति 'संशग्म्येन' "मनसा सङ्गमेन" मनसा विगतापुत्रत्वसन्तापेन चेतसा,—नाह मपुत्रः, दृय मेव पुत्रिका मम पुत्रः, यो ह्यस्या मुत्पद्यते, स पौत्रो मम भविष्यति इत्येवं सुखेन मनसा सन्दधात्यात्मानं तस्यां पुत्रिकायाम्। तत्रैवं सति यस्तस्या मेव कृतपुत्रिकाधर्मिण्या मुत्पद्यते दौहित्रः, त मेव नप्तारं ममाय मित्येव मुपगच्छति मातामहः, न सर्वानेव दौहित्रान्;

* अमुष्यापत्य मामुष्यायणः, द्वयोः (जनयितुर्दुहितुश्च) आमुष्यायणौ द्यामुष्यायणः।

भ्रातृमत्या अपि स तस्या एव पुत्रो मातामहस्य भवति, न सर्वस्याः; इति सैव च दायाद्यार्हा, नेतरा। स एव च मुख्यया वृत्त्या मातामहस्यैव पौत्रो भवति, नेतरे भ्रातृमतीपुत्राः *। ते हि गौण्या वृत्त्या जनयितुः पितुः पुत्राः सन्तो मातामहस्य पौत्रा दृत्युच्यन्ते कदाचिल्लोके शास्त्रे वा ॥

तत्रैवं सति "अङ्गादङ्गात् सम्भवसि", "आत्मा वै पुत्रनामासि"-इत्येव मादिषु गौणं दुहितुः पुत्रत्वं मुच्यते। किञ्च; यदि दुहिता पुत्रेण अविशिष्टा एव स्यात्, ततो दुहितेति विशेषसमाख्या नैव स्यात्; अस्ति चेयम्। तस्माद् विशिष्टतरः पुत्रो दुहितुः सकाशादित्युपपद्यते ॥

यदपि चोक्तम्,—"अविशेषेण पुत्राणां दायो भवति"—इति, तदप्यभ्रातृमतीपक्षे द्रष्टव्यम्। अथवा वेदस्मृत्योर्विरोधे वेददृष्ट एव धर्मो ज्यायान्, न स्मृतिदृष्टः †।

तस्मिंश्च वेदे "अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति" धर्मविदः,—येय मृग् वक्ष्यमाणा (६ ख०) "न जामये तान्वः"—इति। अथ-शब्दो विशेषाधिकारार्थः। "ज्येष्ठं पुत्रिकाया दृत्येके"—इति। यदा उत्सृष्टायां पुत्रिकायां पुत्रिकापितुरन्ये पुत्रा जायेरन्, तदा विभागकाले ज्येष्ठं भागं पुत्रिकायै च दद्याद्, यथाभाग मितरान्

---

* तथाच मनुः—"दौहित्र एव च हरेदपुत्रस्याखिलं धनम्"—इति ९, १३१।

† अत्रेदं मपि विचार्यं मस्ति—अविशेषेणेत्यस्य श्लोकस्यैकं खीकृतं भाष्यकृता यास्केन, न तु स्मृतित्वम् (२५९ पृ० ९ पं०), तत् कथ मुपपद्येतैतद् वचनं देवराजयज्वनि? वस्तुतोऽत्र मथवा-पत्नी निरर्थक एव, अपुत्रस्यैव पितुर्धनहरणे स्मृतीनां सम्मतिः १ म० ९, १३१ इत्यादयो द्रष्टव्याः।

पुत्रान् विभजेत्, * अभागा एव वितरा दुहितर इति। तदेतदनयर्चा निरुच्यते यथा दुहितॄणां भागो नास्तीति—॥ ५ ॥

न जामये तान्वो रिक्थ मारैक् चकार् गर्भं सनितुर्निधानम्। यदी मातरो जनयन्त वह्निं मन्यः कर्त्ता सुकृतोरन्य ऋन्धन्॥ न जामये भगिन्यै जामिरन्येऽस्यां जनयन्ति जा मपत्यं † जमतेर्वा स्याद्गतिकर्म्मणो निर्गमनप्राया भवति तान्व आत्मजः पुत्रो रिक्थं प्रारिचत् प्रादात्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य। यदी मातरो ‡ ऽजनयन्त वह्निम्। पुत्र मवह्निं च स्त्रिय मन्यतरः सन्तानकर्त्ता भवति पुमान् दायादोऽन्यतरोऽर्ज्जयित्वा जामिः प्रदीयते परस्मै॥ ६ ॥

इति तृतीयाध्यायस्य प्रथमः पादः॥ ३, १०

न जामये इति ६। "न 'जामये' भगिन्यै" "तान्वः आत्मजः" आत्मनो धियो जातः। स आत्मजः किं करोति? इति, 'रिक्थम् आरैक्'। 'रिक्थं' पैतृकं धनं 'न' "प्रादात्" न प्रददौ। किन्तर्हि तस्याः करोति? इति। उच्यते,—'चकार गर्भं सनितुर्निधानम्। "सनितुः हस्तग्राहस्य" भगिन्याः भर्त्तुः प्रसवसमर्थां करोति, पुष्णा-

* तथाच—"पुत्रिकायां कृतायान्तु यदि पुत्रो न जायते। समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः॥"—इति म० ९, १३४।

† "जनयन्त्यजैन मपत्यं"—क, ख।

‡ "यदि च मातरो" ङ, च।

§ ऋ० सं० २, १, ५ १।

तीत्यर्थः। किञ्च; 'यदी * मातरः' यत् पुत्रद्वयं मातरो जनयन्ति, "वङ्क्रिं" च वोढारं "पुत्रम्" "अवङ्क्रिं च" अवोढ्रीं स्त्रियम्, तयोर्द्वयोरपि वोढ्रवोढ्र्योः पुत्र्योः † "अन्यतरः" एकतरः 'कर्त्ता' "सन्तानकर्त्ता भवति"। कतमः? यः "पुमान्" स एव "दायादः" दायाद्यार्हः, नेतरः कन्याख्यः। किञ्च; तयोरुभयोरपि 'सुकृतोः' सुकृतयोः सुतरा मेकेनापि प्रयत्नेन कृतयोरुत्पादितयोः 'अन्य क्षन्धन्' "अन्यतरोऽर्द्धयित्वा" सुकृतोऽपि सन् "जामिः" जाम्याख्यो भगिन्याख्यः "प्रदीयते परस्मै" न कस्माच्चिदप्यवस्थाया ममावात्मीयो भवतीत्यभिप्रायः॥ एव मस्या रूचिं 'न जामये तान्वो रिक्थ मारैक्' इति न दुहितरो रिक्थभागिन्यो भवन्ति, नैताः सन्तान-कर्मणि पितुरुपतिष्ठन्ते, वर्द्धयित्वा ह्येताः परस्मै दीयन्ते, तस्माद्-भागा एता इति॥

यत् पुनरुक्तं पुंसोऽपि दानातिसर्गविक्रया विद्यन्त इति ‡, तत् कदाचित् केनचिन्निमित्तेन भवति, स्त्री तु निसर्गेणैव दीयते विक्रीयते विसृज्यते वा; सा हि परार्थ मेवोत्पद्यते, तस्माद्भागा इति ॥६॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)
प्रथमः पादः॥ ३, १.

---

* "निपातस्य च (पा० ६, ३, १३६)"—इति दीर्घः।

† "वङ्क्रिं" 'पुमान् स्त्रिया (पा० १, २, ६७)'—इति वङ्क्रेः शेषः।"—इति शायणः।

‡ १५९ पृ० १३ पं०। टीकायामपि २६४ पृ० ११ पं०।

॥ द्वितीयः पादः ॥

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः कस्मान्मत्त्वाकर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मनस्यतिः पुनर्मनस्वीभावे मनोरपत्यं मनुषो वा तच्च पञ्चजना इत्येतस्य निगमा भवन्ति ॥ १ (७) ॥

प्रसक्तानुप्रसक्त मुक्तम्, तद्यथा—'जनयितुः प्रजा'—इत्येव मादि *; प्रकृत मिदानी मुच्यते;—

"मनुष्यनामान्युत्तराणि पञ्चविंशतिः" †। मनुष्याणां नामानि 'मनुष्यनामानि', 'उत्तराणि' प्रकृतेभ्योऽपत्यनामभ्यः; अपत्यान्येव हि विद्वद्भानि सन्ति मनुष्या इत्युच्यन्ते। कियन्ति पुनस्तानि? 'पञ्चविंशतिः' पञ्च च विंशतिश्च पञ्चविंशतिः (२५)। कतमानि पुनस्तानि? "मनुष्याः, नराः"—इत्येव मादीनि ‡॥

आह;—"मनुष्याः कस्मात्"? उच्यते;—"मत्त्वा" ज्ञात्वा, तत एते "कर्माणि" "सीव्यन्ति" तन्वन्तीत्यर्थः। अथ वा "मनस्यमानेन" प्रजापतिना "सृष्टाः"। "मनस्यतिः पुनः" अयं धातुः "मनस्वीभावे"। मनस्वीभावो नाम प्रहृष्टेन प्रहृष्यता प्रजापतिनैते सृष्टाः §। अथ वा "मनोरपत्यं" मनुष्याः ॥ "मनुषो वा" ॥

---

* २५२ पृ० ८ पं०। इतो तु २५४ पृ० ११ पं०।
† १भा० १७९ पृ० १ख०।
‡ १भा० १७९—१८७ पृ०।
§ मनुः १अ० ३२—५१ श्लो०।
॥ "मनोर्जातावञ्यतौ बुक् च"—इति पा० ४, १, १६१ सू०।

"तत्र पञ्चजना इत्येतस्य निगमा भवन्ति" सन्दिग्धाः, तत्रेय मृगुदाहरणम्। तद्यथा ;—॥ १ ॥

तदु॒ द्य वा॒चः प्र॑थ॒मं म॑सीय॒ येना॑सु॒रा॒ँ अ॒भि दे॒वा अ॑साम। ऊ॒र्ज्जाद उ॒त य॑ज्ञिया॒सः॑ पञ्च॑जना॒ मम॑ होत्रं जुषध्वम्॥ तद्द्य वाचः परमं मंसीय येनासुरानभिभवेम देवा असुरा असुरता स्थानेष्वस्ता स्थानेभ्य इति वापि वासुरिति प्राणनामास्तः शरीरे भवति तेन तद्वन्तः सोऽदेवानसृजत तत्सुराणां सुरत्व मसोरसुरानसृजत तदसुराणा मसुरत्व मिति विज्ञायते। ऊर्ज्जाद उत यज्ञियासः। अन्नादाश्च यज्ञियाश्चोर्गित्यन्ननामोर्ज्जयतीति सतः पक्वं सुप्रवृक्ण मिति वा। पञ्चजना मम होत्रं जुषध्वं गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवो निषादः कस्मान्निषण * मस्मिन् पापक मिति नैरुक्ताः। यत् पाञ्चजन्यया विशा। पञ्चजनीनया विशा पञ्च पृक्ता सङ्ख्या स्त्रीपुन्नपुंसकेष्वविशिष्टा बाहुनामान्युत्तराणि द्वादश बाहू कस्मात् प्रबाधत आभ्यां कर्माण्यङ्गुलिनामान्युत्तराणि द्वाविंशतिरङ्गुलयः कस्मादग्रगामिन्यो भवन्तीति वाग्रगालिन्यो भवन्तीति वा-

* "निषादः कस्मान्निषदनो भवति निषण" ङ, च।

ग्रकारिण्यो भवन्तीति * वाङ्ना भवन्तीति वाञ्चना† भवन्तीति वापि वाभ्यञ्चनादेव‡ स्युस्तासा मेषा भवति ॥ २ (८) ॥

तदद्य वाचः०—०जुषध्वम्§। सौचीकस्याग्नेरार्षम्। तस्य विश्वैर्देवैः सह संवादः। तत्रेयं होत्रजपे विनियुक्ता। "तद्" वीर्यं "वाचः" "परमम्" उत्कृष्टम् अहम् "अद्य" "मंसीय" मन्ये जाने इत्यर्थः। तेन वीर्येण किम्? इति। "येन असुरान् अभिभवेम" वयम्। 'ऊर्ज्जादः' अन्नभक्षयितारः। अपि च हे 'यज्ञियासः' यज्ञसम्पादिनः 'देवाः' यूयम्। अपि च हे 'पञ्चजनाः' मनुष्याः! निषादपञ्चमा वर्णाः! 'मम' इदं 'होत्रं' 'जुषध्वम्' अनुगृह्णीध्वम्॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"असुराः अ-सुरता स्थानेषु" ते हि न सुष्ठु रताः स्थानेषु, चपला इत्यर्थः। अथ "वा" "अस्ताः स्थानेभ्यः इति" प्रच्यविता देवैरित्यर्थः। "अपि वा असुरिति प्राणनाम"। स हि "अस्तः" क्षिप्र इव "शरीरे भवति" तस्य हि तत्र नित्यमवस्थान मित्यभिप्रायः। "तेन" हि "तद्वन्तः" भवन्ति। रो मत्वर्थे॥। अथ वा इदं मन्यद् ब्राह्मणोक्तं निर्वचनं स्यात् "सेऽर्दैवानसृजत" सुरिति प्रशस्तनाम। प्रशस्तादात्मनः प्रदेशात् प्रजापतिः

---

* इत उत्तरं "वाग्यारिण्यो भवन्तीति"—इत्यधिकम् ङ, च।

† "वाङ्ना" क, ख, ग।

‡ "वाभ्यञ्चनादेव स्युः" क, ख, ग।

§ ऋ० सं० ८, १, १२, ४।

॥ १ भा० ७२ सू० (२९) द्रष्टव्यम्।

सुरानसृजत, ऊर्ज्जेभ्यः प्राणेभ्यः। तदुक्तम्,—'उध्वे मुदत्वणत्पूर्वपक्षः पञ्चदशः, तेन "सोर्देवानसृजत तत् सुराणां सुरत्वम्"—इति विज्ञायते। एव मेव प्रातिलोम्येन "असोरसुरानसृजत"। असुरिति प्रशस्तप्रतिषेधः। अप्रशस्तादात्मनः प्रदेशात् प्रजापतिरसुरानसृजत। तदुक्तम्,—'अर्वाङ् वा तिरदपरपक्षः, तेन असुरानसृजत'—इति। "ऊर्ज्जाद उत यज्ञियासः, अन्नादाश्च यज्ञियाश्च"। "ऊर्गित्यन्ननाम"; तद्धि "ऊर्ज्जयति" बलिष्ठं करोतीत्यर्थः। अथ "वा" "पक्वम्" एतत् "सुप्रक्वणम्" भवति "इति"; ककाररेफसामान्यात् पचेर्व्रश्चतेर्वा स्यात्। द्वयोरपि वा तद्धि पक्वं सन्मृदुत्वात् सुच्छेद्यं भवति॥

"पञ्चजना मम होचं जुषध्वम्"। एतदत्र सन्देहपद मेक मुद्धृत्य प्रदर्शितम्। "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके" मन्यन्ते*। "चत्वारो वर्णाः, निषादः पञ्चमः;—इत्यौपमन्यवः"। निषद्य हन्तीति निषादः प्राणिबधजीवनः†। अथ वा "निषण मस्मिन् पापक मिति" निषादः सौधन्वनाः‡ इत्येके मन्यन्ते। स च रथकारः §।

---

* "पाञ्चजन्यं वा एतदुक्थं यद् वैश्वदेवं, सर्वेषां वा एतत् पञ्चजनानां मुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां चैतेषां वा एतत्पञ्चजनानां मुक्थं सर्वं एनं पञ्चजना विदुः"—इति ऐ० ब्रा० ३, ३७।

† मनु० १० अ० ४८ श्लो०।

‡ सौधन्वनाः सुधन्वनः पुत्राः"—इति सायणः (ऋ०सं०म०१, सू० ११०, ऋ० ४)। "ऋभूर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः"—इति निरु० दै० का० ११, १, ९।

§ "रथं ये चक्रुः सुहवं सुचेतसोऽविष्टरन्तं मनसस्परि ध्यया। तॉ ऊ ण्वस्य सवनस्य पीतये विष्णो वाजा ऋभवो मादयामसि॥"—इति ऋ० सं० ३, ७, ७, ३।

तस्य भिन्नकाल माधानं श्रूयते;— "वर्षासु रथकारः"। "ऋभूणां त्वा इति रथकारस्य" इति च मन्त्रभेदः;—"सौधन्वना ऋभवः (ऋ० सं० १,७,३०,४)"—इति च मन्त्रलिङ्गात्॥

यथा तु पञ्चजन-शब्देन मनुष्या एव निषादपञ्चमा वर्णा उच्यन्ते, तथैव निराह;—"यत्पाञ्चजन्यया विशा०—०स त्वयः"*। प्रगाथेन दृष्टा। इय मनुष्टुप्। ऐन्द्री। पृष्ठस्य पञ्चमेऽहनि महत्वतीयग्रस्तस्य प्रतिपदेषा। 'यत्' यदा "पञ्चजनीनया विशा" पञ्चजनसमुदायलक्षणया सहितैः स्तोतृभिः ऋत्विग्भिः अवर्षति 'इन्द्रे' वर्षार्थिभिः 'घोषाः' स्तुतीः 'अस्रक्षत' असृज्यन्त। निषादपञ्चमा वर्णा आर्त्ताः सन्तो वर्षाभावे अस्तुवतैव इन्द्रम्—'वर्ष भगवन्!'—इत्येव मर्थयन्तः। अत इद मुक्तम्,—यदा पाञ्चजन्यया विशा सह घोषा ऋत्विग्भिः असृज्यन्तेति। तदा किम्? इति। तदा उपश्रुत्य स इन्द्रः ताभिः प्रह्लादितचेताः 'अस्तृणाद्' अहन् वर्षार्थं मेघान्। 'बर्हणा' परिवृढेन वज्रेण, परिवृढानि वा मेघजालानि 'विपः' विपाट्, पिता मेघानां मेघावी वा 'अर्यः' ईश्वरः कृत्स्नस्य जगतः। कस्मात् पुनरस्तृणात्? यस्मात् 'मानस्य स त्वयः' मानस्य दर्पस्य बलस्य वीर्यस्य स त्वयः निवासः, तस्मात् अस्तृणात्। अवीर्यो हि स्तूयमानः किं कुर्यात् परितुष्टोऽपि? अथवा मानस्य सत्कारस्य पूजायाः स इन्द्रः त्वयो निवासो भाजन मिति मन्वानैः स्तोतृभिः वर्षार्थिभिः सत्कृतः, तान् वर्षप्रदानेन प्रतिसत्कारयिष्यन् अस्तृणात् मेघान्। अपि वा अस्य

* "यत्पाञ्चजन्यया विशेन्द्रे घोषा अरुक्षत। अस्तृणाद् बर्हणा विपो मानस्य स त्वयः॥"—इति ऋ० सं० ६, ४, ४२, १।

जगन्निर्माणस्य देवादेः स्थावरान्तस्य स इन्द्रः क्षयो निवास आश्रयो यस्मात् ततो मेघानस्तृणात्। अनावृष्टिद्वारेणास्य जगतः विनाशो माभूत् कथन्नामेत्यभिप्रायः॥

"पञ्च पृक्ता सङ्ख्या"। सा हि "स्त्रीपुन्नपुंसकेष्वविशिष्टा" एव भवति। तद्यथा,—पञ्च स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि इति। एवं पञ्चशब्दे स्त्रीपुन्नपुंसकेषु विशेषो नास्ति *॥

"बाङ्नामान्युत्तराणि द्वादश" †। बाङ्नामानि 'बाङ्नामानि', 'उत्तराणि' प्रकृतेभ्यो मनुष्यनामभ्यः। मनुष्याणा मेव हि भवन्तीति मनुष्यनामभ्य उत्तराणि 'बाङ्नामानि'। कियन्ति पुनस्तानि? 'द्वादश' द्वे च दश च द्वादश। कतमानि पुनस्तानि? "आयती, च्यवाना, अभीशू"—इत्येव मादीनि ‡। आमिश्रीभवतः कर्मभिरेताविति आयती। च्यावयितारौ कर्मणां च्यवाना। अभीशू अभ्यश्नुवाते कर्माणि। इत्येवमादि योज्यम्॥

आह;—"बाङ् कस्मात्"? उच्यते;—"प्रबाधत आभ्यां कर्माणि" प्रकर्षेण बाधते प्रक्षिपत्याभ्यां कर्माणि॥

"अङ्गुलिनामान्युत्तराणि द्वाविंशतिः" §। अङ्गुलीनां नामानि 'अङ्गुलिनामानि', 'उत्तराणि' प्रकृतेभ्यो बाङ्नामभ्यः; बाङ्कोरेव ह्यङ्गुलयो भवन्तीति बाङ्नामभ्य उत्तराणि अङ्गुलिनामानि। कियन्ति पुनस्तानि? 'द्वाविंशतिः' द्वे च विंशतिश्च द्वाविंशतिः।

---

* १भा० १८५—१८७ पृ० (२१)।
† १भा० १८८ पृ० ४ख०।
‡ १भा० १८८—१९१ पृ०।
§ १भा० १९१ पृ० ५ख०।

कतमानि पुनस्तानि ? "अश्वयः, अक्षाः, क्षिपः"—इत्येव मादीनि * । बाह्वग्रे अवस्थिता अवन्त्येताः कर्माणीति अश्वयः । अक्षाः परिमाणात् एताः। क्षिप्यते आभिः क्षेप्तव्यं द्रव्य मिति क्षिपः। इत्येव मादि ॥

आह ;—"अङ्गुलयः कस्मात्" ? उच्यते ;—"अग्रगामिन्यो भवन्ति" अग्रे ह्येताः कर्मसु गच्छन्ति। अथ"वा" "अग्रगालिन्यो भवन्ति" अग्रे ह्येता गलन्ति उदकानि। "अग्रकारिण्यो वा भवन्ति" अग्रे ह्येताः कर्माणि कुर्वन्ति। "अङ्कना भवन्ति वा" तथाहि,—यो ह्येताभिरभिहन्यन्तेऽभावङ्कित इव भवन्ति। "अपि वा अभ्यञ्जनादेव स्युः" एता हि तं त मर्थ माभिमुख्येनाञ्जन्ति गच्छन्ति। ये तु "अभ्यञ्जनाः"—इत्यभिधीयन्ते, तेषा मभ्यज्यत आभिरिति † ॥

"तासाम्" अङ्गुलीनाम् "एषा" निर्वाचिका ऋग् "भवति", —॥ २ ॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः। दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहन्त्यः ॥ अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि कक्ष्याः प्रकाशयन्ति कर्माणि योक्त्राणि योजनानीति व्याख्यात मभीशवोऽभ्यश्नुवते कर्माणि। दश धुरो दश युक्ता वहन्त्यः। धूर्धूर्वतेर्वधकर्मण इय मपीतरा धूरे-

* १भा० १९१—१९९ पृ० ।

† एवञ्च 'अङ्कना भवन्ति', 'अञ्जना भवन्ति'—इति द्विविधोऽपि पाठः सम्मतो हलिकारस्य ।

तस्मादेव विहन्ति वहं धारयतेर्वा कान्तिकर्माण उत्तरे धातवोऽष्टादशान्ननामान्युत्तराण्यष्टाविंशतिरन्नं कस्मादानतमभूतेभ्योऽत्तेर्वाप्तिकर्माण उत्तरे धातवो दश। बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्माद्बलं भरं भवति बिभर्त्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्विनोतीति सतो गोनामान्युत्तराणि नव क्रुध्यतिकर्माण उत्तरे धातवो दश क्रोधनामान्युत्तराण्येकादश गतिकर्माण उत्तरे धातवो द्वाविंशशतं क्षिप्रनामान्युत्तराणि षड्विंशतिः क्षिप्रं कस्मात् सङ्क्षिप्तो विकर्षोऽन्तिकनामान्युत्तराण्येकादशान्तिकं कस्मादानीतं भवति सङ्ग्रामनामान्युत्तराणि षट्चत्वारिंशत् सङ्ग्रामः कस्मात् सङ्गमनाद्वा सङ्गरणाद्वा सङ्गतौ ग्रामाविति वा तच्च खल्वेतस्य निगमा भवन्ति॥ ३ (९) ॥

दशावनिभ्य इति *। अवनय इत्येव मादीनि नद्यादिनामभिः सन्दिह्यते, तदर्थ मिद मुदाहियते। चिष्टुबेषा। अर्बुदस्य काद्रवेयस्य सर्पस्यार्षम्†। ग्रावस्तुतौ विनियुक्ता। दशभिरवनिभिः ये उपचर्यन्त ग्रावाणः, सोमाभिषवकर्मणि प्रवृत्ते, ते दश अवनयः;‡ तेभ्यो 'दशावनिभ्यो' हे ऋत्विजः! यूय मपि 'अर्चय' स्तुतीः प्रोच्चारयतेत्यर्थः।

* ऋ० सं० ८ ४, ३०, २।

† "तान् होवाचार्बुदः काद्रवेयः सर्पऋषिरेतत्" — इति ऐ० ब्रा० ६, १, १।

‡ भा० १९५ पृ० (११)।

एव मेव दशभिः कक्ष्याभिर्ये उपचर्यन्ते, ते दशकक्ष्याः; * तेभ्यो 'दशकक्ष्येभ्यः' अर्चत। दशभिर्योक्त्रैः ये उपचर्यन्ते, ते दशयोक्त्राः †; तेभ्यो 'दशयोक्त्रेभ्यः' अर्चत। दशभिर्योजनैः ये उपचर्यन्ते, ते दशयोजनाः ‡; तेभ्यो 'दशयोजनेभ्यः' अर्चत। दशभिरभीशुभिर्ये उपचर्यन्ते, ते दशाभीशवः § ; तेभ्यो 'दशाभीशुभ्यः' अर्चत। 'अजरेभ्यः' अजरणधर्मभ्यः 'दश धुरः' ॥ य एते यावाणः तेभ्यः अर्चत। दशभिर्दशभिरङ्गुलीभिर्यं एते युक्ता वहन्ति यावाणः, तेभ्य एभ्यो 'दश युक्ता वहन्त्यः' अर्चत॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"अवनयोऽङ्गुलयो भवन्ति" ता हि "अवन्ति कर्माणि" रक्षन्ति भक्षयन्ति वा क्षिपयन्तीत्यर्थः। "कक्ष्याः" अङ्गुलय एव; ता हि "प्रकाशयन्ति कर्माणि" प्रकटीकुर्वन्तीत्यर्थः। "योक्त्राणि"—इत्येतत् पदं "योजनानि इति" अनेन पदेन व्याख्यातम्। योजनानीत्येतत् निगदसिद्ध मेव। "अभीशवः" अपि अङ्गुलय एव; ता हि "अभ्यश्नुवते कर्माणि" व्याप्नुवन्तीत्यर्थः। अनेकैर्नामभिरङ्गुलय एवोक्ताः अनेककियाशक्त्युपप्रदर्शनाय। एते यावाण एव मनेककियायोगिनीभिरङ्गुलीभिर्गृहीतास्तदर्थं मर्चतेति। "धूः धूर्वतेः वधकर्मणः" धरति धूर्वतीति वधकर्मसु पठितम्¶। "दश

---

* १भा० १९४ सू० (१०)।
† १भा० १९७ सू० (११)।
‡ १भा० १९७ सू० (१७)।
§ १भा० १९८ सू० (१०)।
‖ १भा० १९७ सू० (१८)।
¶ १भा० २८१ सू० (४)।

मपीतरा धूः" अनडुहादिसम्बन्धिनी। "एतस्मादेव" धातोः वध-कर्मणः। मापि "विहन्ति वहम्" अनडुहोऽस्य वा। "धारयतेर्वा" सा हि धारयत्यश्वं मनड्वाहञ्च ॥

"कान्तिकर्माण उत्तरे धातवोऽष्टादश" *। खल्वयं पुरुषो व्याख्यातः सवाङ्गः साङ्गुलः, तं खलु काम एव प्रथम मा विवेशेति उत्तरे कान्त्यर्था इत्यर्थः। यदपि ह्यकान्तं भवति, तदप्यङ्गुलीभिरेव कान्तं क्रियत इत्येतेऽङ्गुलिनामभ्यः 'उत्तरे कान्तिकर्माणः' समाम्नाताः। कियन्तः पुनस्ताः? इति। 'अष्टादश' अष्टौ च दश च अष्टादश (२८)। कतमे पुनस्ते? इति। "वश्मि, उश्मसि, अत्रवेति" —इत्येव मादयः † ॥

"अन्ननामान्युत्तराणि अष्टाविंशतिः"‡। अन्नस्य नामानि 'अन्ननामानि', 'उत्तराणि' प्रकृतेभ्यः कान्तिकर्मभ्यः; अन्न मेव हि कान्तं सर्वभावेभ्यो भवतीति कान्तिकर्मभ्यः उत्तराणि अन्ननामानि। कियन्ति पुनस्तानि? 'अष्टाविंशतिः' अष्टौ च विंशतिश्च अष्टाविंशतिः (२८)। कतमानि पुनस्तानि? "अन्धः, वाजः, पाजः, प्रयः, पृचः"—इत्येव मादीनि §। अन्ध इत्ययं निर्वक्ष्यति ॥। वाजयितव्यं पूजयितव्यम् एतद् भोजनायोपस्थितं भवतीति वाजः। पीयत इति पाजः। प्रयः पानादेव ॥

---

* १भा० १९९ पृ० ९ ख०।
† १भा० १९९—२०२ पृ०।
‡ १भा० २०२ पृ० ७ ख०।
§ १भा० २०४—२१२ पृ०।
॥ नैग० का० ५, १, १।

आह;—"अन्नं कस्मात्"? उच्यते;—"आ" आभिमुख्येन ह्येतत् "नतं" प्रह्वीभूतं भवति भोजनाय भूतानाम्। "अत्तेर्वा" अद्यते अत्ति च भूतानि, तस्मादन्नं तदुच्यत इत्युक्तम्॥

"अत्तिकर्माण उत्तरे धातवो दश"*। अन्न मेव ह्यद्यतइत्यन्ननामभ्य 'उत्तरेऽत्तिकर्माणः' समाम्नाताः। कियन्तस्ते? इति 'दश' (१०)। कतमे पुनस्ते? "आवयति, भर्वति, बभस्ति"—इत्येव मादयः†॥

"बलनामान्युत्तराण्यष्टाविंशतिः"‡। बलस्य नामानि 'बलनामानि', 'उत्तराणि' प्रकृतेभ्योऽत्तिकर्मभ्यः; य एव ह्यदन्ति त एव बलवन्तो भवन्तीत्यत्तिकर्मभ्य उत्तराणि बलनामानि समाम्नातानि। कियन्ति पुनस्तानि? 'अष्टाविंशतिः' अष्टौ च विंशतिश्च अष्टाविंशतिः (२८)। कतमानि पुनस्तानि? "ओजः, पाजः, शवः"—इत्येव मादीनि§। ओजः ओजतेर्वाजते वा। इत्येव मादि।

आह;—"बलं कस्मात्"? उच्यते;—तद्धि "भरं भवति" भ्रियते (भृ०उ०) हि सः, योऽबलिष्ठो भवति। "बिभर्त्तेः" वा (जु०उ०) स एति॥

"धननामान्युत्तराण्यष्टाविंशतिरेव"॥। य एव बलवन्तो भवन्ति त एव धनं प्राप्नुवन्ति इति बलनामभ्यः 'उत्तराणि धननामानि'।

---

* १भा० ११२ पृ० ८ ख०।
† १भा० ११३—११४ पृ०।
‡ १भा० ११५ पृ० ९ ख०।
§ १भा० ११५—१२१ पृ०।
॥ १भा० १२१ पृ० १० ख०।

कियन्ति पुनस्तानि? 'अष्टाविंशतिरेव' (२८)। बलनामान्युत्तराण्यष्टाविंशतिः इमान्यष्टाविंशतिरेवेत्येव शब्दः। कतमानि पुनस्तानि? "मघम्, रेकणः, रिक्थम्, वेदः"—इत्येवम्प्रभृतीनि *। रिच्यत इति रेकणः। अतिरिच्यमान मेतदिहैव तिष्ठति म्रियमाणस्येति रिक्थम्। विद्यते लभ्यते एव इति वेदः। इत्येव मादीनि॥

आह;—"धनं कस्मात्"? उच्यते;—"धिनोतीति सतः" सत इति कारकावधारणम्, धिनोतिस्तर्पणार्थः †॥

"गोनामान्युत्तराणि नव"‡। गवां नामानि 'गोनामानि', प्रकृतेभ्यो धननामभ्यः; गाव एव हि प्रकृष्टं धन मिति धननामभ्यः 'उत्तराणि' गोनामानि। कियन्ति पुनस्तानि? 'नव' (९)। कतमानि पुनस्तानि? "अघ्न्या, उक्षा, उक्षिया"—इत्येव मादीनि§। अघ्न्या अहन्तव्या भवति। इत्येव मादि निर्वचनम्। उक्तनिर्वचनो हि गो-शब्दः॥, अतो गौः कस्मात् इति न ब्रवीति॥

"क्रुध्यतिकर्माणः उत्तरे धातवो दश"¶। धनार्थ मेव हि गवार्थं च क्रोधो भवतीति गोनामभ्यः 'उत्तरे' क्रुध्यर्थाः समाम्नाताः। कतमे पुनस्ते? इति। "रेऋते, हेऋते"—इत्येव मादयः**॥

क्रुध्यर्थसम्बन्धेनैव "क्रोधनामान्युत्तराणि"। कियन्ति पुनस्तानि?

---

* १भा० २२२—२२९ सू०।
† 'जिवि दिवि धिवि हिवि प्रीणनार्थाः' भू० प०। पा० ६, ९, ८०।
‡ १भा० २२९ सू० ११ ख०।
§ १भा० २२९—२३२ सू०।
॥ १७५ सू० १ ख०।
¶ १भा० २३१ सू० १९ ख०।
** १भा० २३२—२३३ सू०।

"एकादश" (१ १) *। कतमानि पुनस्तानि? "हेऊः, हरः, हृणिः, † त्यजः" इत्येव मादीनि ‡। हे अरे इत्यनेनाविष्टो भवतीति हेऊः। नीचैरनेन नरकं प्रति ह्रियते इति हरः। नीचैरनेन ह्रियते नरकं प्रतीति हृणिः। त्यजत्यनेनाविष्टो धर्मं जहातीति त्यजः। इत्येव मादि॥

"गतिकर्माण उत्तरे धातवो द्वाविंशशतम्" (१ २ २)§। क्रुद्धा एव सन्तः सुतरां गच्छन्तीति क्रोधनामभ्यः 'उत्तरे' 'गतिकर्माणः' समाम्नाताः॥॥

"क्षिप्रनामान्युत्तराणि षड्विंशतिः"¶। गतिसम्बन्धादेव 'क्षिप्रनामानि उत्तराणि' समाम्नातानि। कियन्ति पुनस्तानि? 'षड्विंशतिः' षट् च विंशतिश्च षड्विंशतिः (२ ६)। कतमानि पुनस्तानि? "नु, मनु, द्रवत्"—इत्येव मादीनि **। नुन्न इव क्षिप्रं गच्छतीति नु। मां क्षिणोति मां क्षिणोतीति सर्व एव हि क्षिप्रगामिनं मन्यन्ते इति मनु। द्रवत् द्रवतेः। इत्येव मादि॥

आह;—"क्षिप्रं कस्मात्"? उच्यते;—"विकर्षः" विकृष्टो विक्षिप्तोऽर्थः "सङ्क्षिप्तः" क्षिप्र मुच्यते॥

"अन्तिकनामान्युत्तराण्येकादश"††। य एव हि क्षिप्रं गच्छति,

* १भा० २३३ पृ० १३ ख०।
† १भा० २३४ पृ० (२) द्रष्टव्यम्।
‡ १भा० २३४—२३६ पृ०।
§ १भा० २३६—२३८ पृ० १४ ख०।
॥ १भा० २३८—२५७ पृ०।
¶ १भा० २५७ पृ० १५ ख०।
** १भा० २५८—२६४ पृ०।
†† १भा० २६४ पृ० १६ ख०।

स एवाभिप्रेतार्थस्य अन्तिके समीपे भवन्तीति क्षिप्रनामभ्यः 'उत्तराणि' 'अन्तिकनामानि'। कियन्ति? 'एकादश' (११)। कतमानि पुनस्तानि? "तक्षित्, आसात्"—इत्येव मादीनि *। ताच्यतेऽस्मिन् प्रदेशेऽवस्थित इति तडित् इत्युच्यते। अन्तिकप्रदेशोपासन्नः स आसात्। इत्येव मादि योज्यम्।

आह;—"अन्तिकं कस्मात्"? उच्यते;—तद्धि "आनीतं भवति" सन्निकृष्टत्वात्॥

"सङ्ग्रामनामान्युत्तराणि षट्चत्वारिंशत्" †। सङ्ग्रामस्य नामानि 'सङ्ग्रामनामानि', 'उत्तराणि' प्रकृतेभ्योऽन्तिकनामभ्यः; अन्तिकीभूतानामेव हि सङ्ग्रामो भवतीत्यन्तिकनामभ्य उत्तराणि सङ्ग्रामनामानि। कियन्ति पुनस्तानि? 'षट्चत्वारिंशत्' (४६)। कतमानि पुनस्तानि? "रणः, विवाक्, नदनुः"—इत्येव मादीनि ‡। रणन्त्यस्मिन् शूरा इति रणः। विविधा शूराणां यत्र वाग् भवतीति विवाक्। नदन्त्यस्मिन् शूरा इति नदनुः। इत्येव मादि योज्यम्॥

आह;—"सङ्ग्रामः कस्मात्"? उच्यते;—"सङ्गमनाद्वा"; सङ्गच्छन्ति हि परस्परेण तत्र योधाः। "सङ्गरणाद् वा" सङ्गृणन्ति संशब्दायन्ते शूरा यत्र परस्परेण। "सङ्गतौ ग्रामाविति वा"। ग्राम इति सङ्घात इत्युच्यते। परस्परं जीगीषया समागतौ तत्र भवतः॥

"तत्र" षट्चत्वारिंशत्के सङ्ग्रामनामगणे "खले"§—"इत्येतस्य"

---

* १भा० २६४—२६६ पृ०।

† १भा० २६६—२७७ पृ० १७ ख०।

‡ १भा० २६७—२७८ पृ०। तत्र "विखादः"—इति द्वतीयं पदम् (२६८ पृ०)।

§ १भा० २७६ पृ० (२८)।

नाम्नः "निगमाः" सन्दिग्धाः "भवन्ति", इतरोऽपि धान्य-खल इत्युच्यते सङ्ग्रामोऽपि। तचैवं सति अस्या ऋचि वक्ष्यमाणायां * 'खल न पर्षान्'—इति व्यपदेशाद् विभागो लक्ष्यते सस्यखल-सङ्ग्राम-खलयोः—॥ ३ ॥

अभीइद् मेकं मेको अस्मि निष्षाढ†भी द्वा किमु चयः करन्ति। खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्ति शचवोऽनिन्द्राः ॥ अभिभवामीद् मेक मेको ऽस्मि ‡ निष्षहमाणः § सपत्नानभिभवामि द्वौ किं मा चयः कुर्वन्त्येक इता सङ्ख्या द्वौ द्रुततरा सङ्ख्या चयस्तीर्णतमा सङ्ख्या चत्वारश्चलिततमा सङ्ख्याष्टावश्नोतेर्नव न वननीया नावाप्ता वा दश दस्ता दृष्टार्था वा विंशतिर्द्विदशतः शतं दशदशतः सहस्रं सहस्रदशतं नियुतं प्रयुतं॥ तत्तदभ्यस्त मर्बुदो ¶ मेघो भवत्यरण मम्बु तद्दोऽम्बुदोऽम्बुमङ्गातीति** वाम्बुमङ्गवतीति वा स यथा महान् बहुर्भवति वर्षस्त†† दिवार्बुदम्। खले न

---

* इत उत्तरस्मिन्नेव खण्डे (९ पं०)।
† "निःषाल" क। "निष्षाल" ग, ङ, च।
‡ "मेको ऽस्मि" क ख, ग।
§ "निःषहमाणः" ङ, च।
‖ "प्रयुतं नियुतं" क, ख, ग।
¶ "मम्बुदो" ङ, च।
** "तदोऽम्बुमङ्गातीति" क, ख, ग।
†† "वर्षस्त" च।

पर्षान् प्रति हन्मि भूरि। खल इव पर्षान् प्रतिहन्मि भूरि खल इति सङ्ग्रामनाम खलतेर्वा खलतेर्वाय मपीतरः खल एतस्मादेव समास्कन्नो भवति। किं मा निन्दन्ति शचवोऽनिन्द्राः। य इन्द्रं न विदु*रिन्द्रो ह्यह मस्म्यनिन्द्रा इतर इति वा व्याभिकर्माण उत्तरे धातवो दश तच्च द्वे नामनी† आक्षाण आश्नुवान आपान आप्नुवानो वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् तच्च वियात इत्येतद् वियातयत इति वा‡ वियातयेति वा। आखण्डल प्र ह्रूयसे। आखण्डयितः §। तद्धि॥ दित्यन्तिकवधयोः संसृष्टकर्म¶ ताडयतीति** सतः॥ ॥ ४ (१०) ॥

"अभीऽ३द मेक०—°०ऽनिन्द्राः"††। वैकुण्ठस्येन्द्रपुत्रस्येय मार्षम्। जगती। दशरात्रस्य नवमेऽहनि निष्केवल्ये शस्यते। आध्यात्मिको मन्त्रः। "इदं" तावत् जगत् 'एकः' एव अहम् 'अभि अस्मि' "अभि भवामि", अभि भूय च भवामि। अस्य सर्वस्याह मेकोऽधिपतिरित्यभिप्रायः। कथम्पुनरभिभवाम्यह मेतत्? "एकम् एकः" 'निष्-

* "न विविदु" ङ, च।
† "नाम्नी" क, ख, ग।
‡ नैतद् "वा"-पदं दृश्यते ङ-च-पुस्तकयोः।
§ "आखण्डयितः खण्डं खण्डयतेः" ङ, च।
‖ 'तल्लि" क, ख। 'तडि" ङ, च।
¶ "संसृष्टं कर्म" क।
** "ताडयतीति' क, ख, ग।
†† ऋ० सं० ८, १, ९, २।

षाट्' "निषहमाणः" "सपत्नान्" शत्रून् निश्चयेनाधिकं वाभिभवामीत्यर्थः। सहतिरभिभवार्थश्छन्दसि। कथमुनरभिभवन् सपत्नानह मस्य जगत आधिपत्ये वर्त्ते? यावदेकं तावदागतं सन्त मेक एवाभिभवामि सपत्नम्, 'अभी द्वा' "द्वौ" अप्यागतौ एक एव "अभि भवामि"। "किम्" 'उ' "त्रयः" 'करन्ति' त्रयोऽपि युगपदागताः सन्तः एकाकिनोऽपि मम किं "कुर्वन्ति"? न किञ्चिदपीत्यभिप्रायः। किञ्च 'खले न पर्षान्' गाह्यमाने हन्यमाने गम्यमानेऽन्ने। एकः खलशब्दः उपमानम्, उपमासम्बन्धात्; यथा 'खले' खलस्थाने कर्षकेण 'पर्षान्' बहूनपि सञ्चितान् अप्रतिबन्धेन क्षुधेरन्, एव मह मपि भूरीनपि शत्रूनागतान् क्षणादेव तैरप्रतिबध्यमानः 'हन्मि'। त मेवम्प्रभावं सन्तं मां "किं निन्दन्ति शत्रवः?" नाहं निन्दार्हः, स्तव्योऽह मित्यभिप्रायः। अपि च "अनिन्द्राः", 'ये' माम् "इन्द्रं न विदुः" याथात्म्यतः, ते कथ मविज्ञायैव मां निन्दन्ति? नैतन्न्याय्य मित्यभिप्रायः। "अनिन्द्रा इतर इति वा" अथवा अनिन्द्राः सन्तः आत्मना कथ मिन्द्रं सन्तं मां निन्दन्ति? न तु नामेन्द्रत्वेनैवाह मतिरिक्तेभ्यः, अथ कथ मितरे अनिन्द्राः सन्तो न लज्जन्तीत्यभिप्रायः॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"एक इता सङ्ख्या" गता सङ्ख्या, अलं प्राप्तेत्यर्थः *। द्व्यादिकं वापीयं गन्ता। "द्वौ द्रुततरा सङ्ख्या" एकस्याः सकाशात्†। "त्रयस्तीर्णतमा सङ्ख्या" द्वयोः सकाशात्‡। प्रसक्तानु-

---

* "एकपदी" दै० का० ११, ४, १।

† 'द्विपदी" दै० का० ११, ४, १।

‡ "त्रिनाभि" नैग० का० ४, ४, १।

प्रसक्त मुच्यते;—"चत्वारश्चलिततमा सङ्ख्या" त्रिभ्यः सकाशात् *। "अष्टावश्नोतेः" ते हि सप्त सङ्ख्या व्याप्य वर्त्तन्ते †। "नव" इति या सङ्ख्या, सा "न वननीया" न सम्भजनीया भवति; नव-सङ्ख्या-युक्तायां हि तिथौ न कश्चिदप्यारम्भः क्रियते ‡। "दश" इति या सङ्ख्या, सा "दस्ता"; दशान्नैव हि § सङ्ख्या भवति। "दृष्टार्था वा" दृष्टार्थैव हि‖ दशाना मुपरि पुनः पुनः दृश्यते सङ्ख्या। तद्यथा;—एकादशेत्येव मादि। तस्माद् दृष्टार्थदर्शनाद् दशेत्युच्यते। "विंशति-र्द्विदशतः" द्विः दश विंशतिरित्युच्यते। "शतं दशदशतः" दशकृत्वोऽभ्यस्ता या दश, ताः समुदिताः शत मित्युच्यते¶। "सहस्रं सह-स्रत्"**। सह इति बलनाम††, तेन तदत्; दुर्बलाना मपि सहस्रं समुदितं बलवदेव भवति सङ्घातबलीयस्त्वात्। "अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्" सहस्रं दशकृत्वोऽभ्यस्त मयुत मामिश्रीभूत मयुत मित्युच्यते‡‡, अयुत मपि दशकृत्वोऽभ्यस्तं नियुत मित्युच्यते§§, नियुत मपि दशकृत्वोऽभ्यस्तं प्रयुत मित्युच्यते‖‖। अथार्बुदशब्द-

---

* "चतुष्पदी" दै० का० ११, ४, १।
† "अष्टापदी" दै० का० ११, ४, १।
‡ "नवपदी" दै० का० ११, ४, १।
§ "दस्यतेः क्षयार्थात्" दै० का० ७, १, ४। पुरस्ताच्च ७१ पृ० १ पं० किञ्च ७१ पृ० ११ पं०।
‖ तथा च दशेति दृशेः रूप मिति भावः। "दश" ऋ० सं० १, ७, १, १।
¶ "शतसाः" दै० का० १०, ४, १।
** "सहस्रसाः" दै० का० १०, ४, १।
†† १भा० ११९ पृ० (१७)।
‡‡ "अयुतं" दै० का० ११, १, १। य० वा० सं० १७, २।
§§ "नियुतं" य० वा० सं० १७, १।
‖‖ "प्रयुतं" य० वा० सं० १७, १।

विवक्षया अम्बुशब्दं निर्वक्ति;—अरणशीलम् "अम्बु*", तस्य दाता मेघः, सः "अम्बुदः", तस्य; "स यथा" उदकभाव मापद्यमानो "महान् बभूर्भवति वर्षन् तदिवार्बुदम्" तदिव वर्षन् यद् बभ्रु द्रव्यजातं भवति, तदर्बुद मित्युच्यते †। "खल इति सङ्ग्रामनाम" ‡। "खलतेर्वा" भ्रंशत्यर्थस्य, भ्रश्यन्ति हि योधाः। "खलतेर्वा" हिंसार्थस्य, हिंस्यन्ते हि तत्र परस्परेण। "अथ मपीतरः" "खलः" धान्यखलः "एतस्मादेव", तत्रापि हि भ्रश्यन्ति चूर्ण्यमानानि धान्यानि हिंस्यन्ते वा, चूर्ण्यन्त इत्यर्थः। अथवा "समास्कन्नः" असौ "भवति" विप्रकीर्णैः धान्यैः॥

"व्याप्निकर्माण उत्तरे धातवो दश"(१०) §। सङ्ग्रामे हीतरेतरं व्याप्नुवन्ति योधा इति सङ्ग्रामनामभ्यः 'उत्तरे' 'व्याप्निकर्माणः'। कतमे पुनस्ते? इति। "इन्वति, ननत्ते"—इत्येव मादयः ‖। "तत्र" दशके व्याप्निकर्मधातुगणे एते "द्वे" "नामनी" भवतः—'आप्नाणः(३)' इति, 'आपानः(४)' इति च¶। तत्र, "आप्नाण आप्नुवानः" यो हि अश्नोति व्याप्नोति स आप्नाण इत्युच्यते, तथा च य आप्नोति स "आप्नुवानः" सन् "आपानः" इत्युच्यते॥

"वधकर्माण उत्तरे धातवस्त्वयस्त्विंशत्" **। सङ्ग्रामे हीतरेतरं व्याप्य ततो घ्नन्तीति व्याप्निकर्मभ्यः 'उत्तरे' 'वधकर्माणः' समाम्नाताः।

---

* १भा० १९७ सू० (९१)।
† "अर्बुदं" य० वा० सं० १७, १।
‡ १भा० १७९ सू० (२८)।
§ १भा० १७८ सू० १८ ख०।
‖ १भा० १७८—१८० सू०।
¶ १भा० १७९ सू० (३), (४)।
** १भा० १८० सू० १९ ख०।

कियन्तः? 'त्रयस्त्रिंशत्'(३३)। कतमे पुनस्ते? इति। "दम्भोति, अयति, ध्वरति, धूर्वति"—इत्येव मादयः*। "तच्च" वधकर्मधातुमध्ये "वियात इत्येतद्" नाम †। तत्पुनरेवं निर्वक्तव्यम्;—"वियातयते" नाना प्रकारं यातयते यः शत्रून्, स वियातः। अथ "वा" एव मन्यथा स्यात्—"वियातय" एव मुच्यते यः स्तोतृभिः, स वियातः। 'आखण्डलः'—इत्येतदपि नामैव ‡। निगम मपि चात्र दर्शयति;—"आखण्डल प्र हूयसे" §। आभिमुख्येनावस्थितो यः खण्डयति मेघान्, स आखण्डयिता; तस्य सम्बोधनम्। हे "आखण्डयितः!" ॥

दरिम्बिठिर्नाम कण्वो मन्त्रदृक्। तस्येय मार्षम्। गायत्री। ऐन्द्री। रात्रिपर्यायेषु मध्यमरात्रिपर्याये हेतुरियं शस्त्रे विनियुक्ता। "शाचिगो०—०हूयसे" ॥। शाचिगो इति चैकं पदम्। शचीति कर्मनाम ¶। तस्य शच्याख्यस्य कर्मणो येय मिष्टि-पशु-सोमादि-लक्षणा सन्ततिः, सा शाचिः। अथ वा स्वार्थिक एव तद्धितः स्यात्। शच्येव शाचिः। तं प्रत्याह्रयमानो यो गच्छति, स शाचिगुरिन्द्रः, तस्य सम्बोधनं हे 'शाचिगो!' इति। तथैव शाच्यां य आगतः सन् पूज्यते स शाचि-पूजनः, तस्य सम्बोधनं हे 'शाचिपूजन!'। हे 'आखण्डल' आखण्डयितः! शत्रूणां मेघानां वा। इय मस्माभिः

---

* १भा० १८१ १८६ सू०।
† १भा० १८३ सू० (१९)।
‡ १भा० १८४ सू० (२२)।
§ ऋ० सं० ६, १, २४, १।
॥ "शाचिगो शाचिपूजनायं रणाय ने सुतः।
आ खण्डल प्र हूयसे॥" ऋ० सं० ६, १, २४, १।
¶ १भा० १७० सू० (११)।

प्रस्तुता शची यां प्रति ते नित्य मिष्ट मागतं यथा च पूज्यसे त्व मागतः सन्, किञ्च एतस्माच्च शच्या मस्मिन् कर्मणि 'अयं' 'रणाय' रमणाय 'ते' तव 'सुतः' अभिषुतः सोमो यतोऽस्माभिः त्वं 'प्रह्वयसे' प्रकर्षेणादरवद्भिर्ह्वयसे आह्वयसे। स एव मेतज्ज्ञात्वा अस्मदनुग्रहाय अनतीतकाल मागन्तु मर्हसीत्यभिप्रायः॥

आखण्डलशब्देऽन्यतरं वक्तव्यं बहुतरं तडिच्छब्दे इति क्रमभेदतो * निरुच्यते;—"तडिदित्यन्तिकवधयोः संसृष्टकर्म"। तडिदित्येतच्छब्दरूप मन्तिकाभिधायि वधाभिधायि च † इत्येक मेव ह्येतदुभाभ्या मर्थाभ्यां सम्प्रयुज्यते। विद्युदपि च तडिदित्युच्यते ‡। सा पुनः कर्त्तरि कारके "ताडयतीति सतः"॥ ४॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि। या नो दूरे तळितो§ या अरातयोऽभि सन्ति जम्भया ता अनप्नसः। त्वया वयं सुवर्ईयिचा ब्रह्मणस्पते स्पृहणीयानि वस्वनि मनुषेभ्य आ ददीमहि याश्च नो दूरे तडितो॥ याश्चान्तिके ऽरातयो¶ ऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप्र इति रुपनामा-

---

* 'तळित् (११), आखण्डल (११)," १भा० २८१ पृ० १९ ख०।
† १भा० २९४ पृ० (१), २८४ पृ० (११)।
‡ अनुपद मेव वक्ष्यत्याचार्यः २९८ पृ० १ पं०।
§ "तलितो" क, ख, ग।
‖ "तलितो" क, ख, ग।
¶ "याश्चान्तिके अरातयो" क। "याश्चान्तिकेरातयः" क।

म्रोतीति सतो विद्युत्तडिद्भवतीति* शाकपूणिः सा ह्यव-
ताडयति† दूराच्च दृश्यतेऽपि त्विद् मन्तिकनामैवाभि-
प्रेतं स्यात्। दूरे चित् सन्तष्ठिदिवाति‡ रोचसे। दूरे
ऽपि सन्नन्तिक इव सन्दृश्यस इति, वज्रनामान्युराण्य-
ष्टादश वज्रः कस्माद् वर्जयतीति‡ सतस्तच्च कुत्स
इत्येतत् क्षन्ततेर्ऋषिः कुत्सो भवति कर्त्ता स्तोमाना
मित्यौपमन्यवो ऽचाप्यस§ वधकर्मैव भवति तत्सख
इन्द्रः शुष्णं जघानेत्यैश्वर्यकर्माण उत्तरे धातवश्चत्वार॥
ईश्वरनामान्युत्तराणि चत्वारि तच्चेन इत्येतत् सनित
ऐश्वर्येणेति वा सनित मनेनैश्वर्य मिति वा ॥ ५ (११)॥

यथा त्वन्तिकनामेदं तथेय मृगुदाहरणम्;—"त्वया व॒यं०—०
अ॑न॒प्नसः"—इति¶। गत्वमदस्यार्षम्। जगती। प्रवर्ग्ये विनियुक्ता। हे
"ब्रह्मणस्पते!" "त्वया" "वयं" "सुवधाः" "सुवर्द्धयित्वा" सुष्ठु वर्द्धिताः
अनुगृहीताः सन्तः 'वसु' "वसूनि" यानि यानि 'स्पार्हा' स्पार्हाणि
'स्पृहणीयानि", तानि तानि 'मनुष्या' "मनुष्येभ्यः" तानभीभूय
"आ ददीमहि"। किञ्च, "याश्च नो दूरे तड़ितः" 'या नो दूरे'
अध्वन्यवस्थिताः "अरातयः","याश्चान्तिके"। तडिच्छब्दस्यान्तिकाभि-

* "तल्लिङ्गवतीति" क, ख, ग।
† "ह्यवतालयति" क, ख ग।
‡ "सन्तिष्ठिदिवाति" क, ख, ग।
§ "वज्रयतीति" क, ख, ग।
‖ "ऽप्याप्यस्य" क, ख, ग।
¶ ऋ० सं० २, ६, २०, ४।

धायित्वम्। दूरे च अन्तिके च या अरातयः। अरातिः सेना। "अदानकर्माणः"। रातिर्दानार्थः *। अस्माक मभिमतानर्थान् ददतो ये निवारयन्ति ते। 'अरातयः' "अदानप्रज्ञाः" न दातव्य मस्माभिरेभ्य इत्येवं येषां प्रज्ञा ते अदानप्रज्ञाः। द्विविधा हि ऋत्विजः,—दुःखसन्नाश्याः, सुखसन्नाश्याश्च; तत्र ये दुःखसन्नाश्याः ते अदानप्रज्ञाः, ये अदानकर्माः ते सुखसन्नाश्याः। ते चोभयेऽपि दूरे चान्तिके चावस्थिता भवन्ति। "ताः" दूरान्तिकावस्थितानुभयानपि "जम्भय" निश्चेष्टान् कुरु त्वं ब्रह्मणस्पते! किञ्च, "अनप्नसः" अरूपाश्चैतान् कुरु। "अप्न इति रूपनाम" †। तद्धि "आप्नोति" आश्रयम्॥

"विद्युत्०"। "सा ह्यवताऽयति" अशनिरूपेण। "दूरात्" एव "च" "दृश्यते"। तस्माद्न तस्या अन्तिकनामाभिसम्बन्धोऽस्ति। "अपि त्विदम्" अपरेणोदाहरणेन "अन्तिकनामैवाभिप्रेतं स्यात्"-"दूरे चित् सन्तळिदिवारि रोचसे" ‡। "दूरेऽपि सन्नन्तिक इव" अवस्थितो "दृश्यसे इति" अत्र दूरेऽपि सन्नन्तिक इवेति स्फुटतर मन्तिकाभिधानत्वम्, न तथा पूर्वस्मिन् मन्त्रे—'या नो दूरे तळित्नुः' इति॥

एव मन्तिकनामत्वेन वा विद्युन्नामत्वेन वा वधनामत्वेन वा प्रकरणोपपदे अवेत्य यथासम्भवं निर्वक्तव्यम्॥

"यो विश्वतः०—०वृयं तव" §। एषा जगती। आग्नेयी।

---

* १भा० ३५५ पृ० (४)।

† १भा० ३२० पृ० (८)।

‡ ऋ० सं० १, ९, ३१, २।

§ "यो विश्वतः सुप्रतीकः सुदृङ्नसि दूरे चित् सन् तळिदिवारि रोचसे। रात्र्याधियन्नो अवि देव पश्यस्यग्ने सुम्ने मा रिषामा वयं तव॥" ऋ० सं० १, ९, ३१, २।

कुत्सेन दृष्टा। महाव्रते आग्निमारुते शस्त्रे अभिप्लवस्य च षष्ठेऽहनि आग्निमारुते एव च शस्यते। 'यः' त्वं हे 'अग्ने!' 'विश्वतः' सर्वतः 'सुप्रतीकः' सुदर्शनः शोभनदर्शनः, अपि च 'सदृङ्' यतो यतो दृश्यसे ततस्ततः समानदर्शनः तुल्य एव लक्ष्यसे। अपि च "दूरे" अपि "सन्" अतिभ्राजिष्णुत्वात् 'तत्रिदिव' अन्तिक इव अवस्थितः 'अति रोचसे' अतिरोचिष्णुर्दृश्यसे। अपि च यदेतत् 'रात्र्यास्चित्' रात्र्या अपि सन् तम् 'अन्धः' अध्यानलक्षणं तमः, यत् न ध्यातुमपि शक्यते किमुत द्रष्टुम्। एतदपि 'अति' अतीत्य हे 'देवः' सर्वभूतदीपयितः! 'पश्यसि' एव त्वम्; न तेऽस्माकमिव तेनान्धेनापि तमसा प्रतिरुध्यते दर्शनम्। तस्य तवैवङ्गुणयुक्तस्य हे 'अग्ने!' 'वयं' 'सख्ये' सखिभावे परिचरणकर्मणि आ उत्तमादुच्छ्वासाक्षताध्यवसायाः सन्तः 'मा' केन चिद् विधिना* शत्रुणा वा 'रिषाम' मास्मान् किञ्चिद्धिंसीत् त्वदनुध्यानादेवेत्यभिप्रायः॥

"वज्रनामान्युत्तराण्यष्टादश" †। यो हि हन्यते स वज्रेणैवेति वधकर्मभ्यः 'उत्तराणि' 'वज्रनामानि'। कियन्ति पुनस्तानि? अष्टादश; अष्टौ च दश च। कतमानि पुनस्तानि? "दिद्युत्, नेमिः, हेतिः"—इत्येव मादीनि‡, दिद्युत्, द्यतेर्वा द्योततेर्वा; पुनः पुनरतिशयेन वा द्यति अवखण्डयति, द्योतते दीप्यते वा सा दिद्युत्। अवनामयति खण्डयति प्रहारेणेति नेमिः। हेतिर्हन्तेः। इत्येव मादि॥

---

* "बाधिना" ख।

† १भा० २८६ पृ० २० ख०।

‡ १भा० २८६—२९१ पृ०।

आह ;—"वज्रः कस्मात्" ? उच्यते,—"वर्जयति" वियोजयति प्राणैः प्राणिनः । "तच्च, कुत्स इत्येतत्" सन्देहपदम् * । ऋषिरपि कुत्स इत्युच्यते । तत् पुनरेतत् यदा वज्रनाम, तदा "कृन्तते:" कृत्यतेऽनेनेति "कुत्सः" । यदा पुनरेतदृष्यभिधानं, तदा "कर्त्ता स्तोमानाम् इति" "औपमन्यवः" आचार्यो मन्यते † । "अचार्यस्य वधकर्मैव" अभिप्रेतं स्यात् । अत्रापि एतदृषौ वर्त्तमान मभिधान मस्य ऋषेर्वधकर्मैव वधार्थसंयुक्त मेव स्यात् । किङ्कारणम् ? "तत्सख इन्द्रः शुष्णं जघान इति" ‡ । तेन स्तूयमानो विवृद्धबलः शुष्णं शोषयितारं रसाना मसुरं मेघं वा जघान । मेघो हि शुष्णः § ; तदुदये हि धान्यानि उदकग्राहनिमित्तेन शुष्यन्ति ॥

"ऐश्वर्यकर्माण उत्तरे धातवश्चत्वारः" ॥ । घ्नता मेव हि वज्रेणायुधेनैवैश्वर्यं भवतीति वज्रनामभ्य 'उत्तरे' 'ऐश्वर्यकर्माणः' । कतमे पुनस्ते ? "इरज्यति, पत्यते, क्षियति, राजति ?"—इति ¶ ॥

"ईश्वरनामान्युत्तराणि चत्वारि" ** । ऐश्वर्यसम्बन्धेनैवोच्यते । कत-

---

* १भा० १८९ ४० (११) ।

† कुत्स आङ्गिरसः ऋ० सं० १, ९४–९८; १,१०१–११५; ९. ९७, ४५–५८ ।

‡ "एतच्च यास्केनोक्तम्,–'इन्द्रः शुष्णं जघान' इति । शुष्णं पिप्रु मित्यादि मन्त्रे चाय मर्थो विस्पष्टः"—इति ऋ० सं० १, १, २१, ७ ऋग्व्याख्यायां सायणः । शुष्णं पिप्रु मिति तु ऋ० सं० १, ७, १७, २ । तत्सखपदबोधाय ऋ० सं० १, ५, १९, १—२ ऋचोऽपि द्रष्टव्याः ।

§ "मेघरूपेणावस्थितं हेतिं हन्तारं शुष्ण मसुरम्"—इति सायणः । ऋ० सं० १, ८, २५, १० ।

|| १भा० १९१ ४० ११ ख० ।

¶ १भा० १९१, १९१ ४० ।

** १भा० १९१ ४० ११ख० ।

मानि पुनस्तानि? "राष्ट्री, अर्यः, नियुत्वान्, दूनः"*। "तत्र इन इत्येतत्" अभिधान मेवं व्युत्पाद्यम्;—"सनितः" सम्भक्तः "ऐश्वर्येणेति वा"; अथ "वा" "सनितं" सम्भक्तम् "अनेनैश्वर्य मिति"॥ ५॥

यचा सुपर्णा अमृतस्य भाग मनिमेषं विदथाभिस्वरन्ति। इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाक मचाविवेश॥ यच सुपर्णाः सुपतना† आदित्यरश्मयोऽमृतस्य भाग मुदकस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स मा धीरः पाक मचाविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवत मथाध्यात्मं यच सुपर्णाः सुपतना‡-नीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो§ वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषा मिन्द्रियाणां गोपायितात्मा स मा धीरः पाक मचाविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिं माचष्टे॥ ६ (१२)॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः॥ ३, २.

---

* १भा० १८१—१८१ पृ०।

†, ‡ "यच सुपतना" क, ख, ग।

§ "निमिषन्ति" क, ख, ग।

अधुना मन्त्रमपि व्याचष्टे यस्मिन्नेतदीश्वरनामेन इति;—"यत्रा सुपर्णा०"—इति* । त्रिष्टुबेषा। वैश्वदेवीये सूक्ते दीर्घतमसा दृष्टा। महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते। वैश्वदेवेषु हि सूक्तेष्वेकदेवता बहुदेवताश्च मन्त्रा भवन्ति, तदप्युपेक्षितव्यम्। "यत्र" यस्मिन् मण्डलेऽवस्थिताः "सुपर्णाः सुपतनाः आदित्यरश्मयः" ते हि शोभन मर्थं मुद्दिश्य तमोविघातलक्षणं पतन्ति। अथवा शोभमानाः पतन्तीति सुपर्णाः। ते किं कुर्वन्ति? उच्यते,—"अमृतस्य भागम्" "उदकस्य" अमरणधर्मणो 'भागं' भजनीय मंश मादाय पृथिवीलोकात् तेनान्विताः सन्तः सर्वभूतानि "अभि स्वरन्ति"। 'स्वृ शब्दोपतापयोः (भू० प०)' अभितपन्तीत्यर्थः। अथवा अभिस्वरन्त्यादित्यमण्डलम्, आभिमुख्येन रसान् गृहीत्वा प्रयान्ति। "अनिमिषन्तः" अनिमिषमाणा इव आदरवन्त इत्यर्थः। 'विद्या' "वेदनेन"† स्वकर्माधिकारयुक्तेनान्विताः सन्तः इद मेवास्माभिः कर्त्तव्य मादानादिलक्षणं कर्मेति अभिस्वरन्ति। यचैतदेवंलक्षणं कर्म कुर्वन्त्यादित्यरश्मयः, तच्च किम्? इति उच्यते;—"इनो विश्वस्य भुवनस्य गोपाः"। 'इनः' "ईश्वरः"; इनो ह्यसावादित्यः, ऐश्वर्येण भवति 'विश्वस्य' 'भुवनस्य' भूतस्य "सर्वेषां भूतानां" 'गोपाः' "गोपायिता" भवति "आदित्यः" मण्डलान्तरपुरुषो यः तत्र मण्डलेऽवस्थितः। "स मा धीरः" "धीमान्" प्रति विशिष्टया बुद्ध्यान्वितः; बुद्धिरेव हि तस्य शरी-

---

* ऋ० सं० १, ३, १८, १।
† १भा० ४२४ पृ० (२२)।

रम्। "पाकः पक्तव्यः"*, पक्तव्यप्रज्ञो "विपक्वप्रज्ञः"; सम्यग्दर्शनोऽनुग्राह्यतया "आ विवेश" आविशतु॥

"इति" शब्दः प्रकरणप्रदर्शनार्थः;—एव मयम् "उपनिषदर्थो भवतीति"। यद्वा; ज्ञान मुपगतस्य सतो गर्भजन्मजरामृत्यवो निश्चयेन सीदन्ति, सा रहस्यं विद्या उपनिषदित्युच्यते। उपनिषद्भावेन वर्णत इति उपनिषदर्थः। "अधिदैवतम्" उक्तम्॥

"अथाध्यात्मम्" उच्यते;—अधिदैवत मध्यात्म मित्येतौ शब्दौ व्याख्यातौ†। "यत्र" यस्मिन् शरीरे "सुपतनानि इन्द्रियाणि" अवस्थितानि स्वेषु स्वेषु आयतनेषु कृष्णसारादिषु। किं कुर्वन्ति? उच्यते,—"अमृतस्य" अमरणधर्मणः "ज्ञानस्य" "भागं" भजनीयं स्वं स्वं रूपादिलक्षणं रस मादाय। 'विदथा' "वेदनेन" विज्ञानेन युक्तम् "अभि स्वरन्ति"। न हि इन्द्रियाणां चैतन्य मस्तीति तानि ह्यचेतनानि; चेतनस्य पुरुषस्य कर्त्तुर्विज्ञानमयस्य करणानि, तदधिष्ठानास्तु देवतास्येतनाः। तदभिप्रायेणोच्यते,—'विदथा' "वेदनेन" विज्ञानेनेति। किं कुर्वन्ति? "अभि स्वरन्ति" "अभि प्रयन्ति" विषयज्ञानेन पुरुषस्यापि भोक्तुर्दुःखं कुर्वन्ति। अथ वा 'अभि स्वरन्ति' बुद्धि माभिमुख्येन विषयविज्ञान मादाय वाङ्मयप्रत्ययाधानार्थं स्वरन्ति गच्छन्तीत्यर्थः। तत्र किम्? इत्युच्यते,—तत्र योऽवस्थितः "ईश्वरः" दूनः, "सर्वेषा मिन्द्रियाणां गोपायिता" यः "आत्मा", "स मा धीरः" "धीमान्", "पाकः पक्तव्यः" पक्तव्यप्रज्ञः "विपक्वप्रज्ञः"

---

* १भा० ३१४ पृ० (८)।

† परस्तात् १३४—१३७ पृ० ४ ख०।

सम्यग्दृशः सर्वज्ञः। सः "अत्र" एव हि देहेऽवस्थितः बुद्ध्यधिदैवत-भावेन तैजसाख्यो माम् "आ विवेश" त्वनुग्राह्यतया स मा मत्रै-वावस्थितोऽनुगृह्णात्वित्यर्थः; तदनुग्रहाद्धास्य सम्यग् दर्शनं प्रकाशते तदाशास्यत इति। "आत्मगति माचष्टे" एव मपास्य विज्ञान माचष्टे मन्त्रैः *॥

यदुक्तं "पुष्पफले देवताध्यात्मे वा" † इति, तदेव मुपपाद्यम्,—तत्र एक एव ह्यसावादित्यमण्डले चाधिदैवते चाध्यात्मे च। बुद्ध्यधिदेवताभूतः स एव तत्र तत्रोपेक्षितव्यः। तस्मादमुष्मादादित्य-मण्डलाद् ये रश्मयः प्रसर्पन्ति ते विश्वेदेवा इति; "रश्मयो वै विश्वेदेवाः" इति ह्युक्तम्‡। अध्यात्मेऽपि हृद्याकाशाद् यानीन्द्रियाणि प्रसर्पन्ति, त एव रश्मयः। अधिदैवते त एव विश्वेदेवा इत्युक्तम्। एवं तत्र तत्र योज्यम्; प्रकारमात्र मेवेद मुपदर्शितं भाष्य-कारेणेति ॥ ६ ॥

॥ इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

द्वितीयः पादः ॥ ३, २ ॥

---

* "मन्त्रैः"—इति रोथ्-सम्पादितः पाठः।

† १२४ पृ० १५ पं० किञ्च १२९ पृ० १९ पं० व्याख्यानम्।

‡ "आदित्याः"-इत्यादिपदानां व्याख्यानानि द्रष्टव्यानि (१ भा० ४९५—४९७ पृ०)। परस्ताच्च दै० का० १२ अ० ४ पादो द्रष्टव्यः।

॥ तृतीयः पादः ॥

बहुनामान्युत्तराणि द्वादश बहु* कस्मात् प्रभवतीति सतो ह्रस्वनामान्युत्तराण्येकादश ह्रस्वो ह्रसतेर्महन्नामान्युत्तराणि पञ्चविंशतिर्महान् कस्मान् मानेनान्याञ्जहातीति शाकपूणिर्मंहनीयो भवतीति वा तच्च ववक्षिथ विवक्षस इत्येते वक्तेर्वा वहतेर्वा साभ्यासाद् गृहनामान्युत्तराणि द्वाविंशतिर्गृहाः कस्माद् गृह्णन्तीति सतां परिचरणकर्म्माण उत्तरे धातवो दश सुखनामान्युत्तराणि विंशतिः सुखं कस्मात् सुहितं खेभ्यः खं पुनः खनते रूपनामान्युत्तराणि षोड़श† रूपं रोचतेः प्रशस्यनामान्युत्तराणि दश प्रज्ञानामान्युत्तराण्येकादश सत्यनामान्युत्तराणि षट् सत्यं कस्मात् सत्सु तायते सत्प्रभवं भवन्तीति वा‡ अष्टा उत्तराणि पदानि पश्यतिकर्म्माण उत्तरे धातवश्चायतिप्रभृतीनि च नामान्यामिश्राणि नवोत्तराणि पदानि सर्वपदसमाम्नायाथात उपमा यदतत्तत्सदृश मिति गार्ग्यस्तदासां कर्म ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं

---

* "बहुः" क, ख।

† "षोलश" क।

‡ क ख-ग-पुस्तकेष्विह प्रथमखण्डः समाप्तः।

वा प्रख्यातं वोपमिमीते ऽथापि कनीयसा ज्यायांसम्॥ १ (१३)॥

"बऋनामान्युत्तराणि द्वादश" *। ईश्वराणामेव बऋत्वं भवतीत्यतः † ईश्वरनामभ्यः 'उत्तराणि' 'बऋनामानि'। कियन्ति? द्वे च दश च 'द्वादश' (१२)। कतमानि पुनस्तानि? "उरु, तुवि, पुरु"—इत्येव मादीनि ‡। उरु विस्तारे; यद्धि बऋ भवति, तद् विस्तीर्णं भवति। तुवि वृद्धौ; यद्धि बऋ भवति, तद् वृद्धं भवतीति। पूरित मिव हि बऋना सर्वं भवतीति पुरु। इत्येव मादि युक्तं योज्यम्॥ आह;—"बऋ कस्मात्"? उच्यते—"प्रभवति" हि एतत् बऋभ्यो दीयमानम्॥

बऋनामसम्बन्धेनैव "ह्रस्वनामानि उत्तराणि" §। कियन्ति? "एकादश" (११)। कतमानि पुनस्तानि? "कुवित्॥, रिहम्¶, ह्रस्वः"—इत्येव मादीनि **। कुत्सित मिव हि तद् विज्ञायते

---

* १ भा० २९४ पृ० २ अ० १ख०।

† 'ईश्वरस्य हि बऋपालकत्व मस्तीत्यतः'—इति वक्तुं युक्तम्।

‡ १ भा० २९४—२९९ पृ०।

§ १ भा० २९९ पृ० ३ अ० २ ख०।

॥ कुविदिति पद मिह दृक्तिकृता भ्रमाद् गृहीतम्, तस्य बऋनामसु दृष्टत्वात् १ भा० २९९ पृ० (११)। किञ्च "इति वा इति"—इति-सूक्तीय-चथोदश-मन्त्रेष्वेव "कुवित् सोमस्यापो मिति" (ऋ० सं० ८; ९, १९-२७व०)"—इति पादस्य व्याख्यानावसरे 'कुविद्' इत्यस्य 'बऋवारम्'—इत्येवार्थः कृतः सायणेन; एव मन्यत्रापि।

¶ इत्राप्यस्मि पाठभेदः १ भा० २९९ पृ० १७ पं० द्रष्टव्यः।

** १ भा० २९९—२९९ पृ०।

अल्पत्वादिति कुवित्। लीढ मेव हि तदल्पत्वाद् भवतीति रिहम्। "हस्रः" कस्मात्? उच्यते,—"हसतेः"; हसितो हि भवति सः, महतः सकाशात्॥

हस्रसम्बन्धेनैव "महन्नामान्युत्तराणि पञ्चविंशतिः" *। हस्रापेक्षयैव हि महत्त्वं भवति। कियन्ति पुनस्तानि? "पञ्चविंशतिः" (२५)। कतमानि पुनस्तानि? "महत्, ब्रध्नः, चष्वः"—इत्येव मादीनि †। आह;—"महान् कस्मात्"? उच्यते,—"मानेन" "अन्यान्" हस्रान् "जहाति" "इति" "शाकपूणिः" आचार्यो मन्यते। अथ "वा" "मंहनीयः" पूजनीयो "भवतीति" महान्। हस्रत्वात् हंहणत्वा द्वा ब्रध्नः। चष्वः रेषणवान्। इत्यादि योज्यम्॥ "तत्र" तस्मिन् महन्नामके गणे "ववक्षिथ(१४), विवक्षसे(१५)"—इत्येते आख्याते। ते पुनरुभे वक्तेर्वा वहतेर्वा धातोः "साभ्यासात्"‡॥

य एव महान्तस्त एव गृहिणो भवन्तीति महन्नामभ्यः "उत्तराणि गृहनामानि" §। कियन्ति पुनस्तानि? "द्वाविंशतिः" (२२)। कतमानि पुनस्तानि? "गयः, कृदरः, हर्म्यम्"—इत्येव मादीनि ॥। गम्यत इति गयः। कृत-दरः कृदरः। हर्म्यं हरणम्। इत्येव मादीनि॥ आह;—"गृहाः कस्मात्"? उच्यते,—ते हि यावदेव किञ्चिद्वा ह्रियते, तत् सर्व मेव "गृह्णन्ति" दुःपूरत्वात्॥

---

* १ भा० २९९ पृ० १ अ० १ ख०।
† १ भा० २९९—३०१ पृ०।
‡ १ भा० ३०१ पृ० (१४), (१५)।
§ १ भा० ३०१ पृ० २ अ० ४ ख०।
॥ १ भा० ३०७—३१२ पृ०।

गृहेष्वेवावस्थिताः परिचर्यन्ते परिचरतैवेति गृहनामभ्यः "उत्तरे परिचरणकर्माणः धातवः" समाम्नाताः *। कियन्तः पुनस्ते? "दश" (१०)। कतमे पुनस्ते? "दूरज्यति, विधेम, सपर्यति"—इत्येव मादयः †॥

परिचर्यमाणाना मेव हि सुखं भवतीति परिचरणकर्मभ्यः "उत्तराणि सुखनामानि"‡। कियन्ति पुनस्तानि? "विंशतिः" (२०)। कतमानि पुनस्तानि? "शिम्बाता, शतरा, शातपन्ता"—इत्येव मादीनि §। शिम्बाता, सुखानुसम्बन्धाद्धि हृदमग्ना मिव शरीरं शीतीभवति। शतरा, शीतलतर मिव हि जलादपि सुखम्। शात-पन्ता, शान्ततापं मेव हि सुखम्। एव मादि। आह;—"सुखं कस्मात्"? उच्यते,—"सु हितम्" सुष्ठु हित मेतत् "खेभ्यः" इन्द्रि-येभ्यः। "खं पुनः" इन्द्रियम्, "खनतेः" धातोः॥। अवदीर्ण मेव हि तस्य कर्णायतनं भवति॥

"रूपनामान्युत्तराणि षोड़श" ¶। य एव हि सुखिनस्त एव हि प्रायो रूपवन्तो भवन्तीति सुखनामभ्यः 'उत्तराणि' 'रूपनामानि'। कियन्ति पुनस्तानि? 'षोड़श' (१६)। कतमानि पुनस्तानि? "निर्णिक्, वन्निः"—इत्येव मादीनि **। निर्णिक्त मिव हि तद् भवति

---

* १ भा० २१२ पृ० २ अ० ५ ख०।
† १ भा० २१२—२१४ पृ०।
‡ १ भा २१४ पृ० २ अ० ९ ख०।
§ १ भा० २१४—२१८ पृ०।
॥ १ भा० १९९ पृ० (३)।
¶ १ भा० २१८ पृ० २ अ० ७ ख०।
** १ भा० २१९—२२२ पृ०।

तैजसत्वात्। विवृणोत्यास्य मिति वह्निः। इत्येव मादि। "रूपं रोचतेः" दीप्यमान मिव हि तत् प्रकाशं भवति*॥

"प्रशस्यनामान्युत्तराणि† दश"। य एव हि रूपवन्तस्त एव प्रशस्या भवन्तीति रूपनामभ्यः 'उत्तराणि' 'प्रशस्यनामानि'। कियन्ति पुनस्तानि? 'दश' (१०)। कतमानि पुनस्तानि? "अस्रेमाः, अनेद्यः, अनिन्द्य‡"—इत्येव मादीनि §। अस्रेमाः, 'स्रिवु गतिशोषणयोः (दि० प०)'; न स्रियति गच्छत्यकीर्त्तिं मित्यस्रेमाः, अपाप इत्यर्थः; क्षमारहितो वा। अनेद्यः, अनिन्दार्हः ॥। इत्येव मादि योज्यम्॥

"प्रज्ञानामान्युत्तराण्येकादश" ¶। य एव हि प्रज्ञावन्तस्त एव हि प्रशस्या भवन्ति, य एव हि प्रशस्यास्त एव हि प्रज्ञावन्तो भवन्तीति प्रशस्यनामभ्यः 'उत्तराणि' 'प्रज्ञानामानि'। कियन्ति पुनस्तानि? 'एकादश'। एकञ्च दश च एकादश (११)। कतमानि पुनस्तानि? "केतः, केतुः, चेतः"—इत्येव मादीनि **। 'कित ज्ञाने (भू० प०)', तस्य केतः ††। केतुरपि तस्यैव॥

"सत्यनामान्युत्तराणि षट्" ‡‡। य एव हि प्रज्ञावन्तः, त एव

---

* १९७ पृ० २१ पं० किञ्च १९९ पृ० १२ पं०।

† १ भा० २२२ पृ० २ अ० ८ ख०।

‡ नैतद्व्याख्यातं पूर्वत्र, व्याख्यातञ्च 'अनेमाः'—इति। एवञ्च निघण्टु-व्याख्याकाले कादि पुस्तकपाठोऽवलम्बितः, इह तु गादि-पुस्तकपाठ इति।

§ १ भा० २२२—२२४ पृ०।

‖ इहास्ति लेखकप्रमादः?

¶ १ भा० २२४ पृ० २ अ० ९ ख०।

** १ भा० २२५—२२९ पृ०।

†† पूर्वत्र तु अन्यथैव व्याख्यानम् २२५ पृ० (१) द्रष्टव्यम्।

‡‡ १ भा० २२९ पृ० २ अ १० ख०।

हि सत्यवादिनो भवन्तीति प्रज्ञानामभ्यः 'उत्तराणि' 'सत्यनामानि'। कियन्ति पुनस्तानि? 'षट्' (६)। कतमानि पुनस्तानि? "बट्, अत्, सचा"—इत्येव मादीनि *। बद्ध मिव सम्बद्धं भूतेनार्थेन भवतीति बट्। अवणार्हं मेतद् भवतीति अत्। एव मादि। आह ;—"सत्यं कस्मात्"? उच्यते,—"सत्सु तायते" सत्स्वेव हि तत्तायते विस्तीर्यते; न हि सतां समीपे शक्य मनृतं वक्तुम्। अथ "वा" "सत्प्रभवं भवति" य एव हि सन्तस्त एव हि सत्यं वदन्ति॥

"अष्टौ" यानि "उत्तराणि पदानि" चिक्यदित्येव मादीनि, ते "पश्यतिकर्माणः" पश्यत्यर्थाः "धातवः"† । "चायति-प्रभृतीनि च"‡ तान्येव "नामानि" भवन्ति। तानि पुनरेतानि "आमिश्राणि" संसृष्टानीत्यर्थः। तेषां प्रकरणोपपदाभ्यां विशेषावधारणं भवति। तच्च,—किञ्चिन्नाम, किञ्चिदाख्यातम्,—इत्येके मन्यन्ते। अन्ये पुनः किम्? "चिक्यत्(१)", "विचर्षणिः(२)", "विश्वचर्षणिः(३)"—इत्येतानि नामानि, यान्यन्यानि परिशिष्टानि ते धातवः; तानि पुनरेतानि पूर्वाचार्यप्रामाण्यात् आमिश्राणि पद्यन्ते इत्येवं मन्यन्ते॥

"नव" यानि "उत्तराणि पदानि" "हिकं, सुकं, नुकम्"—इत्येव मादीनि§, आकृत मित्येव मन्तानि, "सर्वपदसमाम्नानाय"॥। कथं नाम सर्वं चतुर्विधं पदप्रकार मेतस्मिन् समाम्नाये समाम्नातं

---

* १ भा० ३२९—३३७ पृ०।
† १ भा ३३७ पृ० १ अ० ११ ख०।
‡ "चिक्यदित्यादीनि चायत्यर्थनिगमानि"—इति स्कन्दस्वामी।
§ गादिपुस्तकसम्मतोऽयं पाठः।
॥ १भा० ३३९ पृ० १अ० १२ख०।

स्यादित्येव मर्थ मेवैव हि नवसु समाम्नातेषु उभये निपातोपसर्गाः, दर्शिता भवन्ति ॥

"अथात उपमाः"। 'अथ' इदानीम्, 'अतः' अनन्तरम्, 'उपमाः' भवन्ति। तद्यथा,—"इद मिव, इदं यथा, अग्निर्नये, चतुरश्चिद् ददमानात्, ब्राह्मणा व्रतचारिणः, वृत्तस्य नु ते पुरुहूतवयाः, जार आ भगम्, मेषो भूतोऽभि यन्नयः, तद्रूपः, तद्वर्णः, तद्वत्, तथा"—एताः उपमाः* ॥

सामान्यलक्षण मासां ब्रवीति,—"यदतत्तत्सदृश मिति गार्ग्यः"। 'यत्' किञ्चित् अर्थजातम् 'अतत्' भवति, 'तत्' सरूपञ्च; यथा—अनग्निः खद्योतः, अग्नि-सरूपश्च सोऽग्निनोपमीयते—अग्निरिव खद्योत इति, एवम् अतत्सरूपेण गुणेन गुणसामान्यात् उपमीयते;—इत्येवं 'गार्ग्यः' आचार्यो मन्यते। "तदासां कर्म" स आसा मुपमानाना मर्थः, यदप्रसिद्धतरगुणस्य कस्य चित् प्रसिद्धतरगुणेनान्येन गुण-प्रकाशनम्। क्वचित् पुनरात्मनाप्युपमानं भवत्येव।—"वायुरात्मोपमे गतिः", "तथा करोति सैन्यानि यथा कुर्याद् धनञ्जयः" इति। "ज्यायसा वा गुणेन, प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीते"। 'ज्यायसा' उत्कृष्टेन 'गुणेन' यो यस्मिन् द्रव्ये उत्कृष्टो गुणः तेन, 'कनीयांसम्' अनुत्कृष्टं गुणम् 'उपमीयते'। तद्यथा,— सिंहो माणवकः। सिंहे शौर्यं मुत्कृष्टम्, माणवक मेतेनो-पमिमीते; सिंह इव माणवको विक्रान्त इति। 'प्रख्याततमेन वा'

---

* १भा० ३३० पृ० २अ० १३ ख०। किञ्च १मा० ३८०—३८१ पृ०।

'अप्रख्यातम्' 'उपमीयते'। प्रख्यातश्चन्द्रमा, अप्रख्यातो माणवकः, तं तेनोपमिमीते,—चन्द्र इव कान्तो माणवक इति। "अथापि" क्वचित् "कनीयसा" गुणेन "ज्यायांसम्" अपि सन्तम् उपमिमीते। तदेतच्छन्दस्येव द्रष्टव्यम्* ॥ १ ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम्। तनूत्यक्तनूत्यक्ता वनर्गू वनगामिनावग्निमन्थनौ वाह्न तस्कराभ्या मुपमिमीते तस्करस्तत्करोति† यत् पापक मिति नैरुक्तास्तनोतेर्वा स्यात् सन्ततकर्मा भवत्यहोरात्रकर्मा वा रशनाभिर्दशभिरभ्यधीता मभ्यधातां‡ ज्यायांस्तत्र गुणोऽभिप्रेतः§ ॥ २ (१४) ॥

आह;—किं मुदाहरणम्? उच्यते;—"तनूत्यजेव०—०रशनाभिः"इति। चितस्येव मार्षम्। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'तनूत्यजा' "तनूत्यक्ता", चौर्याभिप्रायेण हर्त्तव्यं वा सर्त्तव्यं वेति कृताध्यवसायौ तस्करौ "वनर्गू वनगामिनौ" मार्गमोषकौ प्रस्तुतौ, ताभ्या मुपमीयते। तौ यथा उपमार्थत्वेन सुपुष्टौ भवतः, न तथा ग्रामतस्करौ। तौ यथा कं चिद्ध्वगं बध्नीयातां रज्वा। एवम् एतौ अक्षद्वाह्न

* उभयविध मेवेति भावः। तत्र प्रथम मुदाहरणं तनूत्यजेति (३१३ ४० ५ पं०), द्वितीयं कुत्रचिद्दोषेति (३१५ ४० १पं०।

† "तस्करस्तत्करो भवति" क, च।

‡ "रभ्यधीता मभ्यधीता मित्यभ्यधाताम्" क, च।

§ "०धीताम्। दृतं ते अग्रे मत्यसी मनीषा यक्षा रथं न मघवन्तिरश्चैः॥" ऋ० सं० ७, ५, २२, १।

'रशनाभिः' अङ्गुलीभिः 'दशभिः' दशसङ्ख्यायोगिनीभिः 'अभ्यधीतां' प्रतिनिबध्नीताम्। अभिनिबध्य च अग्निमन्थनयोक्त्रेण अधरारण्युत्तरारणीभूतं त्वां तस्करावित्र कञ्चिद्ध्वगं गाढं बध्वा सुमृश मा कर्षतः। किमर्थं पुनरेव मर्थ्यतेऽस्माभिः? हे 'अग्ने!' 'दूयं' यस्मात् 'नव्यसी' नवतरा, अन्यैः स्तोतृभिः अदृष्टपूर्वा, युष्मदुक्तैः संस्कृत्य विवक्षिता, 'ते' तव 'मनीषा' स्तुतिः प्रधानसंयुक्ता। स त्वमेतज्ज्ञात्वा एव मर्थ्यमानोऽस्माभिः 'युक्ष्व' योजय आत्मानं मरणी प्रति। अरणिभ्यां 'प्रदीप्यद्भिः' दीप्यमानैः स्वैः 'अङ्गैः' ज्वालाख्यैः। कथमुनर्योजय? 'रथं न' यथा कश्चित् कुतश्चित् आजिगमिषुः शीघ्रं रथं योजयेत्, एव मेवावतरणाय त्वा माभ्यां मरणीभ्यां योजयमानो यज्ञे विघ्नं मा कार्षीरित्यभिप्रायः। "तनूत्यक् तनूत्यक्तौ" इत्यर्थः। "वनर्गू वनगामिनौ", तत्र हि तयोश्चौर्यं सिद्धति*। एव मस्मा मृचि "अग्निमन्थनौ" "बाह्व" प्रशस्तौ "तस्कराभ्याम्" अप्रशस्ताभ्याम् "उपमिमीते" मन्त्रदृक्॥

"तस्करः" "तन्" एव "करोति", "यत्" एव "पापकम्" भवति "इति नैरुक्ता मन्यन्ते"। वैयाकरणानां पुनरन्यथापि स्यात्†। स हि "सन्ततकर्मा भवति"; रात्रौ ग्रामे मुष्णाति, दिवा अरण्ये, एवम् "अहोरात्रकर्मा वा" एतदेतत् सन्ततकर्मत्वम्। "रशनाभिर्दशभिरभ्यधीताम्" इत्येव "तत्र" बाह्वोः "ज्यायान्" "गुणोऽभिप्रेतः", तयोः प्रशस्तत्वात्; अप्रशस्तत्वाच्च तस्करयोः कनीयान्॥ २॥

---

* १भा० ६१६ पृ० (८) द्रष्टव्यम्।

† "सद्वृत्तनौ करपत्रोत्खलोपत्र" वा० प्रति० ६, ५१।

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः। को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ। क स्विद्रात्रौ भवथः क दिवा क्वाभिप्रायं* कुरुथः क वसथः को वां शयने विधवेव देवरं (देवरः कस्माद् द्वितीयो वर उच्यते†) विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्म्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्म्मा मर्यो मनुष्यो मरणधर्म्मा योषा यौतेराकुरुते सहस्थाने‡ ऽथ निपाताः पुरस्तादेव व्याख्याता यथेति कर्म्मोपमा। यथा वातो यथा वनं यथा समुद्र एजति। भ्राजन्तो अग्नयो यथा। आत्मा यक्षस्य नश्यति पुरा जीवगृभो यथा। आत्मातनेर्वा-मेर्वापि§ वान्त इव स्याद् यावद्ध्यग्निभूत इति। अग्निर्न ये भ्राजसा रुक्मवक्षसः। अग्निरिव ये (मरुतो भ्राजमाना रोचिष्णूरुक्का॥) भ्राजस्वन्तो रुक्मवक्षसः॥ ३॥ (१५)॥

---

* "क्वाभिप्रायं" क, ख, ग।
† बन्धनोचिक्रान्तगतानीमानि पदानि न सन्ति क ख ग-पुस्तकेषु।
‡ "सधस्थाने" क, ख, ग।
§ "ध्यग्नेर्व्यापि" क, ख, ग।
॥ बन्धनोचिक्रान्तगतानीमान्यपि पदानि न सन्ति क-ख-ग-पुस्तकेषु।

द्वितीय मुदाहरण मेतस्मिन्नेवार्थे "अथापि कनीयसा ज्यायांसम् (३०७पृ०१पं०)" इति ;—"कुह खिद् दोषा"* इति। कक्षीवतो दुहिता घोषा नाम, तस्या इय मार्षम्। आश्विनी। जगती। प्रातरनुवाकाश्विनयोः शस्यते। हे अश्विनौ! 'कुह खिद् दोषा' "क्व" नु युवां "रात्रौ" "भवथः"? 'कुह वस्तोः' "क्व" वा "दिवा" भवथः युवाम्? येन नापि रात्रौ अस्माकं दर्शन मुपगच्छथः, नापि दिवा। चिदिति परिदेवनायाम्, ईर्ष्यायां वा। 'कुह' "क्व" च 'अभिपित्वम्' "अभिप्राप्तिं" स्नानभोजनाद्यर्थं "कुरुथः"? 'कुह' "क्व" वा 'उषतुः' "वसथः"? सर्वथा न विज्ञायते वा मागमनप्रवृत्तिः। किञ्च; 'को वां शयुत्रा' कतमो युवां यजमानः शयुत्रा "शयने"? किं 'विधवा इव देवरम्' यथा विधवा मृतभर्तृका का चित् स्त्री शयने रहस्यतितरां यत्नवती देवर मुपचरति; स हि परकीयत्वात् नार्या दुराराध्यतरो भवति, यत्नेनोपचर्यते; न तथा निजो भर्त्ता। तस्मात् तेनोपमिमीते अश्विनौ। तथा 'मर्यं' मनुष्यं देवरम्। सैव मृतभर्तृका 'योषाः' 'आ' 'कृणुते' आभिमुख्येन कुरुते। को वाम् एवम् आभिमुख्येन 'सधस्थे' "सहस्थाने" समाने सहयोगिना चात्मना कृत्वा परिचचार? येनेह नोपगतवन्तौ स्थोऽस्मद्दर्शन मिति। एव मस्मा मृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते, विधवया च यजमानः॥

अथैकपदनिरुक्तम्।—"विधवा विधातृका भवति"। धाता स

---

* ऋ० सं० ७, ८, १८, १।
† मनुः ९ अ० ६९, ७० श्लो०।

तस्या विगत इति। "विधवनाद्वा" सा हि भर्तृमरणेन विधूता कम्पितेव भवति। "विधावनाद्वा" सा हि भर्तुरभावादनुरुध्यमाना तत्र तत्र विधावेत्येव। "इति चर्मशिराः" आचार्यो मन्यते। "अपि वा धव इति मनुष्यनाम*, तद्वियोगाद् विधवा। "देवरः"-इत्येष शब्दो "दीव्यतिकर्मा" दीव्यत्यर्थः; स हि भर्तुर्भ्राता, नित्य मेव तया भ्रातृभार्यया देवनार्थं ब्रियत इति देवर इत्युच्यते। "मर्यः मनुष्यः" स हि "मरणधर्मा"। "योषा यौतेः" मिश्रणार्थस्य; सा हि मिश्रयत्यात्मानं पुरुषेण साकम्। "आ कुरुते सहस्थाने" आभिमुख्येन आत्मना कुरुते परिचरणाय॥

"अथ निपाताः" समाम्नाताः। यथा—"अग्निर्नये" इत्येव मादयः, ते चत्वारोऽवसरप्राप्ताः। ते च पुनः "पुरस्तादेव व्याख्याताः" सामान्यतः†, विशेषत इदानी मुदाहरणतो व्याख्यायन्ते। तत्र "यथा इति" एषा "कर्मोपमा"। किं मुदाहरणम्? "यथा वातो यथा वनं यथा समुद्र एजति"—इति‡। सप्तवधिराग्नेयोऽपश्यत्। एषा अनुष्टुप्। गर्भानुमन्त्रणे विनियुक्ता। यथा वात-वन-समुद्राः एजन्ते कम्पन्ते, एवं 'त्वं' हे 'दशमास्य' दशमाससम्भूत! गर्भ! एतस्मात् मातुरुदरात् अदुःखयन् एनाम् एजन् चलन् 'अवेहि' अर्वाङ् एहि, 'सह' 'जरायुणा' उल्वेन प्रजायस्व; मा स्याः त्व मेतस्मिन्नुदरे इत्यभिप्रायः॥

---

* १भा० १०८५ (२)।

† अथ निपाता इत्यादिभिस्तु उपेक्षितया इत्यग्नेरनभिः सर्वैः (पु० ४४—८६५०)।

‡ "०एजति। यथा त्वं दशमास्य सहावेहि जरायुणा॥" ऋ० सं० ४, ४, १०, ४।

अपर मुदाहरणम्;—"अदृश्र मस्य केतवः"—इति*। प्रस्कण्वस्यार्षम्। गायत्री। सौरी सा। अनयातिग्राह्यो गृह्यते पृष्ठस्य षष्ठेऽहनि। 'अदृश्रम्', 'अस्य' 'केतवः' रश्मयः; 'वि' विविधाः दृश्यन्तेऽस्य भगवतः सूर्यस्य प्रज्ञानसत्त्वाः; ते हि तमोऽपहत्य सर्वप्राणिनां प्रज्ञानमभिव्यञ्जयन्तीति त एव केतव इत्युच्यन्ते लक्षणया। अथवा प्रकाशसत्त्वास्त इति साक्षादेव केतुशब्दस्तेषु स्यात्। केतुरिति विज्ञानमुच्यते†, विज्ञानञ्च पुनः प्रकाशसत्त्वास्यैत इति केतव इत्युच्यन्ते। अथवा केतव इव सर्वतो दिग्भ मुच्छ्रिता आदित्यमण्डले; ध्वजो हि केतुरुच्यते। के पुनस्ते? इति, 'रश्मयः'। किं कुर्वन्ति य एव मुच्छ्रिताः? इति, उच्यते;—'जनान् अनु' तिष्ठन्ति गच्छन्ति तमांस्यपहन्तु मन्यांश्चोपकारान् कर्तु मोषधिपाकादीन्। कथं पुनरनुतिष्ठन्ति? 'भ्राजन्तः' दीप्यमानाः। कथम्? 'अग्नयो यथा' येन प्रकारेण अग्नयो भ्राजन्ते, तथा भ्राजन्तोऽनुतिष्ठन्ति॥

अपर मुदाहरणम्;—"यदिमा वाजयन्नहं"-इति‡। आथर्वणो भिषक्, तेनेय मोषधिसूक्ते दृष्टा। अनुष्टुप्। एतेन पुनरुपतप्तो दीक्षितो एकविंशतिभिर्दर्भपिञ्जूलीभिराभिरद्भिरभिषिच्यते। उपतापशान्त्यर्थ मनेनैव सूक्तेनाग्निचयनार्थं चेत्तं ग्राम्यारण्याभिरोषधिभिरुप्यते। 'यद्' यदा, अहम् 'इमाः' 'ओषधीः' 'हस्ते' 'आदधे' आधाय च सन्निकर्षेऽपि तिष्ठामि रोगिणः एताः ओषधीः 'वाज-

---

* "अदृश्र मस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा॥" ऋ० सं० १, ४, ७, २।

† १भा० ३१३ पृ० ९ स्त० (२)।

‡ "यदिमा वाजयन्नहं मोषधीर्हस्ते आदधे। आत्मा०—" ऋ० सं० ८, ५, १०, १।

यन्' पूजयन् स्तुवन्नित्यर्थः। अथ तदेव तदनन्तर मेव 'पुरा' एव तासा मोषधीनां प्रयोगात् अस्मात् सुनीतम् ओषधिवीर्यम्, असह्यं मन्वानः 'आत्मा' 'यक्ष्मस्य' यक्ष्मणो 'नश्यति' रोगस्यापुनरागमनाय। कथं पुनर्नश्यति? 'जीवगृभः यथा' यथा जीवग्राहस्य, पुरैव हननात्; अहतस्यैव जीवो नश्येत् विपदो दैवात्, एव मात्मा रोगस्यापि पुरैवौषधिप्रयोगात् नश्यतात्यभिप्रायः॥

निगमप्रसक्त मुच्यते;—"आत्मा अततेर्वा" सर्व मेव हि तेनातितं भवति सर्वगत्वात्। "आप्नेर्वा" सर्व मेव हि तेन व्याप्तं भवति सर्वगतत्वादेव। "अपि वाप्त इव" सङ्घाते ह्यसौ कार्यकारणस्थो "यावद् व्याप्तिभूत इति' अपि चैव मन्यथा "स्यात्" आप्तो व्याप्त इव स्यात्। किञ्च सर्वगतत्वेऽपि सति यावन्मात्र मेव तस्य कार्यकारणसङ्घातेन व्याप्यते, तावन्मात्रभूत एवासौ लक्ष्यते, तावन्मात्रे हि प्रदेशे तस्य चैतन्यशक्तिरभिव्यज्यते; तप्तायसि दर्भमुष्टिप्रक्षेपात् अग्न्यभिव्यक्तिवदिति। सूक्ष्मेण हि स्थूलं व्याप्यते, न स्थूलेन सूक्ष्मम्; स्थूलञ्च कार्यकारणम्, सूक्ष्म आत्मा; तस्मादिवशब्दः॥

"दृढं यथा(१)", "अग्निर्न ये(२)", "चतुरश्रिद् ददमानात्(४)" —इत्येषः समाम्नायानुक्रमः*। अग्निर्नय इत्यस्य निघण्टुतन्त्रस्य "दुर्मदासो न सुरायाम्"—इत्यनेनैवा गतार्थतेति मन्यमानाः के चिदत्र निगमं नाधीयते, अपरे पुनः समाम्नायानुक्रमोऽय मिति मन्य-

---

* १भा० ३३० पृ० १अ० १२ख०।

† पुरस्तात् ४४ पृ० ७पं० किञ्च ४८ पृ० १पं०।

माना एव मेवं निगम मधीयते। "अग्निर्नये भ्राजसा रुक्मवक्षसः"*। भार्गवस्य वसदस्योरिय मार्षम्। मारुती। जगती। अग्निरिव ये भ्राजिष्णुतया रोचनाः; यथा केन चित् प्रकर्षेण 'रुक्मवक्षसः' रोचिष्णूरस्काः; मरुतः। किञ्च; 'वातासो न स्वयुजः सद्य ऊतयः' वाता इव स्वयुजः। स्वेन स्वेनानुग्रहेणानुग्राह्याणां स्तोतॄणां योजयितारो ये ते 'स्वयुजः'। किं तेषाम्? 'सद्य ऊतयः' शीघ्रगतय इत्यर्थः। किञ्च; 'प्रज्ञातारो न ज्येष्ठाः सुनीतयः' यथा के चित् प्रकर्षेण ज्ञातारः 'सुनीतयः' स्युः, प्रशस्तया नीत्यान्विताः; एव मेतेऽपि मरुतः। बलप्रधाना हि ते इत्यतः प्रज्ञावद्भिरुपगीयन्ते। 'सुश्रर्माणो न सोमा ऋतं यते'। सुखाः बन्धव इव सन्तु 'सोमाः' सोम्याः 'ऋतं यते' ऋतं यज्ञं कर्तुमिच्छते यजमानाय। ये एवङ्गुणयुक्ता मरुतो भवन्तीति, तान् वयम् अभिप्रेतार्थसिद्धये स्तुम इति वाक्यशेषः ॥ २ ॥

चतुरश्चिद्दमानादिभीयादा निधातोः। न दुरुक्ताय स्पृहयेत्। चतुरोऽक्षान् धारयत इति† तद्यथा कितवाद् बिभीयादेव मेव दुरुक्ताद् बिभीयान्न दुरुक्ताय स्पृहयेत् कदा चिदा इत्याकार उपसर्गः पुरस्ताद्देव व्याख्यातो ऽथाप्युपमार्थे दृश्यते। जार आ भगम्। जार इव भग मादित्योऽप जार उच्यते राचेर्जर-

---

* "अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्य ऊतयः। प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुश्रर्माणो न सोमा ऋतं यते॥" ऋ० सं० ८, ६, १९, २।

† "चतुरश्चिदारयत इति" क, ख, ग। "चतुराऽक्षान् धारयत इति" घ।

यिता स एव भासां तथापि निगमो भवति। स्वसुर्जारः शृणोतु न इत्युषस मस्य स्वसार माह साहचर्याद्रसहरणाद्वापि त्वयं मनुष्यजार एवाभिप्रेतः स्यात् स्त्रीभगस्तथा स्याद् भजतेर्मेष इति भूतोपमा। मेषो भूतोऽभियन्नयः। मेषो मिषतेस्तथा पशुः पश्यतेरग्निरिति रूपोपमा। हिरण्यरूपः स हिरण्यसन्दृगपान्नपात्सेदु हिरण्यवर्णः। हिरण्यवर्णस्येवास्य रूपं या इति च। तं प्रत्नथा पूर्वथा* विश्वथेमथा। प्रत्न इव पूर्व† इव विश्व इवेम इवेत्यय मेततरोऽमुष्मादसावस्ततरोऽस्मादमुथा यथासाविति व्याख्यातं वदिति सिङ्गोपमा। ब्राह्मणवद्वृषलवत्। ब्राह्मणा इव वृषला इवेति (वृषलो वृषशीलो भवति वृषाशीलो वा‡)॥ ४ (१६)॥

चिदित्यय मपरो निपात उपमार्थीयो भवति; पुरस्तादप्ययमुक्तो "दधिचिदित्युपमार्थे"१, इदानीं समाम्नायविशेषव्याख्यानावसरप्राप्तस्य छान्दस मुदाहरण मस्य प्रदर्श्यते। छतमत् पुनस्तत्?

---

*,† 'पूर्व्वथा" इति, 'पूर्व्व"—इति च क।

‡ वन्धनोचिछान्तर्गतं निर्वचनं न दृश्यते क-ख-ग-पुस्तकेषु।

॥ ४९ पृ० १९ पं० किञ्च ५० पृ० ७ पं०।

इति, उच्यते;—"चतुर॰—॰स्पृहयेत्" *। मित्रावरुणावर्यम्णश्च घोरपुत्र एतां गायत्रीं ममक्षत्। चतुरोऽक्षान् धारयमाणात् "कितवात्" योऽन्यः कितवो "बिभीयात्" किं मयि यतिष्यन्ते तदन्यदा किञ्चिद् येन मा मयं जेष्यतीति। निहितेषु न तथा भयं भवति यथा कितवस्य प्राङ् निधानात्। "एवं" सर्वदा "एव" "दुरुक्ताद्" "बिभीयात्" उद्विजेदित्यर्थः। तथा तथा वर्त्तेत यथा यथा दुरुक्तं न शृणुयात्, न श्रूयते। दुरुक्ते हि वरुणो देवता, तस्मात् "न दुरुक्ताय स्पृहयेत्" "कदाचिद्" अपि किन्तु सूक्त मेव हि शृणुयात्; तत्र हि मित्रो देवता अर्यमा च॥

"ब्राह्मणा व्रतचारिणः"—इत्येतदुपरिष्टाद् व्याख्यास्यते—"संवत्सरं शशयाना (ऋ॰सं॰ ५,७,३,१)"—इत्येतस्मिन् मन्त्रे, चतुर्दशेऽध्याये †॥

"वृक्षस्य नु ते पुरुहूतवयाः"—इत्येतत् पुरस्ताद् व्याख्यातम् ‡॥

"आ इत्याकार उपसर्गः" स पुनरेष "पुरस्तादेव व्याख्यातः"—"आ इत्यर्वागर्थे" इति §; "अथापि" अय माकारः कदाचित् "उपमार्थे" अपि "दृश्यते"। तद्यथा,—"जार आ भगम्" इति। किं मुक्तं भवति? "जार इव भगम्"—इति। आह;—कोऽय मत्र जार उच्यते? "आदित्योऽत्र" "जारः" इति "उच्यते" अस्मिन् मन्त्रे। स हि "रात्रेर्जरयिता" तदुदये हि रात्रिर्जीर्यते विपरण-

---

* ऋ॰ सं॰ १, ६, १२, ४।

† दै॰ का॰ ९, १, १। द्रष्टव्यश्च पुरस्तादपि १भा॰ १८॰ पृ॰ (५)।

‡ १अ॰ २पा॰ ३ख॰ (५०—५१ पृ॰)।

§ १अ॰ १पा॰ ५ख॰ (४१—४२ पृ॰)।

मतीत्यर्थः। "स एव भासाम्" चन्द्रादीनां या भासः ता अपि स एव उद्यन् जरयति॥

"उदीरय०—० वेपते मती"*। अङ्गिरःपुत्रो हविर्द्धाने एतथा जगत्या अग्निं मस्तौत्। पितृमेधे विनियुक्ता। हे भगवन्नग्ने! सर्वगतं सन्त मशेषस्य मात्मानं विशेषात्मलाभाय 'उदीरय' उद्गमयैव। अरणी पितरौ प्रति, अथवा द्यावापृथिव्यौ पितरौ स्याताम्†, अहोरात्रे वा; ते प्रति विशेषात्मलाभायोज्वलय त्व मात्मानम्। कथं च पुनरुदीरय? 'जार आ भगम्' जार इव भगम्। जार आदित्यो यथा भगं भजनीयं भौम मान्तरिक्षं च रसं खं वा ज्योतिरूर्द्ध मीरयति, एवं त्व मात्मानं पितरौ प्रत्युदीरय। कस्मात् पुनरेव मादरवान् ब्रवीमि? यस्मादेव यजमानः 'दयते' यष्टु मिच्छति देवान्, 'हर्य्यतः' हवींषि प्रेप्सतः; न च त्वदृते शक्येऽध्येयम्; त्व मेव हि प्रतिविशिष्टं यज्ञसाधनं सर्वं मन्यत्र चैवङ्गुणभूतम्। किञ्च; अयं यजमानः 'हृत्तः' हृदयेन 'इयति' दक्षत्यात्मनोऽभिलषितान् कामान्; न च देवाननिष्ट्वा शक्यास्ते प्राप्तु मिति अतो ब्रवीमि,—देवयागाय यजमानकामप्राप्तये च उदीरय त्व मात्मान मिति। किञ्च; अय मपि 'वक्निः' यज्ञवोढा होता 'स्वपस्यते' यजमानाय‡ अभीष्टकामोपपिपादयिषया देवतितर्पयिषया

* "उदीरय पितरा जार आ भग मियर्त्ति हर्य्यतो हृत्त इयति। विवक्ति वक्निः स्वपस्यते मखस्यविध्यते अङ्गिरो वेपते मती॥" ऋ० सं० ७, ९, १०, १।

† "द्यौर्मे पिता * * * माता पृथिवी * * *॥" ऋ० सं० १, ३, १०, ३।

‡ "स्वपसः * * * सुकर्मणः"—इति दै० ८, १, २।

च ऋत्विग्भिः कर्म क्रियमाणं भिक्षति 'विवक्ति' च अतो ब्रवीमि,—आत्मान मभ्युदीरय पितरौ प्रति विशेषात्मलाभाय। किञ्च; 'मखः'* 'तविष्यते' परिसमाप्तिं यास्यति† उपक्रमादारभ्यापवर्गात्; अतो ब्रवीमि,—उदीरय त्व मात्मान मिति। किञ्च; अय मध्वर्युः 'असुरः' असुमान् प्रज्ञावान् अतिकुशलः अस्मिन् यज्ञकर्मणि 'वेपते मती' मत्या वेपते प्रोत्कम्पमानहृदय आस्ते सादरः प्रक्षीभूतः, अपि नामाय मुदीरयेदात्मानं ततोऽहं मेनद्यज्ञकर्म तनुया मिति; अतो ब्रवीमि,—उदीरय त्व मात्मान मिति। अपि वा असुरो ब्रह्मा‡; स हि त्रयीविद्योपजनित-प्रज्ञानः। अपि चोद्गाता असुरः; स हि प्राणेनासुना तद्वान्, उद्गातृत्वस्य प्राणवृत्त्यधीनत्वाद् विशेषणम्। अपि वा यज्ञाधिदैवतैवान्वादिश्यतेऽसुर इत्यनेन तस्या आनन्तर्यात्। अपि वा सर्व एवैते यजमानादयोऽन्वादिश्येरन्, सर्वेषां प्रकृतत्वात्। 'असुरः' असुराः 'वेपते' वेपन्त इति; सर्व एते यजमानादयोऽसुमन्तः§ मतिभिर्वेपन्तो प्रोत्कम्पमानहृदया आसते; युष्मदात्मोदीरणप्रतीक्षाः। अपि नाम अय मग्निरुदीरयेदात्मानं ततो नोऽभिप्रेतार्थसाफल्यं स्यादिति; अतो ब्रवीमि,—उदीरय त्व मात्मान मरण्यादीनां पितृणां मन्यतमौ पितरौ प्रति। अपि चैतावेव पितरौ दम्पती पत्नी यज-

---

* १भा० १४९ पृ० (११)।

† "तविष्यते, तविषिर्दृढार्थः, अत्तर्णीनसनर्थस्य द्रष्टव्यः; स्तुतविषति। स्तोत्रलक्षणां स्तुतीर्वर्द्धयितु मिच्छतीत्यर्थः।"—इति सायणः।

‡ 'असुरः, प्राणवान् प्रज्ञावान् वा; ब्रह्मेति शेषः।'—इति सायणः।

§ "असुरिति प्राणनाम"—इत्यादि पुरस्तात् द्रष्टव्यम् (१७८ पृ०)।

मानौ अग्न्याधेयेन नवजननसम्बन्धेन पितरः। हे भगवन्! अग्ने! तावेतौ यज्ञविपरिणामकाले एतस्मिन् प्रत्युपस्थिते देवयानेन वा पितृयानेन वा मार्गेण उदीरय उद्गमय यथाप्रार्थितफलप्राप्तये। समान मन्यदृक्कृतं पूर्वेणार्थेन॥

यथा आदित्यो जारशब्देनोच्यते "तथा अपि" अयं "निगमो भवति" (अथान्येऽपि बहवः इत्यपिशब्दः);—"मातुर्दिधिषु०—० सखा मम"*। एषा गायत्री। भरद्वाजस्यार्षम्। "एहि वां विमुचो नपादाघृणेः (ऋ० सं० ६,५,६,१)"—इत्येतस्मिन् पौष्णे सूक्ते। 'मातुः दिधिषुम्' माता रात्रिरादित्यस्य; स हि भगवान् रात्र्या जघने प्रातरुदेति कुमार इव स्त्रियाः प्रसवकाले, तेन ज्ञायते रात्रे रेवासौ जायत इति; अतो रात्रिर्माता †, तस्याः स एवं धारयिता रोद्धा, तम्. 'मातुर्दिधिषुं' धारयितार महम् 'अब्रवम्' उक्तवानस्मि यन्मेऽभिप्रेतम्। स एव चादित्यो 'मम' 'सखा' समानख्यानः ‡ यथैवाह मेतस्मिन् यज्ञे जगदनुग्राहके कर्मणि अभिप्रवृत्तः, एव मसावपि प्रकाश-पाक-रसादान-वर्षादिलक्षणे कर्मणि जगदनुग्राहके अभिप्रवृत्तः; इत्येतस्मादावयोः समानख्यानत्वम्। यत एव मम समानख्यानः, अतो मध्यमस्य च 'इन्द्रस्य' 'भ्राता' उदकभागहर्त्ता अथ वा मध्यमस्यैवोदकेन भर्तव्यः §; तेन ह्यसौ दीप्यते। स पुनः

---

* "मातुर्दिधिषु मब्रवं स्वस्रोरप्तृणातु नः।
भ्रातेन्द्रस्य सखा मम॥" ऋ० सं० ४, ८, ११, ५।

† "मातुर्निर्माच्या रात्रेः"—इति सायणः।

‡ "सखायः * * * समानख्यानाः"—इति दै० ७, १, ७।

§ "भ्राता, भरतेर्हरतिकर्मणो हरते भागं भर्तव्यो भवतीति वा" नैरु० का० ४, ४, ५।

किं करोतु? यच्च पूर्वमहं मन्त्रवं तच्च साधयतु; साम्प्रतञ्च यद् ब्रूमः, तच्च 'शृणोतु' श्रुत्वा च तदपि साधयत्वित्यभिप्रायः। 'स्वसुर्जारः' इति। अस्मिन् मन्त्रे स्वसृशब्देन मन्त्रदृक् "उषसम्" "आह"। केन पुनः सामान्येनेति? उच्यते,—"साहचर्यात् रसहरणाद्वा'। भ्राता स्वसा साकं वाक्ये नित्य मेव चरति, तथा चोषसा साक मादित्य इत्येतत् सामान्यम्। आदित्यो हि पूषा, "अथ यद्रश्मि-पोषं पुष्यति, तत् पूषा भवति"—इति हि वक्ष्यति *। तस्मात् पूष्णः एतस्मिन् मन्त्रे जारत्व मेतत् आदित्यस्य दर्शितम्। रसहर-णाद्वा उषाः स्वसादित्यस्य। भ्रातृ-स्वस्रोः सम्भोजनाभिप्रायसामा-न्यम्। "अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात्" अथादित्योऽपि मनुष्यजारः। अथ मेवास्मिन् मन्त्रे "उदीरय पितरा जार आ भगम् (ऋ० सं० ७,६,१०,१)"—इत्यभिप्रेतो मन्त्रदृशः; नैरु-क्तानां वा स्यात्। "तथा" पुनः सति "स्त्रीभगः" एव "स्यात्"। भगः "भजतेः" सेवनार्थस्य; स हि सेव्यते मैथुनार्थिभिः पुरुषैः। जारो मनुष्यः, स हि परकीयां स्त्रियं भोगेन सार्वाङ्गिकेण निर्दयो भूत्वा जरयति विपरिणामयति, स्वामरूपां करोति, न तथा निजो भर्त्ता। तं च दृष्टान्तदर्शनेनैवोदीरय;—यथैव स्त्रियाः भग उपस्थः, पुरुषाग्निसम्बन्धे आर्द्रीभवति, एव मरणियोक्तादिहस्तानस्मान् द्युम्नम्निमन्थिषून् दृष्ट्वोदीरय त्वा मात्मानं हे भगवन्नग्ने! इत्येवं योज्यं जारशब्दे मनुष्यविषये सति †॥

---

* उत्तरषट्के, दै० का० १९, १, ५।

† परस्ताच्च द्रष्टव्यम् (५, ४, ४.—१०, ९, ४.)।

"मेष इति भूतोपमा" मेष इत्येषा भूतशब्देनोपमा। "मेषो भूतोऽभि यन्नयः (ऋ०सं० ५,७,२४,५)"—इत्येष निगमः *। निगमप्रसक्त उच्यते,—"मिषो मिषतेः" दर्शनार्थस्य। पर्यायप्रसक्त मुच्यते,—"तथा पश्यतेः पश्यतेः" इति; पश्यति ह्यसौ। "इत्याधी०—०यन्नयः" †। काण्वस्यैव मेध्यातिथेरिय मार्षम्। ऐन्द्री। गायत्री। हे 'अद्रिवः' अद्रिवन्! वज्रिन्! 'इत्या' अमुना प्रकारेण 'मेषो भूतः'। इत्य मनेन शब्देन अमुनेत्येतच्छब्दपर्यायवाचिना अभिगमन-प्रकार मेतस्मादेव मन्त्रदृग्दर्शनाद् विज्ञाय अभिनयेन मन्त्रदृग्-वर्त्तमानः काण्वो मेधातिथिर्दर्शयति;—हे अद्रिवन्! एव मन्यक-ल्पान्तरीण मेव 'मेध्यातिथिं' 'धीवन्तं' कर्मवन्तं वा 'अभियन्' आहूतो याज्ञे कर्मणि अभिमुख्येनाभ्युद्यतैर्महद्भिर्दायैः 'यन्' गच्छन्, आह्वानसमनन्तर मेव अविलम्बमानः 'मेषो भूतः' मेष इव किञ्चि-दप्युत्तर मब्रुवन् तं गौरवावगत मित्या अनेन प्रकारेण अयस्कम् आप्तवानसि। न च तदस्माक मप्रत्यक्षम्। एतस्मादेव मन्त्रदर्शनाद-खिलं तद् ‡ विजानीमो वयं यतोऽतो ब्रूमः। अपवृत्ते तस्मिन् काण्वे मेध्यातिथौ सहान्यमन्वन्तरीणैरधिकारिभि रिदानी मस्य मनोरन्तरे मेधातिथिप्रापकेन कर्मणा मेधातिथिपदम्, तदहं प्राप्तवान्। सोऽहं ब्रुवे;—याः ताः काण्व-मेधातिथिद्वारेण स्तुतयः नित्याः प्रादुर्भवन्ति। एतासां प्रवक्तृत्व मपि वर्त्तते। स त्व मेताः

* १भा० ३८१ पृ० (८)।

† "इत्या धीवन्त मद्रिवः काण्वं मेधातिथिम्।
मेषो भूतोऽभि यन्नयः॥" ऋ० सं० ५, ७, २४, ५।

‡ "मेधातिथिं हि काण्वायनिं मेषो भूत्वोदजहार" सा० वे० षड्वि० ब्रा० १,१।

प्रुष्णुषुः, हवींषि वास्मत्प्रदत्तानि प्रतिजिघृक्षुः, पूर्वकाण्व-मेधातिथि-वदस्मानप्यभ्येहि ; किमर्थं वा नाभ्येषीत्यभिप्रायः ॥

"अग्निरिति" एषा "रूपोपमा" * । "हिरण्यरूपः०—०त्यन्न मस्मै" † । गत्समदस्येयं मार्षम् । त्रिष्टुप् । अपान्नपाद्देवता । कुम्भेष्टकोपाधानेऽग्निचयने विनियुक्ता । 'हिरण्यरूपः' हिरण्यसमान-रूपः । अपि च, 'सः' 'अपान्नपात्' मध्यस्थानो वैद्युतोऽग्निरादि-त्यस्य पुत्रोऽपान्नपात् ‡, प्रावृट्काले घर्मार्त्तानां प्रजानां मन्नार्थि-नीनां च 'हिरण्यसन्दृक्' हिरण्य मिव सन्दृश्यमानः मनःप्रीतिजन-कः । अपि च, स एव 'हिरण्यवर्णः' हिरण्य मिव वरणीयः § प्रार्थ-नीयो भूतानाम् । य एवङ्गुणयुक्तोऽपान्नपात्, स किं करोतु ? इति,—'हिरण्ययात्' तेजोमयात् 'योनेः' आदित्यात् विनिर्गत्य 'परि नि षद्य' सर्वतो निषद्य मध्यस्थाने अभ्रजालेनान्तरिक्षलोकं व्याप्य ('हिरण्यदाः'—इत्येकं पदम् विसर्जनीयान्तम्) 'हिरण्यदाः' हिरण्य-दाता । सोऽपान्नपात् परिषद्य 'ददति' ददतु 'अन्नम्' अन्नहेतु-दकम् 'अस्मै' यजमानाय इति । "समुद्रादूर्म्मिर्मधुमाँ उदारत्॥"—इत्यादित्य मुक्तं मन्यन्ते; इत्येतस्माद् दर्शनादपां पुत्र आदित्यः । "आ दूतो अग्निं मभरद् विवस्वतः ¶"—इत्यतश्चादित्यस्यापि वैद्युतो ऽग्निः पुत्रः, इत्येव ममावपान्नपात् = अपां नप्ता ॥

---

* १भा० ६८१ पृ० (९) ।

† "० हिरण्यवर्णः । हिरण्ययात् परि योनेर्निषद्या हिरण्यदा ददत्यन्न मस्मै ॥" ऋ० सं० २, ७, २२, ५ ।

‡ १भा० ४७८ पृ० (११) ।

§ १भा० ६८१ पृ० (१०) ।

॥ ऋ० सं० ६, ८, १०, १ ।

¶ ऋ० सं० ४, ५, १०, ४ ।

'था'—इत्ययं चोपमाशब्दः * । आह ;— किं मुदाहरणम्? उच्यते ;—"तं प्रत्नथा पूर्वथा" इति † । अवत्सारः पञ्चदशर्चं सूक्त मपश्यद् वैश्वदेवम्; तस्मिन् वैश्वदेवे सूक्ते प्रथमा मेवैतां जगतीं मपश्यत्। वैश्वदेवेषु च सूक्तेषु एकदेवता अपि मन्त्रा भवन्त्येव। बाक्तृचे वाजपेये सप्तदशे ग्रस्त्रे विनियुक्तोऽयम् ‡। चरकाध्वर्यवः पुनरनया मन्थिनं गृह्णन्ति। तेषां पुनः श्रुतिः,—"प्रजापतेर्वा एते चक्षुषी यच्छुक्रामन्थिनौ, असावादित्यः शुक्रः, चन्द्रमा मन्थीत्येवं चन्द्रदेवतोऽयं मन्त्रः। अपि वा "तस्मै सूर्याय हविराजुहोत"—इति हवनमन्त्रे सूर्यश्रवणात् सूर्यदेवतोऽयम्। शौनकस्तु दाशतये समाम्नाये मन्त्रदेवता अनुक्रममाणः "को नु वां मित्रावरुणौ (ऋ० स० ५,१, ९ सू०)"—इत्यत आरभ्य वैश्वदेवान्येकादशसूक्तान्यवोचत्; "तं प्रत्नथा (ऋ० सं० ५,३,१२ सू०)"—इत्येतच्चतुर्थं सूक्तम्, तेन तन्मत्या वैश्वदेव एष मन्त्रः स्यात्। वाजसनेयिनां पुनरनया शुक्रो गृह्यते, स च सा प्रथमा संस्कृतिरित्यनेनैन्द्रेण हूयते; तेन तेषा मप्यय मैन्द्र एव §। चारके पुनराध्वर्यवे श्रुतिः शुक्रामन्थिनोः, तस्मादेता-वन्यदेवतौ गृह्येते। अथेन्द्राय हूयते इति तेन ज्ञायते। यद्यपि हवन मन्त्र ऐन्द्रो मन्थिनः, तथापि ग्रहणमन्त्रो नैन्द्र इति, स

---

* १भा० १८१४० (११)।

† "तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषद् खुर्विदम् (प्रतीचीनं वृजनं दोहसे गिरा शुं जयन्तं मनु यासु वर्धसे॥" ऋ० सं० ४, २, ११, १।

‡ मूलर्-प्रकाशिते १भा० ४१३ पृ० १७—२२ पंक्तयो द्रष्टव्याः।

§ "शुक्रं वैश्वेन वा तं प्रत्नथेति'—इति का० सू० ४, १, १९।

एव सर्वथाऽयं दुरवधारदेवतो मन्त्रः, अनिरुक्तदेवतालिङ्गत्वात्*। शण्डामर्कयोस्त्वसुरपुरोधसोः† सम्मोहनार्थं मनेनानिरुक्तदेवतालिङ्गेन मन्त्रेणान्यतरः शुक्रामन्थिनोर्गृह्यते। "शण्डा-मर्कौ वा असुराणां पुरोहितौ वास्ताम्"—इत्युपक्रम्य "तावेतौ शुक्रामन्थिना वा एणोथाम्"—इत्युक्त्वा "तावपनुद्याथेन्द्रायां जुह्वयुः"—इत्युक्तम्। तस्मात्तावनेनानिरुक्तदेवतालिङ्गेन मन्त्रेण सम्मोह्यते। सौम्यो वा स्यादयम्; सोमो ह्युच्यते मन्थिपात्रेण शुक्रपात्रेण गृह्यमाणः, गृहीतो वा सप्तदशस्तुशंसनाभिप्रायेण। हे भगवन्! सोम! त मिन्द्रं वा वैश्वदेवं गणं वा 'ज्येष्ठराजं' ज्येष्ठदीप्तिम्। अथ वा ज्येष्ठः श्रेष्ठः सर्वेषां देवाना मिन्द्रः, स यस्य राजा, सोऽयं ज्येष्ठराट् वैश्वदेवगणः, तं ज्येष्ठराजम्। वर्हिष्याह्वतो यज्वभिः यः सीदति, स वर्हिषत्, तं 'वर्हिषदम्'। खरिव यो दृश्यते, सः खर्दृक्, तं खर्दृशम्' सूर्यसमानदर्शन मित्यभिप्रायः। 'आशुं' शीघ्रम्। 'जयन्तं' जेतव्यानसुरादीन्। त मेवङ्गुणसंयुक्तम् इन्द्रं, वैश्वदेवं गणं हे सोम! 'त्वासु' क्रियासु 'अनुवर्डूसे' पुनः पुनः संस्क्रियसे। स त्वं क्रियासु नासु तथावस्थितस्त्वं 'गिरा' स्तुत्या सहितः त्वं 'प्रतीचीनं' यज्ञाभिमुखम् इन्द्रं वैश्वदेवं वा गणम् अवस्थाप्य स्वतेजसा तर्पयित्वा अस्मै यजमानाय 'वजनं' धनं 'दोहसे' धोक्ति प्रचारयसि। कथं पुनः

---

* "ऐन्द्रौ शुक्रामन्थिनौ, यदैन्द्रं शंसति तेन शुक्रामन्थिनावुक्थ्यवन्तौ"—इति ऐ० ब्रा० ३, १।

† य० वा० सं० ७, ११-१२ मन्त्रौ सव्याख्यानौ द्रष्टव्यौ। ऋक्संहितायां चैकत्र (१, ७, १२, ३) 'शण्डिकानाम्'—इति; शण्डामर्कावसुरपुरोहितौ; शण्डमर्काणाम्'—इति च मन्त्र सायणः।

धोचि इन्द्रं वैश्वदेवं वा गणम्? 'प्रत्नथा'* चिरन्तना इव। ये महर्षयो भृग्वादयः, तेषां यथा दुग्धवानसि, तथास्माक मपि धोचि। अपि च 'विश्वथा' ऋषिपुत्रकाणां मृषीणां च सर्वेषां यथा दुग्धवानसि, तथास्माक मपि धोचि। अपि च 'इमथा' यथा वर्त्तमानकालीनानां यजमानानां धोचि, तथैवास्माक मपीति। एव मेष यथाभिमतदेवतं योज्यः॥

इमथेत्येतस्मात् प्रसक्त मुच्यते,—"अयम्" इत्यस्य शब्दस्य का व्युत्पत्तिरिति? उच्यते,—"एतत्तरः" हि आगततर आसन्नतरः "असुमात्" दूरस्थात् भवति, सोऽय मित्युच्यते। "असावित्यस्य का व्युत्पत्तिरिति? उच्यते,— "असौ अस्ततरः" अस्मात् चिप्रतर इव विप्रकृष्टत्वाद् भवति। आह;— कुतः चिप्रतरः? उच्यते,—"अस्मात्" एततरात्। असावित्येतस्मात् प्रसक्त मुच्यते,—"असुथा, यथा असौ इति" असावित्यनेन शब्देनोक्तो भवति, स एवार्थः असुथेत्यनेनाप्युक्तो भवति॥

"वदिति" एषा "सिद्धोपमा" † सिद्धैर्वैषोपमा लोके। आह;— कथं कृत्वा? उच्यते,—"ब्राह्मणवत्, वृषलवत्"। ब्राह्मणवदधीते, वृषलवच्चाक्रोशतीति॥ ४॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत्। अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम्। प्रियमेधः प्रिया

* "प्रत्नपूर्वविश्वेमात् थाल् छन्दसि"—इति पा० ५, ३, १११।
† १भा० ३८१ पृ० (११)।

अस्य मेधा यथैतेषा मृषीणा मेवं प्रस्कण्वस्य शृणु ह्वानं प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्र मर्चिषि भृगुः सम्बभूव भृगुर्भृज्यमानो न देहेऽङ्गारेषङ्गिरा अङ्गारा अङ्कना (अञ्चना *) अचैव तृतीय मृच्छतेत्यूचुस्तस्मादङ्गिर्न चय इति विखननाद्वैखानसो भरणाद्भारद्वाजो विरूपो नानारूपो महिव्रतो महाव्रत इति ॥ ५ (१७) ॥

॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥ ३, ३.

कन्दस मुदाहरणं ब्रवीति;—"प्रियमेधवत्"—इति †। एषा प्रस्कण्वस्यार्षम्। अनुष्टुप्। आग्नेयौ। प्रातरनुवाकाश्विनयोः शस्यते। हे 'जातवेदः!' 'महिव्रत' महाव्रत! महाकर्मन्! महद्यस्य भगवतो जातवेदसः कर्म, हविर्वहणादिलक्षणम्, तेनैवामन्त्र्यते महिव्रत! इति। यथैतेषा मृषीणां प्रियमेधादीनां श्रुतवानसि पूर्वं माङ्गानम्, शृणोषि वा, एवं ममापि 'प्रस्कण्वस्य' शृणु आङ्गानम्। इत्याग्नेः॥ एष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"प्रियमेधः, प्रिया अस्य मेधाः" यज्ञाः इत्यर्थः‡। यष्टु मिति वाक्यशेषः। "प्रस्कण्वः, कण्वस्य पुत्रः" प्रपदस्य तद्धितार्थत्वं निराह, कण्वस्यापत्य मित्यर्थः। "यथा" प्रगत

---

* अयमेतत् पदं ख-घ-ङ-पुस्तकेषु।
† ऋ० सं० १, १, २१, १।
‡ १भा० १४७ पृ० (४)।

मग्नं "प्राग्नम्" इत्युच्यते, गत-शब्दलोपं कृत्वा; एव मिहापि "कण्व-प्रभवः" इति वक्तव्ये भव-शब्दलोपं कृत्वा व्यत्ययेन च प्रकृष्ण इत्युक्तम्। "भृगुः, भृज्यमानो न देहे" प्रजापतिना किल शुक्र मात्मीय मादाय अग्नौ हुतम्, ततः "अर्चिषि" ज्वालायां "भृगुः" नाम महर्षिः "सम्बभूव", व्यपगतेऽर्चिषि यो ऽङ्गारेषु सम्बभूव सोऽङ्गिरा नाम अभवत्*। विग्रहप्रसक्त मुच्यते,—"अङ्गारा अङ्कनाः" ते हि यत्र निधीयन्ते तदङ्कितम् भवति। तस्मिन्नुत्पन्ने द्वितीये "अत्रैव तृतीय मृच्छत"—"इत्यूचुः" ये पूर्वोत्पन्नाः ते। "तस्मात्" अत्रैव तृतीय इत्येतस्मादनुव्याहारात् "अत्रिः" अभवत्। अथवैव मन्यथा स्यात्,— अत्रिः प्रतिषेधार्थोऽकारः। कथम्? "न त्रयः" एवात्र, किन्तर्हि? खन्यता मेतदग्निस्थानं चतुर्थोऽप्यत्र भविष्यतीत्येव मनुव्याहारादत्रिरभवत्। व्युदुह्याग्निं तस्मिन्नग्निस्थाने य उत्पन्नः स "विखननाद् वैखानसः" एव नाम्ना अभूत्; "बभूवार्चिःषु अङ्गारेषु तत्रैव तृतीयं विखननाद् वैखानसः" इति। अनयैवानुपूर्व्यैतानि निर्वचनान्युपपादयितुं शक्यन्ते, तस्मान्मन्त्रपाठविपर्यासेनैतानि निरुक्तानि। "विरूपो नानारूपः" इति ऋज्वेव। व्रत मिति कर्मनाम। "महिव्रतो महाव्रतः" "इति" अर्थः ॥ ५ ॥

॥ इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

तृतीयः पादः ॥ २, ३ .

---

* "तस्य यद्रेतसः प्रथम मुददीप्यत, तदसावादित्योऽभवत्; यद् द्वितीय मासीत्, तद् भृगुरभवत्. तं वरुणो न्यगृह्णीत, तस्मात् स भृगुर्वारुणिः; अथ यत् तृतीय मदीदेदिव त आदित्या अभवन्; येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्"—इत्यादि ऐ० ब्रा० २, ३, ९।

॥ चतुर्थः पादः ॥

अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते सिंहो व्याघ्र इति पूजायां श्वा काक इति कुत्सायां काक इति शब्दानुकृतिस्तदिदं शकुनिषु बहुलं न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः काकोऽपकालयितव्यो भवति तित्तिरिस्तरणात्तिलमाचचिच इति वा कपिञ्जलः कपिरिव जीर्णः कपिरिव जवत ईषत्पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा श्वाशुयायी शवतेर्वा स्याद्गतिकर्मणः श्वसितेर्वा सिंहः सहनाद्धिंसेर्वा (स्याद्*) विपरीतस्य सम्पूर्वस्य वा हन्तेः संहाय हन्तीति वा व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा ॥ १ (१८) ॥

"अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते"†। उपमाधिकारो वर्त्तते। "यदेतत् तत्सदृशमिति‡"—एतदुपक्रान्तम्। तत्र शब्दवत्यश्चोपमा भवन्ति, लुप्तोपमाश्चशब्दाश्च। तत्र "अग्निर्न ये" इत्येव मादिभिः§ शब्दैरुपमिमिताना मर्थानां समानरूपैरर्थस्य मानं क्रियत इत्येतदनुक्रान्तम्। अथ इदानीं येषु पदेषु लुप्यन्ते उपमाशब्दा इवादयः, तान्यवसरप्राप्तानि व्याख्यास्यामः, तानि पुनरिमानि अथोपमानीत्येव माचचते आचार्याः, निरूढा क्रियते सञ्ज्ञेत्यभिप्रायः। तानि च पुन-

* मास्त्येतत्पदं क-ख-ग-पुस्तकेषु।
† १भा० ३८१ पृ० ११—१४ पं०।
‡ पुरस्तात् ३०६ पृ० १६ पं०।
§ पुरस्तात् ३१५ पृ० १३ पं०।

समाम्नातान्येव निघण्टु-समाम्नाये, तेषु वक्तुरभिप्रायगता एत एवोपमाशब्दा अर्थत उपमीयन्त इत्यर्थोपमा इत्युच्यन्ते। तान्येतानि भाष्यस्य विस्तरविषयत्वात् समाम्नातान्यपि सन्ति अवसरप्राप्तानि प्रदर्श्यन्ते। तद्यथा ;—"सिंहो व्याघ्र इति पूजायाम्"। यो हि पूज्यो भवति स उच्यते 'सिंहो देवदत्तः' इति*। अत्र न सिंह एव देवदत्तः, किन्तर्हि? सिंहगुणस्तत्र कश्चिदस्ति शौर्यादिः, अतस्तदभिधानेनोपमार्थं कृत्वोपमाशब्दाना मिवादीना मन्यतम मनुच्चारयन्नेव ब्रवीति 'सिंहो देवदत्तः' इति। यत्तदनुच्चारण मुपमा-शब्दस्य स एव लोप इत्युच्यते॥

"श्वा काक इति कुत्सायाम्"। यो हि लौल्यादि-दोषसमन्वयेन कुत्सनीयो भवति, स एव मुच्यते,— 'श्वा अयम्' इति। अत्रापि श्वेवाय मिति इवशब्दस्य लोपो द्रष्टव्यः। धार्ष्ट्यादि-दोषसमुच्चयेन† यः कुत्स्यते, सः 'काकोऽयम्' इत्युच्यते। काकादिशब्दान् उदाहरणप्रसक्तान् निर्ब्रवीति,—"काक इति शब्दानुकृतिः"। अनुकरण मनुकृतिः, शब्दस्यानुकृतिः; यादृश मेवासौ शब्दं करोति तथैवानुकृत्या तस्य नामापि भवति शब्दस्यानुकृतिः। स हि काकु इति वाच्यते, तस्मात् स काक इत्युच्यते। "तदिदम्" एवं शब्दानुकृतिहेतुकं नाम "शकुनिषु" एव तान्येषु सत्वविशेषेषु "बहुलं" प्रायेणेत्यर्थः। "न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः" शकुनिष्वपि न शब्दानुकृतिहेतुकं नाम विद्यते, इत्यौपमन्यव आचार्यो मन्यते। किं कारणम्?

---

* अमरकोषे अमरः—"सिंह-शार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः"—इति २,९,५९।
† "धार्ष्ट्यादि-दोषसमुच्चयेन"—इति ख।

व्यभिचारित्वात्। श्यामा, दर्वी, पुच्छप्लवः, हंसः, इत्येवमादिषु शब्दानुकरणहेतुको नामधेयप्रतिलम्भो नास्ति। शकुनिपक्षेऽपि शब्दानुकारो न विद्यते। बहवोऽप्येवं प्रकारा अन्यक्रियार्थैर्नामभिरन्विताः शकुनयः। तच्च, यदुक्तं "तदिदं शकुनिषु बङ्कलम्" इति। एतदयुक्तम्। आह;—कथन्तर्हि काकस्यान्यक्रियाहेतुको नामधेयप्रतिलम्भ इति? उच्यते;—स हि "काकः अपकालयितव्यो भवति उपघातभयात्; स हि यद्यत् स्पृशति तत्तदुपहन्तीति अपकाल्यते तस्मात् काक इत्युच्यते। शकुनिलसामान्यप्रसक्त मुच्यते;—"तित्तिरिस्तरणात्"। 'तॄ प्लवने (भ्वा० प०)'। उत्प्लुत्यासौ गच्छति। "तिलमात्रचित्र इति वा"। अथ वा तिलमात्रचित्रः स भवतीति तित्तिरिः। "कपिञ्जलः कपिरिव जीर्णः" यादृशो हि कपिः मर्कटः, जीर्णः सवर्णतो भवति, तादृशोऽसावपि कपिञ्जलः इत्युच्यते। अथ "वा" "कपिरिव जवते" कपिञ्जलः "ईषत्पिङ्गलः" इत्यर्थः। अथ "वा" "कमनीयं" प्रार्थनीयं मङ्गल्यं मधुरं वा "शब्दं" "पिञ्जयति" अभिव्यनक्तीति कपिञ्जलः। "एवमादीनि शकुनिनामधेयानि" एवमादिना प्रकारेण अशब्दानुकृतिपूर्वकत्वे सति निर्वक्तव्यानि। "श्यामुद्यायी"। श्यु इति क्षिप्रनाम *। क्षिप्रमसौ शीघ्रत्वादेतीति श्या। "श्वयतेर्वा गतिकर्मणः†"; स हि नित्यमेव गच्छति। "श्वसितेर्वा" वधकर्मणः‡। "सिंहः सहनात्" अभि

---

* १भा० २९१ सू० (१५)।
† १भा० १४१ सू० (१७)।
‡ १भा० १८० सू० (९)।

भवति ह्यसौ अन्यान् प्राणिविशेषान्। "सम्पूर्वस्य वा हन्तेः" उपसर्गश्लेषेण। "संहाय हन्तीति वा" वैयाकरणाना मेषा व्युत्पत्तिः। "व्याघ्रो व्याघ्राणात्" विविध मसौ जिघ्रतीति व्याघ्रः। तस्य हि घ्राणेन्द्रियं पटु भवतीति स हि घ्रान् आघ्राय हन्ति; घ्राणेन्द्रिये हि तस्य विशिष्टं ज्ञानम्। "व्यादाय हन्तीति वा"; स किल व्यादाय वक्त्रं विवृतं कृत्वा ततो हन्ति। अथ वा "व्यादाय हन्तीति" यः किल प्रथमे ग्रहे शङ्कितः, तेन हन्तुं भवति मृगोऽन्यो वा कश्चित्, त मसावमर्षाद् विकृष्य तस्मिन्नेव प्रदेशे प्रथमग्रहस्थाने आनीय ततो हन्ति। सिंहो व्याघ्रः श्वा काक इत्येव मनुक्रम्यार्वाचीनान्येतानि पदानि निरुक्तानि, अथ मपि निर्वचनप्रकारोऽस्तीति प्रदर्शनार्थम्। सिंहव्याघ्रशब्दयोस्तु अनुलोम मेव निर्वचन मनुलोमव्याख्योपप्रदर्शनार्थम्; एवं हि उभे अपि प्राप्ती दर्शिते भवति॥ २॥

अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशन्मेधाविनामान्युत्तराणि चतुर्विंशतिर्मेधावी कस्मान्मेधया तद्वान् भवति मेधा मतौ धीयते स्तोतृनामान्युत्तराणि चयोदश * यज्ञनामान्युत्तराणि पञ्चदश यज्ञः कस्मात् प्रख्यातं यजतिकर्मेति नैरुक्ता याच्ञेया भवतीति † वा

---

* इत उत्तरं "स्तोता स्तवनात्"—इत्यधिकं दृश्यते ग-च-पुस्तकयोः परं तद् दृष्टिविरुद्धम्; तच्च प्रत्यक्षेत्यादिश्रुतेः (३४०४० १पं०)।

† "याज्ञा भवति इति" क। "याचञ्ञो भवतीति" च।

यजुरुन्नो भवतीति * वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वर्त्विङ्नामान्युत्तराण्यष्टावृत्विक् कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिर्ऋतुयाजी भवतीति वा याच्ञाकर्माण† उत्तरे धातवः सप्तदश दानकर्माण उत्तरे धातवो दशाध्येषणाकर्माण‡ उत्तरे धातवश्चत्वारः स्वपितिसस्तीति द्वौ स्वपितिकर्माणौ कूपनामान्युत्तराणि चतुर्दश कूपः कस्मात् कुत्सितं पानं भवति कुप्यतेर्वा स्तेननामान्युत्तराणि चतुर्दशैव स्तेनः कस्मात्संस्त्यान मस्मिन् पापक मिति नैरुक्ता निर्ऋतान्तर्हितनामधेयान्युत्तराणि षट् (निर्ऋतं कस्मान्निर्ऋक्तं भवति §) दूरनामान्युत्तराणि पञ्च दूरं कस्माद् द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणि षट् पुराणं कस्मात्पुरा नवं॥ भवति नवनामान्युत्तराणि षडेव¶ नवं कस्मादानीतं भवति ॥ २ (१९) ॥

"अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशत्" **। 'अर्चतिकर्माणः' अर्च्यर्थाः, पूजयत्यर्थाः पूजाया मवश्यं भवितुं युज्यते उप-

---

* "यजुरुन्नो भवति इति" क। "यजुर्ना भवतीति" ङ।

† "याच्ञाकर्माण" क, च। "याच्ञकर्माण" च।

‡ "दशाध्येषणकर्माण" च।

§ यन्नैरुक्तचिह्नान्तर्गतानीमानि पदानि न दृश्यन्ते क-ख-ग-पुस्तकेषु।

॥ "पुरानवं" क। "पुरानवं" ग।

¶ "षडेव" क, ख, ग।

** १भा० २२० पृ० १च० १४च०।

मेति उपमाशब्देभ्योऽनन्तरम् अर्चतिकर्माणः समाम्नाताः। कियन्तः पुनस्ते? 'चतुश्चत्वारिंशत्' (४४)। कतमे पुनस्ते? "अर्चति, शृणोति" —इत्येवमादयः*। य एतेऽर्चतिकर्माणः, एतैर्हि मेधाविन एवार्चन्ति, एत एव हि स्तोतुं शक्नुवन्ति; नेतरे अमेधसः॥

तस्मात् "मेधाविनामान्युत्तराणि चतुर्विंशतिः"†। अर्चति-कर्मभ्यः 'उत्तराणि' 'मेधाविनामानि'। कियन्ति पुनस्तानि? 'चतुर्विंशतिः' (२४)। कतमानि पुनस्तानि? "विप्रः, धीरः, विद्वः" —इत्येवमादीनि‡। विविधानर्थानस्य प्राप्नुं प्रातीति विप्रः। धीः प्रज्ञा, तद्वान् धीरः; रा मत्वर्थे। विद्वच्च सदसि कथयतीति विद्वः। इत्येवमादि। आह;—"मेधावी कस्मात्"? उच्यते;— स हि "मेधया तद्वान् भवति"। आह;—"मेधाः"। कस्मात्? सा हि "मतौ धीयते"। मतिर्बुद्धिः, तस्यां या पुरुषशक्तिरभिव्यज्यते, सा मेधा इत्युच्यते§॥

य एव मेधाविनः, त एव स्तोतुं शक्नुवन्तीति मेधाविनामभ्यः "उत्तराणि" "स्तोतृनामानि"‖, कियन्ति पुनस्तानि? "त्रयोदश"। कतमानि पुनस्तानि? "रेभः, जरिता, कारुः"—इत्येवमादीनि¶। रेभो रेभतेः स्तुत्यर्थस्य**। जरिता जरतेः स्तुत्यर्थस्यैव††। कारुः कर्त्ता

---

* १भा० २२१—२२० पृ०।
† १भा० २२८ पृ० ३अ० १५ख०।
‡ १भा० २२८—२४४ पृ०। तत्र पुनर्नैवं पाठक्रमः।
§ साङ्ग्रमतेनैतदुक्तम्।
‖ १भा० २४४ पृ० ३अ० १६ख०।
¶ १भा० २४४—२४६ पृ०।
**, †† १भा० २२२ पृ० (२),(७)।

स्तोमानाम्। इत्येवमादि स्तोमम्। प्रत्यक्षवृत्तित्वादस्य शब्दस्य नोक्तं [illegible] कर्मादिति" ॥

यज्ञेषु हि प्रतिशयेन देवतानां स्तुतयः प्रयुज्यन्त इति स्तोत्र-नामभ्य "स्तोमाश्च" "यज्ञनामानि †"। कियन्ति पुनस्तानि? "पञ्चदश" (१५)। कतमानि पुनस्तानि? "यज्ञः, वेनः, अध्वरः, देवः"—इत्येवमादीनि ‡। आह;—"यज्ञः कस्मात्"? उच्यते;—यदेतत् "प्रख्यातं यजति कर्म" लोकवेदयोः। एतदेव भावसाधनेन शब्देनोच्यते यजनं यज्ञ इति। अथ "वा" "याच्ञ्ञो भवतीति" यज्ञः; याच्यते ह्यत्र, यतो वै देवाना मन्नं सम्भूतम् समभावयन्निति ह विज्ञायते; तस्माद् याचनाद् यज्ञः। अथ "वा" "यजुर्भिः" अयम् "उन्नः" संक्लिन्न इव "भवति", बहुत्वादत्र यजुषाम्। "बहु कृष्णाजिन इत्यौपमन्यवः" यद् यदत्र दृश्यते प्रतिविशिष्टं साधनं किञ्चित्, तत् तत् कृष्णाजिन मिति यज्ञः; सोमे तावदजिनद्वयम्, यजमानेऽप्यजिनद्वयम्, अवहन्यमानेषु हि हविःषु अजिनं घर्मोपार्जितं घर्मपात्रेष्वप्यजिनम्; एवं बहुकृष्णाजिनः। अथ "वा" "यजूंष्येनम्" उपक्रमादारभ्यान्तं "नयन्तीति" यज्ञः §। वनतिः कान्त्यर्थः; काम्यन्ते हि यज्ञाद् होमपशुस्वर्गादयः तस्मात् स वेनः यज्ञ इत्युच्यते ॥। ममेदं दास्यतीति एवं यज्वभिः अस्मात् फलं प्रार्थ्यत इति मेधः ¶। इत्येवमादि ॥

---

* ग-च-पुस्तकयोरस्त्येव "स्तोता स्तवनात्" इति।

† १भा० ३४९ पृ० ३च्य० १०ख०।

‡ १भा० ३४७—३५० पृ०। अस्ति च तत्र पाठव्यतिक्रमः।

§,॥,¶ १भा० ३४७ पृ० (१), (२), (४)।

यज्ञसम्बन्धेनैव "ऋत्विङ्नामानि उत्तराणि अष्टौ"*। ऋत्विजां नामानि ऋत्विङ्नामानि। कियन्ति पुनस्तानि? "अष्टौ (८) नामानि पुनस्तानि? "भरताः, कुरवः"—इत्येवमादीनि†। भियन्ते दक्षिणाभिरिति भरताः। कुर्वन्ति कर्माणीति कुरवः। इत्येवमादि। आह;—"ऋत्विक् कस्मात्"? उच्यते,—"ईरणः" ईरयिता स्तोतॄणां भवतीति ऋत्विक्। "ऋग्यष्टा भवतीति शाकपूणिः" ऋग्भिर्ह्यसौ यागकारी भवतीति ऋत्विक्। "ऋतुयाजी भवतीति वा" स हि काले देवता यजतीति वा। ऋतौ याजयतीति वा; स हि काले एव याजयते, नाकाले॥

ऋत्विक्सम्बन्धेनैव "याच्ञाकर्माण उत्तरे धातवः सप्तदश" (१७)‡। कतमे पुनस्ते? इति। "ईमहे, यामि, मन्महे"—इत्येवमादयः §॥

याच्ञासम्बन्धेनैव "दानकर्माण उत्तरे धातवो दश" (१०)॥। कतमे पुनस्ते? इति। "दाति, दाशति, दासति"—इत्येवमादयः ¶॥

दानसम्बन्धेनैव "अध्येषणाकर्माण उत्तरे धातवश्चत्वारः (४)**। कतमे पुनस्ते? इति। "परिस्रव, पवस्व"—इत्येवमादयः††। सत्कृत्य दातृभिर्दातुं प्रतिग्रहीतॄणां प्रार्थना, अध्येषणेत्युच्यते॥

---

* १भा० २५०पृ० २अ० १८ख०।
† १भा० २५०—२५१ पृ०।
‡ १भा० २५१ पृ० २अ० १९ ख०।
§ १भा० २५२—२५५ पृ०।
॥ १भा० २५५ पृ० २अ० २०ख०।
¶ १भा० २५५—२५६ पृ०।
** १भा० २५६ पृ० २अ० २१ ख०।
†† १भा० २५७ पृ० (१), (२), (३), (४)।

आश्रमाणो हि सर्वोऽपि खपितीति अध्येषणाकर्मभ्य उत्तरौ "खपितिकर्माणौ" *। कतमौ पुनस्तौ? "खपिति, मस्ति"—"इति" †। स्मरन्नेवोचार्य द्विग्रहणमवधारणार्थम्,—एतौ एव "खपितिकर्माणौ" ‡ निगमे न पुनस्तृतीयोऽस्तीति; अल्पत्वाद्वा द्वि-ग्रहणम्॥

"कूपनामान्युत्तराणि चतुर्दश" कूप मेव हि आश्रित्य मरौ म्रियते, सुप्तः कूप इव पतितो भवतीति वा, खपितिकर्मभ्यो मन्त्रराणि कूपनामान्युच्यन्ते। कियन्ति पुनस्तानि? 'चतुर्दश' (१४)। कतमानि पुनस्तानि? "वप्रः, कातुः, खातः"—इत्येवमादीनि §। म्रियते ह्यसावुदकार्थ मिति वप्रः। क मुदक मत्रेति कातुः। इत्येवमादि। आह;—"कूपः कस्मात्"? उच्यते,—"कु पानं भवति" यच ह्यसौ भवति, तच कुत्सितं पानं भवति; साधनापेक्षत्वात्। "कुप्यतेर्वा" यत्सम्बाधादुदकार्थिनः कुप्यन्ति॥

"स्तेननामान्युत्तराणि चतुर्दशैव" ॥। कूप माश्रित्य मुष्णन्ति स्तेना इत्यतः कूपनामभ्यः 'उत्तराणि' 'स्तेननामानि'। कियन्ति पुनस्तानि? 'चतुर्दशैव' (१४)। कतमानि पुनस्तानि? "द्वेषुः, रिपुः"—इत्येवमादीनि ¶। परेभ्यो धनान्याहृत्यातिशयेनात्मानं भृत्यांश्च तर्पयतीति द्विषुः। लिम्पत्यसावात्मानं पापेनेति रिपुः।

---

* १भा० ३५७ पृ० ३च्च० २१ ख०।

† १भा० ३५७ पृ० १९पं०—१४ पं०।

‡ १भा० ३५८ पृ० ३च्च० २३ ख०।

§ भा० ३५८—३६१ पृ०। अस्ति च तत्र पाठव्यतिक्रमः।

॥ १भा० ३६१ पृ० ३च्च० २४ ख०।

¶ १भा० ३६१—३६५ पृ०। अस्ति च तत्रापि पाठव्यतिक्रमः।

इत्येवमादि। आह;— "स्तेनः कस्मात्"? उच्यते,—"संस्त्यानम्" संहतम् "अस्मिन्" "पापकम्" कर्म भवति "इति" एवं "नैरुक्ताः" मन्यन्ते। वैयाकरणाना मन्यथापि स्यादित्यभिप्रायः *॥

"निर्णीतान्तर्हितनामधेयान्युत्तराणि षट्" †। निर्णीतस्य च अन्तर्हितस्य नामधेयानि 'निर्णीतान्तर्हितनामधेयानि'। 'उत्तराणि' प्रकृतेभ्यः स्तेननामभ्यः; स्तेना एव ह्यन्तर्हिता भवन्तीत्येष सम्बन्धः स्तेननाम्ना मन्तर्हितनाम्नां च। कियन्ति पुनस्तानि? 'षट्' (६)। कतमानि पुनस्तानि? "निण्यम्, सस्वः, सनुतः"—इत्येवमादीनि ‡। निर्णीत मिव निण्यम्§। सुप्त मिव सस्वः। सन्तत मिव सनुतः। इत्येवमादीनि॥

"दूरनामान्युत्तराणि पञ्च"(५)॥। अन्तर्हितं यद् भवति, दूरवत्तद् भवतीत्येष सम्बन्धः। कतमानि पुनस्तानि? "आके, पराके, पराचैः"—इत्येवमादीनि ¶। आ कियतो देशात् एतद् वर्त्तते इति विज्ञातव्य मेतद् भवतीत्याके। पराके पराक्रान्ते। पराङ्मुख मञ्चितं पराचैरित्येवमादि। यथैव श्रुतानि छन्दसि, तथैवैतानि समाम्नातानि। आह;—"दूरं कस्मात्"? "द्रुतं" हि तद् "भवति" अध्वनो महत्त्वात्। "दुरयं वा" दुःखं हि तद् गम्यते प्राप्यत इत्यर्थः॥

---

* यथाहि,—"स्तेन चौर्ये (चु० प०)"—इत्यस्मात् पचाद्यचि रूपम्।
† १भा० ६९५ पृ० १अ० २५ ख०।
‡ १भा० ६९४—६९६ पृ०।
§ पुरस्तात् २१७ पृ० ८पं०।
॥ १भा० ६९६ पृ० १अ० २९ ख०।
¶ १भा० ६९७ पृ० (१)—(५)।

दूरसम्बन्धेनैव "पुराणनामान्युत्तराणि षट्" (६) *। समानं हि कालाध्वनो र्महत्त्वं दूरपुराणयोः। कतमानि पुनस्तानि? "प्रत्नम्, प्रदिवः, प्रवयाः"—इत्येवमादीनि †। प्राक्तनं प्रत्नम्। प्राग् द्युनिमदाक्षीदिति प्रदिवः। प्रकृष्टवयाः प्रवयाः। इत्येवमादि। आह;—"पुराणं कस्मात्"? उच्यते,— तद्धि "पुरा नवं भवति", न वर्त्तमानकाले॥

"नवनामान्युत्तराणि षडेव" (६) ‡। पुराणसम्बन्धेनैव। कतमानि पुनस्तानि? "नवम्, नूनं, नूतनम्"—इत्येवमादीनि §। आह;—"नवं कस्मात्"? उच्यते,—तद्धि सद्य एव कुतश्चित् "आनीतं भवति" ॥ २ ॥

दिश उत्तराणि नामानि प्रपित्वेऽभीक इत्यासन्नस्य प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते। आपित्वे नः प्रपित्वे तूय मा गहि। अभीके चिदुलोकृदित्यपि निगमौ भवतः। दभ्र मर्मक मित्यल्पस्य॥। दभ्रं दभ्नोतेः सुदभ्रं भवत्यभीक मवहृतं भवति। उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि

---

* १भा० ३९७ पृ० २च० १७ ख०।
† १भा० ३९८—३९९ पृ०।
‡ १भा० ३९९ पृ० २च० १८ ख०।
§ १भा० ३९९—४०० पृ०।
॥ "मित्यप्यल्पस्य" ङ, च।

निगमौ भवतः। तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सृतः संसृतं भवति। तिरश्चिदर्यया परिवर्त्तियात मदाभ्या। पाचैव भिन्दन्त्सत एति रक्षस इत्यपि निगमौ भवतः। त्वो नेम इत्यर्द्धस्य त्वोऽपतत्तो नेमोऽपनीतोऽर्द्धं* हरतेर्विपरीताद्धारयतेर्वा स्यादुद्धृतं भवत्यूधोतेर्वा स्याद्दृढतमो विभागः। पीयति त्वो अनु त्वो गृणाति। नेमे देवा नेमेऽसुरा इत्यपि निगमौ भवतः। कृक्षाः स्तृभि†रिति नक्षचाणां नक्षचाणि नक्षतेर्गतिकर्म्मणो नेमानि क्षचाणीति‡ च ब्राह्मण कृक्षा उदीर्णानीव ख्यायन्ते स्तृभिऽस्तीर्णानीव ख्यायन्ते। अमी य कृक्षा निहितास उच्चा। पश्यन्तो द्या मिव स्तृभिरित्यपि निगमौ भवतः॥। वम्रीभिरुपजिघ्विका इति सीमिकानां वम्र्यो वमनात् सीमिका स्यमनादुपजिघ्विका उपजिघ्र्यः¶। यदन्युपजिघ्विका यद्वम्रो अतिसर्पतीत्यपि निगमौ भवत्यूर्दरं** ऊदर मित्यावपन-

---

* "पनीतोऽर्द्धो" क, च; परं इत्तिपाठविरुद्धः।

† "स्तिभि" क, ङ।

‡ "नेमा नक्षचाणीति" क, ख, ग। "नेमानि न चचाणीति" ङ।

§ "स्तिभि" क, ङ च।

॥ क-ख-ग-पुस्तकेष्वित्रैव तृतीयखण्डसमाप्तिः।

¶ इतोऽनन्तरं "वम्रीभिः पुच सुपुवो चद्वानम्"—इत्यधिकः पाठः ङ-च-पुस्तकयोः।

** "भवति। ऊदरं" ग, "निगमौ भवतः। ऊदरं" ङ, च।

"स्योदरं मुदीर्णं भवत्यूज्जे दीर्णं वा। त मूर्दर् न घृणता यवेनेत्यपि निगमो भवति। त मूर्दर मिव पूरयति यवेन क्षदरं क्षतदर् भवति। समिद्धो अञ्जन् क्षदरं मतीना मित्यपि निगमो भवति॥ ३ (२०)॥

"दिश उत्तराणि नामानि"*। द्वे द्वे दिश उत्तराणीति। "प्रपित्वे, अभीके"—इत्येव मादीनि†। व्याख्यातानि पृथिवीनामभ्य आरभ्य एकैकार्थस्य बह्वनि नामधेयानि‡, इदानी मेकैकस्य द्वे द्वे नामनी वाचके समाम्नायेते;—प्रपित्वे, अभीके इत्येवमादीनि; आद्यावापृथिवीनामभ्यो यावत्§॥

अधुनैव मुक्त्वा सामान्यतो विशेषेण एकैकं व्युत्पाद्य उदाहरणैरेव दर्शयति। तद्यथा,—"प्रपित्वे, अभीके"—"इति" एते नामनी "आसन्नस्य" भवतः॥। इत्येवमादि। "प्रपित्वे प्राप्ते" इत्यर्थः। "अभीके अभ्यक्ते" आभिमुख्येनाञ्चिते अभ्यागते। इदानी मुदाहरणे ब्रवीति;—"आपित्वे नः", "अभीके चित्"—"इति निगमौ (ऋ० सं० ५,७,३०,३.—८,७,२१,१.) भवतः"॥

"यथा गौरो०—० सचा पिबं"¶। ऐन्द्रेयषा। क्षदती। देवा-

---

* १भा० ३७० पृ० ३ष० १९ ख०।

† १भा० ३७० पृ० १८ पं०। किञ्च ३८२—३८८ पृ०।

‡ पुरस्तात् १७५ पृ०—३४४ पृ० १० पं० यावत्।

§ इत आरभ्य एतदध्यायान्त मिति भावः।

॥ १भा० ३८१ पृ० (१), (२)।

¶ "यथा गौरो अपा कृतं तृष्णेत्येवैरिणम्। आपित्वे नः प्रपित्वे तूय मा गह्यि कण्वेषु सु सचा पिबं॥" ऋ० सं० ५, ७, ३०, ३।

आप्ते

तिथेः काण्वस्यार्षम्। महाव्रते बृहतीसहस्रे शस्यते। हे 'इन्द्र!' 'यथा' येन प्रकारेण 'गौरः' गौरमृगः, 'अवेरिणम्' अपगतार्णम् अपगतोदकं मरुदेशं गत्वा 'तृष्यन्' तृषा-बाध्यमानः 'अपाकृतम्' अपानीयम्, (पानयोग्यं यच्च नास्ति, स्वल्पोदकत्वात्, तच्च कृतम्; उदकेन वा कृतम् जलाशयस्थानम्) तडाग मन्यद् वा शीघ्रम् 'एति', एवं त्व मप्येतस्मिन् 'आपित्वे' आपानकाले 'प्रपित्वे' प्राप्ते 'तूयं' क्षिप्रम् 'आ गहि' आगच्छ। आगत्य च य एष सोमः 'कण्वेषु' वर्त्तते, त मेभिरेव ऋत्विग्भिः 'सचा' साकं 'सु' सुष्ठु सह स्थित्वा 'पिब' इति॥ ॥ "प्रो ष्वस्मै०—० धन्वसु" *। सुदासः पैजवनस्येय मार्षम्। अतिच्छन्दाः। सर्वपृष्ठायां मैत्रावरुणीयके देवताव्यत्यये याग आक्षरस्यैन्द्रस्य चरोर्याज्यैषा; रैवतस्य पुरोऽनुवाक्या; बार्हतस्य पुनरिय मेव षोड़शिशस्त्रे शस्यते। हे स्तोतारः! 'प्रो' प्रकर्षेण 'सु' प्रशस्ताभिः स्तुतिभिः 'अस्मै' 'इन्द्राय' तुष्ट्यर्थं 'पुरोरथम्' अग्रतो रथम् एतत् 'शुषम्' बलम् 'अर्चत' स्तुत। कश्च पुनरर्थ मभिसन्धायार्चत? इति। 'अभीके चित् उ लोककृत्'। 'अभीके' अभ्यागते एतस्मिन् 'सङ्गे' सङ्ग्रामकाले प्राप्तेऽप्येषु 'समत्सु' सम्भक्तयितृषु उद्यतायुधेषु शत्रुषु 'लोककृत्' स्थानकृत्। एषु 'वृत्रहा' शत्रुहन्ता इन्द्रो भविष्यतीति एत मर्थ मभिसन्धाय प्रार्चत अस्मै यूय मिन्द्राय पुरोरथं शुष मिति। एव मन्यान् स्तोतॄन् सम्बोध्य

---

* "प्रो ष्वस्मै पुरोरथ मिन्द्राय शूष मर्चत। अभीके चिदु लोककृत् सङ्गे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्ता मन्यकेषां ज्याका अधि धन्वसु॥" ऋ० सं० ८, ७, २१, १।

आत्मनापि प्रवदते वक्तुम्;—हे भगवन्निन्द्र! 'अस्माकं' 'बोधि' बुध्यस्व एताः स्तुतीः, मा परेषाम्; बुध्वा चैताः 'चोदिता' अनुज्ञाता जनस्व भव। 'अन्यकेषाम्' अन्येषां 'ज्याकाः' ज्याः 'अधि धन्वसु' धनुःष्वधिरोपिताः 'नभन्ताम्' हिंस्यन्ताम्; अवततज्याधनुषो हतसर्वोद्यमा एते अस्मद्द्विषो युष्मदनुग्रहाद् भवन्त्वित्यभिप्रायः॥

"दभ्रम्, अर्भकम्"—"इति" एते "अल्पस्य" नामनी *। "दभ्रं दभ्नोतेः" वधार्थस्य। तद्धि "सुदभ्रं भवति" सुच्छेदं भवति; अल्पत्वात्। "अर्भक महद्वृतं भवति" दुःख मित्यर्थः। "उपोप मे परा मृश", "नमो महद्भ्यो नमो"—"इत्यपि निगमौ (ऋ० सं० २, १,११,७.—१,२,२४,३.) भवतः"॥

"उपोप०—०मिवाविका"†। भावयव्यस्येय मार्षम्। अनुष्टुप्। भावयव्य मेव सा भर्त्तारं तेनानुपेयमाना ब्रवीति। हे राजन्! 'उप'गम्य 'उप'श्लिष्य च 'मे' मम 'परा मृश' यः प्रदेशः पुरुषेण स्त्रियाः परामर्शव्यः। किञ्च; 'मा मे दभ्राणि मन्यथाः' अल्पकानि लोमानि मा मन्यथाः। जानेऽहमेतत्, यथा अलोमिकाया उपगमः प्रतिषिद्धः स्मृतौ;—"नाजातलोमगोपहासमिच्छेत्" इति ‡। यतस्ते वेदयामि 'सर्वाह मस्मि रोमशा'; सर्वेष्वेवावयवेषु ममोत्पन्नानि रोमाणि (येषु स्त्रीणा मुत्पद्यन्ते?)। कथञ्च पुनरहं मस्मि रोमशा? 'गन्धारीणा मिवाविका' गन्धारदेशजातानां मविकानां

---

* १भा० ६८१ पृ० (३), (४)।

† "उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। सर्वाह मस्मि रोमशा गन्धारीणा मिवाविका॥" ऋ० सं० १, १, ११, ७।

‡ तथाचि मनुः २, ८;—"नालोमिकां नातिलोमाम्"—इत्यादि।

मध्ये या सुष्ठु रोमशा भवेत्, तथाहं मस्मि रोमशा; निःशङ्को मा मुपगच्छेत्यभिप्रायः॥ ॥"नमो मह्द्भ्यो०—०दृंहि देवाः" *। त्रिष्टुप्। पुनःशेपस्यार्षम्। होत्रजपे विनियुक्ता। 'नमो महद्भ्यः' नमो महत्परिमाणेभ्यो देवेभ्यः। 'नमो अर्भकेभ्यः' अल्पपरिमाणेभ्यः। 'नमो युवभ्यः' यौवनवद्भ्यः। 'नम आशिनेभ्यः' व्यापिभ्यः। 'यजाम' 'देवान्' एतस्मिन्नुपस्थिते यागकाले। 'यदि' 'शक्नवाम'। अल्पश्रुतविज्ञाना वयम् अतएव ब्रूमो यदि शक्नवामेति। वय मीदृशाः सन्तो युष्मान् ब्रूमहे;—हे 'ज्यायसः' ज्यायांसः! देवाः! युष्माक मेव 'शंस' शंसितारं सन्त मल्पे वा महति वा कस्मिंश्चिद् दुःशस्ते 'मा दृंहि' मा अस्मान् क्षिन्धि यज्ञफलात्; को हि नाम नापराध्यति? इत्यभिप्रायः॥

"तिरः, सतः"—"इति" एते "प्राप्तस्य" नामनी भवतः†। अप्राप्तस्यैके अधीयते, तथापि योज्यम्। "तिरः तीर्णं" हि तद् "भवति" दूर मध्वानम्। "सतः संहतं भवति" एकीभूय सृतं भवति। "तिरश्चिदर्यया", "पाचेव भिन्दन्तः"—"इत्यपि निगमौ (ऋ० सं० ४,४,१६,२०—५,७,८,१०) भवतः"॥

"अश्विनावेह०—० श्रुतं हवम्"‡। पङ्क्तिराश्विनी। अवशो-

---

* "नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान् यदि शक्नवाम मा ज्यायसः शंस मा दृंहि देवाः॥" ऋ० सं० १, २०, १४, २।

† १भा० १८२ पृ० (५),(६)।

‡ "अश्विनावेह गच्छतं नासत्या मा वि वेनतम्। तिरश्चिदर्यया परि वर्तिर्यातं मदाभ्या माध्वी मम श्रुतं हवम्॥" ऋ० सं० ४, ४, १६, २।

राजेयस्यार्षम्। प्रातरनुवाकाश्विनयोः शस्यते। हे 'अश्विनौ!' 'नासत्या!' वां 'गच्छतम्' युवाम् 'इह' अस्मिन् यज्ञे सोमं पातुम्। किञ्च; 'मा वि वेनतम्' मा विगतकामौ भूतम्; युवा याच्ञयमानौ मया। किञ्च; 'तिरश्चिदर्यया' तिरोऽपि अप्राप्ते एव स्थाने यद्यवस्थितौ स्थः, तथापि 'अर्यया' ईश्वरयापि रथगत्या दैवगत्या शीघ्रया 'आ यातम्' (द्विवचनं वा सावग्रहत्वात् पदस्य)। किञ्च; 'परिवर्त्तिः यातम्' यद्यपि क्वचिदनिवृत्तौ स्थः, तथापि परिवर्त्तनं कृत्वा आयातम्। हे 'अदाभ्या' अहिंस्यौ! अनुपहिंसितौ! अथवा अदाभ्यया अनुपहिंसितया गत्या आयातम्। हे 'माध्वी!' मधुसोम-मिश्रं पेयं ययोस्तौ। 'मम' 'श्रुतं' शृणुतम् 'हवम्' आह्वानम्। श्रुत्वा अविलम्बमानौ शीघ्र मायात मित्यभिप्रायः॥ ॥

"इन्द्रो यातूना०—०रक्षसः"*। वसिष्ठस्यार्षम्। जगती। 'इन्द्रः' 'यातूनां' यातुधानानाम्. 'अभवत्' 'पराशरः' परा शातयिता। कीदृशानां पुनर्यातूना मभवत् पराशातयिता? इति। उच्यते,— 'हविर्मथीनाम्' हवींषि ये मन्थन्ति, तेषाम्। 'अभ्याविवासताम्' अभ्युदासयतां, यज्ञोत्पादकाना मित्यर्थः। अथवा परिचर्यायां स्यात्; ये त मिन्द्रं परिचरन्ति यातवः, तेषा मेव परा शातयितेति। योऽयमेवंलक्षण इन्द्रः, सोऽस्माभिरारावितः परिचर्यया 'अभि एति' अभ्येतु; अस्मान् प्रति। 'शक्रः' शक्तः, सर्वयातूनां यातने। 'परशुः' परशुहस्तो 'यथा' कश्चित् वनच्छित् अभ्येयात्; यथा, 'पात्रा'

* इन्द्रो यातूना मभवत् पराशुरो हविर्मथीनामभ्याविवासताम्। अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः॥" ऋ० सं० ५, ७, ९, १।

पात्राणि कौलालानि लकुटेनाप्रतिकथ्यमानो 'भिन्दन्' कश्चिद्-ध्येयात्; एव मभ्येति 'रक्षसः' रक्षांसि भिन्दन्। 'यतः' प्रदेशात्, दूरादित्यर्थः॥

"त्वः, नेमः"—"इति" एते नामनी "अर्द्धस्य"*। "त्वः अपततः" अपेत्य ततः। "नेमः अपनीतः" अप भज्य नीतः, पृथक् कृत इत्यर्थः। "अर्द्धं हरतेर्विपरीताद्धारयतेर्वा स्यात्"; "उद्धृतं" हि तद् "भवति"। "ऋध्नोतेर्वा स्यात्"; "ऋद्धतमः" अभि-सम्पन्नतमः "विभागः" भवति। "पीयति त्वो अनु त्वो गृणाति" —"नेमे देवा नेमेऽसुराः"—"इत्यपि निगमौ (ऋ० सं० २,२, १६,२.—य० मै० ब्रा०) भवतः"॥

"बोधा मे०—०अग्ने"—इति†। त्रिष्टुप्। दीर्घतमस आर्षम्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्! 'अग्ने!' 'यविष्ठ' युवतम! 'बोध' बुध्यस्व 'मे' मम 'अस्य' 'वचसः' 'मंहिष्ठस्य दातृतमस्य, पूजयितृतमस्य वा, महत्तमस्य वा 'प्रभृतस्य' प्रकृष्टैर्भगवद्गुणैः सम्भृतस्य। हे 'स्वधावः' अन्नवन्! ये गुणा अस्य वचसः, तान् बोध। किञ्च; इद मपरं शृणु,—उभयेषां प्राजाप-त्यानां देवासुराणां द्विधा विभक्तानां "पीयति त्वः" हिनस्ति एक मर्द्धं मसुराख्यम्, "अनु त्वः" अनु गृणात्येक मर्द्धं देवाख्य मनु ष्टौतीत्यर्थः। तत्रैवं सत्युभयथा विप्रतिपन्नेषु प्राजापत्येषु 'वन्दारुः'

---

* १भा० १८२ पृ० (७), (८)।

† "बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने॥" ऋ० सं० १. २, १९, १।

वन्दनशीलः अहं, दैवं पक्षं माश्रितः, हित्वा आसुरं, तवैतां 'तन्वं' तनूं ज्वलन-दहन-प्रकाशीकरणसमर्थां नित्यकाल मेव प्रातर्मध्यन्दिने, सायं च 'वन्दे' स्तौमीत्यर्थः॥ ॥"नेमे द्देवा नेमेऽसुराः" —इति ब्राह्मणवाक्य मेवेदं वाजपेये मैत्रायणीयानाम्। अर्द्धतो देवा अर्द्धतोऽसुरा आसन्नित्यर्थः॥

"रुक्षाः, स्तृभिः"—"इति" एते "नक्षत्राणाम्"नामनी*। नक्षत्रशब्दं पर्यायाभिधानप्रसक्तं निर्ब्रवीति;—"नक्षत्राणि नक्षतेर्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य; तानि हि नित्य मेवागच्छन्ति। "नेमानि क्षत्राणीति च ब्राह्मणम्"। नेमानि, क्षत्राणि धनानि। क्षत्र मिति धननाम †। किन्तर्हि? धनसरूपाण्येतानि; सूर्यरश्मिनुवेधात् दीप्यमानानि सन्ति हिरण्मयानीव भ्राजन्ते इति तु ब्राह्मणम्; तु-शब्दार्थे च शब्दः। "रुक्षाः" "उद्दीर्णानीव" उद्दीरितानीव, केन चिदर्द्धं गमितानीव "ख्यायन्ते" दृश्यन्त इत्यर्थः। "स्तृभिः स्तीर्णानीव" "ख्यायन्ते" दृश्यन्ते। "अमी य रुक्षाः"—"पश्यन्तो द्या मिव स्तृभिः"—"इत्यपि निगमौ (ऋ० सं० १,२,१४,५.—१, ५,६,२.) भवतः"॥

"अमी य रुक्षा०—०नक्तं मेति"‡। प्रुनःप्रेपस्यार्षम्। त्रिष्टुप्। वारुणी। वरुणस्यास्यां सूर्य उच्यते। 'अमी ये रुक्षाः' अमूनि यानि नक्षत्राणि 'निहिताः' निहितानि 'उच्चा' उच्चै

* १भा० ६८६ पृ० (९). (१०)।

† १भा० ११४ पृ० (९)।

‡ "अमी य रुक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद् दिवेयुः। अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तं मेति॥" ऋ० सं० १, २, १४, ५।

रित्यर्थः। किञ्च; तानि 'नक्तं ददृश्रे' रात्रावेवैतानि दृश्यन्ते। 'कुह चिद् दिवेयुः' न विज्ञायन्ते हि क्व चिद् दिवैतानि गच्छन्ति? किं मेतत् स्यात्? 'अदब्धानि' अनुपहिंसितानि 'वरुणस्य' आदित्यस्य एतानि 'व्रतानि' कर्माणि आश्चर्यभूतानि स्युः। किं मन्यद् भविष्यति? स हि भगवानादित्यः, तानि कुतश्चिदानयन्निवास्तं गच्छति, पुनश्चैतानि अपनयन्निवोदेति? तदेवं दर्शनं वा तेषां सूर्यकृत मेव। यदपि चैतद् 'विचाकशत्' दीप्यमानः 'चन्द्रमा' 'नक्तम् एति', तदप्यस्यैव भगवतः सूर्यस्य कर्म; अय मेव हि चन्द्रमसि दीप्तिं मादधान इवास्तं याति, पुनश्चात्मिपन्निव चन्द्रमसे दीप्तिं मुदेति। योऽय मेवंस्वभावो वरुणः, तं वय मभिप्रेतार्थसिद्धये स्तुमः, स इदं नामास्माकं करोत्विति॥ ॥ "ऋतावानं ०—०दमेदमे"*। गोतमपुत्रस्य वामदेवस्यार्षम्। अनुष्टुप्। आग्नेयी। 'ऋतावानं' यज्ञवन्तं 'विचेतसं' विभूतप्रज्ञानं 'विश्वेषां' सर्वेषाम् 'अध्वराणाम्' यज्ञानां 'हस्कर्त्तारं' स्पर्द्धाकर्त्तारम्, उपज्वलिते हि तस्मिन् भ्रातृव्यद्वेषः स्पर्द्धन्त इव यज्ञः, त मेवङ्गुणविशिष्टम् अग्निं 'पश्यन्तः' वय मनेकधा विहृतं 'दमेदमे' यज्ञगृहेयज्ञगृहे तासु-तासु क्रियासु व्याप्तं स्तुमः। किञ्च; योऽनेकधा दीप्यमानो 'द्याम् इव स्तृभिः' नक्षत्रैः पृथिवीं चित्ररूपां, वेदीं वा करोति, स नोऽभिष्टुतोऽभिप्रेतानर्थान् साधयत्वित्यभिप्रायः॥

"वम्रीभिः, उपजिह्विका"—"इति" एते "सौमिकानाम्"

---

* "ऋतावानं विचेतसं पश्यन्तो या सिवु स्तुभिः। विश्वेषा मध्वराणां हस्कर्तारं दमेदमे॥" ऋ० सं० ६, ५, १, ६।

नामनी भवतः * । या एताः पिपीलिका इत्युच्यन्ते लोके, ता इमाः सीमिकाः। "वम्रो वमनात्"; ता हि वमन्त्युदकं येन मृदाद्रीभवति। "सीमिकाः स्यमनात्" ; स्यमन्ति हि ता नित्य मेव गच्छन्ति इत्यभिप्रायः। "उपजिक्रिकाः उपजिघ्रः" उपजिघ्रन्ति हि ताः; पटु ह्यासां घ्राणेन्द्रियं भवति। द्वयोरपि नाम्नोरेक एव † "निगमः"—"यदत्त्युपजिक्रिका (ऋ० स० ६,७,१२,६)"—"इति" "भवति" ॥

"यदत्त्युपजिक्रिका०—०ते घृतम्" ‡। भार्गवस्य प्रयोगस्येय मार्षम्। उक्थेऽग्नौ समिदनया ह्रियते। 'यत्' 'अत्ति' भक्षयति 'उपजिक्रिका' अन्तरनुप्रविश्य, 'यत्' च 'अतिसर्पति' आर्द्रया मृदा परिवेष्टयन्, 'वम्रः' वह्निं शक्नोत्यन्तुं खदिरसारादि; 'सर्वं' तदुभयजातीय मपि 'ते' तव हे भगवन्! अग्ने! 'घृतम्' अस्तु; 'ता' तत् घृतीभूतं, त्वं 'जुषस्व' संसेवस्व हे 'यविष्ठ्य' युवतम! § ॥

"ऊर्द्दरम्, कृदरम्"—"इति" एते "आवपनस्य" नामनी भवतः ॥। उप्यते यस्मिन् यवादि धान्यं कुशूलेऽन्यत्र वा वैणवादौ कस्मिंश्चित्, तदूर्द्दर मिति कृदर मिति च; यदावपन माजः; प्राकृतेन लौकिकास्तदावपन मित्युच्यते ¶। "ऊर्द्दरम्" "उद्दीर्णम्" ऊर्द्धं हि तद् दीर्णं "भवति"। अथ "वा" "ऊर्जे" तदर्थाय

* १भा० ३८४ पृ० (११), (१२)।

† ङ-च-पुस्तकयोस्तु "वम्रीभिः पुत्र मग्रुवो यदानम् (ऋ०सं०२,९,१,४)"—इति प्रथमस्य, "यदत्त्युपजिक्रिका"—इत्यादि द्वितीयस्येति द्वावेव निगमौ दृश्येते।

‡ "यदत्त्युपजिक्रिका यद्वो अत्तिसर्पति। सर्वं तदस्तु ते घृतम्॥"

§ 'ता जुषस्व यविष्ठ्य'—इत्येतच्चरणं पर्वतेऽग्नेश्चेत्य व्याख्यातम्।

॥ १भा० ३८४ पृ० ११), (१४)। "ऊर्द्दरम्"-इति च-पुस्तकमात्रसम्मतः पाठः।

¶ 'आवपनं' धान्यादिक्षापनस्थानम्; तच्च कटनिर्मितं 'कुशूलम्', वेणुनिर्मितं 'वैणवं' चेत्यादि विविधं भवति।

"दीर्णं" भवति*। ऊर्गित्यन्ननाम, तदुतये हि तच्छुषिरीभूतं भवति। "त मूर्दीरं न पृणता"-"समिद्धो अञ्जन्"—इति निगमौ (ऋ० सं० २,६,१४,५.—य० वा० सं० २८,१) भवतः॥

"अध्वर्यवो०—०वो अस्तु"†। गत्समदस्येयं मार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'अध्वर्यवः'! 'यः' इन्द्रः 'दिव्यस्य' द्युलोकाश्रयस्य, 'वस्वः' वसुनः, धनस्य, 'यः' च 'पार्थिवस्य' अन्तरिक्षलोकाश्रयस्य (पृथिवीत्यन्तरिक्षनामसु पठितम्), यश्च 'चर्म्यस्य' भूम्याश्रयस्य, 'राजा' अधिपतिः, 'तम्' एवङ्गुणयुक्तम् 'इन्द्रम्' 'ऊर्दरं न' ऊर्दर मिव 'पृणत' पूरयत 'यवेन'। यथा कश्चिन्मनुष्यः ऊर्दरं पूरयेत्, तथा यूय मिन्द्रं 'सोमेभिः' सोमैः पूरयत। 'तद् अपः वः अस्तु' तद् वः कर्मास्तु, सर्वं मन्यन्मुच्यतेत्यभिप्रायः॥ ॥ "समिद्धो अञ्जन्०——०मधुष्ठम्"‡। आप्रीसूक्तम् आध्वर्यवेऽश्वमेधे। तत्रेयं प्रथमा आप्री। हे 'अग्ने!' भगवन्! 'समिद्धः' सन्दीप्तः, त्वम् 'अञ्जन्' गमयन्नात्मानं प्रति। 'ऊदरम्' आवपनं 'मतीनां', देवानां हि सर्वेषां 'घृतम्' आवपनं मतीनाम्; ते हि तत्र सर्वा मतीः प्रक्षिपन्ति ममेदं स्यादिति। तदेवङ्गुणयुक्तं घृतं 'मधुमत्' मधुस्वाद-युक्तम् 'पिन्वमानः' पिबन्नित्यर्थः। अथवा देवान् प्रति 'वहन्'

* "उदीर्णम्"—इति च-पुस्तकमात्रसम्मतः पाठः। "उदीर्णम्"—"उदीर्णम्", —इति द्वावेव पाठौ दृश्यितव्यौ मन्ये; 'उत्पूर्वात् दृ विदारणे इत्यस्मात्, ईर गतावित्यस्माद्वा'—इत्यादियुक्तेः (१भा० ६८४४० ११पं०)।

† "अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य चर्म्यस्य राजा। तं मूर्दीरं न पृणता यवेनेन्द्रं सोमेभिरदपा वो अस्तु॥" ऋ० सं० २, ६, १४, ५।

‡ "समिद्धो अञ्जन् कृदरं मतीनां घृतं मग्ने मधुमत् पिन्वमानः। वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियं मा सधस्थम्॥" य० वा० सं० १९, १।

'वाजी' आत्मना वेजनवान् बलवान्; परेभ्यो वा भयदाता। हे 'जातवेदः!' वहत्नेन माश्वमेधिकं वाजिन मुच्यसे;—अस्माभिः 'प्रियम्' एनं 'वाजिनं' 'देवानां' 'सधस्थं' समानस्थानम् 'आ' आभिमुख्येन, क्षीघ्रतरं 'वक्षि' वह प्रापयेत्यर्थः ॥ ३ ॥

रभः पिनाक मिति दण्डस्य। रभ आरभन्त एनम्। आ त्वा रभं न जिव्रयो ररभेत्यपि निगमो भवति। आरभामहे* त्वा जोर्णा इव दण्डं पिनाकं प्रतिपिनष्ट्येनेन। कृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति†। मेना मा इति स्त्रीणां स्त्रिय स्त्यायतेरपचपणकर्म्मणो मेना मानयन्त्येना मा गच्छन्त्येनाः‡। अमेनांश्चिज्जनिवतश्चकर्थ। मास्त्वाकन्तन्नपसोऽतन्वतेत्यपि§ निगमो भवतः। शेपो वैतस इति पुंसप्रजननस्य। शेपः शपते स्पृशतिकर्म्मणो वैतसो वितस्तं भवति। यस्या मुशन्तः प्र हरामि शेपम्। चिः स्म माहुः अथयो वैतसेनेत्यपि निगमौ भवतः। अथैनेत्युपदेशस्य॥। अया ते अग्ने समिधा विधेमेति स्त्रियाः। एना वो अग्नि मिति नपुंसकस्य। एना पत्या तन्वं १ सं सृजस्वेति

---

* "भवत्यारभामहे" ख, ङ, च।

† अत्रैव चतुर्थखण्डसमाप्तिः क-ख-ग-पुस्तकेषु।

‡ "मा आगच्छन्त्येनाः"—इति क, ख, ग।

§ "तन्वनेनेत्यपि" क, ख, ग।

॥ "अथैने त्युपदेशस्य" च।

पुंसः। सिषक्तु* सचत इति सेवमानस्य। स नः सिषक्तु यस्तुरः। स नः सेवतां यस्तुरः। सचस्वा नः स्वस्तये। सेवस्व नः स्वस्तये। स्वस्तीत्यविनांशिनामास्ति†रभिपूजितः सु अस्तीति‡ भ्यसते रेजत इति भयंवेपनयोः। यस्य भुष्माद्रोदसी अभ्यसेतां। रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमौ भवतः। द्यावापृथिवीनामधेयान्युत्तराणि चतुर्विंशतिस्तयोरेषा भवति ॥ ४ (२१) ॥

"रम्भः, पिनाकम्"—"इति" एते "दण्डस्य" नामनी §। "रम्भ आरम्भत एनम्" अस्खलनार्थम्। "आ त्वा रम्भं न"—"क्षत्रियवासाः पिनाकहस्तः"—इति निगमौ (ऋ० सं० ६, ३, ४५, ५.—य० वा० सं० ३, ६१.) ॥

"आ त्वा रम्भं०—०मधस्थ आ" ॥। काण्वस्य त्रिशोकस्यार्षम्। ऐन्द्रौ। गायत्रौ। अतिरात्रे महाव्रते च शस्यते। हे भगवन्निन्द्र! "आ रभामहे" वयं "त्वा" त्वां 'रम्भं न' "दण्ड मिव" 'जिव्रयः' "जीर्णाः" इत्यर्थः। यथा वृद्धाः के चित् दण्ड मारभेरन्नवष्टम्भार्थ मेव मारभामहे त्वाम्। हे भगवन्! 'श्रवसस्पते' बलस्य पते! त्वं न आश्रय इत्यभिप्रायः। किञ्च; 'उग्रमिव त्वा' कामयामहे त्वां नित्य मेव 'सधस्थे' समाने एव कस्मिन् स्थाने यज्ञायतनेऽव-

* "सिषक्ति" क, ख, ग।

† "स्वस्तीत्यविनाशनामास्ति" क, ख, ग।

‡ "स्वस्तीति" च।

§ १भा० १८५ सू० (१५), (१९)।

॥ "आ त्वा रम्भं न जिव्रयो रराभा श्रवस्यते। उग्रमिव त्वा सधस्थ आ॥"

स्थितं त्वा माभिमुख्येन प्रष्टुं स्तोतुं वेत्यभिप्रायः ॥ ॥ "पिनाकं" "प्रति पिनष्ट्येनेन" हन्तीत्यर्थः। "एष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकहस्तः कृत्तिवासाः" *। 'एष ते रुद्र भागस्तेन'—इति; चैयम्बकाः पुरोडाशा अनेन मन्त्रेण वृचे आसज्यन्ते। हे भगवन्! 'रुद्र!' 'एषः' 'ते' तव 'भागः' 'तेन' अवसेन पथ्यदनेन 'परः' परस्तात् 'मूजवतः' पर्वतात् 'अतीहि' अतिगच्छ, मा अत्रैव स्थाः। कथम्पुनरतीहि? 'पिनाकहस्तः' भूत्वा, 'कृत्तिवासाः' चर्मवासाः, 'अवततधन्वा' चैव मतीहि ॥

"मेनाः, ग्नाः"—"इति" एते "स्त्रीणां" नामनी †। पर्यायाभिधानप्रसक्त मुच्यते;—"स्त्रियः स्त्यायतेरपचपणकर्मणः स्त्रज्जार्थस्य; स्त्रज्जन्त्यपि हि ताः। "मेनाः", "मानयन्त्येनाः" पुरुषाः। "ग्नाः", "गच्छन्ति" हि "एनाः" मैथुनेन धर्मेण। "अमेनांश्चित्"—"ग्नास्वा कृन्तन्"—"इति" "निगमौ (ऋ० सं० ४,१,२९,२.—सा० वे० कौ० ग्रा० ता० ब्रा० १,१,८) भवतः" ॥

"आ प्र द्रव०—०श्वकर्ण्य" ‡। अवस्तोराचेयस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'हरिवः!' 'आ' आभिमुख्येनास्मान् 'प्र' प्रकर्षेण 'द्रव'।

---

* यजुर्वेदीयशाखाविशेषे एव मेव पाठः। माध्यन्दिन्यां त्वेवं पाठः,—"एतन्ते रुद्रावसं तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः कृत्तिवासाः अहिंसन्नः शिवोऽतीहि॥" (य० वा० सं० ३, ६१) मूलपाठस्त्वन्यथैव (३५९ पृ० ८ पं०)। अत्रैव च पुनः व्याख्यानकालेऽन्यथा पाठक्रमोऽवलम्बिष्यते (३५८ पृ० ७—८ पं०)।

† १भा० ३८५ पृ० (१७), (१८)।

‡ "आ प्र द्रव हरिवो मा वि वेनः पिशङ्गरूपे अभि नः सचस्व। मयि त्वदिन्द्र वस्वो अन्यदस्यमे नाधिज्जनिवतश्चकर्थ॥" ऋ० सं० ४, १, १९, २।

किञ्च; 'मा वि वेनः' मा विगतकामो भूरस्मत्तः। हे 'पिशङ्गराते' शोभनदान! 'अभि सचस्व' 'नः'। किञ्च; 'नहि' * 'अन्यत्' देवतान्तरं 'त्वत्' त्वत्तः प्रतिविशिष्टम् 'अस्ति', यत् प्रतिपद्येमहि। हे भगवन्! 'इन्द्र!' 'वस्वो' वसुमन्! † किं कारणम्? 'अमेनांश्चित्' अस्त्रीकानपि स्तोतॄन् 'जनिवतः' एव स्त्रीम्, अत एव 'चकर्थ' करोषीत्यर्थः। यस्मात् त्व मेवङ्गुणविशिष्टः, तस्मात् त्व मेव स्तुम इत्यभिप्रायः॥ ॥ "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामि०—० ‡ ग्रास्त्वा छन्नत्नपसोऽतन्वत वयित्र्योऽवयन् वरूणस्त्वा नयतु देवि दक्षिणे हृहस्पतये वासस्त्वेनाम्रतत्व मशीय वयोदात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे०—० § क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्र मा विशत् 'कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥" वासःप्रतिग्रहणमन्त्रेऽनुषङ्ग एषः, मैत्रायणीयके ‖, ताण्ड्यब्राह्मणे (सा०कौ०ब्रा० १,१,८) च, अन्यास्वपि शाखासु च ¶। तद् वास उच्यते;—हे 'वासः!' 'सवितुः' आदित्यस्य 'प्रसवे' अभ्यनुज्ञातः अहं त्वां 'प्रतिगृह्णामि'। 'अश्विनोः' देवयोः बाहुभ्यां प्रतिगृह्णामि। नैताभ्या मेव 'बाहुभ्याम्'; अपि च 'पूष्णः' देवस्य 'हस्ताभ्याम्' प्रतिगृह्णामि। किञ्च; 'ग्रास्त्वा छन्नत्' स्त्रीभिस्त्वं कर्त्तितः, तन्तु-

---

* अत्र 'नहि'—इत्येक मेव पदं मन्यन्ते पदकाराः; न तु नेति हीति पदद्वयम्।

†, 'वस्वो वसीयः श्रेयस्करम्'—इति सायणः।

‡, § अत्रोभयत्रैव मूले, बहु पाठाधिक्यं वर्त्तते, तत्राप्यस्ति च कारणम्; तच्च मन्त्राध्यदर्शनादेव बोद्धव्यम्।

‖ यजुर्वेदीयशाखाविशेषे।

¶ माध्यन्दिनीप्रभृतौ (य० वा० सं० ७, ४७—४८)।

करणाभिप्रायेण। 'अपसः' अल्पकाः, अनुपजातपुंस्काः, जननाया-समर्थाः, कुविन्दपुत्रकाः त्वाम् 'अतन्वत'। ते हि कुविन्दानां परिकर्म 'धियः' धीमत्यः, बुद्धिमत्यः, कुशलाः, वयित्र्यः त्वाम् 'अवयन्' कुविन्दस्त्रियः कृतवत्यः। तदेव मभिनिष्पन्नं त्वां 'मह्यं' 'बृहस्पतये' बार्हस्पत्य आत्मव्यवस्थिताय 'वरुणः' देवताविशेषो 'ददाति' उदकपूर्वकं त्वं दीयसे। सोऽहम् एवङ्गुणयुक्तः त्वां प्रति-गृह्य 'अमृतत्वम्' अमृतभावं यथाभिलषित मेव 'अश्नीय' अश्नु-याम्। त्वं प्रतिगृह्यमाणं वासः, तव प्रसादात् मैव मेतत् स्यात्,—अमृतभावान्मम मा खण्डनं कार्षीरित्यभिप्रायः। किञ्च; 'मयः' सुखं 'दात्रे' 'भूयाद्' भवतु। 'मयः' सुखं 'मह्यं' 'प्रतिग्रहीत्रे' च। किञ्च; 'कः' प्रजापतिरयं 'कस्मै' प्रजापतये एव 'अदात्' ददाति। योऽप्ययं ददाति सोऽप्ययं दाता, अय मपि प्रजापतिरेवे-त्यभिप्रायः। वक्ष्यति हि;—"क ईषते तुज्यते कः"—इति *। किञ्च; कामः कामायैव अदात् तद्ददाति। पुण्यं भविष्यतीत्यनेन कामेन दाता ददाति; आच्छादनं भविष्यति इति इतरः प्रति गृह्णाति। एवं कामो दाता, कामः प्रतिगृहीता। स एव काम उच्यते,—हे 'काम!' 'एतत् ते वासः' सकामो भव इति॥

"शेपः, वैतसः"—"इति" एते नामनी "पुंस्प्रजननस्य" †। "शेपः शपतेः" "स्पृशतिकर्मणः" स्पृशत्यर्थस्य‡; स्पृश्यते हि तेन स्त्री। "वैतसो वितसं भवति"। उपचीणं तद् भवति प्रागनु-

* ऋ० सं० १, ६, ८, २।
† १भा० ६८५ पृ० (१९), (२०)।
‡ शपतिः स्पृशतिकर्मा धातुर्नैरुक्त एव, अत्रैवोक्तेः।

स्मरणात् स्त्रियाः। "यस्या मुञ्चन्तः"-"चिः स्म माङ्क्तः"—"इति" "निगमौ (ऋ० सं० ८,३,२७,२.—८,५,१,५.) भवतः" ॥

"तां पूषञ्छिवतमा०—०शेपम्" *। सूर्याया आर्षम्। कन्याप्रथमोपगमे विनियोगः। हे भगवन्! 'पूषन्!' 'ईरयस्व' तां योनिम्, 'यस्यां' योनौ 'बीजं' शुक्रम् 'मनुष्याः वपन्ति'। त्वत्कृतयोनिपोषे बीज मेतस्या मर्थवत् स्यात्; त्वदधीनो हि योनिपोष इत्यभिप्रायः। 'या' इयम् 'नः' अस्माकम् 'ऊरू' 'उशती' कामयमाना स्त्री 'विश्रयाते' नानाप्रकार माश्रयते। तस्या या योनिः, ताम् 'ईरयस्व' 'उदूढमय' बीजग्रहणाय सुपुष्टां कुरुष्व। 'यस्यां' योनौ 'उशन्तः' पुत्रजन्मकामयमानाः 'प्रहराम' प्रक्षिपेम इमं 'शेपम्' ॥ ॥ "चिः स्म माङ्क्तः०—०स्तदाशीः"†। उर्वश्या आर्षम्। त्रिष्टुप्। सा पुरूरवसा मागास्त्विष्टेत्युक्ता सती अनयर्चा पुरूरवसं प्रत्यब्रवीत्। हे 'पुरूरवः!' 'चिः स्म माङ्क्तः' चिरङ्को माम् 'अग्रथयः' अताड्यः त्वम् 'वैतसेन' ग्रिश्नदण्डेन पूर्वम्। 'उत स्म मे' अपि च यावान् कश्चिदभिलाषो मम मनस्यासीत् तं सर्व मेव त्वम् 'अव्यत्यै' ‡ 'पृणासि' व्यतिपूरितवानेवासि। अतस्त्वाहम् 'अनु आयम्' अनुगतवती। 'केतम्' चेतसा अनुकूला तवाहं

---

* "तां पूषञ्छिवतमा मेरयस्व यस्यां बीजं मनुष्या वपन्ति। या न ऊरू उशती विश्रयाते यस्यां मुञ्चन्तः प्रहराम शेपम्॥" ऋ० सं० ८, २, २७, १।

† "चिः स्म माङ्क्तः अग्रथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि। पुरूरवोऽनु ते केतं आयं राजा मे वीर तन्व १ स्तदासीः॥" ऋ० सं० ८, ५, १, ५।

‡ 'अव्यत्यै। सपत्नीभिः सह पर्यायेण पतिं मार्गयन्ति, सा अती; न तादृशी अव्यती; तस्यै'—इति सायणः।

भव मित्यर्थः। किञ्च; हे 'वीर!' तदा तथानुकूलायाः सत्याः 'राजा' ईश्वरः त्वम्, अस्याः 'तनूः' मच्छरीरस्य 'तदा आसीः' तदानीं त्वम्; सम्प्रति न तथा वर्त्तसे, यथा पूर्वम्; अतस्त्वयेदानीं नाहं समेध्ये इत्यभिप्रायः * ॥

"अया, एना"—"इति" एते नामनी "उपदेशस्य" †। स पुनरुपदेशः स्त्रीपुन्नपुंसकेषु भिन्नो भवति, अतस्त्रिष्वपि प्रदर्श्यते ॥

तत्र, "अया ते अग्ने समिधा विधेम (ऋ० सं० ३,४,२५,५)" —"इति ‡" "स्त्रियाः" उपदेशः। वामदेवस्यार्षम्। त्रिष्टुप्। राक्षोघ्ने कर्मणि विनियोगः। भगवन्! 'अग्ने!' 'अया' अनया 'समिधा' 'ते' तव 'विधेम' परिचर्यां कुर्मः। स त्वमेव मस्माभिः परिचर्यमाणः प्रीणन् यत् कुरुष्व 'प्रतिगृभाय' प्रतिगृह्णाण इमं 'स्तोमं' स्तोत्रम्, अस्माभिः 'शस्यमानम्' उच्चार्यमाणम्। 'दह' एतान् 'अशसः' अशस्तून् अस्तोतॄन्, आत्मनो 'द्रुहः' च दोग्धॄन्, अस्माकम्। एतान् 'रक्षसः' राक्षसान् 'निदः' निन्दितॄंश्च। किञ्च; 'पाहि' रक्ष अस्मान्, हे 'मित्रमहः' मित्राणां पूजयितः! 'अवद्यात्' अवन्द्यीयात् कर्मणः, पापादित्यर्थः ॥ ॥ "एना वो अग्निम् (ऋ० सं० ५,२,२१,१)"—"इति" § "नपुंसकस्य" उपदेशः। वसि-

---

* 'पर मयेवं मन्तव्यम्,—किं मिति कातरो भवसीत्युवाच'—इति सायणः।

† १भा० १८९ पृ० (२१), (२१)।

‡ 'अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय। दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥" ऋ० सं० ३, ४, २५, ५।

§ 'एना वो अग्निं नमसोर्जो नपातं हवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्॥" ऋ० सं० ५, २, २१, १।

ष्टस्यार्षम्। दृहती। प्रातरनुवाकाश्विनयोः शस्यते। 'एना वः' अनेन युष्माकं 'नमसा' अन्नेन अभ्युद्यतेन 'ऊर्जोनपातम्' अपां पौत्रम्, अथवा अन्नानां पौत्रम्; आज्ञतिभ्यः आपः, अज्ञ अग्निः; एनया प्रणालिकया अन्नस्य पौत्रोऽग्निः। तम् ऊर्जोनपातम् 'अग्निम्' 'आजुवे'। किंलक्षणम्; 'प्रियम्' दृष्टम्, देवानाञ्च 'चेतिष्ठम्' अतिशयेन चेतनावन्तम्, 'अरतिम्' अलमतिं पर्याप्तमतिम्, 'स्वध्वरं' शोभनयज्ञम्, 'विश्वस्य' यजमानगणस्य, एष योऽधिकृतः कर्मणि, तस्य 'दूतम्' 'अमृतम्' अमरणधर्माणम्। हे ऋत्विग्यजमानाः! तं वः आशासद्वूये अह माजुये। स चाजुतो देवान् प्रति दौत्यं करिष्यतीत्यभिप्रायः॥ ॥ "एना पत्या तन्वं सं सृजस्व (ऋ० सं० ८,३,२५,२)"—"इति" "पुंसः" उपदेशः। "इह प्रियं०—०वंदाथः"*। सूर्यायाः आर्षम्। जगती। बधूरनया गृहान् प्रवेश्यते, सोच्यते। हे बधु! 'इह' एव 'अस्मिन् गृहे' 'प्रजया' युक्तायाः सत्याः 'ते' तव यत् 'प्रियं' तत् 'समृध्यताम्'। किञ्च; अस्मिन् गृहे त्वं 'गार्हपत्याय जागृहि' गृहपतिभावाय अवहिता भवेत्यर्थः। किञ्च; 'एना पत्या' अनेन भर्त्रा सह 'तन्वं' तनुं 'संसृजस्व' मिश्रीकुरु। अथैवं सौमनस्ये वर्त्तमानौ 'जिन्वी' जीर्णौ यावत् तावत् अवियुज्यमानौ परस्परेण 'विदथं' यज्ञम् 'आ' अभिमुख्येनावस्थितौ सन्तौ यज्ञसम्बन्धीनि वचांसि वदतम् इत्याशीः॥

"एना वो अग्निं नमसा", "एना पत्या"—इति समानेऽप्येना-

---

* "इह प्रियं प्रजया ते समृध्यता मस्मिन् गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं सं सृजस्वाधा जिन्वी विदथमा वदाथः॥" ऋ० सं० ८, ३, २५ २।

शब्दे खरान्ते एकस्मिन्नुपपदविशेषादेकस्य नपुंसकविषयत्व मेकस्य पुरुषविषयत्वम्। एकत्र नम इत्युपपदम्, एकत्र पतिशब्दः॥

"सिषक्तु, सचते"—"इति" एते नामनी "सेवमानस्य" *। "सनः सिषक्तु"-"सचस्वा नः"—इति "निगमौ (ऋ० सं० १,१, ३४,२.—१,१,२,४.) भवतः" ॥

"यो रेवान्०—०यस्तुरः" †। मेधातिथेरार्षम्। अग्न्युपस्थाने विनियुक्ता। "सोमानं स्वरणम् (ऋ० सं० १,१,३४,१)"-इत्यस्या ब्राह्मणस्पत्याया इय मनन्तरा; तेनेय मपि ब्राह्मणस्पत्यैव स्यात्। उक्तञ्चाक्षरकाणां ब्राह्मणस्पत्याभिरग्नि मुपतिष्ठेतेति। हे भगवन्! ब्रह्मणस्पते! 'यो' 'रेवान्' रयिमान्, धनवान्, 'अमीवहा' रोगहा, 'वसुवित्' च वसुनो धनस्य अपूर्वस्यापि लम्भा, यश्च 'पुष्टिवर्द्धनः' धनपोषस्य वर्द्धयिता, 'सः' 'नः' अस्मान् 'सिषक्तु' "सेवताम्"। पुनः युष्मत्प्रसादात् 'यः' 'तुरः' तूर्णकारी पटुरित्यर्थः॥ ॥ "स नः पितेव०—०स्वस्तये"‡। मधुच्छन्दस आर्षम्। अग्न्युपस्थाने विनियोगः। हे भगवन्! 'अग्ने!' यं त्वां वयं परिचराम, 'सः' 'नः' अस्माकं 'सूनवे' पुत्राय 'सूपायनः' सूपगमनः सूपचारः 'भव', सूपचीर्णश्च 'सचस्व' 'नः' 'स्वस्तये' स्वस्त्ययनाय। निगमप्रसक्त मुच्यते,—"स्वस्तीति" एतत् "अविनाशिनाम" अविनाशिनः अर्थस्य

---

* १भा० ३८० पृ० (२३), (२४)।

† "यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्द्धनः। स नः सिषक्तु यस्तुरः॥" ऋ० सं० १, १, ३४, १।

‡ "स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥" ऋ० सं० १, १, २, ४।

नाम। अन्ये त्वधीयते,—"अविनाशनाम" इति। तेषाम् अविनाशस्यैव नाम। तत्त्व मुक्तम्; अधुना व्युत्पत्तिं ब्रवीति,—"अस्तिः" अयम् "अभिपूजितः" सु-पूर्वः सन्नुच्यते "सु अस्ति"—"इति"॥

"भयते, रेजते"—"इति" एते नामनी "भय-वेपनयोः" *। "यस्य ग्रुष्माद्रोदसी"-"रेजते अग्ने पृथिवी"—"इति" "निगमौ (ऋ० सं० २, ६, ७, १.—५, १, ८, ४.) भवतः"॥

"यो जात एव०—०जनाम् इन्द्रः" †। उपरिष्टाद् व्याख्येयः ‡॥

॥ "प्र चित्र मर्कं०—०मखेभ्यः" §। भरद्वाजस्येय मार्षम्। त्रिष्टुप्। चातुर्मास्ये वैश्वदेवे पर्वणि याज्या। "अग्निमारुतीं पृश्निं मालभेत वृष्टिकामः"—इत्यस्य पशोः षडर्चं चेयम्। हे स्तोतारः! 'चित्रम् अर्कम्' चायनीयं स्तोमं 'गृणते' स्तुवते; स्तनयित्नुशब्देन कृत्स्नं जगत् उपलक्ष्यते। 'तुराय' त्वरमाणाय 'स्वतवसे' स्वात्मबलावष्टम्भिने 'मारुताय' गणाय। कीदृशानां पुनर्मरुतां गणाय 'प्र भरध्वम्'? इति;—ये मरुतः 'सहसा' स्वेन बलेन 'सहांसि' परेषां बलानि 'सहन्ते' अभि भवन्ति, 'रेजते' बिभेति, कम्पते वा। केभ्यः मरुद्भ्यः? 'पृथिवीमखेभ्यः' महद्भ्य इत्यर्थः। य एवङ्गुणयुक्ता मरुतः, तेषां यो गणः, तस्मै प्रभरध्वम् चित्र मर्कम्। अग्नये

---

* १भा० ६८७ पृ० (२५), (२६)।

† "यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मज्मा स जनासु इन्द्रः॥" ऋ० सं० २, १, ७, १।

‡ दै० का० १०, १, १०।

§ "प्र चित्र मर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्। ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवीमखेभ्यः॥" ऋ० सं० ५, १, ८, ४।

मारुताय च गणायेति स्तोतॄन् सम्बोध्य ततोऽग्निं ब्रवीति,—हे भगवन्नग्ने ! शृणु त्व मद्येत मर्क मेवङ्गुणयुक्तैर्मरुद्भिः सह ॥

"द्यावापृथिवीनामधेयानि" एभ्यः "उत्तराणि" द्वि-सम्बन्धेनैवोच्यन्ते *। कियन्ति पुनस्तानि ? "चतुर्विंशतिः" (२ ४)। कतमानि पुनस्तानि ? "सधं, पुरन्धी"—इत्येवमादीनि †। सर्वस्यास्य भूतग्रामस्य धारयित्र्यौ स्वधे। पुरन्धी, पुरू बह्वनि धारयित्र्यौ। इत्येवमादि योज्यम् ॥

द्विवचनेन युक्तानि द्यावापृथिव्योर्नामानि ; "तयोः" साहचर्याख्यायिका "एषा" ऋग् "भवति" (साहचर्ये हि सति द्विवचनयोग उपपन्नरूपो भवति नान्नाम्) ;— ॥ ४ ॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद । विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ कतरा पूर्वा कतरापरैनयोः कथं जाते कवयः क एने विजानाति सर्वं मात्मना बिभृतेा यद्धैनयोः कर्म्म विवर्त्तेते चैनयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावापृथिव्योर्म्महिमान माचष्ट आचष्टे ‡ ॥ ५ (२२) ॥

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥ ३, ४.

---

* १भा० ३७१ पृ० २ अ० ३० ख०।

† १भा० ३७२—३७६ पृ०।

‡ "महिमान माचष्टे" च। पुरस्तात् १४२ पृष्ठाथां " * " द्रष्टव्यम्।

"कतरा पूर्वा कतरा"०—इति *। अगस्त्यस्यार्षम्। त्रिष्टुप्। पृष्ठ्याभिप्लवयोः षष्ठेऽहनि महाव्रते च तृतीये सवने वैश्वदेवे शस्त्रे शस्यते। स्वय मेव तावद् वितर्कयन्नुत्पन्नसंशयो मन्त्रदृग् ब्रवीति;—'कतरा' अनयोः द्यावापृथिव्योः 'पूर्वा'? 'कतरा' तु 'अपरा'? न हि पौर्वापर्य्यं मनयोः स्फुटं लक्षयितुं शक्यते। 'कथा' केन प्रकारेण एते 'जाते' स्याताम्? किं पौर्वापर्येण, उत युगपद् भवेताम्? अपि तावत् हे 'कवयः!' 'कः वि वेद' कश्चिदपि विस्पष्टं जानाति? अहं त्वेतावच्चकृयादागमाद् वक्तुम्,—तस्मादुद्भूतस्य हिरण्मयस्याण्डस्यैते शकले इति †। एवं ह्याह ते;—"अण्डकपाले रजतं च सुवर्णं चाभवताम्; तद्यत् रजतं, सेयं पृथिवी; यत् सुवर्णं, सा द्यौः"—इति। तेन ज्ञायते युगपदेवैते स्याता मिति। किञ्च; 'विश्वं' सर्वं 'त्मना' आत्मनैव 'बिभृतः' धारयतः। 'यद्ध नाम' यदर्थं मनयोर्नाम नमनम्, यस्माद् भूतग्रामधारणार्थम् एतेन विपरिणामत्वेन, तत् सर्वं मेते बिभृतः। किञ्च; 'विवर्त्तते' 'च' विपर्ययेण वर्त्तते च 'एनयोः' एव अन्तर्भूते अहनी "अहोरात्रे" 'चक्रियेव' "चक्रयुक्ते इव" चक्रयुगल मिव अवियोगेन संयुक्ते, सम्बद्धे इत्यर्थः॥

मन्त्रव्याख्यानेन गतार्थ मेतद्-भाष्य मिति॥

"द्यावापृथिव्योर्महिमान माचष्टे"—इति। एतदनेन मन्त्रेण द्यावापृथिव्योर्महिमानं माहाभाग्यं मन्त्रदृगाचष्टे॥ ५॥

---

* ऋ० सं० १, ५, १, १।

† मनुः,—१अ० १२, १३ श्लो०।

एव मेतन्नैघण्टुकं प्रकरणं समाप्तम्; अतःपर मैकपदिकं भवति *। यस्याय मादिः;—"एकार्थ मनेक शब्द मिति" † —इति॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य ‡ चतुर्थः पादः॥ ३,४.

ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगदुर्गस्य कृतौ अष्टमोऽध्यायः ६ (तृतीयोऽध्यायः) समाप्तः॥ ३॥

(१ २ ३ ४ ५
कर्मनामानिपरिषद्यन्नहिग्रभायशासद्वह्निरभ्राते-
६ ७ ८ ९ १० ११
वनजामयेमनुष्यनामानितद्यद्दशावनिभ्योऽभीद्न्वया-
१२ १३ १४ १५ १६ १७
वयंयचासुपर्णाबहुनामानितनूत्यजेकुहश्चिच्चतुरश्चित्प्रि-
१८ १९ २० २१ २२
यमेधवद्थलुप्तोपमान्यर्चतिद्विषोरभःकतरापूर्वा द्वाविं-
शतिः॥॥)

॥ इति निरुक्ते पूर्वषट्के तृतीयोऽध्यायः॥ ३॥

(नैघण्टुकं काण्डं समाप्तम्।)

---

* १४६ पृ० २-३ पंक्तिद्रष्टव्या।
† नैग० का० ४, १, १ (२६८ पृ०)।
‡, § १४६ पृ० "¶" द्रष्टव्यम्।
॥ १४६ पृ० "**" द्रष्टव्यम्।

॥ अथ चतुर्थोऽध्यायः ॥

तत्र,

॥ प्रथमपादः ॥

ॐ३म्। एकार्थ मनेकशब्द मित्येतदुक्त मथ यान्यनेकार्थान्येकशब्दानि तान्यतोऽनुक्रमिष्यामोऽनवगतसंस्कारांश्च निगमांस्तदैकपदिक मित्याचक्षते जहा जघानेत्यर्थः ॥ १ ॥

"एकार्थ मनेकशब्द मित्येतदुक्तम्"। किमर्थ मिद मुच्यते? न हि यद्यद् वृत्तं तत्तद् वक्तव्यम्, इदं वृत्त मिदं वर्त्तिष्यत इति। यद्यद् वृत्तं तत्तदनुक्त मपि प्रतीयते, यच्च वक्ष्यमाण मिति। आह;—सङ्क्षेपतो निगमनाय यदुक्तं यद्वा वक्तव्यं प्रतिजानीथ, समासविस्ताराभ्यां * हि सुख माधर्ण्यं प्रकरण मवधारयिष्यामहे; गृहीतार्थं सङ्क्षेपाच्च विस्तरेणोत्तरग्रन्थ मुच्यमानं सुख मवभोत्स्यामहे। अपिचोक्त मन्यत्रापि,—

"विस्तीर्य हि त मज्ञान † मृषिः सङ्क्षेपतोऽब्रवीत्।
इत्थं हि ‡ विदुषां लोके समास-व्यासधारणम्॥"

---

* "प्रतिजानीथ्यसमासविस्ताराभ्यां" क, ख।
† "विस्तीर्य हि मरुज्ज्ञान" ग।
‡ "दृष्टं हि" ग।

शृणु ;—समासतो यदुक्तं यच्च वक्तव्यम् "एकार्थं मनेकशब्द मिति"—एतत् पुरस्तात् सूचितम् ; एतावन्तः समानकर्माणो धातवः, एतावन्त्यस्य सत्त्वस्य नामधेयानि,—इत्यनेन वाक्येन। यदेतद् "गौरिति पृथिव्या नामधेयम् *"—इत्यत आरभ्य नामाख्यातोपसर्गनिपातां प्रपञ्चनञ्च, तत्त्वभेदपर्याय-†-सङ्ग्रामन्दिग्धोदाहरणतन्निर्वचनव्याख्याप्रविभागेनोक्तम् ‡। स एव § नैघण्टुकस्य प्रकरणस्य निगमव्याजेन सर्वथाऽप्यर्थः सङ्क्षेपत उक्तः, शास्त्रसम्बन्धश्चैव मनुसृतो भविष्यति। प्रकरणद्वयस्य चास्यैव मपुनरुक्तता प्रदर्शिता भविष्यतीत्यनेनाभिप्रायेण एकार्थं मनेकशब्द मित्युक्तम्। एकोऽर्थः पृथिव्यादिः, अनेकेषां गवादिशब्दानाम्, यत्र तत्त्वभूतः कथ्यते ; अनेके च गवादिशब्दाः पृथिव्यादेरेकस्यार्थस्य यत्राभिधायिनः कथ्यन्ते, तदिद मेकार्थं मनेकशब्दं प्रकरणम्। अत्रैकेनार्थेनानेके शब्दा लक्ष्यन्ते, अनेकैः शब्दै ‖ रेकोऽर्थः। ततो लक्षितलक्षणया वृत्त्या प्रकरणं लक्ष्यते। अत्र यद्यपि ¶ गतिकर्मणां द्वाविंशतिशतसङ्ख्याना मविशिष्टं गमन मेकोऽर्थ उक्तः**, तथापि प्रसिद्ध्यनुरोधाय "कसति", "लोठते" ††, "श्योतते"—इत्येवमादयः ‡‡ प्रतिनियतसत्त्वगमन-

---

* पुरस्तात् १७५ पृ० १ पं०।
† "तत्त्व भेदपर्याय" क, ख।
‡ १७९ पृ० १९ पं०—१७७ पृ० ८ पं०।
§ "स एव" ग।
‖ "अनेकैश्च शब्दै" ग।
¶ "अत्र पुनर्यद्यपि" ग।
** २८४ पृ० ८ पं० किञ्च २८२ पृ० ९ पं०।
†† "लोटते" क, ख।
‡‡ १भा० १४० ४० (९), (४), (१२) "श्योतति"।

विषया एव द्रष्टव्याः। तद्यथा,—य एवोत्कटिक उरसा वा गच्छति, स एव कसतीत्युच्यते; नेतरो य ऊर्द्धो गच्छति। तथा च,—य एव* निम्नेन प्रदेशेन कश्चिदचेतनो लोष्टादिरन्यो † वा चेतनः पुरुषादिः अकामकारेण गच्छति, स एव लोटत इत्युच्यते ‡; नान्यः। तथा च,— यदेव द्रवद्द्रव्यं किञ्चित् स्रवति, तदेव स्रोतत इत्युच्यते; नान्यत्। एवं गच्छतिकर्मणा मेकार्थत्वेऽपि सति प्रसिद्धे सामर्थ्याद् § गमनविशेषेषु यथार्थं विनिवेशो द्रष्टव्यः। देशान्तरप्राप्तिस्तु चलन-पूर्विका, सर्वेषां समानं कार्यम्; इत्यत एकार्थत्व मेषा मुक्तम् ॥। सामान्यशब्दाश्च क्वचिद् विशेषवाचिनो भवन्ति, विशेषशब्दाश्च क्वचित् सामान्यवाचिनः; तदप्युपेक्षितव्यम् ॥

एकार्थ मनेन समासतो नैघण्टुकं प्रकरण मनुसृतम्; "अथ" इदानीं यद्व्याख्यातव्यं ¶, तत् समासतः प्रतिज्ञायते।—"यानि अनेकार्थानि एकशब्दानि" पुरस्तात् समासतः सूचितानि, एतावता मर्थाना मिद मभिधान मित्येवम्; "तानि", "अतः" परम् "अनुक्रमिष्यामः" व्याख्येत्यभिसम्बन्धः। किंलक्षणा पुनरिह व्याख्या? इति। तदुच्यते;—

"तत्त्वं पर्यायशब्देन व्युत्पत्तिश्च द्वयोरपि।
निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे ॥"

---

* "स एव" क, ख।
† "लोष्ठादिरन्या" ग।
‡ "लोठत इत्युच्यते" ग।
§ "सति प्रसिद्धिसामर्थ्याद्" ग।
॥ १भा० २२१—२५७ पृ० १४ ख०।
¶ "यद्याख्यातव्यं" क, ख।

यान्येतानि दयत्यकूपारादीनि पदानि * अनेकैरर्थैरुपदयादानदहनहिंसादिभिरर्थवन्ति, यानि चैतान्यर्थजातान्युपदयादानदहनहिंसादीनि, एकशब्दवाच्यानि; तान्येव मितरेतरविशेषणविशेष्यभावलक्षणोपलक्षितानि, एकप्रकरणता मुपगतानि; एवम्प्रकारया ऐकपदिकप्रकरणव्याख्यया † 'अनुक्रमिष्यामः' वर्णयिष्यामः‡। अचार्थस्याप्रतीयमानस्य पर्यायाभिधानेन विभज्य प्रतिपादनं व्याख्या; शब्दस्यापि व्युत्पादनं व्याख्या। एव मेते द्वे व्याख्ये। तयोरर्थपरिज्ञान मेकस्याः कार्यम्; शब्दपरिज्ञान मेकस्याः। तदेतदुभय मस्मिन्नैकैकस्मिन् नैगमे पदे यथासम्भवं व्याख्यास्यते §॥

आह;—किमनेकार्थान्येव केवलानि अस्मिन् प्रकरणे व्याख्यायन्ते? नेत्युच्यते;—"अनवगतसंस्कारांश्च निगमान्"। 'अनवगतसंस्कारान्' अविज्ञातसंस्कारानित्यर्थः। येषां प्रकृतिप्रत्ययादिसंस्कारो न साकल्येन ज्ञायते॥, तांश्च निगमान् अत्रैव¶ व्याख्यास्यामः। पूर्वाणि चानेकार्थानि अनवगतसंस्कारांश्चेति च-शब्दः॥

तदेतदेवम्प्रकारं प्रकरणं यत्रैतदुभयं व्याख्यायते, "तद्" "ऐकपदिकम्" "इति" अनेन नाम्ना अन्येऽप्याचार्याः "आच-

---

* "दयते" १भा० १९९ पृ० (२९)। "अकूपारस्य" १भा० १९७ पृ० (२२)। यत्रादिशब्दः प्रकारार्थः। तथा च "जहा"—प्रभृतीनि, "ऋवीषम्"—इत्यन्तानि (१भा० १८८—४५८ पृ०) बोध्यम्।

† "एकपदिकं प्रकरणव्याख्यया" क, ख।

‡ "वर्णयिष्याम इत्यर्थः" ग।

§ १४९ पृ० २ पं० "§" टीका च द्रष्टव्या।

॥ "ज्ञापितः" ग।

¶ "तत्रैव" क, ख।

च्यते" *; निरूढा हीय मस्मिन् प्रकरणे सञ्ज्ञेत्यभिप्रायः। पूर्वस्मिन् प्रकरणे गणशः पदानां विरचना मपेक्ष्यैतदेकपदिक मुच्यते; अत्र त्वेकैक † मेव पदं समाम्नातम्। तद्यथा,—"जहा, निधा" —इत्येवमादीनि ‡। यत्र पुनः क्वचिदनेकान्यपि समाम्नातानि; तद्यथा,—"देवो देवाच्या कृपा"§,"सोमो अत्राः"॥—इत्येवमादीनि, तत्रैव तत् प्रयोजनं वक्ष्यामः ¶ ॥

एवं प्रकरणार्थं सङ्क्षेपतः प्रतिज्ञाय क्रमेण वर्णवृत्तित्वाच्च प्रथमं यत् पदं **, तदुपादीयते ;—"जहा(१)"—इति ††। आह;—किमेतदनवगतसंस्कार मुतानेकार्थम्? उच्यते;—स च जहेत्यनेनानुपपन्नसंस्कारेणोक्तो भवति। अत्र हन्तेर्जहातेश्च सन्देहं इति भाष्यकारेणावधृतं "जघानेत्यर्थः"—इति। आह;—कुतः पुनर्विशेषावधारणं हन्तेरेवात्र रूपम्, न पुनर्जहातेः? इति। उच्यते;—निगमात् ॥ १ ॥

को नु मर्या अमिथितः सखा सखायं अब्रवीत्। जहा को अस्मदीषते। मर्या इति मनुष्यनाम मर्यादाभि-

---

* "इत्याचक्षते" क, ख।
† "अत्र त्वेकैक' ग।
‡ १भा० १८८ पृ० ४ अ० १, १, १ ख०।
§ १भा० ४२४पृ० ४ अ० २ ख० (१९) किञ्च ४२५ पृ०(१९)। परस्तात्च १, १, ४।
‖ १भा० ४०१ पृ० ४ अ० १ ख०(१२) किञ्च ४०७ पृ० (१२)। परस्तात्च ४, १, १।
¶ वयं वृत्तिकारा इति यावत्।
** "वर्णवृत्तित्वाच्च यत्पदं" क, ख।
†† १भा० १८८ पृ० ४ अ० १ ख० (१)।

धानं वा स्यान्मर्यादा (मर्यैरादीयते मर्यादा*) मर्यादिनोर्विभागो मेथतिराक्रोशकर्म्मापापकं जघान क मह जातु कोऽस्मद्भीतः पलायते निधा पाश्या भवति यन्निधीयते पाश्या पाशसमूहः पाशः पाशयतेर्विपाशनात् ॥ २ ॥

कतमः पुनरसौ निगमः? इत्याह;—"को नु मर्याः (ऋ० मं० ६, ३, ४९, २)"—इति। त्रिशोकस्येयं मार्षम्। गायत्री। महाव्रते महदुक्थे ऋचाशीतिषु शस्यते। अस्या ऋचि जहेत्यस्य शब्दस्य पूर्वोत्तरपदाविरोधा†-प्रकरणशब्दसारूप्यार्थोपपत्तिभिः संस्कारानवगमेऽपि सति हन्तेरेव विशेषेणार्थोऽवतिष्ठते, न जहातेः। कथम्? इति, ब्रूहि;—'मा' 'नः' 'एकस्मिन् आगसि' 'वधीः' हे 'शूर!'। 'मा' 'द्वयोः' आगसोः वधीः। 'उत' अपि च 'त्रिषु' अपि आगस्सु मा वधीः। 'भूरिषु' अपि अपराधेषु 'मा वधीः' इति ‡। एतस्मिन् प्रकरणे ब्रवीति "को नु मर्याः"—इति। हे 'मर्याः' मनुष्याः! युष्मानेव तावत् पृच्छामि,—'अमियितः' अनाक्रुष्टः, पुरुषमपि वा किञ्चिदनुक्तः, अपि च 'सखा' समानख्यानः, 'सखायम्' एव समानख्यानमेव सन्तम् (यथा भवता मह यज्ञे समानख्यानः, एवं सन्तम्) 'अब्रवीत्'। को ह्येव माह? 'अमियितः' अनाक्रुष्टो ब्रूयाद्

---

* नैतद्विवेचनं दृश्यते क-ख म-पुस्तकेषु।

† "पूर्वोत्तरपदाविरोधः" क, ख।

‡ "मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु। बधीर्मा शूर भूरिषु॥" ऋ० सं० ६, ३, ४८, ४।

यः कश्चिद्,—यथा यूयमनाहताः सन्तो मां ब्रूत मा वधीरिति। "जहा को अस्मदीषते"। अपापकशब्दोऽत्र भाष्यकारेणाध्याहृतः प्राक् जहा-शब्दस्य अर्थोपद्योतनार्थम्;—,'अपापकं" सन्तं "क महं" "जघान" हतवान् "जातु" कदाचिदित्यर्थः। "अपापकं", "कम्", "अहम्", "जातु"—इति सर्वमेतत् अध्याहृतं भाष्यकारेण, 'जहा'-शब्दस्य निराकाङ्क्षीकरणार्थं मध्याच्चोपरिष्टाच्च *; एवं हि जहा-शब्दः परिसमाप्तार्थो भवति। न कदाचिदपि कश्चिदपापको मया हतपूर्व इति, पापकारिणन्तु हन्मीत्यभिप्रायः। ते यूयमपापा एवाजस्रं भूयास्थ, नैवो हनिष्यामि। यत् पुनरेतदुक्तं भवद्भिः 'भूरिष्वपागस्सु मास्मान् वधीः(३७४पृ०१३पं०)',—इति; कथ मागस्कारी न हन्यते? श्वा पुरोडाशं सवलिह्यात्, न च कस्य चित् कस्मिंश्चिदपि श्वता स्यात्; सर्वं वा असमञ्जस मेव स्यात्, यदि पापकारिणो न हन्येरन्; अथ मनुष्यानपापानपि त्वं हंस्येवेति। अत्र ब्रूमः;—"कः" "अस्मत्" अस्मत्तः अपापकारी सन् "भीतः" 'ईषते' "पलायते" इत्यर्थः; न कश्चिदप्यपापकारी मत्तः उद्विजमानः पलायते; स हि शुद्धेन चेतसा अभिमुख एव मा मभ्येति; य एव तु पापकारी भवति, स एवात्मापराधशङ्कितया बुद्ध्या अस्मत्तो भीतः पलायते इत्यभिप्रायः। अत्रापि कोऽस्मदित्येतस्मात् पञ्चमीयोगात् ईषतेर्गमनमात्रसामान्यवाचिनः † सतो गमनविशेषे पलायनेऽवस्थानम्। यो हि यस्माद् बिभेति, स तस्मात् पलायते।

---

* 'भाष्यकारेण' भगवता शाबरेनेत्यर्थः। ३७४पृ० १, ३ पं० द्रष्टव्ये।

† १भा० १५० पृ० (७०)।

भीतशब्दश्चाध्याहृतः? न ह्यभीतः कश्चित् पलायते॥ इत्येष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"मर्या इति" मनुष्यनामसु पठितम्*, इहापि चैतत् "मनुष्यनाम" एव। तस्योक्ता व्युत्पत्तिः;—"मर्या मनुष्यो मरणधर्मा" इति†। अथ "वा" "मर्यादाभिधानम्" एव अत्र "स्यात्", न मनुष्यनाम। यदा मर्यादाभिधान मेतदभिप्रेतं भवति, तदैवमर्थवत्तास्य योजयितव्या;—"मर्यादा, मर्यैरादीयते"‡। का नु एषा मर्यादा,— यतो धर्मज्ञाः सन्तो यूय मनाहता अनाक्रुष्टाश्च असद्भियोगं सखायः सन्तो मम सख्युर्हन्तुं मा वधीः? इति; नैतन्न्याय्य मित्यभिप्रायः। "मर्यादा, मर्यादिनोर्विभागः"। संश्रिता§ या भूमिरुपचीर्णा, सा मर्येत्युच्यते (विषयान्त इत्यर्थः); आदिरन्यस्य विषयस्योपक्रमश्चोच्यते। संश्रितायाश्च॥ भूमेरादेश्च विभागकारिणी या भूमिः, सा मर्यादेत्युच्यते। "मेथतिराक्रोशकर्मा"। ततस्तः पत्योऽश्व मभिमेथतीति प्रसिद्ध मश्वमेधे मेथतेराक्रोशकर्मत्वम्। लोकेऽपि च शालो¶ मेथनक इत्युच्यते; स ह्यभीक्ष्णं माक्रुश्यते, आक्रोशति च सः॥

"अपापकम्"—इत्यस्य भाष्यपदस्यापरो व्याख्यामार्गः;—को न्वेवं ब्रूयादपापकं सन्तं मा वधीरिति? जघान क महं जातु पापक

---

* १भा० १८० पृ० (११)

† पुरस्तात् २१५ पृ० ८ पं०।

‡ क-ख-नाम-वृत्तिपुस्तकयोश्च नास्येतन्निर्वचनम्।

§ "मृता" ग।

॥ "मृमायाश्च" ग, रोर्यसङ्कीर्तं च।

¶ "स्यालो" ग। खलमध्ये स्थितो धान्यमर्दनाय प्रोथितो गवादिबन्धनदण्डः।

मपापकं वा? कोऽस्माद्भीतः पलायते? न कश्चिदपि; सौम्योऽह मित्यभिप्रायः। बलक्रतिसम्बन्धादिन्द्र * एवायम् † ॥

एव मेतस्मिन् मन्त्रे प्रकरणपूर्वोत्तरपदाविरोधशब्दसारूप्यार्थोपपत्तिभिर्हन्तेरेव विशेषेणार्थोऽवतिष्ठते, न जहातेः; जहातौ ह्येतस्मिन् कल्प्यमाने प्रकरणं पूर्वोत्तराणि च पदानि विरुद्ध्यन्ते शब्दसारूप्येऽपि सति। तस्मान्नाच जहातेरवकाशोऽस्ति, पारिशेष्यात् हन्तेरेतद्रूप मित्युपपन्नं भवति ॥

एव मेव सर्वेष्वेवानवगतसंस्कारेषु योज्यम् ॥

"निधा(९)"—इति ‡। एतत् पद मनवगतसंस्कारावसरप्राप्तं व्याख्यानीय मेकपदिकव्याख्याधर्मेण प्रकृतानुवृत्त्या स व्याख्यातव्य इति तदभिधानाभिधेयनिगमनिर्वचनानुक्रमप्रवृत्त्या ब्रूमः;—"निधा पाश्या भवति"—इति। पर्यायेण तत्त्ववचनम्। यो वालमयः स्नायुमयो वा पाशसमूहः, पक्षिग्रहणार्थः, स पाश्येत्युच्यते। अधुना द्वावप्येतौ शब्दौ निर्वक्ति, निधा-शब्दं पाश्या-शब्दञ्च।—"यत्" यस्मात् इयं "निधीयते" नीचैर्धार्यते पक्षिग्रहणार्थम्। तस्मात् निधि रिति प्राप्ता, निधानीति वा। सेय मेवं प्राप्ता सती निधेत्यनवगतसंस्कारेणोच्यते। पाश्या-शब्दं पर्यायाभिधानप्रसक्तं निर्ब्रवीति प्रत्ययोत्पादनार्थम्;—"पाश्या पाशसमूहः" इति। पदान्निष्कृष्य तद्धितार्थो निरुक्तः; अधुना पदार्थं निर्ब्रवीति;—"पाशः पाशयतेर्विपाशनात्"; तेन हि विविध मतिशयेन वा पाश्यते बध्यत इत्यर्थः ॥ २ ॥

* "या च का च बलकृति रिन्द्रकर्मैव तत्"—इति बृ० का० ७, २, १।

† ग-पुस्तके तु एतदनन्तरं "विशेषकल्पाद्यस्येय मार्षम्"—इत्यधिकम्।

‡ १भा० १८६ पृ० ६ पं०।

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्। वयो वेर्बहूवचनं (सुपर्णाः*) सुपतना आदित्यरश्मय उपसेदुरिन्द्रं याचमाना अपोर्णुह्यापध्वस्तं चक्षुश्चक्षुः ख्यातेर्वा चष्टेर्वा पूर्धि पूरय देहीति वा मुञ्चास्मान् पाशैरिव बद्धान् पार्श्वतः श्रोणितः शितामतः पार्श्वं पर्शुमय† मङ्गं भवति पर्शु‡ स्पृशतेः संस्पृष्टा पृष्ठदेशं पृष्ठं स्पृशतेः संस्पृष्ट मङ्गैरङ्ग मङ्गना§ दञ्चनाद्वा श्रोणिः श्रोणतेर्गतिचलाकर्मणः श्रोणिश्चलतीव गच्छतो देाः शितामा भवति देार्द्रवतेर्योनिः शितामेति शाकपूणिर्विषितो भवति श्यामतो यकृत्त इति नैटीकिः श्यामं श्यायतेर्यकृद् यथा कथा च कृत्यते॥ शितिमांसतो मेदस्त इति गालवः शितिः श्यतेर्मांसं माननं वा मानसं वा मनोऽस्मिन्त्सीदतीति वा मेदो मेद्यतेः॥ ३॥

अधुना यस्मिन् मन्त्रे निधा-शब्दः पाशसमूहवाची, त मानीय ब्रवीति; निधाशब्दनिगमार्थम्। कतमः पुनरसौ मन्त्रः? इत्याह; —"वयः सुपर्णा" इति¶। शाक्तस्य गौरिवीतेरिय मार्षम्।

* नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।
† "परश्मय" क, ख, ग ङ।
‡ "परशु" क, ख।
§ "मङ्गना" क, ख, ग।
‖ "कृत्यते" क, ङ।
¶ ऋ० सं० ८, २, ५, ६।

चिष्टुप्। अग्निष्टोमे मरुत्वतीयशस्त्रस्य परिधानीयैषा निविद्धानीये सूक्ते। 'वयः' "आदित्यरश्मयः"। "वेतेः"* गत्यर्थस्य (अदा० प०) नामीभूतस्य "बहुवचनम्"; विः, वी, वयः इति। 'सुपर्णाः' "सुपतनाः" एत एव "उपसेदुः"। उपसीदन्ति व्युष्टायां रात्रावहन्यहनि। क मुपसेदुः? 'इन्द्रम्' आदित्यम्। 'प्रियमेधाः' प्रियमज्ञाः। त एव यज्ञसहचारित्वात्; उद्गतेषूदितेषु हि तेषु यज्ञास्तायन्ते। 'ऋषयः' त एव, अर्षणात्†; प्रकाशकत्वात्। 'नाधमानाः' त आदित्य मुपसेदुः‡। क मर्थं "याचमानाः"? इति। "अपोर्णुहि" अपावृणु जनाना मेतत् 'ध्वान्तम्' "आध्वस्तम्", आच्छादितं तमसा। 'चक्षुः' 'पूर्द्धि' "पूरय"; युष्मदननुगृहीत मसफल मिवैतेषां जनाना मेतच्चक्षुः §, तत् पूर्द्धि, सफलं कुर्वित्यर्थः। अथवा 'पूर्द्धि' "देहि" इति। यदुक्तं स्यात् अस्तं हि गच्छता त्वया एतेषां जनाना मान्न मिव॥ यच्चक्षुः, तत् पुनरुद्यंस्त्व मेतेभ्यो¶ जनेभ्यो देहि। कथं च पुनर्देहि? 'मुमुग्धि अस्मान्' "मुञ्चास्मान्" 'निधया' "पाशैः" पाशसमूहेन पक्षिणः "इव" एतस्मिन् मण्डले "बद्धान्"। यावदेतत्तावदशेषं तमो नाशयित्वा एतेषां जनाना मेतच्चक्षुर्दद्मः, सफलं वा कुर्मः। एवं ह्येतत् त्वयैव दत्तं भविष्यतीत्यभिप्रायः। एत मर्थं याचमाना उपसेदुः॥

---

* मूलपाठस्तु "वेः" इत्येव।
† "ऋषणात्" ग।
‡ "नाधमानास्त मुपसेदुः" क।
§ "यच्चक्षुः" क, ख।
॥ "जनाना मिव" रोथ्-मु० पाठः।
¶ "मदुद्यंस्त मेतेभ्यो" क, ख। "मदुद्यन्नेतेभ्यो" रोथ्-मु० पाठः।

"चक्षः", "ख्यातेर्वा" दर्शनार्थस्य; "चष्टेर्वा" दर्शनार्थस्यैव। एव मेतस्मिन् मन्त्रे 'मुमुग्ध्यस्मान्निधयेव बद्धान्'—इत्येतेषां पदानां मध्ये वर्त्तमानस्य तृतीयान्तस्य निधा-शब्दस्य पाशसमूहादन्यः कोऽर्थः स्यात्?—'मुमुग्धि', 'बद्धान्'—इत्येतौ शब्दौ हेन बद्धाः, यस्माच्च मुच्यन्ते, तदर्थाभिधायिनं शब्द माकाङ्क्षतः। तत्रैवं सति वर मविद्यमानस्याध्याहाराद् विद्यमानस्य, निधाशब्दस्य, अनयोः शब्दयोर्मध्ये वर्त्तमानस्य, आकाङ्क्षितार्थाभिधायकत्वकल्पना दूति निधाशब्दः पाशसमूहाभिधायित्वेऽवतिष्ठते; इतरथा ह्यय मितरैः पदैरसम्बध्यमानोऽनर्थक एव स्यात्। तस्मादेवं सर्वत्रानवगतसंस्काराणा मसिद्धार्थानां पदानां सामर्थ्यादाकाङ्क्षितरूप एवार्थेऽवस्थानं भवति; तदुपपाद्यं सर्वत्र; ग्रन्थातिगौरवभयात्तु सङ्क्षेपतोऽत्र दर्शयिष्यामः॥

"शितामि(२)"—इति *। एतदनवगतम्। अनुपन्यस्तैव पदम्, अभिधेयं ह्यानुक्तैव निगम मेव प्रथमं पठत्याचार्यः। विप्रतिपत्त्या नेकार्थत्व मस्तीति। "पार्श्वतः श्रोणितः शितामतः"—इति निगमः (य० मा० सं० २१,४३)। पशुहविषः प्रैषोऽयं मन्त्रशेषः। कतमः पुनरसौ प्रैषः? "होता यक्षदिन्द्राग्नी"—इति †। सर्व एव गद्यः। वामदेवस्यार्षम्। मैत्रावरुणो ब्रवीति। 'होता यक्षत्' होता यज-

---

* १भा० ३८९ पृ० ९ पं०।

† "होता यक्षद्विनो ह्यागस्य हविष आत्ता सद्य मद्धुतो मेद उद्भृतस्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गभो घस्तां नूनं घासे अन्नाणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणा मग्निष्वात्तानां पार्श्वतः श्रोणितः शितामत उत्साद्तोऽवादक्षादवत्तानां करत एवाश्विना जुषेतांꣳ हविर्होतर्यज ॥" य० मा० सं० २१, ४३।

त्यर्थः। तेन चेज्यमानौ 'इन्द्राग्नी', * अस्मात् 'हविषः' पश्चाख्यात् 'मध्यतः' यदेतत् 'मेदः' 'उद्भृतम्', अस्यां स्रुच्यां हितम्। तस्मान्मेदः पर्यस्यति, अपयति, चेधा भेदः करोतीति ह्युक्तम्। एतन्मेदः 'अद्य' एतस्मिन्नहनि सद्यः उद्भृतम् 'आत्ताम्' भक्षयेताम्। 'पुरा द्वेषोभ्यः' हविर्मथिभ्यः पिशाचादिभ्यः। 'पुरा पौरुषेय्या गृभः' अर्वागिड़ावदानात्†: दृडा हि ‡ पुरुषार्थं गृह्यते, प्राक् तस्माद् ग्रहणात्। 'इन्द्राग्नी' 'घस्तां' भक्षयेतां, 'नूनं' निश्चयेन। एतस्मिन् 'घासे' घसनकाले, भक्षणकाले प्राप्ते 'अज्राणाम्' अनभिभूतानां रक्षोभिः आदरेण प्रतिविशिष्टैर्मन्त्रैः संस्कृतानाम्§। अथ वा 'घासेअज्राणाम्' इत्येकं पदम्॥। तदाय मर्थः;—घासे हि सति पशवो न जीर्य्यन्त इति 'घासेअज्राः'। 'यवसप्रथमानां' यवसः अशनम्, तस्य अनेकप्रकारस्य श्रेष्ठत्वादेतान्येव देवदत्तये प्रथमानि; तेषां यवसप्रथमानाम्। 'सुमत्त्वराणाम्' स्वय मेवैतानि भक्ष्यमाणानि स्वादुत्वादुदरं प्रति त्वरन्तीति सुमत्त्वराणाम्। 'शतरुद्रियाणाम्' बभ्रुस्तूनीनाम्। अथ वा 'शतरुद्रियाणां' बभ्रो रुग्णानाम्¶। 'अग्निष्वात्तानाम्' अग्निष्वात्तादीनाम्, अग्निपाकेन मृदुत्वात् स्वादूकृतानाम्। 'पीवोपवसनानाम्' पीना क्षागेन, उपवस्तानाम्; अथ

---

* शाखाविशेषे 'इन्द्राग्नी' एव; माध्यन्दिन्यां तु 'अश्विनौ' इति।

† "अर्वागिलावदानात्" क, ख।

‡ "दृला हि" क, ख।

§ "सम्भृतानाम्" क, ख।

॥ "हलदन्तात् (पा० ६, ३, ९)"—इत्यादिना सप्तम्या अलुकि "प्रकृत्यान्तः (पा० ६, १, ११५)"—इति प्रकृतिभावे च रूपम्।

¶ "बभ्रोरुग्णानाम्" क, ख।

वा पीवानं क्वाग मुपगम्योषितानाम् *। 'पार्श्वतः' अङ्गात् 'अवत्तानाम्'। 'श्रोणितः' अवत्तानाम्। 'शितामतः' अवत्तानाम्। 'उत्खादतः' च उच्छेदनस्थानात् 'अङ्गादङ्गात्' अवत्तानाम्। 'कृतः' कुरुताम् इन्द्राग्नी! हविर्म् एतेषाम् एवंलक्षणाना मवदानानाम्†। हे 'हेतः'! यथैताविन्द्राग्नी 'जुषेताम्' आसेवेताम्, एतत् 'हविः'। तथा त्व मपि 'यज' ॥

निगमप्रसक्त मुच्यते;—"पार्श्वं पर्शुमय मङ्गं भवति"। पर्शवो वक्ष्य उच्यन्ते; तन्मयं हि तद् भवति पार्श्वपदलक्षणम्‡। आह;—पर्शुः कस्मात्? उच्यते,—"पर्शुः, स्पृशतेः"। आह;—किं मनया स्पृष्टम्? इति। उच्यते,—"संस्पृष्टा पृष्ठदेशम्" प्रति भवति। आह;—"पृष्ठं" कस्मात्? उच्यते,—"स्पृशतेः" (तु० प०) एव; तद्धि "संस्पृष्ट मङ्गैः"। आह;—"अङ्गम्" कस्मात्? उच्यते,—"अङ्गनात्"; अङ्गितं§ हि तत् कालेन भवति ॥, गत मित्यर्थः (भू० प०)। "अञ्चनाद्वा"। अञ्चतिरपि गत्यर्थ एव (भ्वा० प०)। धात्वन्यत्व मर्थैकत्वम्। पार्श्वशब्दप्रसक्तानुप्रसक्त मुक्तम्। अधुना श्रोणिशब्दं निगमप्रसक्तं निर्ब्रवीति;—"श्रोणिः श्रोणतेः" धातोः "गतिचलाकर्मणः" (भू० प०)। गति-

* "पीवोपवसनानाम्। पीवस् शब्दोऽस्थूलवाची। पीवसां स्थूलाना मङ्गाना मप समीपे वसनं स्थितिर्येषां, तानि पीवोपवसनानि, तेषां स्थूलाङ्गसमीपस्थितानां स्थूलाना मित्यर्थः। "उपवसने पीवः (२, १, १२)"—इति प्रातिशाख्यसूत्रेण पीवसो विसर्गलोपः"—इति महीधरः।

† "भवदातानाम्" क, ख।

‡ "पार्श्वपटलम्" ग।

§ "अङ्कनात्; अङ्कितं" ग।

॥ "अङ्कति क्षिप्रनाम, अञ्चित मेवाङ्कितं भवति।"—इति अचैवोपरिष्टात् वक्ष्यति (नैग० का० ५, १, ५)।

निमित्तं चलनं यस्य कर्म, सोऽयं गतिचलाकर्म, तस्य गतिचलाकर्मणः। किं कारणम्? "श्रोणिश्चलतीव" स्थानात् पशोः "गच्छतः" ॥

शितिाम-शब्दस्य तत्त्व माचष्टे;—"दोः शितिाम भवति" बाहुरित्यर्थः। आह;— दोः कस्मात्? उच्यते;—"दोः", "द्रवतेः" (भू० प०); तस्य हि प्राणेन पशु द्रवति। शित मंसभावेन एतत्कार्यं भवतीति शितिाम। यदा दोर्विषये शितिामशब्दः, तदैवं निर्वक्तव्यः। आह;— कयोपपत्त्या दोः शितिामशब्देनोच्यते? शृणु;— पशोर्हि वाह्यानि चावदानानि, आभ्यन्तराणि च भवन्तीति। तत्र, पशोः पार्श्वे श्रोण्यावंसाविति वाह्यानि; जिक्राहृद्यकृदादीनि * आभ्यन्तराणि। तत्रैवं सति पार्श्वतः श्रोणितः इत्येतयोरन्तरा वर्त्तमानः शितिामशब्दः किं मन्यद् दोष्णोऽभिदध्यात्। प्रायो † हि नियामको भवति। एवं वाह्यावदानप्राये च शितिामशब्दो वर्त्तते इति दोर्विषयः कल्पते। । "योनिः शितिामः"—"इति" "शाकपूणिः" आचार्यो मन्यते। तत्र योनिः अनवदानीया एव ‡। योनिसमानदेशस्तु गुदो नामावदान मस्ति, स योनिशब्देनोच्यते। स च गुदः "विषितो भवति"। 'विस्रु व्याप्तौ' (जु० उ०); व्याप्तः स पुरीषेण भवति। अथवा विषितमांसो विपुषितमांसः, विस्रस्तमांसः, स भवति। आह;— कयोपपत्त्या शाकपूणेर्मते योनिः शितिामशब्देनोच्यते? इति। शृणु;— स हि श्रोण्यनन्तरो भवति; श्रोण्यनन्तरश्च शितिामशब्द

* "जिक्राहृच्छकृदादीनि" ग।

† 'प्रायः' अभिप्रायः।

‡ शाकपूणिमते योनिरप्यवदानीयेत्यशाकम्।

उच्यते,— श्रोणितः शितामत इति। शब्दसारूप्य मपि च किञ्चिदस्ति,— विषितो भवति, शितामेति। अनयोपपत्त्या अनेन च शब्दसारूप्येण योनिः शितास इति शाकपूणिर्मन्यते। । "श्यामतो यकृत्तः"—"इति" "तैटिकिः" आचार्यो मन्यते। यदुक्तं भवति श्यामत इति, तदुक्तं भवति शितामत इति। एवं हि बहुतरं शब्दसारूप्यं लक्ष्यते। एवञ्च सति यकृत्त एतदवदानं चोदितं स्यादिति गम्यते। किङ्कारणम्? तद्धि "श्यामं", "श्यायतेः" (भ्वा०) धातोः; तद्धि सम्पर्कादुपपद्यते। आह;—"यकृत्" कस्मात्? उच्यते,— तद्धि मृदुत्वात् "यथा कथा च" अयत्नेनैव "कृत्यते" क्षिप्यत इत्यर्थः। । "शितिमांसतो मेदस्तः"— "इति" "गालवः" आचार्यो मन्यते। श्वेतान्मांसात्* 'शितिमांसतः'। कतमत् पुनस्तत् श्वेतं † मांस मिति? उच्यते,— 'मेदस्तः'। तस्मात् यदुक्तं भवति शितिमांसत इति, तदेवोक्तं भवति शितामत इति। एव मपि बहुतरं शब्दसारूप्य मस्ति। "शितिः", "श्यतेः" तनूकरणार्थस्य (दि०प०); परो हि विवेकस्तेजसो मेदस्येवावतिष्ठते। "मांसं", "माननं वा" य एव हि मान्यो भवति, तदर्थ मेतत् संस्क्रियते ‡। "मानसं वा"; सुमनसा हि तदुपादीयते §। अथ वा य एव हि मनस्विनो भवन्ति, तैरुपादीयते। "मनोऽस्मिन् सीदतीति वा"

---

* "श्वेतान्मांसात्" ग।

† "श्वेतं" ग।

‡ अत एवातिथिर्गोघ्न उच्यते।

§ य० मा० सं० २१, ४२ मन्त्रे "यवसप्रथमानाम्"— इत्यस्य व्याख्यानाभिप्रायतो महीधरेणोदुत्योक्तः,— "एतद्वै परम मन्नाद्यं यन्मांसम्— इति श्रुतिः"।

सर्वस्यैव हि मांसे मनः सीदति *। "मेदः" "मेद्यतेः" स्नेहनार्थस्य †॥

एव मेष शितास-शब्दोऽनवगताभिधेयोऽनवगतसंस्कारोऽपि। एव मेतस्मिन् प्रकरणे अन्यान्यनवगतसंस्कारानि उपेक्षितव्यानि। उक्तं हि,—

"शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः।
सर्व मेतदनेकार्थे ज्ञानवगमे गुणाः॥"—इति।

(१) (२) (३) (४) (५) (६) (७)
कतमे पुनस्ते? इति। पदजात्यभिधेयस्वरसंस्कारगुणविभागक्रम-
(८) (९) (१०)
विक्षेपाध्याहारव्यवधानानि। तेषु चाभिधेय मपेक्ष्य निर्वचनं कर्त्तव्यम् ‡। उक्तं हि,—

"धात्वपसर्गावयवगुणसत्त्वं हि धातुजम्।
बक्केकधातुजं वापि पदं निर्वाच्यलक्षणम्॥
धातुजं धातुजाज्जातं समर्थार्थज मेव च।
वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम्॥"—इति।

(१) पदजात्यनवगतम्,—"त्व" इति? यथा; नाम, निपातो वा?

(२) अभिधेयानवगतम्,—"शिताम" इति॥ यथा।

---

* "अक्ष्णिनाञ्छागस्य क्विषः प्रिया धामानि"—इत्यादि य० मा० सं० २१, ४१।

† "अग्ने मेदसो घृतस्येति मेदसश्च हि घृतस्य च भवन्ति"—इति; "सा वा एषा रेत एव यद् वपा प्रेव वै रेतो लीयते प्रेव वपा लीयते, शुक्लं वै रेतः शुक्ला वपा शरीरं वै रेतो शरीरा वपा"—इत्यादि च ऐ० ब्रा० १, १, १-४.

‡ "वक्तव्यम्" क, ख।

§ पु० ९१ ष० ७ पं०=९५ ष० १८ पं०। पुनः ९७ ष० ५ पं०=९९ ष० १७ पं०।

॥ १भा० २८९ ष० (२)। अस्मिन्नपि भागे पु० २८० ष० १२ पं०।

(३)स्वरानवगतम्,—"वने न वायो" इति * यथा।

(४)संस्कारानवगतम्,—"ईर्मान्तासः" इति † यथा।

(५)गुणानवगतम्,—"करूऊती" इति ‡ यथा।

(६)विभागानवगतम्,—"मेहना" इति § यथा।

(७)क्रमानवगतम्,—"उप रमध्वं मे वचसे" इति ‖ यथा।

(८)विलेपानवगतम्,—"द्यावा नः पृथिवी" इति ¶ यथा।

(९)अध्याहारानवगतम्,—"दानमनसो नो मनुष्यान्" इति यथा।

(१०)व्यवधानानवगतम्,—"वायुश्च नियुत्वान्" इति ** यथा।

एक मपि पदं पदद्वितयं क्रियते,—"पुरुषादः, पुरुषानदनाय" इति†† यथा।

पदद्वितय मपि चैकं पदं क्रियते,—"गर्भनिधानीं सनितुः" इति ‡‡ यथा।

आख्यात मपि च नाम क्रियते,—"सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः" इति यथा।

एव मेष शब्दार्थसङ्करोऽनेकप्रकार उपेक्ष्यः; दृष्टानुविधानात् छन्दसि यथासम्भव मनुविधेयः॥ ३॥

---

* ऋ० सं० ७,७,११,१। ऐ० आ० ५,३।

† १भा० ३९२ पृ० (१४)। अचोंऽध्याये प० २ पा०, ५ ख०।

‡ १भा० ४५५ पृ० (१२२)। परस्ताच्च ९,९,१।

§ १भा० ३८९ पृ० (४)। इत उत्तरस्मिन्नपि खण्डे (४,१,४) ३८७ पृ०।

‖ पुरस्तात् २४१ पृ० १८ पं०। ऋ० सं० ३,२,१२,५।

¶ ऋ० सं० १,८,१० ५। परस्तात् दै० का० ९,४,१।

** परस्तात् ५,५,४। ऋ० सं० ५,४,९,२।

†† पुरस्तात् १८१ पृ० ५पं०, ७पं०। ऋ० सं०७,७,१९,१।

‡‡ पुरस्तात् २०५ पृ० ८ पं०। ऋ० सं० ३,२,५,२।

यदिन्द्र चित्र मेहनास्ति त्वादात मद्रिवः। राध-स्तन्नो विद्दस उभया हस्त्याभर। यदिन्द्र (चित्रं*) चायनीयं† मंहनीयं धन मस्ति यन्म इह नास्तीति वा चीणि मध्यमानि पदानि त्वया नस्तद्दातव्य मद्रिवन्नद्रिराद्दणात्येतेनापि‡ वात्तेः स्यात्ते सोमाद इति ह विज्ञायते राध इति धननाम राध्नुवन्त्येनेन§ तन्नस्त्वं वित्तधनोभाभ्यां हस्ताभ्या माहरोभौ समुब्धौ भवतो दमूना दममना वा दानमना वा दान्तमना वापि वा दम इति गृहनाम तन्मनाः स्यान्मनो॥ मनोतेः ॥ ४ ॥

"मेहना(४)"—इति¶। एतदनवगतम्। "मंहनीयम्" इति अवगमः। "यदिन्द्र चित्र मेहना"**—इति निगमः। अर्चैर्भामस्यार्षम्। अनुष्टुप्। ऐन्द्री। स्वरपृष्ठानां स्वरसाम्नां प्रथमे स्वरसामि "यज्ञा-

---

* "चित्र" ङ। वन्मनीचिह्नान्तर्गतं पदं न दृश्यते क-ख-ग-पुस्तकेषु।
† "चायनीय" ख, ङ।
‡ "राद्दणात्यनेनापि" ङ। "राद्दणात्येनेनापि" च।
§ राध्नुवन्त्येतेन' क, ख।
॥ "स्यान्मना" च।
¶ १भा० ६८६ पृ० १४ पं०।
** ऋ० सं० ४,२,१०,१=सा० सं० उ० आ० ४,२,१,४।

१२ १
यथा "अपूर्व्य" इति* स्तोचियः†; स्वरसृष्टानां "यदिन्द्र चित्र मेहना"
१ १ १ १

इत्यभिप्रायः। अथ "वा" "यन्म इह नास्तीति" एतस्मिन् वाक्यैकदेशे "त्रीणि" "पदानि" "मध्यमानि" मध्ये भवन्तीत्यर्थः। कथं मेहना इत्येषा संहिता,—'मे—इह—न' इति? एतान्यस्याः संहितायाः पदानि। एव मेष वाक्यावयवः पञ्चपदो भवति। अत्र 'यत्'—इति प्रथमं पदम्, अतः परं 'मे', 'इह', 'न'—इत्येतानि त्रीणि मध्यमानि पदानि, 'अस्ति'—इति पञ्चमं पदम्। एव मभिप्रेत्य "इन्द्र-चित्र"-शब्दादपकृष्योक्तं "त्रीणि मध्यमानि पदानि" इति। आह;—यदैवम् पदविभागः, तदा कोऽर्थः? इति। उच्यते,— यत् मे मम गृहे नास्ति धनम्, तव च तद् अस्ति धनम्, दातव्यञ्च त्वया तावत् स्तोतृभ्यः, तद्धस्ताभ्या मस्मभ्य माभरेति। बह्वृचानां 'मेहना'—इत्येकं पदम्। छन्दोगानां त्रीण्येतानि पदानि 'म,इह,न'—इति। तदुभयं पश्यता भाष्यकारेणोभयोः शाकल्यगार्ग्ययोरभिप्रायावचानुविहितौ*, एव-ज्जातीयनिर्वचनोपप्रदर्शनार्थं मुभयोश्च प्रामाण्यख्यापनार्थम्॥

आह;—पदकारयोः पदविकल्पे कोऽभिप्रायः? इति। उच्यते,— विद्यावान्, विद्यमानधनो वा प्रतिविशिष्टतरं प्रार्थ्यते,—यच्च यस्य गृहे नास्ति, स तद्विशिष्ट मविशिष्टं वा प्रार्थयेत; न चानयोरुभयोरपि विशेषलिङ्ग मस्ति; तस्मान्मंहनीय मित्येतयार्थमत्या मेहनेत्येव मेकं पद मभिप्रेतं शाकल्यस्य। गार्ग्यस्य पुनर्यन्म इह गृहे नास्ति तदाहरे-त्यभिप्रायः। एव मत्र विशेषलिङ्गाभावाद्विप्रतिपत्तिः एव मन्येष्वपि शाखान्तरपदविकल्पेषु अनुविधान मर्थाविरोधेन कर्त्तव्यम्। एव मयं मेहना-शब्दो राधः शब्दसामानाधिकरण्ये वर्त्तमानो यन्मं-

* शाकल्यः ऋक् संहिताया पदकारः, गार्ग्यस्तु सामसंहितायाः।

हनीयं राधः, यद्वा मद्गृहे नास्तीति धनविशेषणत्वात् क मन्य मर्थं ब्रूयात्? तस्मान्मेहनेति सामर्थ्याद्धनविशेषण मेतदित्युपपत्तिः॥

अधुना निगमप्रसक्तानि निरुच्यन्ते।—"अद्रिरादृणात्येतेन" अद्रि-सारमय मेव ह्यायुधं भवतीति। अद्रिर्वज्र उच्यते। आह;—अद्रिः कस्मात्? उच्यते,—आदृणाति आदारयतीत्यर्थः। अथ वा सोमा-भिषवग्रावभिस्तद्वान् अद्रिवान् स्यात्। तैरपि हि सोम आदार्यते "अपि वा" "अन्नेः स्यात्" अद्रिः। कुतः? एतन्निगमात्। कतमो-ऽसौ निगम इति "ते सोमाद इति ह विज्ञायते"; "ते सोमादो हरी इन्द्रस्य निंसते (ऋ० सं० ८,४,३०,४)"—इत्येतस्मिन्मन्त्रे विचार्यमाणे ज्ञायतेऽन्नेरद्रिः स्यादिति। व्याख्यात एव शेषः*। "राध" "इति" एतद् "धननाम" स्मारयति †। व्यभिचारित्वाद्वा शब्दानां धननामसु पठित मपि सदेतद्वधारयति;—दृहाप्येतद्धननामैव, नात्र व्यभिचारोऽस्तीति। पठिताभिधाननिरूपणेषु सर्वेष्वेतौ समाधी योज्यौ ‡। "वित्तधन" इति प्राप्तधन§। उभौ समुच्चौ भवतः; संपूर्णावित्यर्थः॥

"दमूना(५)"—इति? एतदनवगतम्। "दममना" दमूनाः स्यात्; दमे हि नित्य मस्य मनः, अक्रूरमना इत्यर्थः। "दानमना वा" दातव्यं मयेति यस्य मनसि स वा दमूनाः। "दान्त-मना वा" दमेषु दान्तेषु यमनियमवत्सु पुरुषेषु यस्य मनः, स वा

* पुरस्तात् १७६ पृ० ७ पं०।
† १भा० २२६ पृ० (१७)।
‡ स्मरणार्थं मवधारणार्थं वेति समाधिद्वयम्।
§ १भा० १६०पृ० १पं०।

दमूनाः। अथ वा "दम दति" एतद् गृहनाम" एतद् यस्य मनसि ममेद मिति, स दमूनाः "स्यात्" गृहपतिरग्निः* ॥ ४ ॥

जुष्टो दमूना अतिथिर्दुरोण इमन्नो यज्ञ मुप याहि विद्वान्। विश्वा अग्ने अभियुजो विहत्या शत्रूयता मा भरा भोजनानि॥ अतिथिरभ्यतितो गृहान् भवत्य-भ्येति तिथिषु परकुलानीति वा गृहाणीति वा (ऽय मपीतरोऽतिथिरेतस्मादेव †) दुरोण इति गृहनाम दुरवा भवन्ति दुस्तर्पा इमं नो यज्ञ मुपयाहि विद्वा-न्त्सर्वा अग्ने अभियुजो विहत्य शत्रूयता माभर‡ भोजनानि विहत्यान्येषां बलानि शत्रूणां भवना§-दाहर भोजनानीति वा धनानीति वा मूषो मूषिका इत्यर्थो मूषिकाः पुनर्मुष्णातेर्मूषोप्येतस्मा-देव॥ ५ ॥

निगम;—"जुष्टो दमूना॥"—इति। वसुश्रुतस्याचेयस्येय मार्षम्। त्रिष्टुप्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते खिष्टकृत्पुरोनुवाक्या चेयं चातुर्मास्येषु साकमेधे। हे भगवन्नग्ने! 'जुष्टः' आसेवितस्त्व मस्माभिः स्तुतिभिः 'दमूनाः' दममनाः, अक्रूरमनाः भूत्वा, ततः

---

* 'मनो मवोतेः'—इत्येतदत्याख्यात मेव खितम्।

† क-ख-ग-पुस्तकेष्वय मधिकः पाठः।

‡ "माहर" ग, घ।

§ "भवना" क, ख, ग।

॥ ऋ० सं० १, ८, १८, ५।

'उप याहि'। अथ वा गृहं ममेद मिति चेतोऽवस्थाप्य, तत उप याहि। अथ वा दानमना भूत्वा, दातव्य मेभ्यो मयेत्येवं चेतोऽवस्थाप्य, तत उप याहि। अथ वा दान्तेष्वेव हि तव मनो वयञ्च दान्ताः; 'अतिथिः' च त्व मग्निहोत्रिणां दान्तमनसां प्रातः सायञ्च उद्बोध्यमानो भवसि, स्वभाव एवैष तवाग्निहोत्रिणा मतिथित्वेनोपस्थातव्य मिति; अतो ब्रूमः वय मपि दान्तमनसोऽग्निहोत्रिणश्च, अस्माक मपि य एषः'दुरोणे' यज्ञगृहे यज्ञस्तन्यते, तं त्व मुप याहि, त मागच्छ; 'विद्वान्' जानानः स्व मधिकारं भक्तानाञ्चास्माकम्। किञ्च; 'विश्वाः' सर्वाः 'अभियुजः' अभितः सर्वतो युजः, अभियोक्त्र्यः, शत्रुसेनाः त्वदागमनप्रतिबन्धेन वर्त्तमानाः, 'विहत्य' नानाप्रकारं हत्वा, तत उपयाहि। किञ्च; एव मागच्छंस्त्वं शृणु यत्कुरुष्व;—'शत्रूयतां' येऽस्माकं शत्रुत्वं कामयन्ते कर्त्तुम्, तान विहत्य, तेषां; बलानि, ततो यानि तेषां भोजनानि अन्नानि, धनानि वा, तानि अस्मभ्यम् 'आभर' आहरेति समस्तार्थः॥

निगमप्रसक्तोऽतिथिशब्दो दुरोणशब्दश्च। आह;—"अतिथिः" कस्मात्? उच्यते;—"गृहान्" "अभि" आभिमुख्येनासौ "अतितो भवति" गत इत्यर्थः। "अतति*-पतति†" इति गतिकर्मसु पठितम्। अथवैव मन्यया स्यात्; "अभ्येति" अभ्यागच्छति "तिथिषु" पौर्णमास्याद्यासु "परकुलानि" यजमानकुलानीत्यतिथिः। "अय मपीतरोऽतिथिरेतस्मादेव"। "दुरोण इति" एतद् "गृहनाम"।

---

* "अतति" १भा० २३७ पृ० १पं० =२४४ पृ० (३८)।

† "पतति" १भा० २३७ पृ० (३९) टीका द्रष्टव्या।

आह;—किङ्कारणम्? उच्यते;—ते हि गृहाः "दुरवा भवन्ति" अवतिस्तर्पणार्थः* ; "दुस्तर्पाः" इत्यर्थः। उक्तञ्च,—'कुटुम्बतन्त्राणि हि दुर्भराणि'—इति। एव मेतस्मिन्मन्त्रे, जुष्टः, दमूनाः, अतिथिः, विद्वान्, हे अग्ने! यज्ञ मुपयाहि! इत्येतस्मिन्नधिकारे वर्त्तमानो 'दमूनाः'-शब्दः क मन्य मग्निविशेषणादर्थं ब्रूयात्? न कश्चिदपि, परिशेषाद्दमूना इत्येतदग्निविशेषण मेवेति सिद्धम्॥

"मूषः(१)"—इति†। एतदनवगतम्। बहुवचनञ्चैतत्; मूट्, मूषौ, मूषः इत्येवम्। आह;—कुत एतत्? उच्यते;—"व्यदन्ति" इत्येतस्मिन्नाख्याते‡ बहुवचननिर्देशात्; 'मूषो व्यदन्ति'—इत्येतत् सम्बध्यते। "मूषिकाः—इति" अनेनावगतसंस्कारेण यः "अर्थः" उक्तः स्यात्, स एव मूष इत्युक्तो प्रसिद्धार्थेन अभिधानेन। 'मूषः'-शब्दस्य तच्च माख्यातम्; अधुनाऽऽख्यात-प्रसक्तस्य मूषिका-शब्दस्य निर्वचनं करोति,—"मूषिकाः पुनर्मुष्णातेः"। "मुष स्तेये (क्र्या०प०)" इति। अस्य "मूषः अपि" च "एतस्मात् एव" ते हि हरन्ति धान्यादीनि॥ ५॥

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः। मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारन्ते शतक्रतो वित्तं मे

---

* "अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु" भू० प०।

† १भा० १९० पृ० ९पं०।

‡ इत उत्तरस्मिन्नेव खण्डे, १९ पं० = १९५ पृ० ४ पं०।

अस्य रोदसी ॥ सन्तपन्ति मा मभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्तातानि सूचाणि वदन्ति स्वाङ्गाभिधानं वा स्याच्छिश्नानि* वदन्तीति सन्तपन्ति माध्यः कामाः स्तोतारं ते शतक्रतो (वित्तं मे अस्य रोदसी†) जानीतं मेऽस्य द्यावापृथिव्याविति चितं कूपेऽवहित मेतत्सूक्तं प्रतिबभौ तच ब्रह्मेतिहासमिश्र मृङ्मिश्रं‡ गाथामिश्रं भवति चितस्तीर्णतमो मेधया बभूवापि वा सङ्ज्ञानामैवाभिप्रेतं§ स्यादेकतो द्वितस्त्वितइति चयो बभूवुः ॥ ६ ॥

"सं मा तपन्ति"—इति निगमः,—"सं मा तप०—०रोदसी"—इति ॥ । आप्नस्य चितस्य, कुत्सस्य वेद मार्षम्। पङ्क्तिः ¶ । ऐन्द्रयाग्नम् । "सं तपन्ति" "माम्" "अभितः" सर्वतोऽवस्थिताः, कूपे पतितस्य एताः, "कूपपर्शवः" कूपेष्टकाः, सङ्कटेऽवस्थितम्। कथं पुनः सं तपन्ति मा मभितः? 'सपत्नीरिव' यथा समान-भर्तृका योषितः

---

* "स्याच्छिश्नानि" क।

† बन्धनीचिह्नान्तर्गत एष पाठो नास्त्येव क-ख-पुस्तकयोः।

‡ "मृग्मिश्रं" क।

§ "ऽपि वा प्रशंसानामैवाभिप्रेतं" ङ।

¶ ऋ० सं० १,७, ११. १।

॥ नेयं पङ्क्तिरपि तु यवमध्या महाबृहती। आद्यौ द्वावष्टाक्षरौ पादौ, द्वादशाक्षरतृतीयः, ततो द्वावष्टाक्षरौ; सा यवमध्या महाष्टहती। अनु० १, ९. द्रष्टव्यम्।

(परस्परं वा पीड्यन्ते*) एकं भर्त्तार मभि सन्तपेयुः दुर्वचोभिः, इद मस्याः त्वया कृतम्, इदं मम न कृत मिति; एवं मा मेताः कूपपर्शवः सन्तपन्ति; ताभिः कूपेष्टकादिभिः अहं पीड्ये। किञ्च; 'मुषो न' "मुषिकाः इव" 'शिश्नाः' "शिश्नानि" "व्यदन्ति" अदन्ति तानि। अन्नवेष्टितानि†, अन्नमिश्राणि, अन्नमिश्रोदक-पायितानि, "सूचाणि" "व्यदन्ति"। सूचशब्दोऽध्याहृतः उपपत्तिं दृष्ट्वा भाष्यकारेण‡। विविध मदन्ति भक्षयन्ति। अथ "वा" "स्वाङ्गाभिधानम्" एतत् "स्यात्"। स्वाङ्गाभिधान मिति§ शेषो-ऽभिप्रेतः; भवति हि तिरश्चा मेषः स्वभावः,—यच्छेपं भक्षयन्ति। अथ वा लाङ्गूल मपि सादृश्यात् शिश्न मुच्यते; भवति हि मूषि-काणा मेष स्वभावः,— स्वेहभाण्डे स्व-लाङ्गूलं मुक्त्वा उद्धृत्य व्यदन्ति आ खादयति। उपपद्यत उपमार्थ एवाय मपीति शिश्नशब्दो विकल्प्यते। एव मेते मदुक्ताः "सन्तपन्ति मा आधयः"। आधयः "कामाः"; सोमेन यक्ष्ये, दास्ये, भोक्ष्ये इत्येवमादयः। मां भक्षयन्ति, पीड़यन्ति, असम्पूर्यमाणाः। 'आधिः'-इति मानसं दुःख मुच्यते‖। "स्तोतारं ते शतक्रतो" हे 'शतक्रतो।' तव नाम 'स्तोतारं' सन्तम् एते कामाः, एताश्च कूपपर्शवः, मा उभयपार्श्वीकृतं स-वाह्याभ्यन्तरं सन्तापयन्ति। न च नाम त्व मस्मानेतस्या आपदः त्रायसे,

---

* नैष पाठः क-ख-पुस्तकयोः।

† मूले यदुक्तम् "अन्नातानि" इति, तस्यैव पदस्य व्याख्यान मेतत्।

‡ निरुक्तकृतामुना यास्केनेत्यर्थः।

§ "स्वाङ्ग मिति" ग।

‖ "पुंस्याधिर्मानसी व्यथा"—इत्यमरः १, ७, १८ = २, २, ८७।

समर्थः सन्? अहो न युक्तम्? भक्त-परित्यागो हि सतां सर्वेभ्यः पापेभ्यः पापिष्ठ इत्यभिप्रायः। यदा एव मर्ष्यमाणो न शुश्राव इन्द्रः, तदा द्यावापृथिव्यौ आह;—यदि नाय मिन्द्रः शृणोति मन्दभाग-धेयत्वादस्माकम्। युवा मपि तावत् हे 'रोदसी!' 'वित्तम्' "जानीतम्", "अस्य" वचसः स्तुत्याख्यस्य* यत् प्रयोजनम्, यदर्थं महं रोरवीमि; युवा मपि चैतस्मात् अतिभयाकारात् कूपात् उद्धरतम्। यदि नाय मिन्द्रोऽभ्युद्धरति युवयोरपि स्तौतैवाह मित्य-भिप्रायः॥

आहः;— पर्शवः इति एतावति श्रूयमाणे कुत एतत् कूपपर्शव एताः? इति। उच्यते;—"चितः कूपेऽवहितः"†—इत्येतस्मिन् सूक्ते‡ विशेषलिङ्गात् तदेव भाष्यकारेण ख्यापितम्§; अतएव सूक्तगतादिशेषलिङ्गात् उपलभ्य "चितं कुपेऽवहित मेतत् सूक्तं प्रति बभौ", यच्चेय मृक्॥। तस्मात् कूपपर्शवः एता इति॥

सूचाणि व्यदधीति सूचशब्दो भाष्यकारेणाध्याहृतः¶ शिश्न

---

* "अत्याख्यस्य" ग।

† ऋ० सं० १, ७, १२, १।

‡ इत्येतस्या ऋचीति वक्तव्ये 'इत्येतस्मिन् सूक्ते'—इति समादुक्तम्। अथ वा शाखान्तरविषयेणोक्तिः।

§ सायणेनेत्यर्थः। तथाहि;—"तथा च उभयोः (उभयत्र) कूपपार्श्व आम्नायते;—चितः कूपेऽवहितः (ऋ० सं० १, ७, १२, १) इति काटे निबाल्ह ऋषिरकदूतये (ऋ० सं० १, ७, १४, १) इति च"—इति।

॥ चितं कूपे ऽवहितम् अभिलक्ष्य 'एतत् सूक्तम्' "चन्द्रमा आप्सरा (१, १०५,)"—इति प्रतिबभौ यस्मिन् सूक्ते इयं 'सप्ता तपन्ति' इति ऋक् चतुर्थी इत्यर्थः।

¶ निरुक्तकारेण, शाखेनेत्यर्थः।

इत्यस्य शब्दस्य शेषभूतो मूषकसम्बन्धेन; ते ह्यन्नगन्धेन सूत्राणि व्यदन्तीति। स्वाङ्गाभिधानपक्षे तु अध्याहारो नास्त्येवेति ॥

"तच्च ब्रह्मेतिहासमिश्रम्"। तच्च तस्मिन् सूक्ते ब्रह्म*, इतिहासमिश्रम्, इतिहासयुक्त मित्यर्थः। तत् यथा;—"त्रितः कूपेऽवहितो देवान् हवत ऊतये"—इत्येव मादि †। "ऋग्मिश्रं"‡, "गाथामिश्रं" च "भवति"। स पुनरितिहासः ऋग्वद्धो गाथावद्धश्च। ऋक्-प्रकार एव कश्चित् गाथेत्युच्यते§; गाथाः शंसति, नाराशंसीः॥ शंसतीति ह्युक्तं गाथानां कूर्वीतेति। स एष सूक्तानां स्वभावः प्रदर्शितः,—इतिहाससम्बन्धान्यपि सूक्तानि भवन्ति। तेषु प्रकरणादपि सन्दिग्धस्य पदस्यार्थोऽध्यवसेयः; यथेह पर्यु-शब्दो भाष्यकारेणाध्यवसित इति¶ ॥

भाष्यप्रसक्तं त्रित-शब्दं निर्ब्रवीति;—"त्रितः तीर्णतमो मेधया"

---

* इह वाक्यं ब्रह्मेत्युच्यते। तथा हि,—"वाग्वै ब्रह्म, तच्च स काम उपाप्नो यो वाचि च ब्रह्मणि च"—इति ऐ० ब्रा० १, १, ५।

† ऋ० सं० १, १०५, १७।

‡ "ऋङ्मिश्रम्"—इत्येव मेव कात्तिरिक्तसर्वमूलपुस्तकपाठः परं द्वित्रिपुस्तकेषु चिष्वेव ऋग्मिश्र मिति।

§ सामैव स्तोत्र मिति स्तोत्रसाधनं गीत्यात्मकं सामैव गाथेत्युच्यते। तथाहि, ऋक्-संहिताभाष्ये आसा ऋचां व्याख्यानं द्रष्टव्यम्, तथाहि;—१, ७, १. १, ४२, ४. ८, ३१, १. ८, ७१, १४. ८, ९१, १. ८, ९८, ९. ९, ९९, ४. १०, ८५, ९। ऐतरेय-ब्राह्मणे च,—"इन्द्रगाथाः शंसति। इन्द्रगाथाभिर्वै देवा असुरानभिगाय (९, ४, १९)"—इत्येवमादि द्रष्टव्यम्।

¶ "नाराशंसीः शंसति। प्रजा वै नरो वाक् शंसः, प्रजास्वेव तद् वाचं दधाति"—इति ऐ० ब्रा० ९, ४, १९। 'प्रातारत्नम् (ऋ० सं० २, १ १०, १) इत्यादि मनुष्याणां स्तुतयो नाराशंस्यः"—इति च सा० भा० (ऋ० सं० ८, ९, ११, १)।

¶ निरुक्तकारेण, यास्केनेत्यर्थः।

एकतद्वितयोः सकाशात् "बभूव"* । "अपि वा" सञ्ज्ञानिमित्त मेव एतत् "नाम" "अभिप्रेतं स्यात्" । कथम्? "एकतः, द्वितः, त्रितः इति त्रयः" हि ते भ्रातरः "बभूवुः"; तस्मात् सञ्ज्ञानिमित्त मप्युपपद्यत एव । उक्तञ्च;—"भार्याङ्कारेणाभ्युपादयत् तत एकतोऽजायत, द्वितीयं ततो द्वितः, तृतीयं ततस्त्रित इति† ॥ ६ ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः। सोमराजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥ ईषणेन वैषणेन वार्षणेन वा ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव धनस्य प्रवर्ह्य च न आयूंषि सोमराजन्। अहानीव सूर्यो वासराणि। वासराणि वेसराणि विवासनानि गमनानीति वा कुरुतनेत्यनर्थका उपजना भवन्ति कर्त्तनहन्तनयातनेति जठर मुदरं भवति जगध मस्मिन् ध्रियते धीयते वा ॥ ७ ॥

---

* "अत्र शाठ्यायनिन इतिहास माचक्षते। एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो बभूवुः। ते कदाचिन्मरुभूमावरण्ये वर्त्तमानाः पिपासया सन्नग्लानाः सन्त एकं कूप मविन्दन्। तत्र त्रिताख्य एको जलपानाय कूपं प्राविशत्। स्वयं पीत्वेतरयोश्च कूपादुदक मुद्धृत्य प्रादात्। तौ तदुदकं पीत्वा त्रितं कूपे पातयित्वा तदीयं धनं सर्वं मपहृत्य कूपञ्च रथचक्रेण पिधाय प्रास्थिषाताम्। ततः कूपे पतितः स त्रितः कूपादुत्तरितु मशक्नुवन् सर्वं देवा मा मुद्धरन्विति मनसा सस्मार। ततस्तेषां स्तावक मिदं सूक्तं (ऋ० सं० १, १९५) ददर्श।"—इति सा० भा०।

† तैत्तिरीयपाठस्त्वेवम्;—"तत एकतोऽजायत इति स द्वितीय मभ्यपातयत् ततो द्वितोऽजायत स तृतीय मभ्यपातयत् ततस्त्रितोऽजायत"—इति।

"दृषिरः(७)"—इति *। एतदनवगतम्। "दृंषणेन वा एषणेन वा क्षपणेन वा" इति। एताः शब्दसमाधयः। "दृषिरेण ते मनसा" इति समानविभक्त्यन्तत्वात् दृषिर-शब्दस्य प्रतीयत एव मतो विशेषणत्व मित्यभिधेय मनुक्ता निगम मेव पठति;—"दृषिरेण ते मनसा०—०वासराणि"—इति †। प्रगाथस्येय मार्षम्। त्रिष्टुप्। सौमी। हे भगवन्! 'सोम!' 'दृषिरेण मनसा' त्वां प्रति सर्वात्मना गतेनेत्यर्थः। "दृंषति, फणति"—इति गतिकर्मसु पठितम्‡। "एषणेनेति वा" स्यात्, इच्छावता फलप्रार्थनावतेत्यर्थः। "क्षपणेनेति वा", दर्शनवता। ईदृशेन मनसा किं कुर्मः? 'ते' तव योऽस्माकं खांशः, तं भक्षीमहि तं भक्षयेमहि। कथं पुनः भक्षयेमहि? 'पित्र्यस्येव रायः' यथा पित्र्यो धनांशः अविघ्नेन भक्ष्यते, भक्षितश्च सुखपरिणामो भवति, एवं तव वयं स्व मंश मविघ्नेन भक्षयेमहि, भक्षितश्च सुखपरिणामो मे अस्तु; मातीव् भिद्यमहीत्यभिप्रायः। किञ्च; हे 'सोमराजन्!' 'प्र' 'नः' 'आयूंषि' 'तारीः' तारय§ च प्रवर्द्धय च नः आयूंषि। कथं पुनः प्रवर्द्धय? "अहानि इव सूर्यः वासराणि"। यथा सूर्यः वासराणि वासन्तिकान्यहनि। "वासराणि" इति "वेसराणि"। शीतोष्णाभ्यां हि द्राभ्यां तानि सरन्ति; तेषु हि शीतोष्णं भवति; रात्रौ शीतम्, दिवा उष्णम्। अथवा "विवासनानि" स्युः; तानि हि तत् शीतं विवासयन्ति नाशयन्तीत्यर्थः। "गमनानीति वा"

---

* १भा० ९९ सू० १२ मं०।
† ऋ० सं० ९, ४, १९, १।
‡ १भा० २अ० १४ख० (७०), (७१)।
§ "प्रतारय"—इति ग।

विस्तृतानि विस्तीर्णानि सन्ति वासराणीति उच्यन्ते *। यथा तानि सूर्यः वर्द्धयति मन्दगतित्वात्, एव मस्माकं त्व मायुः प्रवर्द्धयेत्याशीः॥

"कुरुतन(८)"—इति†। "अनर्थका उपजना भवन्ति", य एवार्थः कुरुतेत्युक्ते भवति, स एव कुरुतनेति; नाच नकारस्यार्थोऽधिकोऽस्ति। अधुना एव मुक्ता अन्यान्यपि दर्शयति;—"कर्त्तन-हन्तन-यातनेति"।

"ग्रुनं सुफाला वि तुदन्तु भूमिं ग्रुनं कीनाशा अभियन्तु वाहैः। ग्रुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्त्तनास्मे"—इति‡।

अग्निचयने स्तेचकर्षणे विनियुक्ता। त्रिष्टुप्। 'ग्रुनं' 'सुफालाः' सुखं शोभनाः फालाः, 'वि तुदन्तु' विकर्षन्तु 'भूमिम्'। सुखं 'कीनाशाः' भूमिं कीर्णनाशाः, खिलोत्कर्त्तारः, कर्षुकाः, 'अभि यन्तु'; 'वाहैः' अनडुद्भिः। अयं तावदेवं हविषलः हविं करोतु, युवा मपि हे 'ग्रुनासीरौ!' 'हविषा' उदकेन 'तोशमानौ' निघ्नन्तौ भूमिं 'सुपिप्पलाः' सुफलाः, एता 'ओषधीः' 'कर्त्तन' कुरुत; 'अस्मे' अस्मभ्य मित्यर्थः॥

"यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति॥ द्रुहः पाशान् प्रति सं मुचीष्ट तपिष्ठेन हन्मना हन्तना तम्"—इति§॥

वसिष्ठस्येय मार्षम्। सान्तपनस्य चरोः याज्यैषा। 'यः' 'नः' अस्माकं हे 'मरुतः!' 'दुर्हृणायुः' पापक्रोधः, 'तिरश्चित्तानि' अन्तर्हितानि चित्तानि कृत्वा सम्मोह्य ततो हन्तु मस्मानिच्छति। हे 'वसवः'

---

* १भा० ५५ सू० (४) द्रष्टव्यम्।
† १भा० ६९० सू० १८ पं०।
‡ य० वा० सं० १९, २९।
§ ऋ० सं० ५, ४, ९०, १।

सर्वभूतवासयितारः! तस्येदृक्लक्षणस्य 'द्रुहः' अस्मद्द्रोग्धुः उपरि 'पाशान्' 'प्रति सं मुचीष्ट' प्रतिसम्मोचयत। पाशैः एनं बद्ध्वा 'तपिष्ठेन' तापयिष्ठतमेन 'हन्मना' हननेन, बधेन 'हन्तन' हन्तेत्यर्थः॥

"केऽन्वत्र मरुतो ०—० वेदा म ऋतानाम्"—इति *॥

इन्द्रागस्त्यमरुतां संवादः। कथाप्युभयं सूक्तम्। तत्रेयमगस्त्यस्यार्षम्। महाव्रते व्यूढस्य च दशरात्रस्य सप्तमेऽहनि सूक्तं शस्यते। हे 'मरुतः!' कोऽन्यः युष्मानेव मेतस्मिन् जगति 'मामहे' पुनः पुनः महयति, पूजयति? यथा अहं, तथा न कश्चिदित्यभिप्रायः। यत एव मतो ब्रवीमि;— अस्मान् एव 'सखीन्' आभिमुख्येन 'प्र यातन' प्रयात, हे 'सखायः!'। किञ्च; 'मन्मानि' मननानि स्वानि चेतांसि 'चित्राः' चित्राणि, अस्मान् प्रति 'अपि वातयन्तः' निगमयन्तः 'एषाम्' 'ऋतानां' यज्ञानां प्रापयितारो 'भूत' भवत, हे 'नवेदाः' मेधाविनः! इत्यर्थः॥

"जठरम्(९)"—इति†। एतदनवगतम्। "उदरं भवति"—इति अभिधेयवचनम्। "जग्धम्" भुक्तं मन्नम् "अस्मिन्" अवस्थितं "ध्रियते" इति जठरम्‡। अन्नं "वा" जग्ध मस्मिन् "धीयते" इति जग्धधानं वा स्यात्। एते शब्दसमाधी॥ ७॥

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोमं मनुषुधं म-

---

* "को न्वत्र मरुतो मामहे वः प्रयातन सखीँरच्छा सखायः। मन्मानि चित्रा अपि वातयन्त एषां भूत नवेदा म ऋतानाम्॥"—इति ऋ० सं० १, ६, १९, २।

† १भा० १९१ सू० १९ पं०।

‡ "जगधरम्" क।

दाय। आसिञ्च स्वजठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम्॥ मरुत्वानिन्द्र मरुद्भि*स्तद्वान् वृषभो वर्षितापां रणाय रमणीयाय सङ्ग्रामाय पिब सोम मनुष्वध मन्वन्नं मदाय मदनीयाय जैचायासिञ्च स्वजठरे मधुन ऊर्मिं मधु सोम मित्यौपमिकं माद्यतेरिद मपीतरन्मध्वेतस्मादेव त्वं राजासि पूर्वेष्वह्नःसु सुतानाम् ॥ ८ ॥

॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥ ४,१ ॥

"मरुत्वाँ इन्द्र"—इति निगमः। "मरुत्वाइन्द्र वृषभः ०—० सुतानाम्"—इति। विश्वामित्रस्येय मार्षम्। त्रिष्टुप्। मध्यन्दिने पृष्ठ्यस्य चतुर्थेऽहनि शस्यते। मरुत्संयुक्तो भूत्वा पिब। हे 'इन्द्र!' यः त्वं 'वृषभः' वर्षिता, 'अपाम्' इत्यध्याहृतं भाष्यकारेण वृषभसम्बन्धात्। यः त्वा मेवं कर्मकारी, तं त्वां ब्रवीमि,—'रणाय' "रमणीयाय सङ्ग्रामाय" रमणीयं सङ्ग्रामं करिष्यामीति एतमर्थं सुदिश्य "पिब" एतं "सोमम्" अस्माभिर्दत्तम्। 'अनुष्वधं' स्वधेति अन्ननाम ‡, सवनीयपुरोडाशाद्यभिप्रायेण। 'अनुष्वधम्' "अन्वन्नम्"। 'मदाय' "मदनीयाय" पानाय, युष्मदर्थं..अस्माभिः संस्कृतम्। 'जैचाय'—इत्यध्याहृतं भाष्यकारेण; द्विविधो हि मदः,—सम्मोहकरो जैचश्च, तयोः जैच इष्टः सङ्ग्रामे। कथं च पुनः पिब?—किं मीषत्? नेत्युच्यते,—

* क-ख-ग-पुस्तकेष्वेतत् पदं न दृश्यते।
† ऋ० सं० १, २, ११, १।
‡ १भा० १०९ सू० (१७)।

'आसिञ्च स्वजठरे' ये 'मध्वः' "मधुनः"। "मधु सोम मिति, औपमिकम्"—इत्येतदुक्तं सोमस्य मधुत्वम्। "माद्यतेः" धातोः। तत्सिद्धिं समाना, सोमेन मध्वा चेत्यौपमिकत्वम्। "इदं मपीतरत् मधु" माक्षिकम् "एतस्मादेव" माद्यतेः। यत्तु सोमस्योपचारत्वेन, तस्मात् माध्वीकम्। 'ऊर्मिः' सङ्गतः। तावत् तं सोम मासिञ्च स्वजठरे, यावता जैत्रो मद उपजायते। कस्मात् पुनरेवं ब्रवीमि? इतः,—यस्मात् 'त्वं राजासि प्रदिवः सुतानाम्' त्व मेव 'राजा' ईश्वरः "पूर्वेष्वपि * अहःसु सुतानाम्" अभिषुतानाम्, न केवल माधुनिकानाम्; एवं ते समुचितं सोमपान मित्यभिप्रायः॥ ८॥

॥ इति निरुक्तटीकायां नवमाध्यायस्य (चतुर्थाध्यायस्य)
प्रथमः पादः ॥ ४, १.

तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमाचतुन्न मिति वा॥ १(९)॥

"तितउ(१०)"—इति†। एतदनवगतम्। "परिपवनं भवति"-इति अभिधेयवचनम्। सक्तवः परिपूयन्ते येन द्रव्येण, तत् परिपवन मुच्यते‡। ततेन चर्मणा नद्धं 'तितउ'। तुन्नैर्वा छिद्रैः तद्वत् 'तितउ'। तिल-

---

* "सर्वेष्वपि" म।
† १भा० १९१ सू० १७ पं०।
‡ 'चालनी तितउः पुमान्'—इत्यमरः। २, ९, १९।

मात्राणि वा तुन्नानि तस्मिन्निति 'तितउ'। यथासम्भव मेताः शब्द-समाधयः॥ १(९)॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ सक्तु मिव परिपवनेन पुनन्तः सक्तुः सचतेर्दुर्भावो भवति कसतेर्वा स्याद्विपरीतस्य विकसितो भवति यत्र धीरा मनसा वाच मकृषत प्रज्ञानं धीराः प्रज्ञानवन्तो ध्यानवन्तस्तत्र सखायः सख्यानि सञ्जानते भद्रैषां लक्ष्मीर्निहिताभि वाचि * भद्रम्भगेन व्याख्यातं भजनीयं भूताना मभिद्रवणीयं † भवद्रमयतीति वा भाजनवद्वा लक्ष्मीर्लाभाद्वा लक्षणाद्वा (लक्ष्यनाद्वा ‡) लञ्छनाद्वा § लषतेर्वा स्यात् प्रेप्साकर्मणो लग्यतेर्वा स्यादाश्लेषकर्मणो लज्जतेर्वा स्यादाशाघाकर्मणः शिप्रे इत्युपरिष्टाद् व्याख्यास्यामः॥ २(१०)॥

निगमः;—"सक्तुमिव तितउना"—इति। विद्यासक्ते हृदयस्तेरार्षम्। "सक्तुः सचतेः" स हि सूक्ष्मत्वात् सचति संश्लिष्यति अङ्गे।

---

* "वाचीति" ङ, च।
† "मभिद्रमणीयं"।
‡ एष पाठो ङ-च-पुस्तकयोरधिकः।
§ "लाञ्छनाद्वा" ङ, च।
¶ ऋ० सं० ८, १, १९, १।

ततो "दुर्धावो भवति"—इति उपपत्तिः। दुःखं धाव्यते प्रक्षाल्यत इत्यर्थः। "कसतेः वा स्यात् विपरीतस्य" स हि "विकसितः" विपुष्पितः "भवति"। यथा सक्तुं कश्चित् परिपवनेन पुनाति, एवं "मनसा" परिपवनस्थानीयेन परिपूय विनिश्चित्य शब्दार्थं न्याययुक्तां "वाचं" "यत्र" यस्मिन् समाजे, यज्ञे वा "धीराः" धीमन्तः, मेधाविनः "अक्रत" "अकृषत" कुर्वन्तीत्यर्थः*। अत्र केचित् अकृषत प्रज्ञान मित्यभिधीयते; प्रज्ञानार्थत्वात् वाचः। तत्र किम्? इति। "तत्र सखायः" समानख्यानाः। समानख्यानाना मेव समानेषु शास्त्रेषु कृतश्रमाणाम्; तद्यथा,—वैयाकरणानां वैयाकरणा एव, नैरुक्तानां नैरुक्ता एव। "सख्यानि" सखिभावान् "सञ्जानते" विज्ञानानि सञ्जानते, इतरेतरस्य यो विज्ञान-प्रकर्षः, तं जानते। किङ्कारणम्? यस्मात् "भद्रा" भन्दनीया † "एषां" "लक्ष्मीः" विज्ञानाख्या "निहिताधि वाचि" वाचः 'अधि' उपरि, 'निहिता' अवस्थापिता। तया लक्ष्म्या इतरेतरस्य विज्ञानश्रमं जानते; इतरो ह्यविद्वान् किं विज्ञास्यत इत्यभिप्रायः॥

"भद्रम्"। "भगेन व्याख्यातम्" स्त्रीभगः तथा स्यात्, भजतेः ‡ इति। "भजनीयम्" इति। "भूतानाम्" "अभिद्रवणीयम्" अभिगमनीय मित्यर्थः। "भवद्रमयतीति वा" यस्य हि तद् भवति, स रमते। "भाजनवद्वा" सन्ति हि कल्याणरूपाः पुरुषाः, ये तस्य भाजनम्, तैः तद्वत्॥

---

* "मनसा दृषिता वाग् वदति; यां ह्यन्यमना वाचं वदत्यक्षर्या वै सा वाग्देवजुष्टा"—इति ऐ० ब्रा० २, ४, ४।

† "भद्रे भन्दनीये"—इति परस्मात् (दै०का० ११, १, ७) ब्रह्मणम्। १भा० १५७ ४० अभिवादनकर्मसु, ११४ ४० अर्चतिकर्मसु च "भन्दते"—इति ब्रह्मणम्।

‡ पु० ११ ४० १९ पं०।

"लक्ष्मीः"। "लाभाद्वा" लक्ष्मीवन्त एव लभन्ते, नेतरे। "आ लक्षणाद्वा" आलक्षित एव हि लक्ष्मीवान्। "लञ्छनाद्वा" तया हि लञ्छित इव भवति *। "लषतेः (भ्वा०उ०) वा स्यात्, प्रेप्साकर्मणः"; सर्व एव हि ता मभिलषन्ति। "लग्यतेः (भ्वा०प०) † वा स्यात्, आश्लेषकर्मणः"; आश्लिष्य इव हि सा वर्त्तते पुरुषम्। "लज्जतेः (तु०आ०) वा स्यात्, श्लाघाकर्मणः"; ये हि लक्ष्मीवन्तो भवन्ति, ते स्वय मात्मानं न श्लाघन्ते॥

"शिप्रे(११)"—इति ‡। "एतत् उपरिष्टात् व्याख्यास्यामः";—"शिप्रे हनू नासिके वा"—इति §; अत्र ‖ हि एतन्निगमप्रसक्त माचार्यस्यतीति लाघवार्थं मुत्कृष्टम्¶॥ २ (१०)॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्वितनं सञ्ज-भार। यदेदयुक्त हरितः सधस्थादाद्राची वासस्तनुते सिमस्मै॥ तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां वितनं संहियते यदासावयुक्त** हरणा-नादित्यरश्मीन् हरितोऽश्वानिति वाथराची वासस्त-

---

* "लाञ्छनाद्वा तया हि लाञ्छित इव भवति"—इति च।

† दिवादिश्छान्दसः।

‡ १भा० १८२ पृ० ४ पं०।

§ प० १ अ०४ पा० १ खं०।

‖ षष्ठेऽध्याये इति यावत् (१, ४, १.)।

¶ तत्र हि "सुशिप्रः"—इत्येतन्निर्वचनावसरे "वाजं सुशिप्र गोमति" (ऋ० सं० ६, २, १, २)"—इत्येष निगमः प्रदर्शनीयो भविष्यत्येव; तत्प्रासङ्गिकत्वेन शिप्रव्याख्या-लाघवं सुपपन्नं निरुक्तकारेणेति भावः।

** "वयुक्त" ख।

नुते सिमस्मै वेसर महरवयुवती सर्वस्मादपि वोपमार्थे स्याद्राचीव वासस्तनुत इति तथापि निगमो भवति पुनः समव्यद्वितनं वयन्ती। समंनात्सीत्॥ ३ (११)॥

"मध्या(११)"—इति *। एतदनवगतम्। "मध्ये"—इत्यवगमः। "तत् सूर्यस्य देवत्वं०—०सिमस्मै"—इति निगमः†। आङ्गिरसस्य कुत्सस्येयं मार्षम्। त्रिष्टुप्। सौर्यस्य पशोः षड्धैं वपाया याज्या; सूचितञ्च,—"चित्रन्देवाना मिति पुरोनुवाक्यास्सिस्र उत्तरा याज्याः सौर्यस्योपांशु (आ० ३,८.)"—इति। 'तत्' अहं 'सूर्यस्य' भगवतः 'देवत्वं' देवताभावं, 'तन्महित्वं' तच्च महत्त्वं माहाभाग्यं 'मन्ये' जाने। तत् किम्? इति,—'मध्या' "मध्ये" "यत्" "कर्मणां क्रियमाणानाम्" अनेकेषाम् अवगणय्य सर्वान् कर्मकर्तॄन् 'विततं' तेषां "विततम्" एतत् प्रकाशजालम्‡। एव मतिमहत्। महतापि कालेन तत् दुरुपसंहार मन्येऽहमेकेन मुहूर्तेनायत्नेनैव भगवता सूर्येण "संह्रियते", तत् अस्य देवत्वं तच्च महत्त्व महं मन्ये। किञ्च; "यदासौ" भगवान् सूर्यः, "अयुक्त" युनक्ति, 'हरितः' "हरणान्" रसहरणान् "आदित्यरश्मीन्" आत्मन्यस्तं गच्छन् 'सधस्थात्' पृथिवीलोकादाकृष्य। पृथिवी हि तेषां रसादानार्थं सहस्थानम्। इतो हि ते सर्व एव रसानाददते। 'रात्रिः' § 'वासः' "वेसर महरव-

* १भा० १९१ सू० ८ पं०।

† ऋ० सं० १, ८, ७, ४।

‡ "प्रकाशजातम्" म।

§ मूले सूपांशुलुगिति सामिके पूर्वसवर्णदीर्घं सपं "रात्री"—इति।

युवती" अवमिश्रयन्ती 'सिमस्मै' सिमस्मात्, सर्वस्मात् लोकात् अहरपक्षत्य *, स तमः 'तनुते'। तदेव मेतदपि सूर्यस्येव माहाभाग्यं यदस्य सन्निधौ तमो नश्यति, यस्मानेनोत्सृष्टो देशः स तमसा क्षाद्यत इत्यभिप्रायः। "हरितोऽस्मानिति वा †" ऐतिहासिकपक्षमतेन॥

"अपि वोपमार्थे स्यात्, रात्रीव वासस्तनुत इति" वास इव रात्री तमः तनुत इत्यर्थः। पूर्वत्र वेसर महरवयुवती तमस्तनुत इति नास्त्युपमा, इह पुनर्वास इव तमस्तनुत इत्येव मुपमा॥

यथा च उपमार्थोऽपि युज्यते, "तथा" च "निगमः" "अपि" अयं "भवति";—"पुनः समव्युदितंतं वयन्ती०—०सविता देव आगात्" ‡। गृत्समदस्येय मार्षम्। सावित्री। त्रिष्टुप्। पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे शस्यते तृतीयसवने। "पुनः समव्युदितंतं वयन्ती"। "समनात् सीत्"—इति निर्वचनम्। समवेष्टयदित्यर्थः। यथा योषित् काचिद् वासो वयन्ती, पुनः संवेष्टयत्यस्तमयकाले, पुनश्च वितनोत्यादित्य उदिते; एव मियं रात्रिः पुनरेव तमः संवेष्टयति, योषिदिव वासो वयन्ती। कदा पुनः संवेष्टयति? यदा 'मध्या' मध्ये 'कर्त्तोः' कर्म्मणां क्रियमाणानां लोकिकवैदिकानां 'वितनम्' एतद्रश्मिजालम् §, 'शक्म' स्वात्मप्रसवादपत्यभूतं 'न्यधात्'

---

* "लोकात् आहृत्य" ग।

† "हरितोऽस्मा इति" ग।

‡ "पुनः समव्युद् वितनुं वयन्ती सुधा कर्त्तोन्यधाच्छक्म धीरः। उत्संहायास्राद् व्यृतूंरदर्धरुरमतिः सविता देव आगात्॥" ऋ० सं० १, ८, २, ४।)

§ "वितनं रश्मिजातं" ग।

न्यदधात्, नीचैर्धत्ते लोकानां प्रकाशनाय। अथवा शक्नोति कर्मनाम * स्यात्; यदा स्वं प्रकाशं पुनः कर्म निधत्ते, निदधाति, उदेति 'धीरः' धीमानादित्यः, तदा अहनि अभ्युपस्थिते पुनः संवेष्टयति रात्रिस्तमं इति। अस्तमयं प्रति पुनर्वास इव तनोतीति। एव मेतस्मिन्नपि मन्त्रे सामर्थ्यादसत्युपमाशब्दे वासस्य तम उपमीयते। यद्येह तथा पूर्वस्मिन्नपि † निगमेऽपौत्येव मेके मन्यन्ते। अपरे पुनः अपिवोपमार्थे स्यादित्येवं वर्णयन्ति;—रात्रीव वासस्तनुत इत्यत्र वासः-शब्दोऽहःशब्दपर्यायवाची ‡, तस्योक्ता व्युत्पत्तिः वेसर महरिति §। सा रात्रिः वासस्तनुते, अहस्तनुत इत्यर्थः। रात्रिप्रान्ते हि शुक्लं महर्लक्ष्यते ‖, तेन ज्ञायते रात्र्यैवेदं तत मिति। एव मुपमार्थत्व मेके मन्यन्ते;—यदा वाय मर्थः, तदा "पुनः समव्यदितन्तं वयन्ती (ऋ० सं० २, ८, २, ४)"—इत्यत्र पुनः समवेष्टयदहो रात्रिः, वितत मिव वासो वयन्ती। कदा? यदा मध्ये कर्मणां 'न्यधात्' निदधाति। अस्तं गच्छन् आदित्यः स्वमण्डले 'शुक्रं' रश्मिजालं यदा च 'उदस्थात्' उत्तिष्ठति, स्वरश्मीनुपसंहृत्य 'व्यधात्' विदधाति 'ऋतून्' अहोरात्रलक्षणान् ¶। यदा एवम् 'एषः' 'सविता देवः', 'अस्तमितः' यथास्तमितः, 'आगात्' आगच्छति। तदा 'रात्रिः तनुते' 'वासः'

---

* १भा० १९९ पृ० (९) द्रष्टव्यम्।
† "तत् सूर्यस्य देवत्वं"—इत्यत्र (४०९, ४०७ पृ०)।
‡ १भा० ५५ पृ० (४) द्रष्टव्यम्।
§ पृ० ४०७ पृ० १ पं०, १९ पं०।
‖ "शुक्रं ते अन्यद् (४, ८, १४, १,"—इत्यर्थः पर्यालोच्यः।
¶ "अहर्लक्षणान्" ग।

अहर्लक्षणम्, 'पुनः' 'सं वेदृश्यतीत्येवं मन्यन्ते। यद्वार्थाविरोधि तत् प्रतिपत्तव्यम्॥ ३ (११)॥

इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा। मन्दू समानवर्चसा॥ इन्द्रेण हि सन्दृश्यसे सङ्गच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातम्॥ ४ (१२)॥

"मन्दू(१२)"—इति*। एतदनवगतम्। "मदिष्णू, मन्दुनेति वा" शब्दसमाधौ। "इन्द्रेण सं हि"—इति निगमः†। मधुच्छन्दस इदमार्षम्। महाव्रते महदुक्थे वचाग्नीतिषु शस्यते; सावित्रेषु चाहःसु सोमातिदृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे इन्द्र उच्यते। हे भगवन्! इन्द्र! त्वं 'इन्द्रेण' ईश्वरेण, दीप्तेन वा मरुद्गणेन, नित्यमेव "सङ्गच्छमानः" 'सं दृक्षसे' "सन्दृश्यसे"। 'अबिभ्युषा' अभयवता; "गणेन"—इत्यध्याहारः। तौ च "युवां" मरुद्गणः त्वं च, एकत्र सङ्गतौ। "मदिष्णू" हर्षशीलौ; नित्यप्रमुदितावित्यर्थः। 'समानवर्चसौ' च; समानदीप्ती इत्यर्थः। एवं "मन्दू समानवर्चसा"—इत्येतेन द्विवचनेन मरुद्गणेन्द्रविषयेण निगमो व्याख्यातः। "अपि वा" एव मन्यया "स्यात्"। मन्दू इत्यस्य तृतीयैकवचनान्तत्वेन विपरिणामः; एवञ्च सति मरुद्गणविशेषण मेतद्भवति। कथम्? "मन्दुना" मरुद्गणेन, इन्द्र! सन्दृश्यसे सङ्गच्छमानः। "समानवर्चसा

---

* ऋग्० १८१ सू० ११ मं०।

† ऋ० सं० १, १, ११, १।

इति" एतत् पदं मन्दुनेति "एतेन" पदेन "व्याख्यातम्"; यथैव हि मन्दू इत्येतत् द्विवचन मेकवचनं वा, एव मेतदपि;—समानवर्चसाविन्द्रमरुद्गणाविति द्विवचन मथवा मन्दुना समानवर्चसा च मरुद्गणेन इत्येवं तृतीयैकवचनम्। अपि वा एवं मरुद्गण उच्यते;—त मिहेन्द्रेण सङ्गच्छमानो नित्य मेव मन्दृश्यस इति। समान मन्यत्॥४ (१२)॥

ईर्मान्तासः सिलिकमध्यमासः संशूरणासो दिव्यासो अत्याः। हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्य मज्म मश्वाः॥ ईर्मान्ताः समीरितान्ताः (सुसमीरितान्ताः *) पृथ्वन्ता वा सिलिकमध्यमाः संस्तृतमध्यमाः शीर्षमध्यमा वा ऽपि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये चैषां तिष्ठतोद मपीतरच्छिर एतस्मादेव समाश्रितान्येतदिन्द्रियाणि भवन्ति संशूरणासः (दिव्यासो अत्याः †) शूरः शवतेर्गतिकर्मणो दिव्या दिविजा अत्या अतनाः। हंसा इव श्रेणिशो ‡ यतन्ते। हंसा हन्तेर्घ्नन्त्यध्वानं (श्रेणिश इति §) श्रेणिः॥ अयतेः

---

* ङ-च-पुस्तकयोरधिकः पाठ एषः।
† एषोऽपि पाठो ङ-च-पुस्तकयोरधिकः।
‡ "श्रेणिशो" क।
§ अय मपि पाठो न दृश्यते क-ख-ग-पुस्तकेषु।
॥ "श्रेणिः" क, ख, ग।

समाश्रिता भवन्ति यदाश्लिष्यन्यदापन् दिव्य मज्म मजनि * माजि मश्वा अस्यादित्यस्तुतिरश्वस्यादित्या-दश्वो निस्तृष्ट इति। स्तृतादश्वं वसवो निरतृष्टेत्यपि निगमो भवति ॥ ५ (१३) ॥

"ईर्मान्तासः(१४)"—इति †। एतदनवगम्। "समीरितान्ताः", —"पृथ्वन्ता वा" इति यथासम्भवं शब्दसमाधी। "ईर्मान्तासः" —इति ‡ निगमः। दीर्घतमस आर्षम्। "यमेन दत्तम्"—इति § इयच्च; ते अश्येते अश्वस्तोमीये सूक्ते; तेन चाश्वः स्तूयतेऽश्वमेधे; आदित्यस्य रथे येऽश्वा युक्तास्त उच्यन्ते ईर्मान्तासः; तेषां सप्तानां येऽश्वाश्चत्वारः, ते "समीरितान्ताः" विचिप्तान्ताः, प्रसृतान्ताः, प्रविरला इत्यर्थः। "पृथ्वन्ता वा"; तेषा मेवाश्वानां पृथवोऽन्ताः, पृथूरस्काः, पृथुजघना वा इत्यर्थः। "सिलिकमध्यमाः, संसृतमध्यमाः" संश्लिष्ट-मध्यमा इत्यर्थः। तेषां हि सप्तानां ये मध्यमास्त्रयः इतरेतर मुत्पीड्य संश्लेषेणावस्थिताः। अथ वा पृथुजघनोरस्कानां सतां मध्यमाः शरीरप्रदेशाः, सप्ताना मपि संश्लिष्टाः संलग्नास्त्रयः; निरुदरास्तेऽश्वा इत्यर्थः। तथापि हि स्तुतिरुपपद्यत एव। "शीर्षमध्यमा वा" सिलिकमध्यमा वा। एव मपि हि शब्दे सारूप्य मस्ति; यो हि तेषां सप्तानां मध्यमः, स शिरोभूतः प्रधान इत्यर्थः। "अपि वा" एव मन्यथा स्यात्। "शिर आदित्यः" एव "भवति" सर्व्वभूतप्राधा-

* 'मजिन' क, ख, ग।
† १भा० ३९१ पृ० १९ पं०।
‡ ऋ० सं० १, ३, १९, ५=१, ११, ७, १०।
§ ऋ० सं० १, ३, ११, १=१, ११, ७, १।

न्यात्। "मूर्द्धा, राजेति वा अह मेत मुपासे * इति ह विज्ञायते"। यस्माच्चासावनुप्रविश्य प्राणभावेन† सर्व्वभूतानि "श्रेते" आस्ते, तस्मात् सर्व्वभूताश्रयणात्‡ शिर आदित्यः। स चैतेषा मश्वानां "मध्ये तिष्ठति"; श्रौषमध्यमास्त एते श्रौषमध्यमा इत्युक्ताः सन्तः सिलिकमध्यमा इत्युच्यन्ते। "इद मपीतरच्छिर एतस्मादेव"—इति प्रासङ्गिकम्। "समाश्रितानि" हि "एतत्" उत्तमाङ्गम् "इन्द्रियाणि" चक्षुरादीनि "भवन्ति" इति शिर उपपत्तिः। 'संशूरणासः' सङ्गताः शूरेण भगवतादित्येन संशूरणाः। "शूरः शवतेर्गतिकर्म्मणः" § स हि परानभिमुखो गच्छत्येव, न पर्य्यावर्त्तते। 'दिव्यासः' ते हि "दिव्याः" दिविजाताः। 'अत्याः' "अतनाः"; ते हि अतन्त्येव, मुहूर्त्त मपि नावतिष्ठन्ते। य एवंलक्षणा अश्वास्ते किं कुर्व्वन्ति? इति। उच्यते; —'हंसा इव श्रेणिशो यतन्ते'; हंसा इव श्रेणीकृताः पङ्क्तीकृताः यतन्ते गच्छन्ति। "हंसा हन्तेः"; ते हि "घ्नन्त्यध्वानम्"। कदा पुनरेवं यतन्ते? "यदाशिषुः" 'यद्' "यदा" यस्मिन् काले 'आशिषुः' 'आपन्' आप्नुवन्ति। किम्? 'दिव्यम्' 'अज्मम्' "अजनि"। अज्यते ऽस्यां गम्यत इति अजनिः, वाहिका; स्वर्गपथ इत्यर्थः। यदा ते आप्नुवन्ति—उदयादारभ्य यावदस्त मिति, तदैवं यतन्ते। के पुनस्ते? इत्युच्यते,—'अश्वाः'। एव मेतानि दर्भान्नाम इत्येवमादीनि अश्व-

---

* "अह मेव सुपासते" क, ख।

† "आदित्यः सर्वाणि भूतानि प्रणयति, तस्मादेनं प्राण इत्याचक्षते"—इति ऐ० ब्रा० ४, ५, ९।

‡ "सर्व्वाश्रयात्" क, ख।

§ १भा० २अ० १४ ख० २४ १४० (१७)।

विशेषणानि, अश्वशब्देन समानविभक्त्यन्तत्वात्*। आत्मैवैषां रथो भवत्यात्माश्वा इत्येवं प्रक्रमेण सूर्यदैवत एष मन्त्र उक्तः। स पुनरय मश्वस्तुतौ विनियुक्तस्तदसमञ्जस मिति मन्यमानो भाष्यकारः प्रतिसमाधित्सुराह ;—"अस्त्यादित्यस्तुतिरश्वस्य" इति ; अश्वोऽपि ह्यादित्यात्मना स्तूयत इत्यर्थः। आह ;— कयोपपत्त्या ? इति। उच्यते, "आदित्यादश्वो निस्तष्ट इति"—अनयोपपत्त्या सूर्यात्मना अश्वः स्तूयते। आह ;— कुत एतत्सूरादश्वो निस्तष्ट ? इति। उच्यते ;—"सूरादश्वं वसवो निरतष्ट †—इत्यपि निगमो भवति"। "यमेन दत्तं त्रित एनं मायुनक्"—इति‡। 'यमेन' 'एनम्' अस्माकं 'दत्तम्' अश्वम् 'त्रितः' त्रिस्थानो वायुः 'आयुनक्' युनक्ति। यत्रायं योक्तव्यः, तत्र वायुना युक्तस्येन्द्रेणाधिष्ठितस्य 'अस्य' 'गन्धर्वः' गन्धर्वराजः 'रशना मगृभ्णात्'; नियमेन रज्जुं गृह्णाति। कुतः पुनरय मश्वः ? इत्युच्यते,—'सूरात्' सूर्यादेत मेवंलक्षणम् 'अश्वं' 'वसवः' 'निरतष्ट' निस्तष्टवन्तः। एत मेतस्मिन् मन्त्रे सूर्यप्रभवोऽश्व इति स्तूयते। "कारणाच्च कार्यं मनन्यत्"—इत्यूपपद्यते सौर्येण मन्त्रेणाश्वस्य स्तुतिरिति ॥ ५ (१३) ॥

कायमानो वना त्वं यन्मातॄरजगन्नपः। न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः॥ कायमानश्चायमानः कामयमान इति वा वनानि त्वं यन्मातॄरपो-

---

* "समानविभक्तित्वात्" क।

† "यमेन दत्तं त्रित एनं मायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्। गन्धर्वो अस्य रशना मगृभ्णात् सूरादश्वं वसवो निरतष्ट॥"—इति ऋ० सं० १, ३, ११, १।

‡ ऋचादिकं पूर्वं मेवोक्तम् (४१२ पृ० ४ पं०)।

ऽगम उपशाम्यन् न तत्ते अग्ने प्रमृष्यते निवर्त्तनं दूरे यत् सन्निह भवसि जायमानः। लोधं नयन्ति पशु मन्यमानाः। लुब्ध मृषिं नयन्ति पशुं मन्यमानाः। शीरं पावकशोचिषम्। पावकदीप्तिम्। अनुशायिन मिति वाग्निन मिति वा ॥ ६ (१४) ॥

"कायमानः(१५)"—इति *। एतदनवगतम्। "चायमानः"—इत्यवगमः; "कामयमान इति वा"। "कायमानो वना त्वम्"—इति † निगमः। विश्वामित्रर्षेय मार्षम्। बृहती। प्रातरनुवाकाग्निनयोः शस्यते। हे भगवन्! अग्ने! 'कायमानः' "चायमानः" पश्यन्नित्यर्थः। अथ वा "कामयमानः"। किम्? स्वां योनिम्। कतमाम्? 'वना' "वनानि" दारूणि। दारुभ्योऽग्निर्जायते, तदेतत् प्रसिद्ध मेवोक्तम्‡; यदा चाग्निरनुगच्छति अरणी वावगच्छति§। 'मातृः' वा सर्व्वभूतनिर्माचीः 'अपः'; सापि योनिरेवाग्नेः। "आपो वा अग्नेर्योनिः;—इति ह विज्ञायते"॥। अनयोर्योन्योरन्यतरां योनिं

---

* १भा० ६९२ पृ० ४पं०।

† ऋ० सं० ३, १, ५. २।

‡ "अग्निं मन्थति सोमे राजन्यागते"—इति, "इलाभ्या मेनं मन्थति, शिशुं जात मिति; शिशुरिव वा एष प्रथमजातो यदग्निः"—इति च ऐ० ब्रा० १, २, ४—५। "वनेषु जायुर्मनेषु (१, ५, ११, १)"—इत्यादयो ऋचश्च द्रष्टव्याः।

§ "वावसंगच्छतीति" ग।

॥ 'ऋतस्य योना गर्भे सु जातम् (ऋ० सं० १, ५, ९, २)", "ऋतित्यमुर्वसंः (ऋ० सं० १, ५, ९, ५)", "चित्तिरपां दमे (ऋ० सं० १, ५, ११, ५)"—इत्यादिषु बहुषु, एव मादीना मृचां विधायकब्राह्मणश्रुतिषु च द्रष्टव्यम्। "स निर्लायत सोऽपः प्राविशत् तं देवा प्रैष मैच्छत्"—इत्यादि च तैत्तिरीयकम्।

'यद्' यदा 'अजगन्' "अगमः" "त्वम्"। कदा पुनरगमः? "उपशाम्यन्"—इत्यध्याहृतं भाष्यकारेण; अनुगच्छन्नित्यर्थः। तस्य तवैव मनुगच्छतः किम्? इति। उच्यते;—'न' 'तत्' 'ते' 'अग्ने'! 'प्रमृषे' 'निवर्त्तनम्'। "न प्रमृष्यते" न प्रमृज्यते निवर्त्तनं, वर्त्म; मार्गो न लुप्यत इत्यर्थः। कथं गम्यते न प्रमृज्यते मार्गः? इति। 'दूरे' ऽपि 'सन्' अदृश्योऽपि भूत्वा यस्मात् "दृह" पुनः "भवसि" एव। कदा? "जायमानः", "यत्" यदा अद्भ्यो जायसे वैद्युतात्मना *; यदा वा अरणिभ्यां जायसे मथ्यमानः, तदा॥

"न सायकस्य चिकिते०—०अश्वान् नयन्ति" †। "लोधम्(१६)"—इति ‡। एतदनवगतम्। "लूशम्"—इत्यवगमः। यस्मिन् निगमे एष शब्दः सा वसिष्ठद्वेषिणी § ऋक्। अहं च कापिष्ठलो वासिष्ठः? यतस्तान् निर्ब्रवीमीति॥॥

"शीरम्(१७) ¶—इति। एतदनवगतम्। अग्निरभिधेयः।

---

* "आदित् प्रत्नस्य रेतसः"—इति (सा० सं० ऋ० आ० १, १, १०.) द्रष्टव्यम्।

† "न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः। नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान् नयन्ति" ऋ० सं० १, १, १२, १।

‡ १भा० १८१ सू० ८ पं०।

§ "इन्द्रोतिभिः (ऋ० सं० १, १, १२, १) इत्याद्यासप्तसो वसिष्ठद्वेषिणः। पुरा खलु विश्वामित्रशिष्यः सुदा नाम राजर्षिरासीत्। स च केन चित् कारणेन वसिष्ठद्वेष्योऽभूत्। विश्वामित्रस्तु शिष्यस्य रक्षार्थे माभिर्ऋग्भिर्वसिष्ठ मशपत्। इमा अभिशापरूपाः। ता ऋचो वसिष्ठा न गृह्णन्ति।"—इति ऋग्भाष्ये सायणः।

॥ "पुरा खलु तपसः क्षयो मा प्रापदिति शापान्निष्टप्तं लौहिनं विश्वामित्रं वसिष्ठपुरुषा बद्धा नीतवन्तः। तान् प्रति विश्वामित्रो ब्रूते;—" इत्यादि ऋग्भाष्यं द्रष्टव्यम् (१, १, १२, १)।

¶ १भा० १८१ सू० ११ पं०।

"अनुशायिन मित वा"—इति; अनुप्रविश्य सर्व्वभूतानि शेते इत्यनुशायी; त मनुशायिनम्। अश्नोति व्याप्नोति वा सर्व्वभूतानीति "आग्निनम्"। "शोरं पावकशोचिषम् ०—० दीघश्रुत्तमः"—इति * निगमः। भार्गवस्य प्रयोगस्येय मार्षम्। प्रातरनुवाकाग्निनयोः शस्यते। 'शोरम्' अनुशायिनं व्यापिनं वा अग्नि म स्तौमि। "पावकशोचिषम्" पावयित्री यस्य शोचिर्दीप्तिः, तं पावकशोचिषम्। किञ्च 'ज्येष्ठः' श्रेष्ठः, 'यः' प्रधानो 'दमेषु' यज्ञगृहेषु 'आदीदाय' आदीप्यते, परिचर्य्यमाणोऽग्निहोत्रिभिः। किञ्च 'दीर्घश्रुत्तमः' यः, दीर्घश्रोत्रभ्यः यो दीर्घश्रुत्तमः। त मग्निं स्तौमि ॥६ (१४)॥

कनीनकेव विद्रधे नवे द्रुपदे अर्भके। बभ्रू यामेषु शोभेते॥ कनीनके कन्यके कन्या कमनीया भवति केयं नेतव्येति वा (कमनेनानीयत इति वा†) कनतेर्वा स्यात्कान्तिकर्मणः कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनानीति शाकपूणिर्विद्वयो‡ दारुपात्रोर्दारु दृणातेर्वा द्रूणातेर्वा तस्मादेव द्रु नवे नवजाते अर्भके अल्पके ते यथा तदधिष्ठानेषु शोभेते एवं बभ्रू यामेषु शोभेते बभ्रोः§ रश्मयोः॥ संस्तव इदञ्च मे दादिदञ्च मेऽदादि-

* "शोरं पावकशोचिषं ज्येष्ठो यो दमेष्वा। दीदाय दीर्घश्रुत्तमः॥"—इति ऋ० सं० ६, ७, ११, १।

† क-च-पुस्तकयोरयं मधिकः पाठः।

‡ "र्बुध्नयो"—इति क, ख, ग; सायणसम्मतश्च पाठः

§ "बभ्रवो" ङ।

॥ "रश्मयोः" च।

त्यृषिः प्रसङ्गायाह। सुवास्त्वा अधि तुग्वनि। सुवास्तुर्नदी तुग्व तीर्थं भवति तूर्णं मेतदायन्ति। कुविन्नसन्ते मरुतः पुनर्नः। पुनर्नो नमन्ते * मरुतो नसत इत्युपरिष्टाद् व्याख्यास्यामः। ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम्। ये ते मदा आहननवन्तो वच्चनवन्त †स्तैरिन्द्रं चोदय दानाय मघम्॥ ७(१५)॥

"विद्रधे(१८), द्रुपदे(१९)"—इत्येते‡ पदे एकनिगमे। ते अश्ननवगते; पक्षेण चानेकार्थे। 'विद्रधे' विद्धे— 'द्रुपदे' द्रुममये पदे इत्यवगमः। दारुपादौ वा एताभ्यां शब्दाभ्यां विशेष्येते। कन्ययोर्वा पादपीठप्रवचने सप्तम्येकवचनान्ते एते। द्वयोरपि पदयोरेक एव निगमः,—"कनीनकेव विद्रधे०—०शोभेते"—इति §। वामदेवस्यार्षम्। "कन्या कमनीया भवति" सर्व एव हि तां प्रार्थयन्त एव। अथ वा "क्वेयं नेतव्येति वा" दानायेत्येवं तां प्रति पिता चिन्तयतीति कन्या। "कमनेनानीयत इति वा"। "कनतेर्वा स्यात् कान्तिकर्मणः"; "कनति(१७), कानिषत्(१८)"—इति कान्तिकर्मसु पठितम्॥। 'इव'-इति उपमायाम्। 'विद्रधे', 'नवे', 'द्रुपदे',

---

* 'नवन्ते' क, ख, म,—'नषन्ते' ङ।

† "वचनवन्त" चातिरिक्तेषु सर्वेषु।

‡ १भा० १९ १५० १७ पं०, १९४ ३० १पं०।

§ ऋ० सं० १. १, १०, ७।

॥ १भा० २अ० ४ख० (१९९ पृ०)।

'अर्भके'—इत्येतानि चत्वारि पदानि "कन्ययोरधिष्ठानप्रवचनानि", "सप्तम्या एकवचनानीति" एवं "शाकपूणिः" आचार्यो मन्यते। एकस्मिन् दारुमये पादपीठे स्मिन् समधिरूढेषु पादुकाख्येषु अधिष्ठानेषु अधिरूढे 'शोभेते', यथैवं 'बभ्रू' बभ्रुवर्णे अश्वे 'यामेषु' आजिस्थानेषु यमनस्थानेषु; कन्यके, शालभञ्जिके * वा। तदेतैश्चतुर्भिः पादैरुच्यत इति शाकपूणिराचार्यो मन्यते। यास्कस्तु "विङ्ङयोः" विकुषिताधोभागयोः "दारुपाद्वोः" अधिरूढ़योः कन्ययोरभिधानपदान्यभिधायकान्येतानि द्विवचनानीति मन्यते। ताभ्यां ह्यश्विन्योः खुराकारत्वेन सारूप्य मस्तीत्येव मुपादानम्। दारुपाद्वोरित्येतस्मिन् व्याख्यानप्रस्तके पदे विग्रहप्रसक्तो दारुशब्दो निरुच्यते;—"दारु दृणातेर्वा" विदारणार्थस्य (क्र्या०प०)। "द्रूणाते र्वा" हिंसार्थस्य†। तस्मादेव धातुद्वयादन्यतरस्य "द्रु"—इत्येतदभिधानं भवति। द्रुपदे इत्येतदपेक्ष्य "तस्मादेव द्रु"—इत्येतदुक्तम्; द्रुम इत्यर्थः। "नवे नवजाते"। "अर्भके अल्पे" अल्पके‡ इत्यर्थः। "ते" कन्यके एवम्प्रकारेषु "तदधिष्ठानेषु" तेषु पादुकाख्येषु अधिष्ठानेषु अधिरूढ़े "शोभेते" यथा "एवं" "बभ्रू" बभ्रूवर्णे अश्वे "यामेषु" आजिस्थानेषु यमनस्थानेषु वा बन्धनस्थानेषु मन्दुराख्येषु §, वर्त्तमाने शोभेते। ते एव मेत्र "बभ्रोरश्वयोः संस्तवः"॥

---

* चित्ररूपे काष्ठपुत्तलिके इत्यर्थः।
† १भा० २८१ पृ० २अ० १९ ख० (२१) = २८४ पृ० (२१)।
‡ १भा० २९९ पृ० ३अ० २ख० (९)।
§ "वाजिशाला तु मन्दुरा"—इत्यमरः। २, २, ७।

"तुग्वनि(१०)"—इति *। एतदनवगतम्। "तूर्णं मेतदायन्ति" —इति शब्दसमाधिः। "तौर्थम्" अभिधेयम्। "सुवास्त्रा अधि तुग्वनि"—इति† निगमः। अस्य ऋक्पादस्य ऋक्क्रेषापेक्षो निर्णयः। सर्वस्या अपि च तस्या ऋचो यस्या मयं पादः, तस्या या आद्यान्या आधस्त्या ऋक्, तदपेक्षो निर्णयो यतः, अतस्तस्या ऋचः आधस्त्यायाः सङ्ज्ञिप्यार्थं माह भाष्यकारः,—"ददच्च मेऽदादिदच्च मेऽदादित्यृषिः प्रसङ्ज्ञायाह"—इति। ददच्च द्रव्यजातं, मम दत्तवानसौ राजेत्येवं, 'प्रसङ्ज्ञाय' परिसङ्ज्ञानं कृत्वा, ऋषिराह‡ उक्तवानित्यर्थः। कतमा पुनरसौ आधस्त्या ऋक, यथाय मर्यः सङ्ज्ञिप्यते? इति उच्यते;— "अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्बधूनाम्। मंहिष्ठो अर्यः सत्पतिः" §। सोभरेः काण्वस्येयं मार्षम्, परा ‖ च; दानप्रशंसा¶। 'यः' 'अदात्', 'मे' मम, 'पौरुकुत्स्यः' पुरुकुत्सस्यर्षेः पुत्रः 'त्रसदस्युः' दस्युत्रासनः। किं मदात्? 'पञ्चाशतं बधूनाम्' पञ्चाशतं वोढव्यानां कन्यानाम्। 'मंहिष्ठः' पूज्यतरः। 'अर्यः' ईश्वरः। 'सत्पतिः' च सतां पालयिता च। एवंलक्षणः पौरुकुत्स्यः त्रसदस्युः मम दत्तवान् पञ्चाशतं बधूनाम्। आह किं मेतदेवादात्? नेति। उच्यते;—ददच्च यदुक्तम्, उत्तरच्च यद् वक्ष्यते। कतरा पुनरसा-

---

* १भा० १९४ सू० ४पं०।

† ऋ० सं० ९, १, २५, ७।

‡ काण्ववंशीयः सोभरिर्नाम।

§ ऋ० सं० ९, १, २५, ९।

‖ सैव परा ऋक्, यस्या द्वितीयः पादः "सुवास्त्रा अधि तुग्वनि"—इति।

¶ "षट्त्रिंशो सप्तत्रिंशो च त्रसदस्युनाम्नो राज्ञो दानस्तुतिरूपत्वात् तद्देवताके"—इति तत्र ऋग्भाष्ये सायणः।

वुत्तरा ऋक्? इति। उच्यते ;—"उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि। तिमूणां सप्ततीनां श्यावः प्रणेता भुवद् वसुर्दियानां पतिः" *—इति। अयेतत्,— यदुक्तम्, अपि च यदेतत् वक्ष्यमाण मिति 'उत'—शब्द एव मुभयं सम्भावयति। 'मे' मम 'प्रयियोः' (प्र गम्यते येन, तत् प्रयियुः, धन मश्वादि; तस्य प्रयियोः) धनस्य, बक्कदात्। ताभिः कन्याभिः सह 'वयियोः' (ऊयत इति वयियुः वस्त्रादि, तस्य) च बक्कदात्। 'तिमूणां सप्ततीनां' गवाम्। 'श्यावः' श्यामवर्णः वृषः, श्यामवर्णानां 'प्रणेता' प्रकर्षेण नेता अग्रतोगामी। 'भुवद्वसुः' भावयिता वसूनाम्। 'प्रशस्तः' पूजितलक्षणः। 'दियानां' दानार्हाणाम्, देया याः तासां पतिः। ताश्च गा एतत्सङ्ख्यायुक्ताः, एतद्गुणयुक्ताश्च मह्य मदात्। क्व पुनरसा वदात्? 'सुवास्त्वा' सुष्ठु-निवासाया नद्याः 'अधि तुग्वनि' तीर्थेऽधि, एतत् अदात् मह्यम्। "सुवास्तुः नदी †", "तुग्व तीर्थं भवति" "तूर्णं" हि "एतत्" अवगाहनार्थम् "आयन्ति"। अत्र दानसम्बन्धात् सुवास्तुशब्दो नद्य-भिधाने ; प्रसिद्धं हि नद्यां दानम् ; नदीसम्बन्धाच्च तुग्वशब्दोऽपि तीर्थाभिधायक ‡ इत्युपपत्तिः। निगमार्थप्रकाशनायैवं सूक्तगतोऽपि अन्वीक्षितव्य एवार्थ इत्येतत् प्रदर्शित माचार्येण ॥

"नंसन्ते(१२)"—इति§। एतदनवगतम्। "नमन्ते,—"इत्यवगमः।

---

* ऋ० सं० ६, १, २५, ७।

† काश्मीरप्रदेशीयेयाननगरतलवाहिनीयम्। इदानीं "सुयत्"—इति प्रसिद्धा।

‡ "निपानागमयोर्खीर्थं ऋषिजुष्टजलेऽपिच—इत्यमरः २, २, ८९। ऋक्संहिता-याञ्च १. ४९, ८; १६९, ९; १७२, ११. ८, ७१, ७ ९. ९७, ५१ १०, ११, १, ४०, १२; ११४, ७ ४, १९ १; ८, ४७, ११. ऋचो द्रष्टव्याः।

§ १भा० २९४ पृ० ८ पं०।

"कुविन्नंसन्ते"—इति निगमः; "तॉं आ रुद्रस्य मीळ्हुषो०—० "ईमहे तुराणाम्"—इति *। वसिष्ठस्येयं मार्षम्। 'तान्' अहं 'मीळ्हुषः' मरुतः वर्षस्य सेक्तॄन् धनवतः, बलवतः वा 'आ विवासे' आभिमुख्येन स्थित्वा परिचरामि। किंलक्षणान् पुनः मरुतः आविवासे? 'रुद्रस्य' इन्द्रस्य स्वभूतान्, आत्मान् वा। अथ वा 'मीळ्हुषः' इति रुद्रविषयं षष्ठ्येकवचनान्तं स्यात्; मीळ्हुषो रुद्रस्य स्वभूतानिति। कस्मात् पुनस्तानहं परिचरामि? यस्मात् ते मरुतः 'कुविद्' बहु 'नंसन्ते' नमन्ते 'पुनः' वर्षाद्युपकारेण अस्मान् प्रति नमन्ते, प्रह्वीभवन्ति। किञ्च; 'यत्सखायौ' यच्छरीरगतम् 'एनः' 'जिह्मीलिरे' लज्जयन्ति, यच्च 'आविः' प्रकाशम्, तदेवम्प्रकार मुभयलक्षण मपि एनोऽस्मान् 'जिह्मीलिरे' लज्जयन्ति। तदेषां मरुतां 'तुराणां' त्वरमाणानां प्रसादेन उभयलक्षण मपि 'अवयजेमहि' निर्णुदेमहि;—इत्येतद् 'ईमहे' याचामहे; अनेन परिचारेण आराधयितान् मरुत इति। "नमत इत्येतदुपरिष्टात्" द्वादशाध्याये † "व्याख्यास्यामः"; —"अभि प्रवन्त समनेव योषाः" (ऋ० म० ३, ८, ११, ३)—इति व्याख्याने, "नमतिराप्नोतिकर्मा वा नमतिकर्मा वा" ‡—इति॥

"आहनसः(१२)"—इति §। एतदवगतम्। "आहननवन्तः"—इत्यागमः। "ये ते मदा आहनसः"—इति निगमः; परिसोम०—०

---

* "तॉं आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः। यत् सखायौ जिह्मीळिरे यदाविरवृ तदेन ईमहे तुराणाम्"॥ ऋ० सं० ५, ४, १८, ५।

† पञ्चाध्यायिनिघण्टुसहिते भाष्यसप्तमाध्याये इति यावत्।

‡ दै० का० ७अ० ४पा० ४ख०।

§ १भा० ३९४ पृ० १९ पं०।

मघम्" *। पावमानी सौमी। कवेर्भार्गवस्येय मार्षम्। जगती। हे भगवन्! 'सोम!' 'परिप्रधन्व' परिप्रचर, एतस्मात् दशापवित्रात्। 'स्वस्तये' स्वस्त्ययनाय अस्माकम्। 'नृभिः' एतैः ऋत्विग्भिः, 'पुनानः' पूयमानः। किञ्च; 'अभि वासय' अभिप्रच्छादय, अभिभावय। 'आशिरम्' तृतीयसवने। किञ्च; 'ये ते मदा आहनसः' ये ते मदाः तव आहननवन्तः, "वघ्नवन्तः", सम्मोहयितारः; 'विद्थयसः' महान्तः, तैः 'इन्द्रं' 'चोदय' प्रेरय, 'दातवे' "दानाय", 'मघं' धनम्। यथास्माकं तैर्मदैरनभिहतचेताः† सन् दद्यात् मघं धन मित्यर्थः॥ ७ (१५)॥

उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत-प्रियाणि। अह्मसन्न सस्तो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम्॥ उपादर्शि शुन्ध्युवः शुध्युरादित्यो भवति शोधनात्तस्यैव वक्षो भासाधूव्ह‡ इद§मपीतरद्वक्ष एतस्मादेवाधूव्हं॥ काये शकुनिरपि शुन्ध्युरुच्यते शोधनादेवोदकचरो भवत्यापोऽपि शुन्ध्यव¶ उच्यन्ते शोधनादेव नोधा ऋषिर्भवति नवनं दधाति स

* "परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम्। ये ते०—० मघम्॥"—ऋग्वे० सं० ७, १, २२, ५।

† "तैर्मदैरभिहतचेताः" क।

‡ "भासोऽधूढम्" च।

§ "मिद" च।

‖ "देवाधूढं" च।

¶ "शुन्ध्युव" च।

यथा स्तुत्या कामानाविष्कुरुत एव मुषा रूपाण्याविष्कुरुतेऽग्नसदग्नान्नं भवत्यग्नसादिनीति वाग्नसानिनीति * वा। सस्तो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम्। (स्वपतो बोधयन्ती †) शाश्वतिकतमागात्पुनरेयुषीणाम् ‡। ते वाशीमन्त इष्मिणः। ईषणिन इति वैषणिन इति वार्षणिन इति वा वाशीति वाङ्नाम वाश्यत इति सत्याः। शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम्। अभिवहनस्तुति मभिषवण § प्रवादां स्तुतिं मन्यन्त ऐन्द्री त्वेव शस्यते परितक्म्येत्यु ॥ परिष्टाद् व्याख्यास्यामः ॥ ८ (१६) ॥

॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४,२.

"अग्नसत्(९४)"—इति ¶। एतदनवगतम्। "अग्नसादिनीति वा अन्नसानिनीति वा" शब्दसमाधौ। "उषो अदर्शि"-इति ** निगमः। कक्षीवत आर्षम्। ऐषमी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते; 'उषो अदर्शि' उपश्लिष्टा दृश्यत इव मुषाः। कस्य? 'शुन्ध्युवः' शोधयितुरादित्यस्य; आदित्यो हि यदप्यशुचिर्भवति, तदपि रश्मिभिः

---

* "वान्नसानिनीति" ङ, च।
† ज-च-पुस्तकयोरधिक एष पाठः।
‡ "पुनरागामिनीनाम्" ङ, च।
§ "मधिषवण" क, ङ।
॥ "परितक्म्येत्यु" ङ, च।
¶ ९भा० ९९ ५पृ० १पं०।
** ऋ० सं० २, १, ७ ४।

स्पृष्ट्वा शुचीकरोति। "सूर्यः पवित्र मुच्यते"--इति वक्ष्यति *। तमांसि वा शोधयतीति शुन्ध्युः, तस्य शुन्ध्युवः। कथं पुनरुपश्लिष्टा दृश्यते? 'वक्षो न' वक्ष इव; यथा तस्य स्वभासः स्वप्रकाशजालं वक्षोभूत मेतस्मिन् मण्डलेऽध्यूढम्, एवमिय मुषा एतस्मिन् मण्डले उपश्लिष्टा दृश्यते, सन्निकर्षात्। प्रासङ्गिक मुच्यते शब्दसामान्यात्,--"इद मपीतरत्" "वक्षः" पुरुषवक्षः, पशुवक्षो वा अङ्गम् "एतस्मादेव" वहेर्धातोः (भू० प०), इदम् "अध्यूढम्" अधिप्रवेशित मेव "काये" शरीरे भवति। "शकुनिरपि" य एष मङ्कुनाम †, अय मपि "शुन्ध्युरुच्यते", "शोधनादेव"; यो हि "उदकचरो भवति" नित्यशुद्ध एवेति शुन्ध्युः। "आपोऽपि शुन्ध्यव ‡ उच्यन्ते" ता अपि हि शोधयन्ति। "एवं" तावदियम् "उषाः" आदित्यस्य वक्ष इवोपश्लिष्टा दृश्यते। किञ्च इय मेवोषा नोधा इवाविष्कृतप्रियाणि "नोधा ऋषिर्भवति §" स हि "नवनं" स्तोत्रं देवताः प्रति "दधाति"। "स यथा" स्वमुखोद्गीर्णया "स्तुत्या" प्रियाण्यात्मनः "कामान्" स्वानि कामाख्यानि "आविष्कुरुते" आविष्कृणोति, प्रकाशयति देवताः प्रति। "एवम्" इयम् "उषा" स्वात्मन एवोद्गीर्णेन प्रकाशेन "रूपाणि" जनानाम् "आविष्कुरुते" प्रकाशीकुरुते। किञ्च; इय मेवोषाः 'अश्वसन्न ससतो बोधयन्ती' "अश्व अन्नम्" तत् प्रतिकर्त्तव्यताया सीदति, तद्वा सनोति, सम्भजत इति

---

* इत उत्तरस्मिन्नेवाध्याये (पञ्चमे) २पा० १ख०।

† 'मङ्कुः पानीयकाकिका"—इत्यमरः २, ५, २४।

‡ "शुन्ध्यवः"—इत्येव पाठः क-ख-ग-मूलपुस्तकेषु, टीकापुस्तकेषु च सर्वेषु।

§ नोधाः, गौतमः; ऋ० सं० १. ५८—६४; ८ ८८; ९ ९२ सू०।

"अश्मसत्" गृहाधिकारे नियुक्ता अन्नसाधिका स्त्री। सा यथा प्रातरेव क्षीरादुपादानार्थं 'ससतः' "स्वपतः" जनानान्, दोहकादीन "बोधयन्ती" अन्नं साधयिष्यन्ती, एव मुषा अपि जनान् बोधयन्ती, तत्काले हि ते इतिकर्त्तव्यतार्थे जनाः प्रतिबुध्यन्ते, तेनैतयैव बोधिता भवन्ति। आह;— कदा पुनरेतद्भवति? इति। उच्यते;— यदा 'अश्वत्तमागात्' "आश्वतिकतमा" नित्यतमा "आगात्" आगच्छति, तदैव जनान् बोधयति, एव मुषा रूपाण्याविष्कुरुते। एवञ्च वच्च इवोषा आदित्यस्य दृश्यते। आह;— का वा सा अश्वत्तमा इय मुषाः? इति। उच्यते;—'पुनरेयुषीणाम्' "पुनरागामिनीनाम्" —इत्यर्थः। या एताः काश्चिद्गत्वा पुनरागच्छन्ति, ताः पुनरेयुष्यो गावः, अन्या वा*, तासां पुनरेयुषीणां इति निर्द्धारयति। एषैव 'अश्वत्तमा' आश्वतिकतमा। एव मेतस्मिन् मन्त्रे, सा यथा अश्मसदित्यन्नसाधिका स्त्री उच्यते, सा हि तत्काले जनान् दोहकादीन् बोधयति, उषा अपि च तत्काल एवागच्छतीति, एव सुपमान सुपपद्यत इत्युपपत्तिः। अन्ये† तु मक्षिका मश्मसदं मन्यन्ते; सापि ह्यन्ने मोदति, सनोति वान्नं तत्काले च प्रतिबुध्यमाना अन्यान् बोधयतीति॥

"दृश्निणः(२५)"—इति‡। एतदवगतम्। "दृषणिन इति वा, एषणिन इति वा, आर्षणिन इति वा" शब्दसमाधयः। "श्रियमे कं भानुभिः०—० मारुतस्य धान्नः"—इति§ निगमः। राजगणस्य

* "वारयोषिता वा" ग, सायणीयश्च।

† वय मिति वक्तव्ये एष परोक्षनिर्देशो मन्यत्रैलीप्रयत्नः।

‡ १भा० ६८५ पृ० १ पं०।

§ "श्रियमे कं भानुभिः सं मिमिक्षिरे ते रुक्मिभिरक्तुभिः स्वञ्जतयः। ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः"॥ ऋ०सं० १,६,१२,६।

गोतमस्येय मार्षम्। जगती। मारुतस्य प्रैयङ्गवस्य चरोरियं याज्या; तत्र ह्युक्तम् "प्रियवती याज्यानुवाक्ये भवतः"—इति। 'श्रियसे कम्' श्रियोऽर्थाय यजमानाय आत्मने वा; क मित्यनर्थक मेव†, कामये इति वा अस्यार्थः। 'भानुभिः' दीप्तिभिः सूर्यरश्मिभिः, येऽन्तरिक्षे मरुतः 'सम्मिमिक्षिरे' सङ्गच्छन्ते, 'ते' एव 'रश्मिभिः' सर्वलोकनियन्तृभिः 'सम्मिमिक्षिरे'—इत्येतदेवानुवर्त्तते। त एव 'ऋक्वभिः' रसवद्भिः सम्मिमिक्षिरे। 'सुखादयः' सुखदातारः जनानाम्। शोभनानां वा हविषां खादितारः, अत्तारः, 'सुखादयः'। 'ते' एव 'वाग्मीमन्तः' वाग्मिनः। 'इष्मिणः' "ईषणिनः" उपगमनवन्तः, "एषणिनो वा" इच्छावन्तः, "आर्षणिनो वा" आभिमुख्येन सर्वार्थानां द्रष्टारः; 'अभीरवो विद्रे' विदारयितव्ये शत्रौ प्राप्ते विगतभयाः; अथ वा 'विद्रे' वेत्ति, जाने। य एवंलक्षणा मरुतः, तेषां मरुतां यत् स्थानम् अन्तरिक्षलोकः, तस्य 'प्रियस्य' दृष्टस्य 'मारुतस्य' मरुतां स्वभूतस्य 'धाम्नः' स्थानस्य प्राप्तये; तानेव मरुतः स्तौमीत्यध्याहारः। एव मेतस्मिन् मन्त्रे 'वाग्मीमन्त इष्मिणः'—इत्येतस्मादेकवाक्यसम्बद्धाद् 'इष्मिणः'—इत्येतद् मरुद्विशेषणम्। "वाग्मीति वाङ्नाम"। "वाग्मी[११], वाणी[११]"—इति ‡ पठितं वाङ्नामसु। वास्त इति कारकावधारणम्॥

"वाहः[२६]"—इति ‡। एतदनवगतम्। पचेण चानेकार्थम्।

---

* पुरस्तात् ७१ पृ० ११ पं० = ७४ पृ० १६ पं०।
† १भा० (१अ० ११ ख०) ७४ पृ० = ७९ पृ० ९पं०, १५ पं०।
‡ १भा० ३९५ पृ० १२ पं०।

"शंसावाध्वर्यो०—०मिन्द्रो शस्तम्"—इति* निगमः। विश्वामित्रस्येय मार्षम्। त्रिष्टुप्। होता ब्रवीति;—हे 'अध्वर्यो!' एहि 'प्रति गृणीहि' 'शंसाव' आवां सुभावपि; न ह्यप्रतिगीर्यमाणं शस्यते, नाप्यशस्यमानं प्रतिगीर्यते†; एव मितरेतरोपकारकत्व मभिप्रेत्योक्तं द्विवचनम्,—'शंसाव' इति। एव मितरेतरगुणसम्पन्न मेतद् 'वाहः' स्तोत्रं 'कृणवाव' आवाम्‡। स्तोम एव हि देवानां वोढा भवति§। "वाहिष्ठो वां हवानां स्तोमः। (ऋ० सं० ६, २, २९, १)"—इति, "वोढृतमो ह्यानानां स्तोमः"—इति हि वक्ष्यति॥। एव मिय मभिवहनस्तुतिः। एव मेतच्छस्त्र माभिमुख्यगामि 'इदम्', 'इन्द्राय' इन्द्रार्थम्, 'जुष्टम्' प्रियम्, तस्य यथा स्यात् तथा कुर्वः। अन्ये त्वेनाम् "अधिषवणप्रवादां" सोमाभिषवणप्रवादिनीं स्तुतिं मन्यन्ते; वाहःशब्दो हि उदकवाहाभिधानमारूप्यात् तत्र युक्तरूपतर इति कृत्वा यदा पुनरेवं, तदैव मर्थो योज्यः;—'इन्द्राय' 'इदं' 'वाहः' सोमोदकपूर्णं मधिषवणफलकाख्यं वाहः 'जुष्टं' प्रियं यथा स्यात् तथा कुर्वः। तद्धि सु'शस्तं' सुप्रतिगीर्णञ्च इन्द्रस्य प्रीतिजनकं भवति। एतदेव कर्त्तव्य मावाभ्यां यतः, अतो ब्रवीमि;—'एतं बर्हिः यज-

---

* 'शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम्। एतं बर्हिर्यजमानस्य पीदाथो च भूदुक्थ मिन्द्राय शस्तम्॥" ऋ० सं० ३, ३, १९, ३।

+ चोदवचनं शंसनम्, अध्वर्युवचनन्तु प्रतिगरण मुच्यते। यथा च "दैवो मित्यध्वर्युः प्रतिगृणाति पश्चात्तरेण"—इति ऐ० ब्रा० ३, ९, १।

‡ "यद्वाव स तत्र यथा भाजनं देवता अभ्यु मावहाभ्यु मावहेत्यावाहयति, तदेव होतुर्होतृत्वं, होता भवति, होतेत्येन मावहति"—इति ऐ० ब्रा० १ १, १।

§ "येनैवाध्वर्युर्यजुषा प्रयच्छति, तेन होता प्रतिगृणाति"—इति ऐ० ब्रा० २, ४, २।

॥ इत उत्तरस्मिन्नेवाध्याये (पञ्चमे) २पा० १ख०।

मानस्य सीद' एतद् बर्हिः, यदेतदगतगतस्तीर्णं मग्नेण होतारं बर्हिः 'सीद' "स प्रतिगरायोपविशति"—इति ह्युक्तम्*, 'यजमानस्य' अभिप्रेतकामावाप्तये आसीद। मा अवमंस्थास्थिरेणैतच्छंस्यत इति, उपविष्टस्येत् त्वं ममाग्रतः। 'अथ' अनन्तर मेव 'भूद्' भवति। 'उक्थं' शस्त्र मेतत्, इन्द्रार्थं शस्त्रम्; नात्र मम वाङ्मृषेत्यभिप्रायः। एव मिय मभिवहनस्तुतिः, अथवा अधिषवणप्रवादा स्तुतिः; उभयथापि तु दृयम् "ऐन्द्री त्वेव शस्यते" इद मेवैक मभिधान मत्र व्युत्पाद्यत इत्यभिप्रायः॥

"परिनक्त्या(२७)"—"इति"†। "एत दुपरिष्टाद् व्याख्यास्यामः‡" षोड़शाध्याये §; तत्र हि एतत् "कि मिच्छन्ती सरमा प्रेद मानट (ऋ० सं० ८, ६, ५, १)"—इत्येतस्मिन् मन्त्रे॥ प्रसक्त मायास्यतीति लाघवार्थ मुत्कृष्ट मिति॥ ८ (१६)॥

॥ इति निरुक्तवृत्तौ नवमाध्यायस्य (चतुर्थाध्यायस्य)

द्वितीयः पादः॥ ४, २.

सुविते सु इते सूते सुगते प्रजाया मिति वा। सुविते मा धा इत्यपि निगमो भवति। दयतिरनेककर्मा।

---

* "बोधामोदैवेत्यादिको हेतुत्वात्प्रजनकः प्रतिगरः" आ० ७, ११।

† १भा० १८५ पृ० १७ पं०।

‡ "परिनक्त्या रात्रिः"—इत्यादिना।

§ षष्ठाध्यायिनिघण्टुसहिते भाष्यैकादशाध्याये इति यावत्।

॥ दै० का० ११ अ० २पा० ५ख०।

नवेन पूर्वं दयमानाः स्यामेत्युपदयाकर्मा। य एक इद्विदयते वस्विति दानकर्मा वा विभागकर्मा वा। दुर्वर्त्तुर्भीमो दयते वनानीति दहतिकर्मा। दुर्वर्त्तुर्दुर्वारः विदद्वसुर्दयमानो वि शत्रूनिति हिंसाकर्मा। इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबत मश्विना तान्। अहं हि वा मृतये वन्दनाय मां वायसो दोषा दयमानो अबूबुधत्। दयमान इति। नू चिदिति निपातः पुराणनवयोर्नू चेति च। अद्या चिन्नू चित्तदपो नदीनाम्। अद्य च पुरा च तदेव कर्म नदीनाम्। नू च पुरा च सदनं रयीणाम्। अद्य च पुरा च सदनं रयीणां रयिरिति धननाम रातेर्दानकर्मणः॥ १ (१७)॥

"सुविते[२८]"—इति *। एतदनवगतम्। अनेकार्थञ्च। 'सु, इते"-इति, "सुते"—इति शब्दसमाधौ। अत्र यदा "सु इते" इति विपरिणामः, तदा "सुगते" इत्यर्थः। यदा "सुते" इति, तदा "प्रजायाम्"; सुते देवदत्ता पुत्र मिति प्रजायत इत्यर्थः। एवं 'सुविते'-इत्यत्र "सु इते, सुते" शब्दसमाधौ। तयोरेतद् यथासङ्ख्येनार्थवचनम्, "सुगते, प्रजाया मिति"। "सुविते मा धाः"-इत्यपि निगमः†। "अनाधृष्ट मस्य नादृष्यं देवाना मोजो अभि

* १भा० ३९९ पृ० २पं०।

† तैत्तिरीये, काण्व-शाखायाञ्च द्रष्टव्यः। माध्यन्दिन्यां तु "खिते मा धाः"—इति श्रूयते, अन्यास्च सन्ति तत्र बहवः पाठभेदाः (५, ५)।

शस्तिपाः। अनभिशस्त्यञ्जसा सत्य मुपगेषां सुविते मा धाः" *—इति। अनेन तानूनप्त्रं संस्पृशते †। हे तानूनप्त्र! 'अनाधृष्ट मसि' अनाधर्षित मसि; त्वयि स्पृष्टे समयोपयन्तिता ह्येते नान्योऽन्यस्मिन् ‡ द्रोह मुपयास्यन्त्यृत्विजः। कुतः पुनरेतत् सामर्थ्यं तव? इति। इतः;—यस्माद् 'अनाधृष्यं देवाना मोजः' अनाधर्षणीयं त्वम्। ओजो बल मित्यर्थः। किञ्च; 'अभिशस्तिपाः' अभिशंसनान् पासि त्वम्। 'अनभिशस्ति' नाभिशंसनीयं केनचित्, अनवद्य मित्यर्थः। 'अनु मे' 'इदं व्रतं व्रतपतिः' 'मन्यताम्' अनुमन्यताम् 'इदं व्रतं' कर्म, 'व्रतपतिः' अग्निः। 'मे' मयोपेयमानाम् एनां 'दीक्षाम्' 'अनुमन्यताम्' 'दीक्षापतिः' सोमः। किञ्च; 'अञ्जसा' अनन्तर्हितम्, अहम् 'सत्यम्' 'उपगेषम्' उपगतवान्। योऽहं मेतदस्मृगम्, स त्वं हे तानूनप्त्र! एव मुपगतवन्तं मां 'सुविते' सुगते स्थाने, यत्र गतानां शोभनं गतं भवति, तत्र धेहि; अथवा प्रजायां जनयितव्यायां धेहि, यथा बह्वपत्या स्याम तथा कुर्वित्यर्थः ‖॥

"दयति(१९)"—इति ‖। एष शब्दः "अनेकार्थो" अनेकार्थः;

---

* काण्वशाखीयपाठ एषः।

† तदेतद्विधायकं ब्राह्मणम्;—"तनूनपातं यजति। प्राणो वै तनूनपात्; स हि तन्वः पाति, प्राणमेव तत् प्रीणाति—प्राणं यजमाने दधाति"॥—इति ऐ० ब्रा० १, १, ४। "ते वरुणस्य राज्ञो गृहे तनूः सञ्यदधत; ते यद् वरुणस्य राज्ञो गृहे तनूः सञ्यदधत, तत् तानूनप्त्र मभवत् तत् तानूनप्त्रस्य तानूनप्त्रत्वम्"—इति च ऐ० ब्रा० १, ४, ७।

‡ "नान्योऽन्यस्मै" क, ख।

§ तैत्तिरीयपाठानुसारेणैवेदं दृष्टिपथद्-आख्यानं बोध्यम्। स चैवम्—"अनाधृष्ट मस्यनाधृष्यं देवानां मोजो अभिशस्तिपाः। अनभिशस्तीद् मनु मे व्रतं व्रतपतिर्मन्यता मनु मे दीक्षां दीक्षापतिरञ्जसा सत्य मुपगेषꣳ सुविते मा धाः॥"—इति।

‖ १भा० ६९९ पृ० ७पं०।

नत्वनेकविकल्पप्रकृतिः,—यथा सुविते-शब्दस्य अन्येनान्येन धातुना विगृह्यानेकार्थत्व मुक्तम्;—दृणा विगृह्य "सु दृते"—इति गत्यर्थत्वम्, सृतिना विगृह्य "सूते"—इति च प्रजार्थत्वम्; नैव मिह। किन्तर्हि? एकप्रकृतेरेवायं शब्देऽनेकार्थो भवतीत्यस्य विशेषस्योपद्योतनार्थ मुदाहरति। एव मुच्यमानेऽप्यनेकार्थत्वे दयतिरनेककर्मैवेत्येव मुक्तम्। अन्ये तु ब्रुवते;—यथा "सुविते"-शब्देऽनेकार्थोऽनवगतसंस्कारश्च, नैव मयम्। किन्तर्हि? अनेकार्थ एवाय मिति॥

एव मनेकार्थत्वं प्रतिज्ञाय उदाहरणेनैवोपपादयति;—"नवेन पूर्वे दयमानाः स्याम"—"इति" एतस्मिन् मन्त्रे दयतीत्येष शब्दः "उपदयाकर्मा"। उपदयेति रक्षण मुच्यते। 'नवेन' धान्येन 'पूर्वे' पुराणं 'दयमानाः' रक्षन्तः 'स्याम', पुराणेन च नवम्; दृष्टं हि नवेन पुराणस्य च रक्षणं, पुराणेन च नवस्य; प्रसिद्धं च लोके। तस्मादिहाय मुपपद्यते उपदयाकर्मा। चतुर्दैवेऽध्याये इत्यस्य शेषः*॥

"य एक इद् विदयते वसु"—"इति" † एतस्मिन् मन्त्रे "दानकर्मा वा, विभागकर्मा वा"। "य एक इद्०—०इन्द्रो अङ्ग" ‡। राऽगणस्य गोतमस्यार्षम्। ऐन्द्री। उष्णिक्। 'यः' इन्द्रः 'एकः इद्' एक एव स्वतन्त्रः 'वि' विविधं 'वसु' धनं 'दयते' ददाति। कस्मै? 'मर्त्ताय' मनुष्याय। किंलक्षणाय? 'दाशुषे' दत्तवते हवींषि। अथवा विभागकर्मा। 'दाशुषे' 'वसु' 'विदयते' विभजते

---

* दै० का० ९, ४, ९।

† ऋ० सं० १. ९. ९, २।

‡ "य एक इद् विदयते वसु मर्त्ताय दाशुषे। ईशानो अप्रतिष्कुत इन्द्रो अङ्ग"॥

इत्यर्थः। किंलक्षणः पुनरिन्द्रो ददाति, विभजते वा? इति। उच्यते;—'ईशानः' ईश्वरः, 'अप्रतिष्कुतः' अप्रतिस्खलितः सङ्ग्रामेषु। 'इन्द्रः', 'अङ्ग' क्षिप्रं धनं ददाति, विभजते वा, 'दाशुषे' यजमानाय; त महं स्तौमि; सोऽस्माक मेतत् करोत्वित्यभिप्रायः। ईशानः, इन्द्रः, अन्यत्र दानविभागार्थां दाशुषे यजमानाय वस्तेकवाक्ये श्रूयमाणं किं मन्यत् कुर्यात्? तस्माद् वाक्यसामर्थ्यादत्र "दानकर्मा वा विभागकर्मा वा"—इत्युपपद्यते॥

"दुर्वर्त्तुर्भीमो दयते वनानि"—"इति" * एतस्मिन् मन्त्रे "दहतिकर्मा"। निगमप्रसक्तं निर्ब्रवीति;—"दुर्वर्त्तुः दुर्वारः" दुर्वारणीय इत्यर्थः। "अध जिह्वा०—०दयते वनानि" †। आग्नेयी। भरद्वाजस्यार्षम्। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। उपज्वलितस्याग्नेः 'अध' अथ, अनन्तर मेव तस्य 'जिह्वा' ज्वाला दारुषु 'पापतीति' पुनः पुनः पतति, 'प्रवृष्णः' प्रवर्षितुः इन्द्रस्य 'गोषुयुधः' गवार्थं वादे पणिभिः सह असुरैर्युध्यते; अथ वा 'गोषु' अपसु, मेघेन सह युध्यत इत्यर्थः। 'न'—इत्युपमा; इन्द्रस्य गोषु युध्यत इव। 'अशनिः' 'सृजाना' तेनैव सृज्यमानो यथा पतति अशनिर्वज्रः, तथा अग्नेर्ज्वाला दारुषु पापतीति। किञ्च; 'भूरेरस्येव प्रसितिः क्षातिरग्नेः'। यथा कस्य चिद् 'भूरेरस्य' विक्रान्तस्य वा अप्रतिहतगतेः 'प्रसितिः' प्रसहनं सङ्ग्रामानुप्रवेशमार्गः छिन्नभिन्नरुग्णैः

---

* ऋ० सं० ४, ६, ८, ५।

† "अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो अशनिः सृजाना। भूरेरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि॥"

शत्रुभिः प्रकीर्णः स्यात्, एव मस्य 'अग्नेः' 'ज्ञातिः' दहनमार्गः, ईषत्-सुष्टार्द्धदग्धभस्मीभूतैर्वृक्षैर्गुल्मादिभिराकीर्यते। कदा पुनरेतद् भवति? 'दुर्वर्तुः' दुर्वारः, दावाग्नीभूतः, 'भीमः' सर्वप्राणिभयङ्करो यदाय मग्निः 'दयते' दहति। किम्? 'वनानि'। एव मय माग्नेये मन्त्रे वनशब्दसन्निकर्षे श्रूयमाणे दयतिशब्दो दहनादन्यत् कि मभिद-ध्यात्? तस्मात् सामर्थ्यादिहायं "दहनकर्मा"—इत्युपपत्तिः॥

"विदद्वसुर्दयमानो विशत्नून्"—"इति"* एतस्मिन् मन्त्रे "हिंसा-कर्मा"। "इन्द्रः पूर्भि०—०आपृणद्रोदसी उभे"†। विश्वामित्रस्येय मार्षम्। त्रिष्टुप्। उद्गिद्वलभिदोर्निष्केवल्ये निविद्धानीयस्य सूक्तस्य प्रथमैवेयम्। 'इन्द्रः', 'पूर्भित्' असुरपुरां मेघानां वा भेत्ता; अद्भिः पूर्णा अपो वा पालयन्तीति मेघाः, पुरः; "पॄ पालनपूरणयोः (क्र्या० प०)"—इत्येतस्य। 'आतिरत्' आभिनत्। 'दासं' दासयितव्यं मेघम्। कैः सहायैः सह? 'अर्कैः' वृत्तैः, देवैर्माध्यमिकैर्वा‡। किंलक्षणः पुनरसाविन्द्रः, य आतिरत्? 'विदद्वसुः' प्राप्तधनः। किं कुर्वन् आतिरत् दासम्? 'दयमानः' विविधं हिंसन् 'शत्नून्' ये मेघबन्धप्रतिबन्धिनः। आह;— किं विदद्वसुत्वेनैवैकेन गुणेन युक्तो य इन्द्रः, स एतदकरोत्? नेत्युच्यते;—'ब्रह्मजूतः' च ब्रह्मणा स्तुति-लक्षणेन 'जूतः' प्राप्तः, प्रीतो वा; ब्राह्मणत्वा शरीरेण 'वावृधानः' वर्द्धमानः 'आपृणत्' आपूरयति। 'रोदसी' द्यावापृथिव्यौ उभे

* ऋ० सं० २, १, १५, १।

† "इन्द्रः पुर्भिदातिरद्दास मर्कैर्विदद्वसुर्दयमानो विशत्नून्।
ब्रह्मजूतस्त्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे॥"

‡ परस्ताद् वक्ष्यति,—"अर्को देवो भवति"—इत्यादि ५, १, ४।

अपि। 'भूरिदाव्नः' बहुदानश्च इन्द्रो दास मातिरत्। एव मत्र "विदद्वसुर्दयमानो विशंविशम्"—इति शत्रुसन्निधौ दयतेः किं मन्यत् सामर्थ्यं सुपपद्येतान्यत्र बधात्?

"इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबत मध्विना तान्। अहं हि वां भूतये वन्दनाय्य मां वायुषो दोषा दयमानो अबुबुधत्"—इति। "दयमान इति"। अत्र दयतिर्गत्यर्थः। दयमानोऽङ्गीयमानः काकोऽन्तरिक्षेणाधस्तात् मां सुप्तं दोषाया मबोधयत्*। मृग्योऽत्र शेषः॥

"नू चित्(१०)"—इति†। एषः "निपातः" अनेकार्थत्वेनेह समाम्नातः। न हि निपातानां प्रकृतिप्रत्ययादिसंस्कारोऽस्ति, यस्यानवगतं स्यात्। स च पुनरयं "पुराणनवयोः" अर्थयोर्वर्त्तते। प्रकरणोपपदवशात् पुराणतां कस्य चिदर्थस्यावद्योतयति, नवतां च कस्य चित्॥

"नू च(११)"—"इति च"‡। अत्र मपि पुराणनवयोरर्थयोर्वर्त्तते। अयन्तु नू चिदित्येतस्यैवार्थसामान्यप्रसङ्गादसमाम्नात एवोदाहृतः§॥

नू चिदित्यस्योदाहरणम्;—"अद्या चिन्नु०—०रजांसि"‖। भरद्वाजस्येयं मार्षम्। चिष्टुप्। उक्थपर्यायेष्वच्छावाकस्य शस्त्रे माध्यन्दिने

---

* "पुरा श्यकुनियादादनुसूयान्निर्ऋतेर्वा एतन्मुखं यद् वयांसि यच्छकुनयः"—इति ऐ० ब्रा० २, १, ५।

† १भा० ३९९ पृ० १५ पं०।

‡ १भा० ३९९ पृ० १५ पं०।

§ वयन्तु सर्वपुस्तकेषु समाम्नात एव पश्यामः। १भा० ३८८ पृ० १० पं० (११)।

‖ "अद्या चिन्नू चिन्नदपो नदीनां यदाभ्यो अरदो गातु मिन्द्र। नि पर्वता अयासदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि॥"—इति ऋ० सं० ५, ७, १, १।

सवने विनियुक्ता। 'अद्य' च पुरा च, तदेव कर्म 'नदीनां' वर्त्तते। कतमत्? 'तत्' उद्दिश्य वहनं कर्म। कथं नाम? अस्य लोकस्योपकारायाजस्र मेता वहेयुरिति। 'गातुं' गमनमार्गम् 'आभ्यः' नदीभ्योऽर्थाय त्वम् 'अरदः' अखनस्त्वम्। किम् गमनम्? गच्छन्त्यनेनेति गमनम्। हे 'इन्द्र!' तदेव कर्माद्यापि वर्त्तते, तासां नदीनाम्, यथा व्यादिष्ट मेव 'त्वया'। ताभिरद्यापि तदनुष्ठीयत इत्यभिप्रायः। यदुक्तं पुरस्तादपि; "इन्द्रो अस्माँ अरदत्"—इत्यत्र*। एवं तावदयं त्वयैव नद्यधीनेनोपकारेणानुगृह्यते लोकः। किञ्च; 'निपर्वता अह्नसदो न सेदुः'। य एते 'पर्वताः' पर्ववन्तो मेघाः, 'अह्नसदः' निष्पादयितव्य मन्न मस्माभिरित्येतदर्थं मुद्दिश्यान्तरिक्षे लोके सीदन्ति, अवतिष्ठन्ते, गच्छन्ति वा; तेऽपि युष्मद्वीर्योपमृदिता एवोदकभृताः, नीचैर्भूत्या मत्र, निष्पत्त्यर्थं 'सेदुः' सीदन्तीत्यर्थः। तदेवं कृत्वा (किं बहुना†) सर्वथाप्युदकप्रदानद्वारेण त्वयैवैतानि, हे 'सुकर्मन्'! 'दृढ़ानि' दृढ़ीकृतानि 'रजांसि' लोका इत्यर्थः। त्वच्चेदेषा मेव मन्न मुदकञ्च न व्यधास्यः, सर्व एवैते लोका नाभविष्यन्नित्यभिप्रायः। इदाद्यैतस्य सन्निधौ वर्त्तमानो नूचिदित्येष पुराणाभिधायीत्युपपद्यते। इह पुराणनवयोरित्युक्तम्‡, तत्र पुराणाभिधायित्वस्यैतदुदाहरणम्; नवाभिधायिनो "नू चिन्नु वायोरमृतं वि दस्येत्" अत्र हि वक्ष्यति;—"नवञ्च पुराणञ्चेति §"॥

---

* पु० १ अ० ७ पा० ४ ख० २४४ पृ०।
† नास्त्येतत् क-ख-पुस्तकयोः।
‡ पु० ४२० पृ० ८ पं०।
§ प० दै० का० १०, १, २।

नू चेत्यस्योदाहरणम्;—"नू च पुग०—०द्रविणोदाम्"—इति *। कुत्सस्येयं मार्षम्। पृष्ठ्यस्य षष्ठेऽहनि अग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते। 'नू च पुरा च सदनम्' अद्य च पुरा च सदनम्। कस्य? 'रयीणां' धनानाम्। किञ्च; 'जातस्य' उत्पन्नस्य 'जायमानस्य' च' अभिनिष्पद्यमानस्य भूतजातस्य 'चाम्' निवास मित्यर्थः। "तस्मात् सर्वानृतून् पशवोऽग्नि मभिसर्पन्तीति विज्ञायते" †। "यच्च गां शयानां निर्जगाति मृता मेता मद्दिद्वान् मन्यतेऽन्वग्नौ ह्येवैते प्रविशन्तीति च विज्ञायते" ‡। तस्मादुपपद्यते स्थानत्वं निवासत्वं चाग्नेः। 'सतश्च' निष्पन्नस्य भूतजातस्य § 'गोपां' गोप्तारम्, 'भवतश्च' उत्पद्यमानस्य 'भूरेः' बहुनः, गोप्तार मित्यनुवर्त्तते। य एवंलक्षणोऽग्निस्तं 'द्रविणोदां' धनस्य दातारम्, 'देवाः' 'धारयन्' धृतवन्त इत्यर्थः। क्व? हविर्वहनकर्मणि? "अथा देवा दधिरे हव्यवाहम्"—इति वक्ष्यति ॥। एव मिह पुरा चेत्यस्य सन्निधौ नू चेत्येष शब्दो वर्त्तमानो नवाभिधायीत्युपपद्यते। पुराणाभिधायित्वे पर्येष्य मस्योदाहरणम्॥ १ (१७)॥

विद्याम तस्य ते वय मकूपारस्य दावने। विद्याम तस्य ते वय मकुपरणस्य दानस्यादित्योऽप्यकूपार ¶ उच्यते

---

* "नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च चाम्। भूतस्य गोपां भवतश्च भूरेर्देवा अग्निं धारयन् द्रविणोदाम्।" ऋ० सं० १. ७ ४, १।

† "षड् वा ऋतवः; ऋतूनेव तत् कल्पयति।"—इत्यादि च ऐ० ब्रा० २, १, ६।

‡ "गौर्वै देवानां मनोता"—इत्यादि च द्रष्टव्यम् ऐ० ब्रा० १, १, १०।

§ "निष्पन्नभूतजातस्य" ग।

॥ ऋ० सं० ५, २, १४, ४।

¶ "ऽप्यकूपारो"—इति च।

ऽकूपारो भवति दूरपारः समुद्रोऽप्यकूपार उच्यतेऽकूपारो भवति महापारः कच्छपोऽप्यकूपार उच्यतेऽकूपारो न कूपमृच्छतीति कच्छपः कच्छं पाति कच्छेन पातीति वा कच्छेन पिबतीति वा कच्छः खच्छः खच्छदोऽय मपीतरो नदीकच्छ एतस्मादेव कमुदकं तेन छाद्यते। शिशीते शृङ्गे रक्षसे विनिक्षे। निश्यति शृङ्गे रक्षसो विनिक्षणाय * रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति † वा राचौ नक्षत इति वा। अग्निः सुतुकः सुतुकेभिरश्वैः। सुतुकनः सुतुकनैरिति वा सुप्रजाः सुप्रजोभिरिति वा। सुप्रायणा अस्मिन् यज्ञे विश्रयन्ताम्। सुप्रगमनाः॥ २ (१८)॥

"दावने(११)"—इति। एतदनवगतम् ‡। "दानस्य"—इत्यवगमः। "अकूपारस्य(१२)"—इति §। एतदनवगतम्। अनेकार्थम्। "अकूपरणस्य"—इत्यवगमः। द्वयोरप्येतयोरेक एव निगमः; "यन्मन्यसे वरेण्य०—० मकूपारस्य दावने॥"। अत्रेर्भीमस्येव मार्षम्। अच्छावाकस्य तार्तीयसवनिके आवापे नियुक्ता; "यदिन्द्रचित्र"—इति, ¶ द्वयच्च। हे 'इन्द्र!' 'यत्' 'मन्यसे' जानीषे त्वं 'वरेण्यं' वरणीयम्,

* "विनिक्षणनाय" क, ख।

† "क्षणो भवतीति" क।

‡ १भा० ९९१ पृ० १८ पं०।

§ १भा० ९९७ पृ० २ पं०।

॥ "यन्मन्यसे वरेण्य मिन्द्र युध्यं सदा भर। विद्याम तस्य ते वय मकूपारस्य दावने॥"—इति ऋ० सं० ४, १, १०, १।

¶ ऋ० सं० ४, १, १०, १।

एतद्धन मिति; 'द्युत्तं' च, यत् द्युतिनिवासभूतम्, द्युतिमदित्यर्थः। 'तद्' अस्मभ्यम् 'आहर'। कदाचित् त्व माहृत्यापि न दद्याः? अतो ब्रूमः;—'तस्य' त्वयाहृतस्य धनस्य 'विद्याम' लभेमहि 'ते' तव स्वभूतस्य। किंलक्षणस्य? 'अकूपारस्य' "अकूपरणस्य" अकुत्सितपूरणस्येत्यर्थः। येन लब्धेन सुपूर्ण मात्मानं मन्यामहे पर्याप्त मैहिकाय च श्रेयसे आमुष्मिकाय चेत्यर्थः। 'दावने' "दानस्य" इत्यर्थः। ईदृशस्य भावत्कस्य धनस्य * वय मेव लब्धारः स्यामेत्यभिप्रायः। एव मिह यन्नान्यसे वरेण्यं, द्युत्तच, तदाभरेति इन्द्र उच्यमानो धनसन्निधानाद् दानादन्यत् किमुच्यते? धन मेव हि प्रायेण मनुष्यैः प्रार्थ्यते; तस्माद्चाऽ्यमाणोऽपि धनशब्दोऽध्याहृतः। तच्च पुनः प्रार्थ्यमानं बहु प्रार्थ्यते। तस्मादकूपारस्येत्येष शब्दोऽतिपरोक्षवृत्तिः। "अकुपरणस्य"—इत्येवं परोक्षवृत्तित्वेनावस्थाप्य, ततः अकुत्सितपुरणस्य—इत्येवं प्रत्यक्षवृत्तित्वेन व्याख्यायते। अत्र कुरिति कुत्सार्थः, परणं पूरण मुच्यते; कुत्सितं परणं 'कुपरणम्', न कुत्सितं परणं 'अकुपरणम्'; तस्य "अकुपरणस्य" प्रभूतस्येत्यर्थः॥——॥ दानसम्बधादेव "दावने"—इत्येष शब्दो दानार्थ इत्युपपत्तिः। एतस्मिन् मन्त्रे "अकूपारस्य, दावने"—इत्यय मनयोः पदयोरनुक्रमः; समाम्नाये पुनः† "दावने, अकूपारस्य"—इति मन्त्रपाठव्यतिक्रमेणानुक्रमः‡। तेन ज्ञायतेऽन्यैरेवाय मृषिभिः समाम्नायः समा-

---

* "दानस्य" ग।

† "समाम्नाये तु" ग।

‡ तथा हि;—४अ० १ख० (१भा० ६८८ पृ० १० पं०) द्रष्टव्यम्।

म्नातः*, अन्य एव चायं भाष्यकार† इति; एको हि समाम्नानं भाष्यं च कुर्वन्, प्रयोजनस्याभावादेकमन्त्रगतयोः पाठानुक्रमं नाभङ्क्ष्यत्। अविवक्षितार्थाश्चैते मन्त्रे‡ निगमाः, तेषु सम्पन्या काकतालीयन्यायेन§ कस्मिंश्चिदेकस्मिन्नेव निगमे द्वे पदे आगच्छतस्ते यथोपागते एव भाष्यकारो व्याचष्टे इत्यदोषः॥

"आदित्योऽप्यकूपारः"—इति "उच्यते"। किं कारणम्? स हि अकुत्सितस्य महतोऽध्वनः पारयिता भवति; उदयादारभ्य यावदस्तमिति। "समुद्रोऽप्यकूपार उच्यते", असावपि ह्यकुत्सितपारः आत्मनैव भवति। "महापारः"—इति पर्यायेणार्थवचनम्; विस्तीर्णपार इत्यर्थः। "कच्छपोऽप्यकूपार उच्यते" स हि "न कूपमृच्छति" अल्पोदकत्वात्; किं तर्हि? यत्र बहु प्रकीर्णमुदकम्, तत् स्थानं गन्तुमिच्छति, समुद्रं नदीं वा। आख्यानप्रसक्त मुच्यते;—"कच्छपः", "कच्छम्" आत्मनो मुखसम्पुटं "पाति" रक्षति; स हि किञ्चिद् दृष्ट्वा स्वशरीरे एव मुखसम्पुटं प्रवेशयति; सम्पुटे हि

---

* इह समाम्नायशब्देन 'निघण्टु'-नाम समाम्नायो बोद्धव्यः, वेदाङ्गेष्वपि वेदवद्ब्राह्मणादेष्वपि समाम्नायशब्दः प्रयुक्तोऽत्र दृष्टिक्षता, एतद्ब्राह्मणारम्भे यास्केनापि।

† भाष्यकारो यास्कः।

‡ "मन्त्रा" क, ख।

§ एवञ्च "गौः, ग्मा, ज्मा (१भा० ६४० ५पं०)"—इत्यादिपदसमाम्नायो न यास्ककृत इत्यर्थः फलितः।

‖ काकागमनं तालपतनञ्चेति युगपत् सम्भूतं काकतालीयं मुच्यते।

¶ प्राचीनपुस्तकेषु सर्वत्रैव "कक्षपो"—इति, अर्वाचनीयेषु तु सर्वत्रैव "कच्छपो"—इति; एव मन्यत्रापि क्ष-विशिष्टपदमात्रे द्रष्टव्यते। लिपिभेद एवास्य कारणमनुमीयतेऽस्माभिः; अस्ति च पूर्वतनीयार्वाचनीययोः 'क्ष'-वर्णयोराकारभेदस्तथा चार्वाचनीयानां 'क्ष' एव प्राचीनानां 'क्ष' इति गम्यते।

कच्छशब्दः प्रसिद्धः, प्राणिवाच्यः कच्छपुट इति च। "कच्छेन" कटाहेन इतराण्यङ्गानि पातीति वा; स हि किञ्चिद् दृष्ट्वा सर्वाण्यङ्गानि कटाह एवानुप्रवेश्य कूर्मवेनैवावतिष्ठते*। अथ "वा" "कच्छेन" मुखसम्पुटेन "पिबतीति" कच्छपः। विग्रहप्रसक्तः कच्छशब्दो निरुच्यते;—य एष कच्छो मुखसम्पुटः कटाहो वायं कच्छः, आह किमुक्तं भवति? "खच्छः"—इत्युच्यते; स हि "खच्छदः" खम् आकाशं छादयति, स हि मध्ये सुषिरो भवति। "अय मपीतरो नदीकच्छ इतस्मादेव" क-सञ्ज्ञकेन उदकेन "छाद्यते" इति कच्छः †॥

आदित्योऽप्यकूपारः ‡, समुद्रोऽप्यकूपारः, कच्छपोऽप्यकूपार;—इत्येतेषु निगमाः पर्यायाः॥

"शिशीते(२४)"—इति §। एतदनवगमम्। "निशयति",—इत्यवगमः। "वि ज्योतिषा ०—०विनिचे ॥"—इति निगमः। वृषो नाम जनपुत्रस्यैष मार्षम्; आत्रेयस्य वा कुमारस्य; उभयोर्वा। प्रातरनुवाकाश्विनयोः शस्यते। 'वि भाति' 'अग्निः' नानाप्रकारं भाति। केन? 'बृहता ज्योतिषा'। स एवं विभासमानः किं करोति? 'आविर्विश्वानि कृणुते'; 'आविष्करोति' प्रकाशीकरोति 'विश्वानि' सर्वाणि भूतानि। 'महित्वा' महत्त्वेनेत्यर्थः। किञ्च;

---

* "कूर्मवन्नैवावतिष्ठते"—इति क, ख।

† "पुंसि कच्छस्तथाविधः"—इत्यमरः २, १, १०।

‡ "अकूपारः सलिलो मातरिश्वा (ऋ० सं० ८, ६, ७, १)"—इत्यस्य व्याख्यानावसरे "अकूपितपारो महागतिरादित्यः"—इत्याह सायणः।

§ १भा० १९७ पृ० १० पं०।

॥ "वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा। प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिचे॥" ऋ० सं० १, ८, १५, १।

"प्रादेवीर्मायाः सहते"; 'प्रसहते' प्रकर्षेणाभि भवति। किम्? 'अदेवीर्मायाः' आसुरीरित्यर्थः। 'दूरेवाः' दुरवाः, दुस्तर्पा वा *; न ह्यग्नेस्तृप्तिरस्ति। किञ्च; 'ग्रिश्रीते प्रष्ट्रे' यथा हि वृषभस्तटान्निघ्नन् प्रष्ट्रे तीक्ष्णीकरोति, एव मग्निरपि दारूणि दहंस्तीक्ष्णीकरोति ज्वालाः। क मर्थं पुरस्कृत्य? "रक्षसो विनिक्षणाय" विहिंसनायेत्यर्थः॥ अत्र प्रष्ट्रशब्दसन्निधानात् "ग्रिश्रीते"—इत्यस्य तीक्ष्णार्थत्वम्, तीक्ष्णीकृतैर्ह्यर्चिभिर्विनिक्षणेन सुपपद्यत इति॥ निगमप्रसक्त मुच्यते;—"रक्षः रक्षितव्यम्" हि शरीर मस्माद्भवति, रक्षो हि † मानुषान् भक्षयति। "रहसि वा" विविक्ते प्रदेशे रक्षः "क्षणोति" हिनस्तीत्यर्थः। "रात्रौ नक्षते" गच्छति—"इति वा" रक्षः॥

"सुतुके(२५)"—इति ‡। एतदनवगतम्। पक्षेण चानेकार्थम्। "सुतुकनः"—इत्यवगमः; "सुतुकनैरिति वा"। "स आ वक्षि ०—० इह गम्याः"—इति निगमः §। चितस्येव मार्षम् आर्षस्य। प्रातरनुवाकाश्विनयोः शस्यते। यस्यं 'दिवस्पृथिव्योः', 'युवत्योः' सन्धिश्रीभवन्त्योः यानि भूतानि अन्तरा वर्त्तन्ते, तेषां सर्वेषाम् 'अरतिः' त्व मेवालमतिः, पर्याप्तमतिरित्यर्थः। 'स' एवंलक्षणस्य मस्माकम् 'आ वक्षि' आवहयसि देवान्॥; 'महि' महत इत्यर्थः। स एवम् 'आ सत्सि च' आसी-

---

* "दुस्तृप्ता वा" क, ख।

† "तद्धि रक्षो" ग।

‡ १भा० १९७ पृ० १२ पं०।

§ "स आ वक्षि महि नः आ च सत्सि दिवस्पृथिव्योरतिर्युवत्योः। सन्धिः सुतुकः सुतुकैभिरस्मे रयस्वन्ती रयस्वाँ इह गम्याः॥"—इति ऋ० सं० ७, ५, २१, ७।

॥ "एताभिर्वै देवान् यजमानो कर्यति, तदाऊतीना माऊतित्वम्"—इत्यादि ऐ० ब्रा० १, १, १ द्रष्टव्यम्।

दर्शि च होटत्वे। 'अग्निः'—इत्येतत् पदं सम्बोधनत्वेन * विपरिणम्यते, 'आ वक्षि'-'आ च सत्सि'—इति मध्यमपुरुषयोगान्मन्त्रस्य। हे अग्ने! यस्त्वमेवङ्गुणयुक्तः 'सुतुकः' "सुतुकनः" सुगमन इत्यर्थः; अथ वा "सुप्रजाः"। तुगित्यपत्यनामसु पठितम्† । हिरण्मपत्य मभिप्रेत मग्नेः; "हिरण्यरेता अग्निः"—इति श्रूयते ‡, "अग्नेरपत्यं प्रथमं सुवर्णम्" —इति च §। 'सुतुकैरेव' सुगमनैरश्वैः; अथ वा "सुप्रजोभिः" कुलजैरित्यर्थः। अथ वा शोभना प्रजा येषां ते सुप्रजाः; शोभनाना मेवाश्वानां शोभनाः प्रजा भवन्तीति प्रजाद्वारेण चाग्निः स्तूयते। अथवा स एवाग्निः 'सुतुकः' "सुप्रजाः"॥ अपत्यञ्चास्य सर्वाः प्रजाः, ताश्च प्रति कल्याण इति "सुप्रजाः"। 'रभस्वाग्निः' त्वरितैः 'रभस्वान्' स्वयं च त्वरितः 'एह गम्याः' आगच्छेत्यस्य मिह कर्मणि, नित्यं हवींषि वोढुम्; कर्मैव तवेद मित्यभिप्रायः। एव मेतदिह "सुतुकः"—इत्यग्निविशेषणम्, सुतुकनैरश्वैरित्येतस्मात्तृतीयासम्बन्धादित्युपपत्तिः॥

"सुप्रायणाः(२६)"—इति¶। एतदनवगतम्। "सुप्रगमनाः"—इति शब्दप्रतीतिः। यज्ञमुखद्वारोऽभिधेया यास्कमतेन, शाकपूणेस्तु अर्चिषः। "होता यक्षद्०———०होतृयज"—इति निगमः** । मैचाव-

---

* "सम्बोधनार्थत्वेन" ग।

† १भा० १७१ सू० २अ० २ख० (१)।

‡ "हिरण्यदन्तम् (ऋ० सं० २, ८, १४, २)"—इत्यादिषु बहुधेति ज्ञेयम्।

§ "अग्निर्वैश्वानरः प्राच्यावयत्, तस्य यद्रेतसः"—इत्यादि च रे० ब्रा० २, २, १०।

‖ "सुतुकप्रजाः"—इत्येकपदं ग-पुस्तके।

¶ १भा० २९७ सू० १८ पं०।

** "होता यक्षदुरुण्या: कवयोऽकोषधावनीरदाताभिर्जिह्वाभिर्यज्ञं सुप्रायणा अस्मिन् यज्ञे विश्वयजा सृतावृधो व्यन्त्वाज्यस्य होतुर्यज॥"—इति य० का० सं० (वा० सं० २८, ५)।

ह्णो* ब्रवीति ;—'होता यक्षत्' होता यजतु। किम्? एताः 'दुरः' यज्ञगृहद्वारः ; अथवैता अग्न्यर्चिषः। 'कव्याः' मेध्याः ; अथवा हिंसाः ; द्वार्येव हि यो निवारणीयः, स हिंस्यते ; अर्चिषान्तु हिंसत्व मुपपद्यत एव। 'कवयः' विकर्त्तिताः, कुषिताः† इत्यर्थः ; कपाटवत्यो वा यज्ञगृहद्वारः। 'अकोषधावनीः' अकोशधावनीः ; तासु हि संवृतासु द्रव्यकोशाः सुरक्षा भवन्ति ; अर्चिष्यपि हविः प्रक्षिप्तं नान्यतो धावति, किं तर्हि? देवानेव प्राप्नोति ; एतदकोश-धावनीत्व मर्चिषाम्। एवंलक्षणा एता द्वारः, अर्चिषो वा 'उदा-ताभिर्ऋिहताम्' ; 'उज्झितताम्', उज्झितन्तु, 'आताभिः' दिग्भिः‡ ; 'विश्रयन्ताम्' च 'पक्षोभिः' विव्रियन्ते कपाट-संवरणैः द्वारः ; अर्चिषस्तु हविषोऽनुप्रवेशार्थम् पक्षोभिः स्वैरेवावयवैर्विश्रयन्ताम्। विवृताश्च सत्यः 'सुप्रायणाः' "सुप्रगमनाः" भवन्तु ऋत्विजं प्रति द्वारः ; अथ पुनरर्चिषस्ततो हविषः सुप्रगमनाः सन्तु। सामान्य मेवेद माशास्तं यत्, पुनस्तस्मिन्नेव वर्त्तमाने कर्मण्याशास्ते ;—'अस्मिन् यज्ञे' 'विश्र-यन्ताम्' विव्रियन्ताम् 'ऋतावधः' यज्ञवर्द्धयित्र्यः। या एता एवंलक्षणा द्वारः, अर्चिषो वा ; ता अस्मा 'आज्यस्य व्यन्तु' य आसां स्वांशः, तं पिबन्तु। हे 'होतः!' त्व मपि मया प्रेषितो 'यज' एताः॥ एव-मेष 'सुप्रायणाः'—इति द्वारा मर्चिषां वा सन्निधौ श्रूयमाणः सुप्रग-मनाभिधायीत्युपपद्यते ॥ २ (१८) ॥

---

* मैत्रावरुणः चत्विग्विशेषः, स च सप्तसु होत्रेषु तृतीयः ; तस्य च पशूदक्षिण-यक्थिमांसो भागः। ऐ० ब्रा० ९, ३, १. किञ्च ७, १, १।

† "कषिताः" ग।

‡ 'आताः' दिग्भिः। ६ भा० ३९ सू० १अ० ९व० (१)।

देवा नो यथा सदमिद्धे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ देवा नो यथा सदा वर्द्धनाय स्युरप्रायुवोऽप्रमाद्यन्तो रक्षितारश्चाहन्यहनि च्यवन ऋषिर्भवति च्यावयिता स्तोमानां च्यवान मित्यप्यस्य निगमा भवन्ति। युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः। युवां च्यवनं सनयं पुरांणं यथा रथं पुनर्युवानं चरणाय ततक्षथु र्युवा प्रयौति कर्म्माणि तक्षतिः करोतिकर्मा रजो रजते ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते (रजांसि चित्रा वि चरन्ति तन्यव इत्यपि निगमो भवति*) हरो हरते ज्योतिर्हर उच्यते (उदकं हर उच्यते †) लोका हरांस्युच्यन्ते ‡। (असृगहनी हरसी उच्येते। प्रत्यग्ने हरसा हरः शृणीहीत्यपि निगमो भवति §) जुहुरे विचितयन्तः। जुह्विरे विचेतयमाना व्यन्त इत्येषो ऽनेककर्म्मा। पदं देवस्य नमसा व्यन्त इति पश्यतिकर्मा। वीहि शूर पुरोळाश मिति ॥ खादतिकर्मा। वीतं पातं पयस उस्रियायाः।

---

* क-ख-ग-पुस्तकेषु नास्त्येष पाठः; इत्यधिकतापि न व्याख्यातः।

† नास्त्येष पाठः च-पुस्तके; इत्यधिकता तु स्वीकृतः।

‡ "हरा उच्यन्ते"—इति क. ख, ग।

§ क-ख-ग-पुस्तकेषु नास्त्येष पाठः; इत्यधिकतापि न गृहीतः।

॥ "पुरोडाश मिति"—इति च-पाठः।

अश्नीतं पिबतं पयस उस्रियाया उस्रियेति गोनामोत्सा विषाऽस्यां भोगाः (उस्रेति च *)। त्वा मिन्द्र मतिभिः सुते सुनीथासो वसूयवः। गोभिः क्राणा अनूषत। गोभिः कुर्वाणा अस्तोषत (३†)। आ तू षिञ्च हरिं मीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः। आ सिञ्च हरिं द्रोरुपस्थे द्रुममयस्य हरिः सोमो हरितवर्णोऽय मपीतरो हरिरेतस्मादेव। वाशीभिस्तक्षताश्मन्मयीभिः। वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा। स शर्द्धद्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपिगुर्कृतं नः। स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः शिश्नं श्नथतेः। अपिगुर्कृतं नः। सत्यं वा यज्ञं वा॥ ३ (१९)॥

"अप्रायुवः(२७)"—इति ‡। एतदनवगतम्। "अप्रमाद्यन्तः"—इत्येव मर्थप्रतीतिः। "आ नो भद्राः क्रतवो०—०दिवेदिवे"—इति निगमः §। गोतमस्येय मार्षम्। अग्निष्टोमे महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते। 'आ यन्तु' उपयन्तु, अस्माकं 'भद्रा' भन्द्र-

---

* एष च पाठो न विद्यते क-ख-ग-पुस्तकेषु।

† इदैव तृतीयखण्डः परिसमाप्तो दृश्यते क-ख ग-पुस्तकेषु।

‡ १मा० ६९ सू० १ पं०।

§ "आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः। देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥"—इति ऋ० सं० १, ९, १५, १।

नीयाः, स्तुत्याः। 'क्रतवः' सोमक्रतवः, कामा वा। 'विश्वतः' सर्वतः, सर्वदैव यथाविहितेषु कालेषु। 'अदब्धासः' अनुपहताः, अविगुणाः, कैश्चिदपि दस्युभिः। 'अपरीतासः' अपरिप्राप्तपूर्वाः, अस्मच्छत्रुभिः। 'उद्भिदश्च' उद्भेत्तारः, एषां त्रयाणा मपि लोकानाम्; येषां फलेनैतान् चीनपि लोकानुद्भिन्दीमहि *, ते आगच्छन्तु। किञ्च; तथा च तेऽत्यर्थ मविगुणा आगच्छन्तु, 'यया' तैः परितोषिताः सन्तो 'देवाः' सदैव नित्य मेवास्माकं वर्द्धनायोद्यताः 'असन्' स्युरित्यर्थः; भाष्येऽपि † "स्युः"—इत्येष पाठः। 'अप्रायुवः' अप्रमाद्यन्तः, प्रमाद मकुर्वाणः; असम्मुह्यमाना इत्यर्थः। वर्द्धयितारो 'रक्षितारः, च। 'दिवेदिवे' अहन्यहनि यथा स्तुत्या ते सोमक्रतवः, सगुणाः कामा वा आगच्छन्तु। अत्र "अप्रायुवो रक्षितारः"—इति रक्षितृशब्देन समानार्थसन्निवेशादप्रायुवशब्दस्याप्रमादार्थत्वम्; रक्षणे हि सत्यप्रमादस्येष्टत्वात्॥

"च्यवनः(२८)"—इति ‡। एतदनवगतम्। "च्यावनः"—इत्येव मर्थप्रतीतिः। "ऋषिर्भवति"—इत्यभिधेयवचनम्, "च्यवानम्"—"इति"। एवम् "अप्यस्य" ऋषेर्भृगुपुत्रस्य § छन्दसि "निगमाः" सन्ति। च्यवन इति प्रसिद्ध मेवेति कृत्वा निगमं न पठति ‖; इतरथा त्वप्रसिद्ध मल्पप्रयोगञ्चैतदिति कृत्वा पठति;—"युवं च्यवानम् ०—०

---

* "विन्देमहि"—इति ग।

† यास्कीयेऽस्मिन्नेव निरुक्तेऽपीति यावत्।

‡ १भा० ११८ सू० ७ मं०।

§ तथा चैतरेयकम्;—"च्यवनो भार्गवः शर्यातां मानव मभिषिषेच" ८,४, ७।

‖ ऋक्संहितायाम्—१, ११९, ९०—७, १८, १०—८, २२, १;—११९, ४,—१० ११९, ५. ऋचो द्रष्टव्याः।

प्रवाच्या" * । काक्षीवत्या घोषायाः दृय मार्षम् † । प्रातरनुवाकाश्विनयोः शस्यते। अश्विनावुच्येते ;—हे अश्विनौ! "युवां", 'च्यवानम्' ऋषिं च्यावयितारं स्तोमानाम्। 'सनयं' दृद्धं गमनासमर्थं सन्तम् 'यथा' चिरन्तनं 'रथं' गमनासमर्थं कश्चिच्छिल्पी गमनसमर्थं कुर्याद्, एवं 'पुनः युवानम्' च्यवन मृषिं 'चरथाय' "चरणाय" गमनार्थम् 'तक्षथुः' कृतवन्तौ स्थ दृत्यर्थः। किञ्च ; 'निष्टौग्र्य मूहथुः' निरूहथुः, निर्हृतवन्तौ स्थः, 'तौग्र्यं' तुग्राणा मपां ‡ सङ्घातं मेघानाम् § । क्व पुनः निरूहथुः ? 'अङ्गस्यरि' चिरन्तनीना मन्यासा मपा मुपरि; अनुपक्षीणास्वेवान्यासु वार्षिकास्वप्सु, तासा मेवोपरि लोकानुग्रहार्थं मन्य मुदकसङ्घातं निरूहथुः। तान्येवमादीनि कर्माणि 'विश्वा' विश्वानि, सर्वाणि। युवयोः 'सवनेषु' यज्ञेषु; प्रातःसवनादिषु वा 'प्रवाच्या' प्रकर्षेण वचनीयानि स्तोतृणाम् ॥ एव मेतस्मिन् मन्त्रे "च्यवानः"—शब्देन च्यवन एव ऋषिरुक्तः; स हि श्रूयते सौकन्ये आख्याने ;—जीर्णः सन्नश्विभ्यां पुनर्युवाकृत दृति ॥ । तस्मादुपपद्यते ॥ निगमप्रसक्त मुच्यते ;—"युवा, प्रयौति कर्माणि" मिश्रयति। "तक्षतिः करोतिकर्मा" करोतीत्यर्थः ॥

---

* "युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः। निष्टौग्र्य मूहथुरङ्गस्यरि विश्वेत् ता वां सवनेषु प्रवाच्या ॥"—इति ऋ० सं० ७, ८, १५, ४ ।

† काक्षीवतो दुहिता घोषा नाम ब्रह्मवादिनी ऋषिः। ऋ० सं० १, ११७, ७ ;—११२, ५.—८, ९१, ७.—१०, ४०, ५ ;—९८, १ ;—१०३, १० ;—११८, ४ ऋचो द्रष्टव्याः। काक्षीवांश्चैनरेयके सुपरिचितः, तथा हि ;—"एताभिर्हाश्विनोः काक्षीवान् प्रियं धामोपागच्छत्"—इत्यादि ऐ० ब्रा० १, ४, ४ ।

‡ १भा० ९९ पृ० १च० १२ख० (२१)।

§ "सङ्घातं मेघम्"—इति ग।

॥ ऋ० सं० १, ८, ९, ५. द्रष्टव्यम्।

"रजः(३९)"—इति * । अनेकार्थम् । "रजतेः"—इति व्युत्पत्तिः ॥ "ज्योती रज उच्यते"; तद्धि अनुरञ्जयति द्रव्याणि स्वेन प्रकाशेन । "या ते अग्ने रजःशया तनूः"—इत्येवमाद्युदाहरणं द्रष्टव्यम् † । भाष्यकारस्तु प्रचुरत्वादेतेषु निगमान् न पठति ॥

"उदकं रज उच्यते"; तदपि हि स्वेन स्नेहाख्येन गुणेनानुरञ्जयति । "भुवो यज्ञस्य"—इति निगमः ‡ । हे अग्ने ! त्व मेवास्य 'यज्ञस्य' 'भुवः' पृथिवीलोकादमुं लोकं 'नेता' । 'रजसः' उदकस्य च नेता; "अग्निं वो दूतो वृष्टिं समीरयति"—इति हि वक्ष्यति § । क्व पुनर्नेता ? 'यत्र' यस्मिन् लोके 'नियुद्भिः' अश्वजातिभिः 'शिवाभिः' सुखतमाभिः सहितं 'वायुम्' अन्तरिक्षस्थानं 'सचसे' संसेवसे त्वम्, तत्र नेता, मध्यस्थानानां देवानां स्थितये । किञ्च; त्व मेव 'दिवि' अवस्थितः सर्वभूतमुर्द्धानं 'दधिषे' धारयसि । यज्ञाभिनिष्पन्नेनेतो लोकाद्धतेन ॥ हविषा 'सूः' सूराख्य मादित्यम् ¶ । किञ्च; त्व मेव एतां 'जिह्वां' ज्वालाम्** अत्यद्भुताम्, आत्मनः सकाशात् 'चक्रषे' पुनः पुनः करोषि । यः अस्मत्प्रदत्तानि हवींषि उपचिपात, यस्य मेवङ्गुणयुक्तस्त्वं त्वां वय मेतस्मिन् कर्मणि 'हव्यवाहं' हविषां वोढारम्,

---

* १भा० ३९८ पृ० १४ पं० ।

† य० वा० सं० ५, ८ ।

‡ "भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्द्धानं दधिषे सूर्यं जिह्वा मग्ने चकृषे हव्यवाहम् ॥"—इति ऋ० सं० ७, ९, ४, ९ ।

§ प० दै० का० ७अ० ९पा० १ख० ।

॥ "लोकादूढेन" ग ।

¶ पृ० ११० पृ० १अ० ४पा० २ख० ।

** "या ते जिह्वा"—इत्यस्य सायणीयव्याख्या द्रष्टव्या (ऋ० सं० १, ४, १, ५)।

अनेन पुरोडाशाख्येन 'हविषा'* यजामः। पौर्णमासस्याग्नेयस्य हविषो याज्यैषा ॥

"लोका रजांस्युच्यन्ते"; तेष्वपि हि प्राणिनो रज्यन्ते। "त्वया-दृब्हानि सुक्रतो रजांसि" (ऋ० सं० ४, ७, २, ३)—इति व्याख्यातो निगमः† ॥

"असृगहनी, रजसी उच्येते"। असृग् रुधिरम्, असृक् च अहश्च असृगहनी; ते अपि रजसी उच्येते। "मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति"—इति (?) रुधिरस्रोदहारणम्। "अहश्च कृष्ण-मरुरर्जुनञ्च"—इत्यृक्‡ उदाहरणम् ॥

"हरः(४०)"—इत्येतदनेकार्थम्§। "हरतेः"—इति व्युत्पत्तिः। "ज्योति हर उच्यते"; तद्धि ह्रियते, हरति वा स्नेहम्; विस्रंसी-करोति। हरति वा तम इति हरः। "या ते अग्ने हरःशया तनूः ॥", "अग्ने यत्ते हरस्तेन तं प्रति हर¶"—इत्येवमादयः प्रचुरा एव निगमा इति अत्रापि भाष्यकारो न पठति** ॥

---

* "पुरोडाशः खिष्टकृतो यजति, हविरेवास्मा एतत् स्वदयतीव मूर्जं मात्मन् धत्ते"—इति (ऐ० ब्रा० २, १, ९), "हविर्वा एतद् यदुत्पूतम्"—इति च (ऐ० ब्रा० २, २, ५)।

† पु० ४२५ पृ० १९ पं० "अस्माच्चिन्न"—इति मन्त्रव्याख्यानावसरे इति यावत्। ङ-च पुस्तकयोस्तु मूले एव "रजांसि चित्रा (ऋ० सं० ४, ४, १, ५)"—इति निगमो दृश्यते।

‡ ऋ० सं० ४, ५, ११, १। तत्र हि "रजसी"—इति पदस्य 'स्वस्वभासा सर्वं जगद्रञ्जयन्तौ'—इति सायणीयव्याख्यादेरात्रपरा।

§ १भा० ३९८ पृ० १५ पं०।

|| य० वा० सं० ५, ८।

¶ अथ० सं० १, १९, १।

** ङ-च-पुस्तकयोस्तु मूले एव "प्रत्यग्ने हरसा (ऋ० सं० ८, ४, ९, ५)"—इति निगमो दृश्यते।

"उदकं हर उच्यते"; तद्धि ह्रियते प्राणिभिः जीवनाय॥

"लोका हरांस्युच्यन्ते"; तेभ्यो हि क्षीणपुण्याः प्राणिनो ह्रियन्ते *॥

"जुह्वरे(४९)"—इति †। एतदनवगतम्। "जुह्विरे"—इत्यवगमः। "जुह्वरे विचितयन्तो०—०पुरं विविशुः"‡। वक्रेराचेयस्यार्षम्। जुह्वरे, जुह्विरे, जुह्वति। योऽग्निं 'विचितयन्तः' "विचेतयमानाः" कर्मकर्तृसाधनानां याथात्म्यं वेदान्तदर्शनेन जानानाः, ये च नराः 'अनिमिषम्' आदरवदवस्थान मात्मनः कृत्वा युक्तात्मानो 'नृम्णं' योगबल मात्मनः कर्मणि वर्त्तमाने 'पान्ति' रक्षन्तीत्यर्थः। आह;—ये एवं गुणयुक्ताः, किं तेषाम्? इति। उच्यते;—'आ दृढां पुरं विविशुः' ते 'दृढां' नित्यम्, अनावृत्तये परब्रह्ममयीं 'पुरम्' §, इमा मदृढां शरीरपुरं पापिष्ठां हित्वेत्यभिप्रायः॥ विचेतयमाना हि वेदप्रामाणिकाः सन्तो हवनादृते किं मन्यत् कुर्युः, येन दृढां पुर मा विशेयुः? शब्दसाम्यं मपि च "जुह्वरे"—इत्येतस्मिंश्छन्दस्येव। प्रकरणाच्चेय माग्नेयी ऋक्॥। तस्मात् "जुह्वरे"—इत्येष शब्दो हवनार्थ एवेत्युपपद्यते॥

---

* "अथातो ब्रह्मणः परिमरः"—इत्यादीतरेयान्त्यखण्डस्य द्रष्टव्यः।

† १भा० ३९९ पृ० १ पं०।

‡ "जुह्वरे वि चितयन्तोऽनिमिषं रक्षमाणं पान्ति। आ दृळ्हां पुरं विविशुः॥"—इति ऋ० सं० ४, १, ११, १।

§ "अयस्मयी मेवेमा मकुर्वन्, रजता मन्तरिक्षम्, हरिणीं दिवम्"—इत्यादि ऐ० आ० १, ४, ५।

॥ "बृहद्ग्नो"—इत्यादिदमस्कानां चतुर्थेनवमवर्जितानां प्रातरनुवाके आग्नेये क्रतावेव विनियोगदर्शनात् (आ० ४, १९)।

"व्यन्तः(४१)"—इत्येषोऽनेककर्मा *। यस्माद्धातोरयं शब्दो निष्पद्यते, स धातुरनेककर्मा, अनेकार्थः। "वी गतिप्रजननकान्त्यशनखादनेषु (अदा० प०)"—इति। तद्यथा;—"पदं देवस्य नमसा व्यन्तः ०—० रणयन्त संदृष्टौ" † इत्यत्र "पश्यतिकर्मा"। भरद्वाजस्येयमार्षम्। प्रातरनुवाकाश्विनयोः शस्यते, पशौ च विनियुक्ता। 'पदं' स्थानम्, अवस्थानं याथात्म्यम्, 'अग्नेः' 'देवस्य' दानादिगुणयुक्तस्य 'व्यन्तः' पश्यन्तो जानानाः। केन? 'नमसा' नमस्कारेण, 'स्तुत्या' मन्त्रेणेत्यर्थः। मन्त्रार्थपरिज्ञानादेव ह्यग्नेराध्यात्माधिभूताधियज्ञेष्ववस्थानं याथात्म्यतो दृश्यते। पदशब्दो हि स्थाने प्रसिद्धः‡; पदमोऽय मिति हि वक्तारो भवन्ति लोके। अथ वा 'नमसा' अन्नेन §, हविराख्येनाभ्युद्यतेनेति योज्यम्। 'अवस्यवः' अव इच्छमानाः, अन्नमात्मनः प्रार्थयमानाः। य एव मग्नेः स्तुतिभिर्विदांसो याथात्म्यम्; अन्नैर्वा अभ्युद्यतैः अव इच्छमानाः पश्यन्तोऽग्निमुपासते। किन्तेषाम्? इति। उच्यते;—'अव आपन्'। किंलक्षणं पुनराप्नुवन्ति? 'अमृतम्' अमृदितम्; अनुपभुक्तं मन्यैः। किञ्च; 'नामानि चित्'; ये चैते ग्रन्थमात्राध्येतारः, केवलच्छान्दसाः, नामान्यपि च मन्त्रभावेनावस्थितानि धारयन्ति, अनर्थज्ञाः, 'यज्ञियानि' यज्ञार्हाणि; तेऽपि 'भद्रायां' भन्द्रनीयायाम्, अग्नेः 'सन्दृष्टौ' सन्दर्शने 'रणयन्त' रमयन्त्यात्मानम्। तानपि भद्रेण चक्षुषा पश्यत्येवाग्निरित्यभिप्रायः॥

---

* १भा० ३९९ पृ० १० पं०।

† "पदं देवस्य नमसा व्यन्तः अवस्यवः अव आपन्नमृतम्। नामानि चिद् दधिरे यज्ञियानि भद्रायां ते रणयन्त सन्दृष्टौ॥"—इति ऋ० सं० ४, ४ ३५, ४।

‡ "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु"—इत्यमरः २, २, ९२।

§ १भा० २११ पृ० २च० ७ख० (१२)।

एव मेतस्मिन् मन्त्रे "पदं देवस्य नमसा व्यन्तः अवस्यवः अव आपन्"—इत्येतेषां पदाना मेकवाक्ययोगाद् "व्यन्तः"—इत्यस्य शब्दस्य पश्यत्यर्थोऽप्युपपद्यते ॥

"इमा ब्रह्म ब्रह्मवाहः०—०पुरोळाशम्" *—इत्यत्र "खादति-कर्मा"। विश्वामित्रस्येय मार्षम्। रात्रिपर्यायेषु महारात्रिके पर्याये ब्राह्मणाच्छंसिनः † शस्त्रे विनियुक्ता। 'इमा' इम नि, 'ब्रह्म' ब्रह्माणि, ऋग्यजुःसामाख्यानि स्वरसौष्ठवादियुक्तानि, अस्माभिः ब्रह्मणोऽस्य हविषः वहनसमर्थानि, त्वां प्रतिक्रियन्ते, उच्यन्त इत्यर्थः। यज्ञो ब्रवीति;—हे इन्द्र! 'आ बर्हिः सीद' आसी-देदं बर्हिः प्रति। आसीनश्चैतस्मिन् बर्हिषि, 'वीहि' भक्षय एत मस्मत्प्रदत्तं हे 'शूर'! 'पुरोडाशम्' ‡॥ एव मेतस्मिन् मन्त्रे 'वीहि शूर पुरोडाशम्'—इत्येतस्मादेकवाक्यसंयोगाद् "वीहि"—इत्येष शब्दः खादनार्थः प्रतीयति; किं मयं बर्हिष्यासीन इन्द्रः पुरोडाशस्यान्यत्र भक्षणात् कुर्यात्? प्रसिद्धञ्च लोके कठिनद्रव्यस्य भक्षणम्, भक्षयति मोदकादीनि। तस्मात् सामर्थ्याद्भक्षणार्थोऽय मित्युपपद्यते ॥

"वीतं पातं पयसः"—इत्यत्राशनार्थः। "उत वां विक्षु०—०

---

* "इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद। वीहि शूर पुरोळाशम्॥"—इति ऋ० सं० १, ३, ३, ३।

† सप्तदोक्षु द्वितीयो ब्राह्मणाच्छंसी (ऐ० ब्रा० ६, ३, २०)। "सप्तं (सप्तिं) ब्राह्मणाच्छंसिनः"—इति च ऐ० ब्रा० ७, १, १।

‡ "पुरो वा एतान् देवा अक्रत यत् पुरोडाशस्तत् पुरोडाशानां पुरोडाशत्वम्"—इति ऐ० ब्रा० १, ३, ४।

उस्रियायाः" *। मैत्रावरुणेषा †। त्रिष्टुप्। दीर्घतमस आर्षम्। मित्रावरुणावुच्येते ;—'उत वां' अपि युवयोः, एतासु 'विक्षु मद्यासु', एतेषु मनुष्येषु मदर्थिकेषु वर्त्तमान मेतद् 'अन्धः' हविर्लक्षणम् ‡; यदि तस्मिन्नहनि मनुष्यैः भवद्भ्यां देयं पयस्याख्यम् § आज्याख्यञ्च ॥। तदेव 'गावः' एताः 'च आपः', 'देवीः' दानादि-गुणयुक्ताः। आसां गवा मुपकारं कुर्व्वन्त्यः, 'पीपयन्त' वर्द्धयन्ती-त्यर्थः। यदेतदन्नपानयोग्यम्, आज्यं सान्नाय्यलक्षणम् ¶ आभि-रद्भिर्गोभिश्च युवयो रन्धो वर्धते। 'उतो नो अस्य' अपस्य हविषो-ऽस्मत्पूर्वो यजमानः पतिः। पूर्वं हि द्रव्यस्य यजमानः पति र्भवति, तदनन्तरं स तद् ऋत्विग्भ्यः समर्पयति—'देवतायै संस्कृतैतत्'—इति; ततस्ते तस्य हविषः पतयो भवन्ति। तानपेक्ष्य यजमानः 'पूर्व्यः पतिः'। तदपेक्षयैव ऋत्विज आहुः ;—योऽस्मत्तः 'पूर्व्यः पतिः' अस्य हविषः, स 'दन्' भवति, दददित्यर्थः। तेनाप्येतद् भवन्ता-वेवोद्दिश्य स्यात् प्रत्युत्सृष्टम्। एव मपि सदच भवत्यपि वयं यथा व्यादिष्ट मेव तेन पूर्वेण हविः-पतिना भवद्भ्या मेतद्भ्यः।

---

* उत वां विक्षु मद्यासश्चो गावु आपश्च पीपयन्त देवीः। उतो नो अस्य पूर्व्यः पतिर्दन् वीतं पातं पयस उस्रियायाः॥"—इति ऋ० सं० १, २ १२, ४।

† अस्मे विनियुक्तेति शेषः।

‡ १भा० १०४ सू० १ऋ० ७ख० (१)।

§ ऐ० ब्रा० १, ३, १;—"धाना; करम्भः, परिवापः, पुरोडाशः, पयस्येत्येष वै हविर्व्यक्तिः"—इति।

॥ ऐ० ब्रा० १, १, १;—"नवनीतेनाभ्यञ्जन्ति आज्यं वै देवानां सुरभि घृतं मनुष्याणा मायुतं पितॄणां नवनीतं गर्भाणाम्"—इति।

¶ "सान्नाय्यं हविरग्नौ तु हुतं विष वषट्कृतम्"—इत्यमरः १, ७, १७।

तौ युवा मम्र हविषः, 'पयसः' पयस्याख्यस्य, 'उस्रियायाः' पयसा निष्पन्नस्य *, नातिकठिनस्य अशनयोग्यस्य खं भाग मस्माभिर्दीयमानं 'वीतम्' अश्नीतं युवा मित्यर्थः। पिबतं च यदेतदाज्यस्य खं भागम् उपस्तरणाभिघारणसम्बद्धम्†। एव मस्मिन् मन्त्रे 'उस्रियायाः पयसा निष्पन्नस्य'—इति श्रूयमाणे पयस्याज्ये प्रतीयेते; तयो राज्यं पेयम्, तत् 'पातम्'—इत्यनेन सम्बध्यते, पारिशेष्याद् 'वीतम्'—इत्यस्य शब्दस्य पयस्यया सह सम्बन्धः; सा च नाति कठिना, नातिद्रवा, अशनयोग्या; तस्माद् "वीतम्"—इत्येष शब्दोऽशनार्थ इत्युपपद्यते; लोकेऽपि हि नातिकठिने नातिद्रवे अश्नाति-शब्दः प्रसिद्धः,—'अश्नाति पायसम्'—इति॥ निगमप्रसक्त मुच्यते;—"उस्रियेति गोनाम"‡; "उत्स्राविणः" हि तस्याः सकाशात् क्षीरादयो "भोगाः" भवन्ति॥

"क्राणाः"(४२)—इति §। एतदनवगतम्। "कुर्वाणाः"—इत्यर्थप्रतीतिः। "गोभिः क्राणा अनुषत"—इति निगमः। "गोभिः कुर्वाणा अस्तोषत"—इति निर्वचनम्, त्वा मिन्द्रेति शेषः। "त्वा मिन्द्र मतिभिः सुते सुनीथासो वसूयवः। गोभिः क्राणा अनुषत॥"—इति। हे 'इन्द्र!' त्वा मस्मिन् सोमे 'मतिभिः' मतिमद्भिः

---

* "पयस्य माज्यदध्यादि द्रप्सं दधि घनेतरत्॥"—इत्यमरः २, ९, ५१।

† "पश्चादत्तैव वपाज्यस्योपस्तृणाति हिरण्यशल्को वपा हिरण्यशल्क आज्यस्योपरिष्टादभिघारयति। तदाऊर्ध्वहिरण्यं न विद्येत, कथं स्यादिति। हिराज्यस्योपस्तीर्य वपा मादाय द्विषपरिष्टादभिघारयति"—इति ऐ० ब्रा० १, १, ४।

‡ १भा० १अ० ११ख० (२). ११९, १२० पृ०।

§ १भा० १९९ पृ० १२ पं०।

'सुते' मेधाविभिरभिषुते सोमे; य एव हि मतिमन्तः, त एव हि सोम मभिषोतुं शक्नुवन्ति, नेतरे मतिहीनाः। 'सुनीथासः' सुष्ठु ये स्तोतुं शक्नुवन्ति, ते सुनीथाः। 'वसूयवः' वसुकामाः। आह;—किं मेते कुर्वन्ति, मतिभिः सुते मेधाविभिरभिषुते सोमे? उच्यते;—'गोभिः' वाग्भिः, स्तुतिलक्षणाभिः *। अस्मिन्नभिषुते सोमे, आभिमुख्येन "कुर्वाणाः" 'अनुषत' "अस्तोषत" स्तुवन्तीत्यर्थः। अभिषुतेषु सोमेषु किं मन्यदाभिमुख्येन करणाद् इन्द्रस्य गोभिः सुनीथाः स्तुवन्तः कुर्युः; तस्मात् "क्राणाः"—इत्येष शब्दः, "कुर्वाणाः"—इत्येव मुपपद्यते॥

"वाशी(४४)"—इति †। एतदनवगतम्। पक्षेण च अनेकार्थम्। "वाशीभिरश्ममयीभिरिति वा, वाग्भिरिति वा"—इति शब्दसमाधौ। "वाश्यः" एवाभिधेयाः, वाच्याः वा। "आ तू षिञ्चु०—०वक्षि युनक्त" ‡। बुधस्य सोमपुत्रस्यार्षम् 'आसिञ्च' प्रक्षिप, एतं 'हरिं' हरितवर्णं सोमम्। क्व? 'द्रोणपस्थे' द्रुममयस्याधिषवणफलकद्वयस्योपरि। एवं तावदध्वर्युरुक्तः, स हि सोम मुपावहरति। अधुनेतरानभिषवकर्तॄन् ब्रवीति;—यूय मपि अनेनाध्वर्युणोपावहृत मेनं सोम मधिषवणफलकयोरुपरि 'वाशीभिः' एताभिः 'अश्मन्मयीभिः' "अश्ममयीभिः" 'तक्षत' संस्कुरुत, अभिपुणुतेत्यर्थः;

---

* १भा० १अ० ११ख० (४) ७४, ७७ पृ०।

† १भा० २९९, १५ पं०।

‡ "आ तू षिञ्चु हरिं सुतं द्रोणपस्थे वाशीभिरक्षन्नश्ममयीभिः। परिष्वजस्व दशयं कुल्यामिरुभे धुरौ प्रति वक्षिं युनक्त॥"—इति ऋ० सं० ८, ५, १९, ४।

"ग्रावभिरभिषुण्वन्ति"—इति श्रुतम्। अथ वाऽस्य मन्त्रोऽस्यार्द्धस्यार्थः; —हे उन्नेतः! 'आसिञ्च' प्रक्षारय, तं हरितवर्णं सोमं मनेन कलशेन। क्व? 'द्रोरुपस्थे' द्रोणकलशस्योपरि। यूय मपि च हे होतारः! आसिच्यमानम् एनं सोमं 'वाशीभिः' "वाग्भिः" स्तुतिलक्षणाभिः 'तक्षत' संस्कुरुत; यदस्यायज्ञिय मपूतं, तत् स्तुतिभिः पुनीतेत्यभिप्रायः। 'अश्मन्मयीभिः' व्यापनसमर्थाभिरित्यर्थः। यूय मपि हे अध्वर्यवः! पूत मेत मुद्गादभिः, सोमं 'परिष्वजध्वं' ग्रहेषु, स्थालीषु च। 'कक्ष्याभिः' अङ्गुलीभिः; अङ्गुलिभिरेव हि पाचस्यः सोमो गृह्यते। यदेव चेदं ग्रहण मेष एव तस्य परिष्वङ्गः। परिष्वज्य च गृहीत्वा एनं सोमम् 'उभे' हविर्द्धान-'धुरौ' 'प्रति' 'वक्रिम्' इव, वोढार मिव, अनड्वाहं 'युनक्त' एनं सोमं सादयते-त्यर्थः*। स हि सोमो हविर्द्धान-धुरोः† अधस्तात् खरे ‡ सीद्यते। एतस्मादेव चानुवृद्-योजनदेशं प्रति सामान्याद्वक्रि मिव युनक्तेति लुप्तोपमं सुपपद्यते। अत्र "वाशीभिस्तक्षते"—इति तक्षणयोगात् अश्ममय्यो वाग्य एता ग्रावाख्या इति प्रथमस्यार्थस्योपपत्तिः॥ एतस्मिन्नर्थे 'आ तू षिञ्च'—इत्यासेकशब्दो गौणः; न हि सोमांशूनाम् अनभिषुतानाम् आसेकोऽस्ति कठिनत्वात्; तस्मादेतस्मिन्नर्थे प्रक्षेपणमात्र मेव सिञ्चतेरर्थः। अथ वा 'आसिञ्चत हरिं द्रोरुपस्थे'

---

* "अन्यतरोऽनड्वान् युक्तः स्यात्, अन्यतरो विमुक्तोऽथ राजान मुपावहरेयुः"—इति ऐ० ब्रा० १, २, ३। राजानं सोम मित्यर्थः "सोमो वै राजा (ऐ० ब्रा० १, ५, १)"—इत्येवमादिश्रुतेः।

† "हविर्द्धानाभ्यां प्रोह्यमाणाभ्यां मनुवृहीत्याद्यध्वर्युः"—इति ऐ० ब्रा० १,५,३।

‡ "स्थण्डिले" ग। खरशब्द इह खलार्थः; खल इव सोममर्दनस्थानम्।

—इत्यतोऽनन्तरं वाग्वी-शब्दः श्रूयमाणो वाङ्नामधेयत्वेनाणुपद्यते एव*; सोमो हि द्रोणकलशस्योपरि आभिच्यमाने वाग्भिः स्तूयते। एव मर्थद्वय मभिप्रेत्य उभयथा भाष्यकारेणोक्तम्; —"वाग्वीभिरग्नमयीभिरिति वा वाग्भिरिति वा"—इति ॥

"अथ मपीतरो हरिः" मर्कटः, "एतस्मादेव" इति; हरितवर्णत्वाद्धरिरुच्यते; "शिरीषकुसुमप्रख्याः केचित् पिङ्गलकप्रभाः, वानराः"—इति श्रूयन्ते रामायणे ॥

"विष्णुरस्य(४५)"—इति †। एतदनवगतम्। "विषमस्य"—इत्यवगमः। "न यातव इन्द्र जूजु०—०अपि गुर्क्षतं नः‡"। वसिष्ठस्येय मार्षम्। त्रिष्टुप्। उन्नीयमानसूक्ते माध्यन्दिने सवने शस्यते। हे भगवन्! "इन्द्र!" तथा कुरु, यथा 'न' इम मस्मद्यज्ञं 'यातवः' यातयितारः, यज्ञविघ्नकर्त्तारः, के चिदपि 'जूजुवुः' आगच्छेयुरित्यर्थः। किञ्च; हे 'शविष्ठ' बलिष्ठ! य एते 'वन्दनाः' वन्दितारः, लाङ्गौडादयः§; जानपदीभिः 'वेद्याभिः' आकृतिभिर्युक्ताः; किं ब्राह्मणाः एते स्युः, उतान्यजातीयाः केचिदिति? अथ वा आवेदितव्याभिः प्रवृत्तिभिः युक्ताः; न हि तासां प्रवक्त्रीणा मन्तोऽस्ति, याभिस्ते प्रव-

---

* १भा० १अ० ११ख० (११). ७४, ७९ पृ०।

† १भा० ४०० पृ० १पं०।

‡ "न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः। स शर्दर्द्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्क्षतं नः॥"—इति ऋ० सं० ५. २. ६. ५।

§ राढ़-गौड़ेतिविभक्त-दक्षिणोत्तर-वङ्गदेशवासिप्रभृतयः, लष्टगोड़ेति प्रसिद्धा अद्यिच्छब्दीयादयो वा। एतच्च जातिविद्वेषमूलक माख्यानम्, अस्ति च दाक्षिणात्यानां पवित्रमन्यमानाना मेष संस्कारः, दृष्टिकारस्यायं दाक्षिणात्यः। सायणस्तु वन्दनाः वन्दनानि रक्षांसि'—इत्याह।

र्त्तन्ते चपलत्वात्। किञ्च; येऽपि चैते श्रोत्रिया अपि सन्तः 'शिश्नदेवाः' शिश्नेन नित्य मेव प्रकीर्णाभिः स्त्रीभिः साकं क्रीड़न्त आसते, श्रौतानि कर्माणि उत्सृज्य *; तेऽपि युष्मदनुग्रहादिद मस्माकम् 'ऋतं' यज्ञम 'मा अपिगुः' मा आगच्छन्तु; नास्माकं तैरपि यज्ञ मभिगच्छद्भिरर्थोऽस्तीत्यभिप्रायः। आह;—कीदृशास्तर्हि यज्ञ मागच्छन्तिति? उच्यते;—'स शर्द्धत्' स एवोत्सहता मिम मस्माद्यज्ञ मागन्तुम्, य एव 'अर्यः' ईश्वर आत्मीयाना मिन्द्रियाणाम्, जितेन्द्रिय इत्यर्थः। यश्च 'विषुणस्य' "विषमस्य" यज्ञविध्वंसयितुः 'जन्तोः' मनुष्यस्य निग्रहाय समर्थः; येन परिपाल्यमाना एतं यज्ञ मविघ्नेन समापयेमहीत्यभिप्रायः॥ एव मेतस्मिन् मन्त्रे "यातवो वन्दनाः शिश्नदेवाश्च मा आगच्छन्तु"—इति प्रतिषिद्धेष्वेतेषु अनिष्टत्वादेतेषां 'स शर्द्धदर्यः'—इति श्रूयमाण मर्यवत्त-मनुष्याभ्यागमनविषय मेतद्भवति, तस्येष्टत्वात्; स चाभ्यागतः सन्नवश्यं 'विषुणस्य' "विषमस्य" मनुष्यस्य निग्रहं करोति; तस्माद् "विषुणस्य"-शब्दो विषमस्येत्युपपद्यते। यदा तु ऋतशब्दस्य "सत्यं वा"—इत्येतदर्थवचनं भवति, तदाऽस्माकम् 'ऋतं' सत्यम्, एवंलक्षणाः पापकर्माणो 'मा अपिगुः'—इत्येवं योज्यम्। अपिगुरिति चैष गमिस्तदा ज्ञानार्थः। एव मप्युपपद्यत इत्यतो भाष्यकारेणोक्तम्,—"सत्यं वा यज्ञं वा"—इति॥ ३ (१९)॥

---

* "शिश्नदेवाः। शिश्नेन०——०। अब्रह्मचर्या इत्यर्थः."—इति सायणः। इद मूलेऽप्येव मेव (पृ० ४४९ ट० ११ पं०)। ग-पुस्तके तु 'शिश्नोदरपरायणाः'—इति टीकितं च दृश्यते। एवमेव शिश्नदेवाः'—इत्यस्य 'शिवोपासकाः'—इत्यर्थः केषाञ्चिद् वेदसमालोचकानां विचारणीय एव।

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृण-वन्नजामि। उप बर्बृहि वृषभाय बाहुमन्य मिच्छस्व सुभगे पतिं मत्॥ आगमिष्यन्ति तान्युत्तराणि युगानि यत्र जामयः करिष्यन्त्यजामिकर्माणि जाम्यतिरेकनाम बालिशस्य वासमानजातीयस्य वोपजन उपधेहि वृषभाय बाहु मन्य मिच्छस्व सुभगे पतिं मदिति व्याख्यातम्॥ ४ (२०)॥

"जामि(४६)"—इति *। एतदनेकार्थम्। भगिनी, बालिशः, पुनरुक्तवास्याभिधेयानि। प्रकरणादेवैतेषां मन्यतम मस्मिन्नवतिष्ठते। यद्यानेन तावद्भगिन्युच्यते, तथेद मुदाहरणम्;—"आ घा ता०—० मत्" †—इति। इयं यमी ‡ किल यमं प्रार्थयाञ्चकार;—एहि मैथुनाय सङ्गच्छावहा इति; तां मकामयमानोऽसावनर्थां प्रत्युवाच §;— 'आ घा ता गच्छान्'। 'घा'—इत्यनर्थक एव, 'आ गच्छान्' आगमिष्यन्तीत्यर्थः। आह;— कानि? उच्यते;—'ता' "तानि उत्तराणि युगानि आगमिष्यन्ति", तेऽपि काला न तावत् साम्प्रतं वर्त्तन्ते इत्यभिप्रायः॥। येषु किम्? 'यत्र' येषु 'जामयः' भगिन्यः भ्रातॄणाम् "अजामि"-योग्यानि मैथुनसम्बन्धानि

---

* १भा० ४०० पृ० ४पं०।

† ऋ० सं० ७, ६, ७. ५।

‡ विवस्वतः सूर्यस्य पुत्रौ। रूपक मेतदाख्यानम्।

§ ऋ० सं० १०मं० १अ० १०सू १—१४ ऋचु यमयमीसंवादो द्रष्टव्यः।

॥ तथा चोत्तरेयकम्;—'कलिः शयानो भवति, संजिहानस्तु द्वापरः, उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरन्।"—इति ७, १, १।

"कर्माणि" "करिष्यन्ति" * ; कलियुगान्ते हि तादृशः सङ्करो भवति, न चेदं कलियुगं वर्त्तते इत्यभिप्रायः। यतो न तावदद्यापि सङ्कीर्णो वर्णसङ्करधर्मः; स्वाचारा एव तावत् प्रजाः। अतो ब्रवीमि; —'उप बर्बृहि' उपधेहि। कस्मै? 'वृषभाय' तवोपरि रेतः-सेक्तु मन्यकुलजो योग्यः, तस्मै। किं मुपबर्बृहि? इति 'वाजम्'। शयनीये सर्वथा प्रार्थ्यमानोऽप्यहं तव पतिः न भविष्यामीति। यतो ब्रवीमि;—'अन्य मिच्छस्व' अन्य मन्वेषयस्व। हे 'सुभगे!' 'पतिं', 'मत्' मत्त इत्यर्थः †॥ एत मेतस्मिन् मन्त्रे, सूक्ते वा संवादाधिकाराज्जामिशब्देन भगिन्युच्यते इत्युपपद्यते॥

"जामि"—इत्येतदेव स्वरान्तशब्दरूपम् "अतिरेकनाम" भवति, पुनरुक्तनामेत्यर्थः। तदुत्तरत्र लक्षणतो भविष्यति; तद् यत् समान्या ऋचि समानाभिव्याहारं भवति, तत् "जामि भवति"—इति ‡ पुनरुक्ताभिधानत्वेन। जामिशब्दस्य पर्येष्यो निगमः॥

"बालिशस्य वा" बालिशश्चेतदेव नाम। बालिशो मूर्खः; स हि बाल इव शेते, प्रमादित्वाद्धर्मकार्येषु। एतस्यापि पर्येष्यो निगमः॥

"असमानजातीयस्य वा" असमानजातीयो हि पुरुषस्य भगि-

---

* पौराणिकानां मतपोषकं भविष्यद्वचन मिदम्।

† "गार्हपत्येन पत्नीषु प्रत्यक्षादेतो दधाति, प्रजात्यै, प्रजायते प्रजया पशुभिर्य एवं वेद; तस्मात् समानोदर्याखसान्योदर्यायै जायाया अनुजीविनी जीवति"—इत्यादि च शासनं द्रष्टव्यम् ऐ० ब्रा० १, ३ ११।

‡ "जामि वा एतद् यज्ञे क्रियते यच्च समानीभ्या ऋग्भ्यां समानेऽहन् यजतीति"—इति ऐ० ब्रा० १, ५, १।

न्याख्यो भ्राता, सा हि स्त्रीत्वादेवातुल्यजातीयैव पुरुषस्य भवति। जामिरित्येतस्मिन् शब्दे 'मिः'—इत्येष "उपजनः"; यदेवोक्तं भवति 'जा'—इति, तदेव जामीति। उभयथापि मन्त्रे प्रयोगो द्रष्टव्यः। "अन्य मिच्छस्व सुभगे! पतिं मत्—इति व्याख्यातम्"। निगद-सिद्ध मेवैत दित्यर्थः। अथ वैतानि पदान्यधस्तात् तत्र तत्र व्याख्यातानि; तद् यथा,—"अन्यो नानेयः" *—इत्येवमादि उपेक्षितव्यम्॥ ४ (२०)॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्। उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भं माधात्॥ द्यौर्मे पिता माता वा पालयिता वा जनयिता नाभिरत्र बन्धुर्मे माता पृथिवी महतीयं बन्धुः सम्बन्धनान्नाभिः सन्नहनान्नाभ्या सन्नद्धा गर्भा जायन्त इत्याहुरेतस्मादेव ज्ञातीन्त्सनाभय इत्याचक्षते सम्बन्धव इति च ज्ञातिः सज्ज्ञानात्। उत्तानयोश्चम्वोर्योनिरन्तः। उत्तान उत्तान ऊर्ङ्तानो वा तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः। (शंयुः सुखंयुः†।) अथानः शं योरर्पो दधात। रपो रिप्र मिति पापनामनी भवतः शमनञ्च रोगाणां यावनञ्च भयाना मथापि शंयुर्बार्हे-

* पू० १अ० ३पा० १ख०;—६१ प्र० १पं।
† नास्येष पाठः क-ख-ग पुस्तकेषु।

स्यत्य उच्यते* । तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति । गमनं यज्ञाय गमनं यज्ञपतये ॥ ५ (२१) ॥

॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥ ४, ३.

"पिता(४७)"—इति†। एतदनवगतम्। "पाता वा पालयिता वा"—इत्यवगमः। "द्यौर्मे पिता"—इति‡। दृय मस्यवामीयं दीर्घतमस आर्षम्। तृतीयसवने वैश्वदेवे शस्यते। 'द्यौर्मे पिता' येयं द्यौः, उपरि स्थिता द्युलोकाख्या, एष एव मम पिता। द्यौरह मित्येवं वैवाहिके कर्मणि द्युलोकभावेन पित्रा आत्मान मभिसम्पाद्यमानं दृष्ट्वैव माह मन्त्र दृक्'—'द्यौर्मे पिता'—इति। 'जनिता' जनयिता, उत्पादयितेत्यर्थः। आह;—कथम्? उच्यते;—'नाभिरत्र' नहन मेव नाभिः§, अत्र एतस्मिन् द्युलोकलक्षणे पितर्युदकदानेनानुगृहीतरि ॥ सति सन्तानोत्पत्त्यनुग्रहक्रमेणैव शुक्रात्मनोत्पत्तिरुपपद्यते ¶;—इत्येव मभि समीक्ष्योक्तम् 'द्यौर्मे पिता, जनिता, नाभिरत्र'—इति। 'बन्धुः मे' अङ्गसम्बन्धकारणाद् बन्धुः

---

* "स्यत्य उच्यते"—इति ख।

† १भा० ४०० पृ० ११पं०।

‡ ऋ० सं० १ १, १०, १।

§ "प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिरित्याभेर्नाभित्वम्, प्राण मेवास्मिंस्तदधाति।"—इति ऐ० ब्रा० १, ४, १।

॥ उदकस्य रेतस्त्वं स्पष्ट माम्नात मैतरेयके "रेतो वा आपः"—इति १. १, १।

¶ "ता न्यूङ्खयति, अन्नं वै न्यूङ्खोऽन्नाद्रेतः सिच्यते, रेतसः प्रजाः प्रजायन्ते"—इति ऐ० ब्रा० ७, ५, १०।

मे 'माता पृथिवी महीयम्'—इति। मातुर्मन्त्रेण पृथिवीत्वं सम्पाद्यमानं दृष्ट्वैव माह;—'बन्धु मे माता पृथिवी महीयम्' —इति। उदकं हि द्युलोकात् पतितम्, पार्थिवेन धातुना सम्पृक्तम्, ओषधिभाव मागम्य, शरीरभावेनावतिष्ठते,—इत्येतदपेक्ष्य सर्वभूतानां द्यावापृथिव्यौ मातापितरौ उच्येते तत्र तत्र। तद्यथा;—"यदन्तरा पितरं मातरञ्च*" इत्येव मादि। तत्कृतस्य ह्युपकारस्याभावे सतीतरौ मातापितरावकिञ्चित्करावेव भवतः। तस्मादुपपद्यते द्यावापृथिव्योर्मातापितृभावः। आह;—किमेते द्यावापृथिव्यौ अन्यत् किञ्चिदनपेक्ष्यैव सर्वभूतानां मातृपितृभावं बिभृतः, उत अन्यदपि किञ्चिदपेक्षेते? इति। उच्यते; —अनयोः 'चम्वोः'† द्यावापृथिव्योः 'उत्तानयोः'‡ ऊर्द्ध मेव ह्येनयोः अन्तरा च प्रतिधारणीयोऽन्नः प्राणः तत इति उत्ताने द्यावापृथिव्यौ; प्राणेन ह्येमे वायुना सूचभूतेन विधृते तिष्ठतः §; एतयोः द्यावापृथिव्योरुत्तानयोः य एषोऽन्तरिक्षाख्यः 'अन्तः' मध्ये 'योनिः', 'अत्र' एतस्मिन्नवकाशप्रदानोपकारप्रवृत्ते सति 'पिता' "पर्जन्यः" द्युलोकाख्यः; द्यौरेव हि रसान् प्रार्जयति, तस्मात्

---

* "द्वे सृती अशृणवं पितृणां अहं देवानामुत मर्त्यानाम्। ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरञ्च॥"—इति ऋ० सं० ८, ४, १९, ५।

† 'सर्वस्य अन्योः भोगसाधनयोः'—इति ग० पु० टी०।

‡ 'उत्कृष्टं तानयोरूर्द्धं तानयोर्वा'—इति ग० पु० टी०।

§ तथा चैतरेयकम्;—"वायुर्वै यन्ता, वायुना ह्येदं यन्ति मन्तरिक्षं न संप्रच्छन्ति"—इत्यादि ऐ० ब्रा० १, ५, ९। किञ्च; इत उत्तरं त्रिलोकप्रतिष्ठान मन्यत्रैव वर्णितम्। तथा हि;—'द्यौरन्तरिक्षे प्रतिष्ठिता, अन्तरिक्षं पृथिव्याम्, पृथिव्यापस्सु, आपः सत्ये, सत्यं ब्रह्मणि, ब्रह्म तपसि;—इत्येता एव तत्प्रतिष्ठाः।"—इति ऐ० ब्रा० ३, १, ९।

मैवात्र पर्जन्यशब्देन भाष्यकारेणोक्ता। 'दुहितुः' "पृथिव्या." उपरि 'गर्भं' सर्वभूतगर्भोत्पत्तिहेतुभूतोदकम् * 'आधात्' आदधाति, ददातीत्यर्थः। अत्र पृथिव्येव दुहितृशब्देनोक्ता; सा हि द्युलोकाद् 'दूरे निहिता', अथ वा सा हि द्युलोकं 'दोग्धीति' दुहिता;—सा हि द्युलोकात् पतित मुदक मुपजीवत्येवादूरे निहिता, दोग्धि वा † ॥ एवं द्यावापृथिवीभ्यां मन्त्रलिङ्गेन चावकाशदानेनानुगृह्यमाणान्येतान्यस्मदादीनि भूतान्युत्पद्यन्त इति. एतदनेन मन्त्रेण मन्त्रदृशाख्यापितम्। अत्र मातृपितृसम्बन्धात् पितृशब्दः पितर्यवेत्युपपत्तिः। पिता माता चाय मेतदाशासनं मन्येत ॥

"शंयोः[४८]"—इति ‡। एतदनवगतम्। पञ्चम्यन्तं वा षष्ठ्यन्तं वा सत् §। न चैवं यजमानोऽर्थात्तस्माद् बृहस्पतिपुत्रादर्थ मपेक्षते, किं कारणम्? स्वत एव हि ते विधातुं समर्थाः; न च बृहस्पतिपुत्रस्य शंयोः मम पितरः किञ्चिद्देभिः पितृभिः विधीयेतेति। एवं पञ्चम्यर्थासम्भवं षष्ठ्यर्थासम्भवञ्च पश्यन् भाष्यकारः, 'शंयोः'—इत्येकं एदं, द्वितीयान्ते द्वे पदे चकार, 'शम्'—इति, 'योः'—इति च। श मित्यस्य "शमनम्" अर्थं निराह, योरित्यस्य "यावनम्"—इति। एवं द्वितीयान्तेन परिणामं कृत्वा अर्थं निराह, तथा हि

---

* अत एवाह;—"पुनर्वा एतं सृष्टिजो गर्भं कुर्वन्ति यं दीक्षयन्त्यङ्गिरभिषिञ्चन्ति"—इत्यादि। ऐ० ब्रा० १, १, १।

† पु० २अ० १पा० १ख० २५६ ४० २पं० द्रष्टव्यम्।

‡ १भा० ४०० पृ १५ पं०।

§ निगमश्चैषः;—"बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्। त आ गतावसा शन्तमेनाथा नः शंयोरुपो दधात॥"—इति ऋ० सं० ७, ६, १०, ४।

वाक्येन सम्बध्यत इति। कस्य शमनं कस्य वा यावनम्? इति पुनः पर्यनुयोगे प्राप्ते "रोगाणाम्", "भयानाम्" "च" इत्यध्याजहार भाष्यकारः। रोगशमनञ्च दधात, भययावनञ्च; शान्तरोगा यथा स्याम, प्रहीणसर्वभयाश्च, तथा कुरुतेत्यभिप्रायः। किमेतावदेव? नेत्युच्यते;—यदपि चान्यत् किञ्चिद् 'अरपः' अपापम्, तदपि चास्मभ्य मेव 'दधात' दत्तेत्यर्थः॥ एव मेतत् पदम् एकम्, अर्थासम्भवाद् द्विधा प्रविभज्य भाष्यकारेण निरुक्तम्। इत्थ मप्यर्थासम्भवे सति निर्वचनप्राप्तिरस्त्येव, तद्यथा उद्गीथशब्दे,—"प्राण एवोत् प्राणेन ह्युत्तिष्ठति, वाग् गीर्वाचो ह गिर इत्याचक्षते, ऽन्नं थ मन्नेन होदं सर्वं स्थितम् (छा० ब्रा० २, ३.)"—इत्येवमादि; तस्मादुपपद्यते। प्रथमान्त मेव सत् कस्माद् द्वितीयान्तत्वेन विपरिणम्यते शंयु मिति? एव मपि न विरुध्यति; तथापि हि न कश्चिदर्थ उपपद्यते, तस्माद् युक्त मिति॥ "रपो रिप्रम्"—इति, अत्र रिप्रशब्दस्य रपःशब्देनार्थसामान्यात् तत्त्व मुक्तम्। यदेवास्य 'रिप्रम्' अमेध्यम्, तच्छुध्यतीति ह विज्ञायते॥

"अथापि शंयुर्बार्हस्पत्य उच्यते" अपि शं, योः,—इत्यनेन पदद्वयेन शमनयावने रोगभययोः उच्येते; द्वेधा प्रविभक्तेन; अपि यथावस्थितेनैवाविभक्तेन बार्हस्पत्यो ह्यृषिः उच्यते*; तस्माप्येतदेव नामेत्यपिशब्दः. "तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये"-इति†।

---

* अस्य चर्क्संहितायां चत्वारि सूक्तानि;—१, ४, १-२ २-५।

† "ओमान॑ शंयोर्ममकाय सूनवे (ऋ० सं० १, २, ४, १)" इति, "तच्छंयोः सुम्न मीमहे (ऋ० सं १, २, १९, ४)"—इति च निगमौ।

दयं शक्करी। शंयोरेव बृहस्पतिपुत्रस्यार्षम्। शंयोर्वाके* विनियुक्ता। शंयोरात्मान मभि सम्पाद्य, अथवा शंयोः सकाशादिति के चिन्मन्यन्ते। अनेन कर्मणा 'शंयोः' वाकाख्येन† 'तत्' तदा आभिमुख्येन 'वृणीमहे'। किं पुनस्तत्? 'गातुं यज्ञाय' "गमनम्" अस्मै "यज्ञाय" देवान् प्रति, 'गातुं यज्ञपतये' "गमनं" चास्मै "यज्ञपतये" देवान् प्रति। किञ्च; 'दैवी स्वस्तिरस्तु नः' देवानुग्रहादस्माकं स्वस्तिरस्तु; मा नो देवाः काञ्चिदापद मुत्पादयन्त्वित्यभिप्रायः। 'स्वस्ति मानुषेभ्यः' मनुष्येभ्योऽपि सकाशात् मा नः का चिदापदस्तु। 'ऊर्ध्वं जिगातु भेषजम्' गच्छत्वेतद्भेषजम्, भयसादयितृ कर्म; यावज्जीव मनवच्छिन्न मविगुणस्योर्द्धगमनयोग्यम् अस्माक मस्त्वित्यभिप्रायः। किञ्च; 'शन्नो अस्तु' शं सुखं नोऽस्माकं भवतु, 'द्विपदे' मनुष्यादिकाय 'चतुष्पदे' गवादिकाय च॥ 'शंयुः' बृहस्पतिपुत्रः—इति, एतस्मिन् मन्त्रे विशेषलिङ्ग मस्ति; तदन्यस्मात् श्रुतिलिङ्गात् कुतश्चिदुपलभ्यमानाद्वा एतावदेव लेतस्मात् मन्त्रात् सिद्धम्;—एक मेवेदं पद मविभक्तम् निरुच्यते, पञ्चम्यन्तं वा षष्ठ्यन्तं वा; न यथा पूर्वस्मिन्‡ मन्त्रार्थासम्भवाच्छंयुशब्दो विभक्त इति॥ ५ (२१)॥

इति निरुक्तवृत्तौ नवमस्याध्यायस्य (चतुर्थाध्यायस्य)

तृतीयः पादः॥ ४, ३.

---

* वाक-परिचयस्तु "गायत्रेण प्रति मिमीते (ऋ० सं०१, ३, १८, ४)"—इति मन्त्रे "वाकेन वाकम्"—इत्यस्य सायणीयव्याख्यायां द्रष्टव्यः।

† वाकलक्षणमन्त्रप्रणयनकर्मणेति यावत्।

‡ पृ० ४९५ पं० १५ प०।

॥ चतुर्थः पादः ॥

अदितिरदीना देवमाता ॥ १ (२२) ॥

"अदितिः(४९)"—इति*। एतदनवगतम्। "अदीना"—इत्यवगमः। "देवमाता" अभिधेया, ऐतिहासिकपक्षेण; नैरुक्तपक्षेण पुनर्यान्येतस्या माववक्ष्यमाणायां द्यौरित्येवमादीनि पदानि श्रूयन्ते† एतान्येवादितिशब्देनोच्यन्ते ॥ १ (२२) ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥ इत्यदितेर्विभूति माचष्ट एनान्यदीनानीति वा। यमेरिरे भृगवः। एरिर इतीर्त्तिरुपसृष्टोऽभ्युत्तः ॥ २ (२३) ॥

"अदितिर्द्यौः०—०मदितिर्जनित्वम्"‡। राङ्गणस्य गोतमस्येय मार्षम्। तृतीयसवने सर्वस्तोमेष्वेव, वैश्वदेवस्य शस्त्रस्य परिधानीयेषा§। 'अदितिः' एव देवमाता 'द्यौः', 'अदितिः' अदितिरेव च 'अन्तरिक्षम्', 'अदितिः' एवं 'माता' सर्वभूतनिर्माची, 'सः' एव च 'पिता' पालकः, 'सः' एव हि 'पुत्रः'; सैव हि परितुष्टा सती स्तोतारं पुरुषं बहुनः पापात् त्रायते; अथ वा सैव निरु-

* १भा० ४०१ पृ० १पं०।
† ऐ० ब्रा० ३, ३, ७ द्रष्टव्यम्।
‡ ऋ० सं० १, ९, १९, ५।
§ अस्य च विधायकं ब्राह्मणम्; "वैश्वदेवं शंसति" इत्यादि ऐ० ब्रा० ३, ३, ७।

णाति, सर्वभूतानां यन्निर्वर्त्तव्यं दातव्य मित्यर्थः। येऽपि चैते 'विश्वेदेवाः' सर्वे देवाः, एतेऽपि 'अदितिः' एव। 'पञ्चजनाः' गन्धर्वादयः* 'अदितिः' एव। सर्वेषामपि किं बहुना, यावदेतत् किञ्चित् 'जातं' च 'जनित्वं' च जनिष्यमाणञ्च सर्वं मप्येतद् 'अदितिः' एव। एव मनेन मन्त्रेण मन्त्रदृक् "अदितेर्विभूति माचष्टे" देवमातुस्तत् सर्वं मप्युपपद्यत एव; माहाभाग्याद्देवताया:। तदुत्तरत्र† वक्ष्यामः। एव मैतिहासिकपक्षेण; नैरुक्तपक्षेण पुनः "एनानि" द्युलोकादीनि सर्वाणि "अदीनानि" अनुपक्षीणानि इति योज्यम्; न ह्येषां क्षयोऽस्तीति॥

"एरिरे(५०)"‡—इति। एतदनवगतम्। "आ ईरिरे"—इत्यवगमः। "यमेरिरे भृगवो०—०न राजति"§। दीर्घतमस दृय मार्षम्। जगती। प्रातरनुवाकाश्विनयोरग्निमारुते च शस्यते। 'यम्' अग्नि माभिमुख्येन ईरितवन्तः, प्रेरितवन्तः, स्थापितवन्त इति यावत्; आत्माभिप्रेतार्थसिद्धये 'भृगवः'। 'विश्ववेदसं' सर्ववेदसं, सर्वस्य वेत्तारं, सर्वधनं वा। क्व पुनः 'एरिरे'? 'नाभा' पृथिव्याः नाभौ अवस्थितम्, उत्तरवेदिमध्यगताया: पृथिव्या वेद्या उपरि। केन

* "सर्वेषां वा एतत् पञ्चजनानां मुख्यं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणाञ्च, पितॄणां चैतेषां वा; एतत् पञ्चजनानां मुख्यम्। सर्वे एनं पञ्चजना विदुः।"—इति ऐ० ब्रा० १, १, ७।

† "माहाभाग्यात् देवताया एक आत्मा बहुधा सूयते, एकस्यात्मनोऽन्य देवाः प्रत्यङ्गानि भवन्ति।"—इति दै० का० ७ १, ४।

‡ १भा० ४०१ पृ० ५ पं०।

§ 'य मेरिरे भृगवो विश्ववेदस नाभा पृथिव्या भुवनस्य मज्मना। अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एका वसो वरुणो न राजति॥"—इति ऋ० सं० १, १, १२, ४।

पुनरेरिरे? 'भुवनस्य' उदकस्य 'मज्मना' मननीयेन वीर्येणान्नेन हविर्लक्षणेन। किं तस्य? 'तमग्निं' हे यजमान! त्वमपि 'गीर्भिः' वाग्भिः स्तुतिलक्षणाभिः आभिमुख्येन स्थित्वा 'हिनुहि' प्रेरय। तस्मिन् तस्मिन् कर्मणि वर्त्तमानमग्निहोत्रादौ; यथा भृगवः ईरितवन्तः, तथा 'स्वे दमे' स्व एव गृहे; मा कस्य चिदार्त्विज्येऽवस्थित इत्यभिप्रायः। किंलक्षणं पुनरग्निं माहिनुहि? 'य एको वस्वः' एक एव यो वसुनो धनस्य दाता। 'वरुणो न' वरुण इव, यथा वरुणः समुद्रान्तर्गतानां धनानाम् इष्टे, एवं यः सर्वस्येव धनस्य 'राजति' इष्टे इत्यर्थः। राजतिरैश्वर्यकर्मसु पठितः; —"क्षियति[२], राजति[४]"—इति*। "एरिरे—इति", "ईर्त्तिः" अयं धातुर्गतिकर्मा;—"ईर्त्ते[७९], ज्रयति[८१]"—इति गतिकर्मसु पठितम्†। स पुनरयमाङोपसर्गेण "उपसृष्टोऽभ्यस्तः" च; पुनः पुनरीरितवन्त इत्यर्थः॥ २ (२३)॥

उत स्मैनं वस्वमथिं न तायुं मनुक्रोशन्ति क्षितयो भरेषु। नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम्॥ अपि स्मैनं वस्वमथि मिव वस्वमाथिनं वस्वं वस्तेस्तायुरिति स्तेननाम संस्त्यान मस्मिन् पापक मिति नैरुक्तास्तस्यतेर्वा स्यादनुक्रोशन्ति क्षितयः सङ्ग्रामेषु भर इति सङ्ग्रामनाम भरतेर्वा हरतेर्वा नीचा-

* १भा० २च० २१ख० (२), (४). २९१, २९२ष्ट०।

† १भा० २च० १४ख० ७९, (८१). १२८, १५१ ष्ट०।

यमानं नीचैरयमानं नीचैर्निचितं भवत्युच्चैरुचितं भवति जस्त मिव श्येनं श्येनः शंसनीयं गच्छति। अवश्वाच्चो पशुमच्च यूथम्। अवश्वापि पशुमच्च यूथं प्रशंसां च यूथं च धनं च यूथं चेति वा यूथं यौतेः समायुतं भवति। इन्धान एनं जरते स्वाधीः। गृणाति मन्दो मन्दतेस्तुतिकर्मणः। प्र मन्दिने पितुमदर्चता वचः। प्रार्चत मन्दिने पितुमदर्चो गौर्व्याख्यातः ॥ ३ (२४) ॥

"जसुरिः(५१)"—इति *। एतदनवगतम्। "जस्तम्"—इत्यवगमः। "उत स्तेनं"—इति † निगमः। वामदेवस्यार्षम्। त्रिष्टुप्। दधिक्राण्णे सूक्ते। दधिक्रावा चेन्द्र एव, वायुर्वा मध्यस्थानत्वात् ‡। 'उत स्तेनम्' श्येनमिन्द्रम् 'अनु क्रोशन्ति' आभिमुख्येन क्रन्दन्ति, आह्वयन्ति। 'क्षितयः' मनुष्याः। क्व? 'भरेषु' सङ्ग्रामेषु। कथं पुनरभिक्रन्दन्ति? 'वस्तमर्थं न' वस्तापहर्त्तारमिव 'तायुम्', यथा के चिज्जनाः कञ्चिद्वस्तापहर्त्तारं तायुं दृष्ट्वा कञ्चिदन्यमात्मनस्त्राणार्थमभिक्रन्देयुः, एवमेतमिन्द्रम् अभिक्रन्दन्ति सङ्ग्रामेषु, परैरभ्यर्द्यमानास्त्राणार्थमात्मनः। किञ्च; अपि चैनं तायुं 'नीचायमानं' नीचैर्गच्छन्तं 'जसुरिं न' जसुरिमिव, "जस्त मिव" 'श्येनं' बद्धम्, स्नायुतन्तुना य एष याजिक इति § प्रसिद्धो राज्ञाम्; स

* १भा० ४०१ पृ० ८ पं०।
† ऋ० सं० २, ७, ११, ५।
‡ पु० १४७ पृ० २अ० ७पा० ५ख०। प० १०अ० २पा० १ख०। १भा० १४९पृ०(७)।
§ "पाशिक इति"—इति ग।

हि बद्धत्वादुत्पतितुं मत्यर्थं न शक्नोति, नीचैरेव गच्छति; गत्वा च शशकादीनि हिनस्ति सत्त्वानि। स यथा जनैरभिक्रन्द्यन्ते, तथा चैन मभिक्रन्दति। आह;—कं मर्थं मभिसन्धाय? इति। उच्यते;—'अवस्व अच्छ' कीर्त्तिञ्चाभिसन्धाय; कयं नाम शूयेमहि? प्रशस्येमहि जित मेभिरित्येत मर्थं मभिसन्धाय *। 'पशुमच्च शूयम्' अनेकपशुजातिसंयुक्तं पशुयूथ मभिसन्धायेतरस्माकं स्यादित्येव मभिक्रन्दतीत्येष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"वस्त्रं वस्तेः" आच्छादनार्थस्य (अदा० आ०); तद्धाच्छाद्यते। "तायुरिति"—एतत् "स्तेननाम" †, "संस्त्यानं" संहतम् "अस्मिन् पापकं" भवति "इति" एवं "नैरुक्ताः" मन्यन्ते। "तस्यतेः वा स्यात्" क्षयार्थस्य (दि० प०); उपक्षीणो ह्यसौ भवति, अधार्मिकत्वात्; परलोक मनपेक्ष्य कल्पयति कर्माणि। क्षितयो मनुष्याः‡। "भर इति सङ्ग्रामनाम §" भ्रियन्ते तस्मिन् योद्धारः "हरतेः वा" ह्रियन्ते हि तस्मिन् जीवितानि, वसूनि च। "श्येनः शंसनीयं गच्छति" शीघ्रत्वात्। "यूथं यौतेः"; तद्धि "समायुतं भवति" एकत्र मिश्रीभूतं स्त्रीपुरुषबालवृद्धैः पशुभिः॥ एव मिह नीचायमानं श्येन मित्यनेन सम्बन्धाज्जसुरिर्बद्ध इत्युपपद्यते; न ह्यबद्धः श्येनो नीचैरयते॥

---

* "सर्वे नन्दन्ति यशसागतेन"—इति ऐ० ब्रा० १, ३, १।
† १भा० ३९१ पृ० ३अ० १४ख० (७); ३९२ पृ० (७)।
‡ १भा० १७९ पृ० २अ० ३ख० (९); १७८ (९)।
§ १भा० २९४ पृ० १अ० १७ख० (५); २९८ पृ० (५)।

"जरते(५२)"—इति *। एतदनवगतम्। धातोरस्यार्थे प्रवृत्ति रेवानवगमः। "दिवस्परि०—०जरते स्वाधीः"—इति †। वत्सप्री-भीलन्दनः, तस्येय मार्षम्। उक्थस्याग्नेरुपस्थाने विनियुक्ता। 'दिवस्परि' 'दिवः' द्युलोकादित्यर्थः। 'प्रथमम्' अयम् 'अग्निः' 'जज्ञे' आदित्यात्मना। 'द्वितीयम्' 'अस्मत् परि' अस्मदधि, अस्मत्तो जायते, पार्थिवात्मना। 'तृतीयम्' 'अप्सु' अन्तरिक्ष लोके वैद्युतात्मना जायते। "आपः"—इति ह्यन्तरिक्षनामसु पठितम् ‡। नृणां मनस्यवस्थितो 'नृमणाः'; नृषु वा मनोऽस्य, स नृमणाः। योऽय मेक एव त्रिषु स्थानेषु जायते §, त मेवङ्गुणयुक्तं 'स्वाधीः' शोभनधीः 'दन्वानः', 'अजस्रं' नित्यं 'जरते' स्तौति, यः, स एव 'स्वाधीः' सुप्रज्ञ इत्यर्थः। दन्वानो हि किं मन्यत् स्तुतेः कुर्यात्? तस्मात् "जरते"-इत्यस्य शब्दस्य "गृणाति"—इत्यर्थ उपपद्यते॥

"मन्दिने(५३)"—इति ‖। एतदनवगतम्। "मन्दतेः" स्तुत्यर्थस्य। मन्दनीयः स्तुतिमान् वेत्यर्थप्रतीतिः। "मन्दति(१८), शंसति(२५)"—इति स्तुतिकर्मसु पठितम् ¶। "प्रमन्दिने पितुमद०—० हवामहे" **। कुत्सस्येय मार्षम्। छन्दोमेषु तृतीयेऽहनि मरुत्वतीये

---

* १भा० ४०१ सू० १२ मं०।

† "दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः। तृतीय मप्सु नृमणा अजस्र मिन्धान एनं जरते स्वाधीः॥"—इति ऋ० सं० ७, ८, १८, १।

‡ १भा० १४ सू० १ऋ० ३ख० (८); १८ सू० (८)।

§ ऋ० सं० ३, १, २२, २ ऋक् द्रष्टव्या; शत० ब्रा० ७, १, २१ कण्डिकायाञ्च।

‖ १भा० ४०१ सू० १५ मं०।

¶ १भा० २२१ सू० ३ऋ० १४ख० (१८), (२५); २२४ सू० (१८), २२५ सू० (२५)।

** "प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना। अस्मत्रो रुषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे॥" ऋ० सं० १, ७, १२, १।

शस्त्रे निविद्धानीयसूक्तस्य * प्रथममेषा। हे स्तोतारः! 'प्रार्चत' प्रकर्षेणोच्चारयत, पूजयत। 'मन्दिने' मन्दनीयाय, स्तुत्याय, स्तुतिमते वा; इन्द्राय। 'पितुमत्' अन्नसंयुक्तं 'वचः'। 'यः' इन्द्रः, किं करोति? कृष्णस्य मेघस्य गर्भभूता अपः 'निरहन्' नीचैरहन्, निरगमयदित्यर्थः। केन? 'ऋजिश्वना' ऋजुरेवावच्छिन्नो लक्ष्ये यः स्वनति गच्छति इति ऋजिश्वा वज्रः, तेन निरगमयत्। 'अवस्यवः' अवन मात्मनो रक्षण मिच्छन्तः, तर्पणं वा। योऽय मेवम्प्रभाव इन्द्रः, त मिमं 'वृषणं' वर्षितारम्, 'वज्रदक्षिणं' वज्रबाहुम्, 'मरुत्वन्तं' मरुत्सहितम्, 'सख्याय' सखिभावाय 'हवामहे' तासु तासु क्रियासु आह्वयामहे इत्यर्थः॥ एव मेतस्मिन् मन्त्रे "मन्दिने पितुमद्वचः प्रार्चत"—इत्येतस्माद्वाक्यसम्बन्धादिन्द्रविशेषण मेतदित्युपपद्यते॥

"गौः(५४)"—इति†। एतदनेकार्थत्वादिह समाम्नातम्। यथा चैतदनेकार्थत्वं तथा पुरस्ताद् "व्याख्यातम्"‡॥ ३ (२४)॥

अचा ह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे॥ अच ह गोः सममंसतादित्यरश्मयः स्वं नामापीच्य§ मपचित मपगत॥ मपिहित मन्तर्हितं वामुच चन्द्रमसो गृहे गातुर्व्याख्यातो (गातुं कृणवन्नु-

---

* "निविद्धानं निविदा ह्येव स्तोच मतिशस्तं भवति" इत्यादि ऐ० ब्रा० ३,१,११।

† १भा० ४०१ ४० १पं०।

‡ पु० १ख० १पा० १ख० (१०५ ४०)।

§ "संनामापीच्य" क, ख, ग।

॥ "मपगत मपचित"—इति क-च-पुस्तकयोर्व्यत्ययेन पाठ, इत्यिकारसम्मतश्च।

षसो जनायेत्यपि निगमो भवति *) दंसयः कर्माणि दंसयन्त एनानि †। कुत्साय मन्मन्नह्यश्च दंसय इत्यपि निगमो भवति। स तूताव नैन मश्नोत्यंहतिः। स तुताव नैन मंहतिरश्नोत्यंहतिश्चांहश्चांहुश्च हन्तेर्निरूल्होपधाद् ‡ विपरीतात्। बृहस्पते चयस इत्ययारुम्। बृहस्पते यच्चातयसि देवपीयुं पीयतिर्हिंसाकर्मा § वियुते द्यावापृथिव्यौ वियवनात् ॥। समान्या वियुते दूरे अन्ते। समानं सम्मानमाचं भवति माचा मानाद् दूरं व्याख्यात मन्तोऽतेर्ऋधगिति पृथग्भावस्य प्रवचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते। ऋधगया ऋधगुताशमिष्ठाः। ऋध्नुवन्नयाक्षीर्ऋध्नुवन्नशमिष्ठा इति चास्या इति चास्येति ¶ चोदात्तं प्रथमादेशेऽनुदात्त मन्वादेशे तीव्रार्थतर मुदात्त मल्पीयोऽर्थतर मनुदात्तम् (४**) अस्या ऊ षु ण उप सातये भवोऽहेळमानो ररिवाँ अजाश्व (अवस्यता मजाश्व ††) ॥ अस्यै नः सातय उपभवाहेल-

* नैष पाठो दृश्यते क-ख ग-पुस्तकेषु, नापि दृक्षितयोररीळतो व्याख्याकाले। निगमस्वेषः;—ऋ० सं० १, ८, १, १।

† "दंशयन्त्येनानि" – इति ङ, च।

‡ "निरूढोपधाद्" च।

§ "पीयुतिर्हिंसाकर्मा"—इति क, ख, ग।

॥ "वियुमनात्" क, ख, ग।

¶ "चास्या इति" क, ख, ग।

** इदैव चतुर्थखण्डसमाप्तिः क-ख-ग-पुस्तकेषु।

†† एषोऽधिकः पाठो ङ-च-पुस्तकयोः।

मानोऽक्रुध्यन्वरिवान्नातिरभ्यस्तोऽजाश्वेति पूषण माहाजाश्वाजा अजना अथानुदात्तम्। दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्। दीर्घायुरस्या यः पतिर्जीवतु स शरदः शतं शरच्छृता अस्या मोषधयो भवन्ति शीर्षा आप इति वाऽस्येत्यस्या इत्येतेन* व्याख्यातम्॥ ४ (२५)॥

यत्तूक्तम्,—"अथाप्येकेा रश्मिश्चन्द्रमसं प्रति दीप्यते,०—० सोऽपि गौरित्युच्यते;—'अत्रा ह गोरमन्वतेति' तदुपरिष्टाद्व्याख्यास्याम:"—इति †, तदिद मुच्यते;—"अत्रा ह"—इति ‡। गोतमस्य राङ्गणस्येय मार्षम्। अग्निचयने इष्टकोपधाने विनियुक्ता। 'अत्रा ह' अत्रैव, एतस्मिंश्चन्द्रमण्डले 'गोः' सुषुम्नस्यैकस्य सूर्यरश्मेः, इतरे सूर्यरश्मय: 'अमन्वत' अमन्यन्त, समनुज्ञातवन्त इत्यर्थः। किं पुनस्तत् सममन्यन्त 'नाम', नमनं प्रह्वण मवस्थान मित्यर्थः। कुतः? 'त्वष्टुः' आदित्यस्य स्वभूता रश्मय: सममन्यन्त। कथं तस्य नमनं तत् सममन्यन्त? इति 'अपीच्यम्' "अपगतं" तत्रैव चन्द्रमण्डलेऽन्तःप्रविष्टस्य यदवस्थानान्तरं तत् सममन्यन्त। अथ वा अपीच्य मिति "अप" एत्य सूर्यमण्डलात् चन्द्रमण्डले "चितम्" अपीच्यम्। अथ वा अपीच्यम् "अन्तर्हितम्" इत्यर्थः; "प्रतीच्यम्(५), अपीच्यम्(६)"—इति अन्तर्हितनामसु पठितम् §। क्व पुनरन्तर्हितस्यान्य-

---

* "वाऽस्या अस्येत्यनेन"—इति क, ख, ग।
† पु० १ब० १पा० १ख० (१८१ ट० १०पं०)।
‡ ऋ० सं० १, १, ७, ५।
§ १भा० १९५ ट० १ब० १५ख० (५), (६)।

चावख्यानम्? इति 'इत्या चन्द्रमसो गृहे' अमुष्मिंश्चन्द्रमण्डले इत्यर्थः॥

"गातुः(५५)"—इति*। "व्याख्यातः"; "गमनं यज्ञपतये"—इत्यत्र †॥

"दंसयः(५६)"—इति ‡। एतदनेकेषां कर्मणां अभिधानम्। तानि हि दंसयन्त्युपलयन्ति कर्मकराः। "तव त्य इन्द्र०—०ह्यश्व दंसयः?"। अङ्गस्यौरवस्येय मार्षम्। हे 'इन्द्र' 'तव' 'त्ये' 'वङ्गयः' वोढारोऽश्वाः, 'सख्येषु' समानख्यानेषु कर्मसु वर्त्तमानाः; इद मेव हि भवतः कर्म, मेघो विदारयितव्य इति॥; एतदेव तेषा मपि समानख्यानत्वम्। 'चृतम्' उदक मस्मिन्नस्तीति, एव मेतं 'मन्वानाः'। कि मकुर्वन्? 'व्यदर्द्दिरुः' विदारितवन्तो 'वलं' मेघं काले काले। 'यत्र' यस्मिन् मेघे विदारिते 'दशस्यन्' दशस्यन्ति 'उषसः' माध्यमिकाः; एकस्या एव पूजनार्थे बहुवचनम्। किं दशस्यन्? 'अपः', 'अह्नः च' अहिनिवासिन्यः, मेघनिवासिनी-रित्यर्थः। ताश्च दीर्यमाणाः 'रिणन्' आगच्छन्, पृथिवीलोकम्। तदेतत् सर्व मपि युष्मदश्वैः क्रियते। किं पुनरर्थ मुद्दिश्य त एवं कुर्वन्ति? 'मन्मन्' मन्यमानाः, 'कुत्साय' पृथिवीं कृन्तते, कृषी-वलाय; 'दंसयः' कृषिकर्माणि सफलानि कर्त्तुम्। अत्र 'दंसयः'

---

* १भा० ४०२ पृ० २पं०।

† पृ० ४९२ पृ० २पं०, किञ्च ४९७ पृ० ४पं०।

‡ १भा० ४०२ पृ० ५पं०।

§ "तव त्य इन्द्र सख्येषु वन्हय चृतं मन्वाना व्यदर्दिरुर्वलम्। यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्नश्च दंसयः॥"—इति ऋ० सं० ८, ७, २९, १।

॥ "अथास्य कर्म;—रसानुप्रदानं हतवधो या च का च वलकृतिरिन्द्रकर्मैव तत्।"—इति प० दै० का० ७, २, २।

—इत्येतेन शब्देन "कर्माणि" उक्तानि। दासैः कर्मकरैः; 'दस्यन्ते'—इति दत्वा कर्मकरा दासा इति। बाऊल्याद् भाष्यकारेण नोदाहृतः॥

"तूताव(५७)"—इति *। एतदनवगतम्। "तुताव"—इत्यवगमः। "यस्मै त्वं मा यजमा॰—॰वयं तवा" †। कुत्सस्येयं मार्षम्। महाव्रते आग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते। हे भगवन्! 'अग्ने!' 'यस्मै' यजमानाय 'त्वम्' 'आ' आहूय 'यजसे' देवान्, होतृत्वेऽवस्थितः। 'सः' एव 'साधति' साधयत्यात्मनोऽभिप्रेतार्थम्। किञ्च; स एव 'अनर्वा' अप्रत्यृतः, अनाश्रितः कञ्चिदन्यम्, स्वेनैव महिमायुक्तः। 'चेति' निवसति, युष्मदनुग्रहात्। स एव 'दधते' धारयते 'सुवीर्यं' शोभन मात्मनो वीर्यम्। स एव 'तूताव' वर्द्धते, प्रजाधनयज्ञोभिः; 'न' च 'एनम्' 'अंहतिः' अपि पाप मपि सम् "अश्नोति" आप्नोति। हे भगवन्नग्ने! यः त्वं मेव मतिमहानुभावः, तस्य 'तव' 'वयं' 'सख्ये' सखिभावे, परिचरणकर्मणि वर्त्तमानाः 'मा रिषाम' मा केन चिच्छिद्येमहि॥ एवमत्र मन्त्रे "तूताव"—इति शब्दः 'यस्मै त्वं मा यजसे'—इत्येवमादीनां पदानां मध्ये श्रूयमाणो दृष्ट्यर्थ मुपपद्यते॥ "अंहतिश्च अंहश्च अंकश्च"—इत्येते शब्दाः‡ "हन्तेः" "निरूढोपधात् विपरीताद्" अकार मुपधातोर्निष्कृष्यादौ कृत्वा, ततो हकार-नकारौ विपर्ययेण भवतः॥

---

* १भा० ४०९ पृ० ८ पं०।

† "यस्मै त्वं मा यजसे स साधत्यनर्वा चेति दधते सुवीर्यम्। स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तवा॥"—इति ऋ० सं० १, ९, १०, १।

‡ १भा० ४५९ पृ० (१११). किञ्च पं० ९, ५, ५. अंकश्च द्रष्टव्यः।

"चयसे(५८)"—इति *। एतदनवगतम्। "चातयसि"—इत्यर्थप्रतीतिः। "ये त्वा देवोस्रिकं०———०चयसु इत् पियारुम्" †। अगस्त्यस्य मैत्रावरुणस्येयं मार्षम्। हे 'बृहस्पते!' 'देव' दानादिगुणयुक्त! 'ये' यजमानाः त्वाम् 'उस्रिकम्' उत्स्राविणं भोगानां 'मन्यमानाः' दातैव केवलं भोगानाम्, अय मार्जवेन न प्रत्युपकारार्थीत्येवं मन्यमानाः, 'पापाः' अप्रत्युपचिकीर्षवः 'उपजीवन्ति' एव केवलं, न क्रियया प्रत्युपकारं कुर्वन्ति, 'भद्रं' भन्दनीयं स्तुत्यम्, अपि च 'पज्राः' प्रार्जितधनाः सन्तः, न दरिद्राः। किं तेभ्यः? इति 'न दूळ्हे' न तेभ्य एवंलक्षणेभ्यः, दुर्दृशेभ्यः, पापबुद्धिभ्यः, स्वार्थप्रधानेभ्यः त्वम् 'अनु ददासि' 'वामं' वननीयं धनम्। किं तर्हि? यस्तादृशो जनः 'पियारुः' देवपीयुः, देवहिंसिता, स्वभोगप्रधानः, न यष्टा देवानाम्, तं 'चयसे' "चातयसि" नाशयसि। य एव श्रद्दधानो यष्टा, तस्मै देवान् यजते ‡ अनुददासि वामम्; यस्मात् त्व मेवं करोषि, तस्मात् ते पापबुद्धयः त्वां सम्यक् न पश्यन्तीत्यभिप्रायः। यो हि दुर्बुद्धिः देवपियारुः तस्य किं मन्यत् चातनादृते स्यात्? चात्य एवासौ॥ तस्मात् 'चयसे'—इत्येष शब्दः, "चतयतिः" नाशने इत्येव मवस्थापिते नाशनार्थो भवतीत्युपपद्यते; "चातयतिर्नाशने"—इति हि वक्ष्यति §। लोकेऽपि च प्रसिद्धं देशादुच्चातित इति। तस्मादुपपद्यते॥

---

* १भा० ४०१ पृ० ११ पं०।

† "ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रं मुपजीवन्ति पज्राः। न दूळ्हे इ अनु ददासि वामं बृहस्पते चयसु इत् पियारुम्॥"—इति ऋ० सं० १, ५, ११, ५।

‡ "देवान् यच्छते" क, ख।

§ प० ४च० ४पा० १ख०।

"वियुते(५९)"—इत्येतदेक मेव * समस्तयोर्द्यावापृथिव्योरभिधानम्। "वियवनात्"—इति निर्वचनम्। यौतिर्मिश्रणार्थः (अदा० प०) तस्योपसर्गसामर्थ्याद्विपर्ययेणार्थो भवति, विमिश्रीभूते इत्यर्थः। "दूमे वै सहास्तां ते शम्यामाचं न्यैता मिति ह विज्ञायते"†। "समान्या वियुते०—०मिथुनानि नाम‡"। विश्वामित्रस्येय मार्षम्। वैश्वदेवे सूक्ते। 'समान्या' समान्यावेते द्यावापृथिव्यौ, समानपरिमाणे। 'वियुते' च विमिश्रीभूते। 'दूरे अन्ते' च, न हि द्यावापृथिव्योरन्तोपलब्धिरस्ति। 'ध्रुवे पदे' सप्तम्येकवचनम्, अन्तरिक्षविषयम्; ध्रुवं शाश्वतम्, एतस्मिन् पदे आधारभूते; अन्तरिक्षस्य क्षयो नास्ति, प्रतिद्वन्द्वाभावात्; तच्चैतयोर्द्यावापृथिव्योः प्रतिष्ठा; तस्मिन्नेते 'तस्थतुः' स्थितवत्यौ। सर्गादारभ्य 'जागरूके' जागरणशीले, स्वं स्व मधिकारं प्रति। 'उत' अपि चैते 'स्वसारौ' भगिन्यौ, सहोत्पत्तित्वात्। 'युवतीभवन्ती' सम्मिश्रीभवन्त्यौ, परस्परसम्भोगेन। 'आदु उ ब्रुवाते मिथुनानि नाम' इति। अथैव मेते 'वियुते' च सम्मिश्रीभूते च सत्यौ, द्यावापृथिव्यौ, ब्रुवाते इव; प्रथयत इव; स्तोतृणां 'नाम' नामानि, आत्मनो 'मिथुनानि' द्विवचनसम्बद्धानि स्तुतिनामभिः;—"स्वधे(९), पुरन्धी(२)"—इत्येवमादिभिरिति §॥ एव मेतस्मिन् मन्त्रे "वियुते"—इत्यस्य पदस्य द्यावापृथिवीविशेषणत्वम्,

---

* १भा० ४०२पृ० १४पं०।

† पृ० २६६ पृ० ८ पं०;—'तयोः सारूप्यख्यापिका एषा'—इत्यादि।

‡ "समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके। उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम॥"—इति ऋ० सं० ६, ६, १५, १।

§ १ भा० ३७१, ३७२ पृ० ३अ० १०ख० (१), (२)।

द्यावापृथिवीशब्दश्चात्राध्याहार्यः; 'दूरे अन्ते'—इत्येवमादीनां तथोपपत्तिदर्शनात्॥

"ऋधक्(१०)"—इति *। अनेकार्थम्। "ऋधगिति पृथग्भावस्य प्रवचनं भवति" पृथक्त्व मेव पृथग्भावः, तस्येदं प्रवचनं भवति; सोऽनेन प्रोच्यते इत्यर्थः। "यदिन्द्र दिवि पार्ये०——० मरुद्भिः"†। भरद्वाजस्येय मार्षम्। पृष्ठ्यस्य पञ्चमेऽहनि मरुत्वतीये निविद्धानीये सूक्ते श्रूयते। हे भगवन्! 'इन्द्र!' 'यद्' यदि त्वं 'दिवि' द्युलोके 'पार्ये' पारणीये स्थानेऽवस्थितः, 'यदृधक्' यदि ऋधक् पृथगिव इत्यर्थः। 'यदा' यदि वा 'स्वे सदने' अन्तरिक्षलोकेऽवस्थितः। 'यत्र वासि' क्वचिदन्यत्रैव स्थानेऽवस्थितः; को हि तत्त्वतो वेद, तव स्थानं यत्रासीति। किं बहुना, यत्र यत्रासि अवस्थितः, 'अतः' आगत्य 'यज्ञम्' 'अवसे' रक्षसि। 'नियुत्वान्' वायुर्भूत्वा। यस्य मेवम्प्रभावः, त्वां तु ब्रवीमि;— हे 'गिर्वणः' गीर्भिः सम्भजित! स हि स्तुतीः सम्भजति, स्तुतिभिर्वा सम्भज्यते, 'सजोषाः' सहजोषणः सप्रीतिः, 'मरुद्भिः' पिबैतं सोम मस्मत्प्रत्तम्। एव मेके पृथग्भावोदाहरण मेत सृचं व्याचक्षते॥

अपरे पुनर्य एवैष भाष्यकारेण निगमः पठितः,—"ऋधगयाः"—इति, अत्रैवैतौ द्वावर्थाविति मन्यन्ते, तथापि दर्शयिष्यामस्तस्या मेवर्चि "अथापि" अथ मेव ऋधगिति शब्दः कदाचिद् "ऋधोत्यर्थे"

---

* १भा० ४०१ पृ० १९पं०।

† "यदिन्द्र दिवि पार्ये यदधुग् यदा स्वे सदने यत्र वासि। अतो नो यज्ञमवसे नियुत्वान् सजोषाः पाहि गिर्वणो मरुद्भिः॥"—इति ऋ० सं० ४, ७, १२, ५।

अपि "दृश्यते" ;—"ऋधगया ऋधगुताश्रमिष्ठाः" इत्यस्मिन् मन्त्रे। "यदद्य त्वा प्रयति यज्ञे"—इति *। समिष्टयजुःषु सौमिकेषु विनियुक्ता। तत्र चोक्तम् ;—"एतौ विश्वामित्रो यज्ञस्यारणी अपश्यत्"—इति। हे भगवन्! 'अग्ने!' 'यत्' प्रयोजन मुद्दिश्य 'अद्य' 'प्रयति' प्रोत्सर्पति एतस्मिन् 'यज्ञे' 'वयम्' 'अवृणीमहि' वृतवन्तो 'होतारं' त्वाम्। "अग्निर्देवो दैव्यो होता"—इति श्रूयते †। किं पुनस्तत् प्रयोजनम्? इति। कथं नामाल्प मप्यवदानमात्रं ऋतं देवताहविषमर्थं बद्ध कुर्यादशान्त मपि च यद् विगुणं यज्ञस्य किञ्चित् तच्छमयित्वा समृद्ध मेव कुर्यात्? इति, तच्चोभय मपि यथाशास्त्र मेवास्माकं त्वया कृतम्; अत इदानीं परिसमाप्ते एतस्मिन् यज्ञे प्रत्यभाष्यसे अस्माभिः;—'ऋधगयाः' त्वम्, अल्प मपि कृतम् अस्माभिः हविः, 'ऋधक्' एव ऋद्ध मेव, देवताहविषमर्थं बद्ध कुर्वन् 'अयाः' त्वं याग मकार्षीरित्यर्थः। किञ्च; 'ऋधगुताश्रमिष्ठाः' अपि च यदपि किञ्चिदिगुणम् अकार्ष्म, वय मेतस्मिन् यज्ञे, तदपि सर्व मेव समृद्धं सगुण मेव कुर्वन्, पाप मस्य यज्ञस्य अश्रमिष्ठाः क्लिष्टरूपेण श्रमितवानसि। यस्य मेतदकार्षीरस्माक मेतस्मिन् यज्ञे, तं, त्वां ब्रवीमि; —एतदेव मयैतेषां कर्त्तव्य मित्येतद् 'विद्वान्' 'प्रजानन्' प्रकर्षेण जानन् अस्माक मात्मन उपरि भक्तिं पुनः पुनः 'उपयाहि' उपागच्छ

---

* "अयं हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारं मवृणीमहीह। ऋधगया ऋधगुताश्रमिष्ठाः प्रजानन् यज्ञ मुपयाहि विद्वानस्खादा॥"—इति य० वा० सं० ८, १०। टीकाकृदुद्धृतो यदद्येत्यादि प्रतीकस्वेषः शाखान्तरीयो बोध्यः।

† "अग्निर्वै देवानां होता, तच्चैतदोत्वदनं यदुत्तरवेदी नाभिः।"—इति ऐ० ब्रा० १, ५, १।

'यज्ञम्'॥ एवं तावदेकेषां "ऋधगयाः, ऋधगुताग्नमिष्ठाः"—इत्येतौ द्वावपि "ऋधक्"-शब्दौ ऋध्नोत्यर्थावेव। एतस्मिन्नर्थे, ऋधक्कृच्छब्दस्य पृथग्भावार्थत्वे "यदिन्द्र दिवि पार्थे यदृधक्"—इत्येतदुदाहरणम्*। अन्ये पुनर्मन्यन्ते;—"ऋधगयाः, ऋधगुताग्नमिष्ठाः"—इत्येतयोरेव ऋधक्कृच्छब्दयोः पूर्वः पृथग्भावार्थः, उत्तर ऋध्नोत्यर्थ इति। तदेतदुपपद्यते; मिश्राण्यपि ह्वींषि क्रुतानि सन्ति, त्व मग्ने ऋधक् पृथगेव कृत्वा ततो देवानयाड्ढीर्न ते सख्योहोऽस्तीत्यभिप्रायः। 'ऋधगुताग्नमिष्ठाः'—इत्येष यथाव्याख्यात एव। पूर्वस्त्वर्थः साधीयान्; यच्च द्वावप्येतावृध्नोत्यर्थावेव,— "ऋधगयाः", "ऋधगुताग्नमिष्ठाः"—इति। किं कारणम्? "अथाप्यृध्नोत्यर्थे दृश्यते"—इति एव सुपन्यस्य भाष्यकारेण ततोऽय सुपात्तो निगमः,—"ऋधगया ऋधगुता ग्नमिष्ठाः"—इति; एवञ्च निरुक्तम्—"ऋध्नुवन्नयाड्ढीर्ऋध्नुवन्नग्नमिष्ठाः"—इति। तस्मात् द्वावप्येतावृध्नोत्यर्थाविति एतदेव साधीयः॥

"अस्राः(९१)"—इति, "अस्र(९२)"—इति च †। पदद्वयं स्त्रीपुंसविषयम्, स्वरकृतात् विशेषाद् प्रधानाभिधायि वा भवति। आह;—कथम्? इति उच्यते;—"उदात्तं प्रथमादेशे"‡। प्रथम इति मुख्यनाम, मुख्यं प्रधान उच्यते; प्रधानं कञ्चिदर्थ मभिदधत् एतद् द्वय§ मुदात्तं भवति। "अनुदात्त मन्वादेशे"॥। प्रधान मर्थ मनु

---

* पु० ४८१ पृ० ५,२१ पं०।
† १भा० ४२०पृ० १पं०।
‡ बा० प्रा० १अ० ७खं०।
§ "एतत् पदद्वय" ग।
॥ "इदमोऽन्वादेशेऽनुदात्तसृतीयादौ"—इति पा० १, ४, ३२।

यो वर्त्तते गुणभावेन तस्यैतत् पदद्वय मन्यादेशे वर्त्तमान मनुदात्तं भवति। आह;—कस्मादेतत् पुनरुदात्तं प्रधाने वर्त्तमान मनुदात्त मप्रधाने? इति। उच्यते;— लोकेऽपि हि यत् "तीव्रार्थतरम्" उत्कृष्टार्थप्रधानतरं तत् "उदात्तम्"—इति प्रसिद्धम्; तद्यथा,— उदात्त मेतत् कुल मिति। "अल्पीयोऽर्थतर मनुदात्तम्" अल्पीयसार्थेन यद्युक्तं भवति तदनुदात्त मुच्यते; अप्रधान मित्यर्थः। उदाहरणैरेवानयोर्विभागं दर्शयति;—"अस्या ऊ षू०—० अपन्नुवे"*। परुच्छेपस्यार्षम्। अतिच्छन्दाः। 'उ'—इति, 'सः'—इति, 'न'—इति पदानि। 'अस्याः' "अस्यै" 'सातये' लभ्यये। कथं नाम वय मर्थं मभिप्रेतं लभेमहि? इत्येत मर्थं मुद्दिश्य, हे 'पूषन्!' अस्माकं सुष्ठु 'उप' समीपे 'भुवः' भव। त्वयि सन्निकृष्टे त्वदनुग्रहादेत मर्थं लभेमहीत्यभिप्रायः। कथं पुनरुपभव? 'अहेलमानः' अक्रुध्यन्, सर्वो ह्यभ्यर्थ्यमानः क्रुध्यतीत्यभिप्रायः। 'ररिवान्' दानवान्, दानाभिप्रायसंयुक्तेन चेतसा उपभव। 'अजाश्व' "अजनाश्व" गमनाश्व, छागाश्व वा 'अवस्यताम्' अस्माकं धन मिच्छतां भव, "अजनाश्व" छागाश्वेत्यर्थः। किञ्च; 'ओ षु त्वा वृतीमहि'। 'आ', 'उ', 'षु',—इति पदानि। 'आ वृतीमहि' त्वां सुष्ठु आभिमुख्येन आत्मनो वर्त्तयामहे। केन? 'स्तोमेभिः' स्तोत्रैः। 'दस्म' हे दस्म! दर्शनीय! अथ वा दान्त! साधुभिः शोभनैरित्यर्थः। किञ्च; 'न हि त्वा' नैव त्वां

* "अस्या ऊ षू ण ऊप सातये भुवोऽहेळमानो ररिवाँ अजाश्च अवस्यता मजाश्च। ओ षू त्वा वृतीमहि स्तोमेभिर्दस्म साधुभिः न हि त्वा पूषन्नति मन्य आघृणे न ते सख्य मपह्नुवे॥"—इति ऋ० सं० १, ९, १, ४।

दर्शनीयम् अतीत्य साधुतरां कञ्चिदन्यां महं देवतां मन्ये, हे 'आघृणे' आगतदीप्ते! त्वङ्कृत एवाहं मस्मीत्यभिप्रायः। किञ्च; 'न ते' न चाहं तव 'सख्यं' सखिभावं कदाचिदपि 'अपक्रुवे' कृतघ्नो ह्यहं मित्यभिप्रायः। एव मत्र सातिः प्रधानेति कृत्वा "अस्याः"—इत्येतत् पदं मन्त्रोदात्तम्। अन्त्रोदात्त मपि च सदुदात्त मित्युक्तं भाष्यकारेण, एकदेशस्योदात्तत्वाद् ॥

"अथ" पुनर्यस्मिन् "अनुदात्तम्" एतत् पदं गुणभूतार्थाभिधायि भवति। तस्यैष निगमः;—"पुनः पत्नीं॰—॰शरदः शतम्"*। सूर्याया आर्षम्। विवाहे विनियुक्ता। पित्रा पूर्वं मेतां दत्तां सतीं कन्यां पत्नीं पुनरग्निरदात्, 'आयुषा सह वर्चसा' तेन सह एतस्मिन् वैवाहिके कर्मणि अग्निसन्निधिसंस्काराद् भार्यात्व मुपजायते इत्येतदपेक्ष्य पूर्वदानात् पुनर्दात्व मुच्यते। तदेव मस्या दत्ताया एतदाशास्महे;—'योऽस्याः पतिः' स 'दीर्घायुः' अस्त्विति। यतो विशेषयन् ब्रवीमि†; —"जीवतु‡ सः शरदः शतम्"—इति। शरदि दुर्जीवाः, रोगभूयस्त्वात्; अत एव माशास्यते शरच्छतं जीवत्विति॥ एतस्मिन् मन्त्रे भर्तृकन्यासंयोगे सति भर्त्तैव प्रधानम्; तस्य ह्यायुराशास्यते। तस्य लक्षणार्था पत्नी। तस्माद् "दीर्घायुः अस्या यः पतिः"—इति, एतदनुदात्तम् ॥

निगमप्रसक्त मुच्यते;—"शरद्", "अस्यां" हि "भूताः" पक्षाः

---

* "पुनः पत्नीं मग्निरदादायुषा सह वर्चसा। दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्॥"—इति ऋ॰ सं॰ ८, २, १०, ४।

† "ब्रवीति"—इति ग।

‡ "जीवातु"—इति ख, "जीवाति"—इति म।

"ओषधयो भवन्ति"—इति, "शीर्णा आप इति वा", वर्षासु हि प्रवृद्धानि स्रोतांसि शरदि विशीर्यन्ते। "अस्य—इति" एतत् पदं पुंविषयम् षष्ठ्यन्तम् "अस्याः—इत्येतेन" स्त्रीविषयेण पदेनैव "व्याख्यातम्"॥ ४ (२५)॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यातापश्यं विश्पतिं सप्तपुत्रम्॥ अस्य वामस्य वननीयस्य पलितस्य पालयितुर्होतुर्ह्वातव्यस्य तस्य भ्राता मध्यमो अस्त्यश्नेा * भ्राता भरतेर्हरतिकर्मणेा हरते भागं भर्त्तव्यो भवतीति वा तृतीयेा भ्राता घृतपृष्ठेा अस्याय † मग्निस्तचापश्यं सर्वस्य पातारं वा पालयितारं वा विश्पतिं सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्र मिति वा सप्त स्तृता सङ्ख्या सप्तादित्यरश्मय इति वदन्ति॥ ५ (२६)॥

यदेवोक्तम् "उदात्तं प्रथमादेशे, अनुदात्तम् अन्त्यादेशे"*—इति तदेवात्रापि लक्षणमित्यभिप्रायः। उदाहरणमात्रं प्रदर्श्यते;—"अस्य वामस्य०—०सप्तपुत्रम्"†। अस्यवामीय मेवेदं सूक्तम्। दीर्घतमस आर्षम्। तान्तौयसवने महाव्रते वैश्वदेवे शस्त्रे शस्यते। 'अस्य' सूर्यस्य 'वामस्य' "वननीयस्य" स्तुतिभिः, 'पलितस्य' "पालयितुः"

* "मध्यमो ऽस्यश्नो" ङ, च।
† "घृतपृष्ठोऽस्याय" ङ, च।
‡ पु० ४०५ पृ० १२ पं०।
§ ऋ० सं० १, १, १४, १।

अयं हि सर्वमेवेदं जगत् पालयति। 'हेतुः' "ज्ञातव्यस्य" आज्ञानार्हस्य। आह ;—तस्य किम्? इति। उच्यते ;—योऽयमेवंलक्षणः 'तस्य' 'भ्राता' "भागहर्त्ता", "भर्त्तव्यो वा" उदकेन, 'मध्यमः' मध्यमस्थानः 'अस्ति' विद्यते *। कतमः? योऽयम् 'अग्निः' "अग्नः" व्यापनो वायुरित्यर्थः; स हि द्युलोकादादित्येनोदकेन भिद्यते, हरति चोदकं द्युलोकात्। 'तृतीयः' 'अस्य' वायोः 'भ्राता' हविर्भागहर्त्ता वा ; ऐन्द्राग्ने हविषि संस्तुतौ वा 'घृतपृष्ठः' घृतेन स्पृष्टः, आज्यस्पृष्टः "अयम्" एव "अग्निः" पृथिवीस्थानः †। 'सहस्विणः' ‡ वायोः ; सर्वस्माद्धि वायुः बलवान्। अथ वा सहस्र मस्य नियुक्तमस्याना मस्तीति सहस्वी वायुः ; "आ नो नियुद्भिः शतिनीभिरध्वरं सहस्विणीभिः"—इति§ श्रूयते वायव्ये मन्त्रे। वायुः, आदित्यः, अग्निः,—इत्येवं परिमङ्ख्याय वायोस्तृतीयोऽग्निर्भवति ; वायुरपि च ज्योतिरेव ; "वायुना ज्योतिषा"—इति विज्ञायते ‖। तच्चैतस्मिन् त्रेधा विभक्ते ज्योतिषि¶, प्रधानत्वेनैत मेवाह मपश्य मिति। 'विश्पतिं' विश्वस्य सर्वस्य जगतः पालयितारम्। कतमम्? य एष 'सप्तपुत्रः'

---

* "वायुर्देवेभ्यो हव्यं वहति, वायु मेव तदन्तरिक्षलोक मायातयति"—इति ऐ० ब्रा० १, ५, २। परलोकाय मपि वक्ष्यति दै० ६, २, १।

† "इमं हि मनुष्या इन्धतेऽग्नि मेव तदस्मिंल्लोक मायातयति"—इति ऐ० ब्रा० १, ५, १।

‡ एतत् पदं, न जाने कस्मिन्नता कुत उपलभ्य व्याख्यात मिति।

§ ऋ० सं० १, १, १४, २।

‖ "स वायुना ज्योतिषा भाति च तपति च"—इति छा० ब्रा० ५, १८।

¶ "भूरग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः स्वः सूर्यः"—इति ऐ० ब्रा० १, ५, ४।

सूर्य एत मेवाह मत्र प्रधानेनापश्य * मित्येव मेतस्मिन् मन्त्रे सूर्यः प्रधानः, सूक्ते सूर्याधिकारात्; तस्मात् 'अस्य वामस्य'—इत्येषः "अस्य"-शब्द अन्तोदात्तः। वायुरत्राप्रधानम्; तस्मात् 'तृतीयो भ्राता घृतपृष्ठो अस्य'—इत्येषः "अस्य"-शब्दोऽनुदात्तः॥ एव मेकस्मिन्नेवास्मिन् मन्त्रे उदात्तानुदात्तावेतौ "अस्य"-शब्दौ प्रधानाप्रधानविषयावित्येक मेवोदाहरणम्॥

आह;—'तृतीयो भ्राता घृतपृष्ठो अस्य'—इत्यनेन "अस्य"-शब्देन सूर्य एव कस्मान्न सम्बध्यते? अपि च "तृतीय"-शब्दस्य प्रकृतानुक्रमाविरोधेनैव मेव सुखतरा योजना भविष्यति। उच्यते;—'अस्य वामस्य'—इत्येतदन्तोदात्तं पद मितरदन्यत् तृतीयो भ्राता घृतपृष्ठो अस्य'—इति प्रधानरूप मेव सत् पूर्वेणानुदात्त मिति स्वरकृतादिशेषादर्थकृतेनापि विशेषेण भवितव्य मित्यप्रधानार्थाभिधायिना विशेषः प्रतीयते। आदित्यसंस्तवात् सूक्ते वायुश्चात्राप्रधानः, प्रकृतादादित्यात् तस्मादायुविषय मेवेदम् अस्येति द्वितीयपद मनुदात्तं सम्पद्यते। अतः सुतरा मुपपन्नं भवति "उदात्तं प्रथमादेशेऽनुदात्त मन्वादेशे"—इत्यत्र प्रथमादेशान्वादेशशब्दाभ्यां प्रधानाप्रधानावुच्येते इति। अन्ये तु मन्यन्ते,—प्रथमादेशो नाम प्रारम्भः; तत्र यद्वर्त्तते, तदुदात्तं भवति, प्रधानार्थतर मुदात्तत्वेनैव† लक्षणेन। तद्यथा,—"अस्या ऊ षु णः (ऋ० सं० २, २, २४०)", "अस्य वामस्य (ऋ० सं० २, ३, १४, १०)"—इति। अन्वादेशो नाम, अन्यस्य पदस्य पश्चादादेशः; तत्र वर्त्तमान मनुदात्तं भवति। पदात् पदस्य निघातो भवतीति हि

* "प्रधानत्वेनापश्य" ग।

† "मनुदात्तत्वेनैव" क।

लक्षणविदोऽपि ब्रुवते *। तच्चानुदात्तत्वेनैव लक्षणेनाख्योयोऽर्थतरं मप्रधानार्थतरं भवति। तद्यथा,—"दीर्घायुरस्या यः पतिः (ऋ० सं० ८, ३, २७, ४.)", "तृतीयो भ्राता घृतपृष्ठो अस्य (ऋ० सं० २, ३, १४, १.)"—इति॥

आह;—कथं सप्तमपुत्र आदित्यः? इति। उच्यते;—"सप्तमो ह्यषावादित्यः पुत्रः"—इत्येव मैतिहासिका मन्यन्ते। ब्राह्मणेऽपि च,—"मृतपितर मण्ड मत्रापद्यत, तस्मिन्नादित्यः सप्तम इन्द्रोऽष्टम इति ह विज्ञायते"। अथ वा सप्तसङ्ख्याका युक्ता अस्य रश्मयः पुत्राः, तेनासौ सप्तपुत्रः। अथ वा नैव सङ्ख्याभिप्राय मेतत् सप्तपुत्र इति। आह;—कथं तर्हि? इति। उच्यते;—"सर्पण पुत्र मिति" एवम्; सर्पणा हि तस्य रश्मयो मुहूर्त्त मप्यनवस्थायिनो यस्य पुत्राः सोऽयं सप्तपुत्रः। "सप्त सृप्ता सङ्ख्या" षड्भ्यः सकाशात्। एवं सप्तसङ्ख्योपेताः, सर्पणक्रियायोग्या वा† एत एव "आदित्यरश्मयः" आदित्यस्य पुत्राः "इति" मन्त्रविदो "वदन्ति" मन्यन्ते॥ ५ (२६)॥

सप्त युञ्जन्ति रथ मेकचक्र मेको अश्वो वहति सप्तनामा। त्रिनाभि चक्र मजरं मनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः॥ सप्त युञ्जन्ति रथ मेकचक्र मेकचारिणं चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वैको अश्वो‡ वहति सप्तनामादित्यः सप्तास्मै रश्मयो रसानभिसन्नामयन्ति

* पा० ८ अ० १पा० १९, १०सू०।

† "सर्पणक्रियायोगिनो वा" ग।

‡ "०कोऽश्वो" ङ, च।

सप्तैन मृषय स्तुवन्तीति वेद मपोतरन्नामैतस्मादेवाभिसन्नामात् संवत्सरप्रधान* उत्तरोऽर्द्धर्चस्त्रिनाभिचक्रं ऋतुः† संवत्सरो ग्रीष्मो वर्षा हेमन्त इति संवत्सरः संवसन्त्येऽस्मिन् भूतानि ग्रीष्मो ग्रस्यन्त्येऽस्मिन्नसा वर्षा वर्षत्यासु पर्जन्यो हेमन्तो हिमवान् हिमं पुनर्हन्तेर्वा हिनोतेर्वाजर मजरणधर्माण मनर्व मप्रत्यृत मन्यस्मिन् यचेमानि सर्वाणि भूतान्यभिसन्तिष्ठन्ते तं संवत्सरं सर्वमाचाभि स्तौति‡ पञ्चारे चक्रे परिवर्त्तमान इति पञ्चर्तुतया§ पञ्चर्त्तवः संवत्सरस्येति च ब्राह्मणं हेमन्तशिशिरयोः समासेन॥ षलर आहुरर्पित मिति षड्ऋतुतया¶ अराः प्रत्यृता नाभौ षट् पुनः सहतेः। द्वादशारं नहि तज्जराय। द्वादश पधयश्चक्र मेक मिति मासानां मासा मानात् प्रधिः प्रहितो भवति। तस्मिन्त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न** चलाचलासः। षष्टिश्च†† ह वै तीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन। सप्त शतानि विंशतिश्च तस्थुः। सप्त

* "संवत्सरः प्रधानः" क, ख।
† "त्यृतुः" क, ख, ग।
‡ "सर्वमाचाभिष्टौति" ङ।
§ "पञ्चर्त्तुनाथाः" क, ख, ग।
॥ "हेमन्तशिशिरसमासेन" क, ख, ग।
¶ षलृतुनाथा" क, ग. "षड्ऋतुनाथा" ख।
**, †† "षष्ठिर्न"—इति "षष्ठिश्च"—इति च ङ।

च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन विभागेन ॥ ६ ॥

॥ इति चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४, ४.

यथा चायं सप्तभिः सर्पणैर्वा रश्मिभिर्युज्यते तथेय मपरा ऋगे-तस्मिन्नेव सूक्ते "सप्त युञ्जन्ति०—०अधि तस्थुः"—इति*। 'सप्त'-सङ्ख्योपेताः सर्पणा वा 'युञ्जन्ति' योजयन्त्यात्मना रश्मयः 'रथं' रंहण मादित्यम्; उद्यन्नेव ह्यसावादित्यो रश्मिभिः युज्यते, रंहण-स्वासौ मुहूर्त्त मप्यनवस्थायित्वाद्। 'एकचक्रम्' एक एव ह्यसावन्त-रिक्षे चरति; इतराणि ज्योतींषि नाशयत्येव स्वेन तेजसा प्रकाशेन। 'एकोऽश्वः' एक एवाश्वः; अश्नोते व्यापनः सर्वभूतानाम् 'वहति' गच्छति 'सप्तनामा' सप्तस्तुतिः, सप्तपुत्रः—इत्येवमाद्याः सप्तसङ्ख्याकाः स्तुतयोऽस्य। अथ वा "सप्तास्मै रश्मयो रसानभिसन्नामयन्ति"—एतस्मिन् मण्डले, इति सप्तनामा। अथ वा "सप्तेन मृषयः (नमन्ति) स्तुवन्ति इति" सप्तनामा। "इद मपीतरत्" शब्दः "नाम" "एतस्मादेव";—"अभिसन्नामात्" तदपि स्व मर्थं प्रत्याययितुं क्रिया-पदस्य वा गुणभावेनाभिमुख्येन सन्नमति। स एवंलक्षणः सप्तचारी† व्यापनः सप्तनामा, सर्पणैः सप्तभिर्वा रश्मिभिर्युक्तो यदा वहति, उदयादारभ्य यावदस्त मिति, तदैवं वहन् निर्वर्त्तयन्नीति। उच्यते; —'त्रिनाभिचक्र मजर मनर्व्वम्' त्रिनाभिसंयुक्तं कालचक्रम्, चकन-

* ऋ० सं० १, ६, १४, १।
† "एकचारी" ग।

धर्म्मि, चकनं चलन मुच्यते; चरणधर्म्मि, क्रमणधर्म्मि वा। 'अजरम्' "अजरणधर्म्माणम्"। 'अनर्वम्' "अप्रत्यृत मन्यस्मिन्", अनाश्रित मित्यर्थः। 'चिनाभिचक्रं' "ऋतुः" हि "संवत्सरः",—"ग्रीष्मो वर्षा हेमन्त इति", अनेन ऋतुविभागेन एतदेवास्य चिनाभित्व मभिप्रेतम्। ऋतुभिर्हि संवत्सरो नह्यते सन्नह्यते इत्यर्थः *। "संवत्सरप्रधान उत्तरोऽर्द्धः", नादित्यप्रधानः। "संवत्सरः संवसन्त्यस्मिन्"—इति प्रसक्तानुप्रसक्तम्; समस्तानि हि "भूतानि" एतस्मिन् संवसन्ति। मैथुनाभिप्रायो वा स्यात् संवासः। "ग्रीष्मः, ग्रस्यन्तेऽस्मिन् रसाः" सूर्येण। "वर्षा, वर्षत्यासु पर्जन्यः", तदेतत् प्रत्यक्ष मेव। "हेमन्तः, हिमवान्", तत्र हि बद्ध भवति हिमम्। "हिमं पुनर्हन्तेर्वा" तद्धि हन्त्योषधि-वनस्पतीन् प्रकिरति; "हिनोतेर्वा" तर्पणार्थस्य, तेन हि पुष्यन्ति यवादयः; गमनार्थस्य वा हन्तेः, तद्धि गमयति क्षयं भूतानि। 'अजरं' तत् संवत्सरचक्रम् अजरणधर्म्मि; न हि संवत्सरस्य जरा नाम धर्मोऽस्ति। "अनर्वं" च तत् "अप्रत्यृतम्" अप्रतिगत मनाश्रित मन्यत्र क्व चित्। आह;—यत्र किम्? इति। उच्यते;—"यत्र" यस्मिन् 'इमा' "इमानि" 'विश्वा' "सर्वाणि" 'भुवना' "भूतानि" 'अधि' उपरि 'तस्थुः' "अभिसन्निष्ठन्ते", आश्रितानि विनाश मुप-यान्ति। विनाशोऽपि हि संस्थोच्यते; संस्थितः पिता ममेत्युक्ते मृत इति गम्यते। तदेवंलक्षणं 'चिनाभि' कालचक्र मजरम्, य आदि-त्योऽभिनिर्वर्त्तयति, यच्चेद मभिनिर्वर्त्यते कालचक्रम्, तदेतदुभय

* "स वा अयं प्रजापतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत् ते वा इम ऋतवश्च मासाश्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठंस्त एतेऽन्योऽन्यस्मिन् प्रतिष्ठिताः"—इति ऐ० ब्रा० ४, ४, २।

मथहं स्तौमीत्येव मस्य मन्त्रस्य पूर्वोऽर्द्धर्च आदित्यप्रधानः, उत्तरः संवत्सरप्रधानः ॥

आह;—कथं गम्यते संवत्सरप्रधान उत्तरोऽर्द्धर्चः इति, न हि संवत्सरग्रहण मत्रास्ति ? उच्यते;—'चिनाभिचक्रम्'—इत्येतस्मादनुसम्बन्धात् । आह;—एतदपि विशेषलिङ्ग मत्र नास्त्येव, यत्र ऋतवो नाभिशब्देनोच्यन्ते इति ? तस्मादेतदप्ययुक्त मेवेति । उच्यते;—य एष पूर्वस्मिन्नर्द्धर्चे प्रकृतेन सूर्येणाभिनिर्वर्त्त्यते संवत्सरः, अस्मिंश्च सर्वाण्येतानि भूतान्यभि सन्तिष्ठते; "तम्" एतं "संवत्सरम्" उत्तरस्मिन्नर्द्धर्चे प्रकृत्य मन्त्रकृत्* 'चिनाभिचक्रम्'—इत्येवमाद्याभिः "सर्वमाचाभिः" सर्वैः अवयवैः 'पञ्चारे चक्रे'*, 'षडरे'†, 'त्रीणि शतानि षष्टिश्च'‡, 'सप्तशतानि विंशतिश्च'§—इत्येवम्प्रकारैः "स्तौति"। तस्मात् सूक्ते संवत्सरस्यावयवस्तुतिप्रायदर्शनादिहापि चिनाभिशब्द ऋतुविषय इत्युपपद्यते। षण्णा मृतूनां द्वौ द्वौ ऋतू समानस्वभावौ इत्यनेनाभिप्रायेण चिलम् ॥ । अथैव मुक्ता "तं संवत्सरं सर्वमाचाभिः स्तौति" ; अधुना यथैतं सर्वमाचाभिः स्तौति, तथोपपादयति,—

---

* मन्त्रा ह्यपौरुषेया ऋषयो वै प्रकाशका एव नेषा मिति सिद्धान्ते कथ मेतत् सङ्गच्छते ? ऐतरेयके चैवं दृश्यत एव। तथाहि,—"सर्प ऋषिर्मन्त्रकृत्" इति ऐ० ब्रा० ६, १, १ ।

* तस्मिन्नेव सूक्ते पञ्चदश्या ऋचि (ऋ० सं० १, १९, ८, १२)।

† तस्मिन्नेव सूक्ते द्वादश्या ऋचि (ऋ० सं० १, १९, ८, १३)।

‡ तस्मिन्नेव सूक्तेऽचत्वारिंश्या ऋचि (ऋ० सं० १, १९, ८, ४८) ।

§ तस्मिन्नेव सूक्ते एकादश्या ऋचि (ऋ० सं० १, १९, ८, ११) ।

॥ "ते वा एते लोकेभ्यो मुक्ता अक्षरा ऋतूनसृजन्त०—० इमाश्चिस्रः सतीरुपसदो दिर्दिरेकैका मुपायन्"—इति ऐ० ब्रा० १, ४, १ ।

"पञ्चारे चक्रे परिवर्त्तमाने०—०शीर्यते स नाभिः"–"इति* पञ्चर्त्तुतया" संवत्सरस्य स्तुतिः। 'पञ्चारे चक्रे' ऋतवः अत्र अरत्वेनाभिप्रेताः †। 'परिवर्त्तमाने' परिगच्छेदं जगद् वर्त्तमाने। आह;—किम्? इति। उच्यते;—'तस्मिन्ना तस्थुः' तस्मिन्नवस्थितानि उपरि अधिरूढ़ानि। कानि? 'भुवनानि' भूतानि 'विश्वा' विश्वानि, सर्वाणि; कालचक्रे हि सर्वं मेवेदं जगदधिरूढं बभ्रमीति। अथैव मतिमहतापि सर्वभूतचक्रेणाक्रान्तस्य कालचक्रस्य 'भूरिभारः' बहुभारः सन्नेवायम् 'अत्रः' संवत्सराख्यः 'न तप्यते' न सन्तापयति नापि सन्तापं यास्यतीत्यर्थः। अपि च 'सनादेव' चिरन्तन एव सोऽत्रः, तथापि न तप्यते, न वा तप्तोऽपि सन् सहसैव 'विशीर्यते'; नश्यति। आह;—यद्यत्रो न तप्यते शीर्यते वा; किमेव मतिबलीयसाचेण घृष्यमाणा नाभिः, तप्यते शीर्यते वा? इति। नेत्युच्यते;—'स नाभिः' अत्रो न शीर्यते न तप्यते। नाभिरादित्य एवाभिप्रेतः ‡। आह;—कथमेतद्गम्यते 'पञ्चारे चक्रे'—इत्यत्र अर-शब्देन ऋतवोऽभिप्रेता इति; न ह्यत्र विशेषलिङ्गं सूत्रेण मरलेऽस्ति; अपि च ऋतवः षट् प्रसिद्धाः, इह च पञ्चार इति श्रूयते; तस्मादनुपपन्नम्? इति। उच्यते;—सूक्ते संवत्सरस्यावयवस्तुतिप्रायदर्शनादुपपद्यते। "पञ्चर्त्तवः

---

* "पञ्चारे चक्रे परिवर्त्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा। तस्य नाक्षत्यते भूरिभारः सनादेव न शीर्यते स नाभिः॥"—इति ऋ० सं० १, १, १६, १=१, ११, ८, १२।

† "पञ्चर्तवो हेमन्तशिशिरयोः समासेन"—इति ऐ० ब्रा० १, १, १। "द्वादशमासाः पञ्चर्तवः संवत्सरः"—इति च ऐ० ब्रा० १, १, ५।

‡ पृ० ४९२ ४० ११पं० द्रष्टव्यम्।

संवत्सरस्येति च ब्राह्मणम्, हेमन्तशिशिरयोः समासेन"* एकत्वेनेत्यर्थः। तस्मादुपपद्यते। एवं पञ्चर्तुत्व मृतूनाम्, अरत्वं चावयवस्तुत्यभिसम्बन्धादिति॥

पञ्चपादं पितरम्०——०र्पितम्"†। "षळर आऽऽ रर्पित मिति षड्ऋतुतया" संवत्सरस्य स्तुतिः। 'पञ्चपादं' संवत्सरम्; ऋतवो हि संवत्सरस्य पादाः, तैरसौ पतति गच्छति। 'पितरं' पालकं सर्वभूतानां मुत्पादयितारं वा 'द्वादशाकृतिम्' द्वादशमासप्रविभक्तविग्रहम्, "द्वादशमासाः संवत्सरस्य"-इति ‡ च ब्राह्मणम्। 'दिवे' द्युलोकस्य 'परे' परमे 'अर्द्धे' स्थाने योऽय मवस्थित आदित्यः, एतस्मिन् पञ्चपादं पितरं द्वादशाकृतिं 'पुरीषिणं' उदकवन्तं संवत्सरम् 'अर्पित माऽऽः' अविशेषेणान्ये ब्राह्मणाः। तस्मात् सर्वेऽप्यृतवो वृष्टिमन्त इति ह विज्ञायते। तस्मात् संवत्सरस्योदकवत्त्व मुपपद्यते। 'अथ' पुनः 'इमे' 'अन्ये' य एते 'उपरे' उपर्यवस्थिताः, 'सप्त' ऋषयः §, एते 'विचक्षणं' विविधानां सर्वभूतकर्मणां द्रष्टार मेव मादित्यं 'चक्रे षड़रे' तस्मिन्॥ संवत्सराख्ये 'अर्पित माऽऽः'। अथ वा सप्तचक्र

---

* ऐ० ब्रा० १, १, १, द्रष्टव्यम्।

† "पञ्चपादं पितरं द्वादशाकृतिं दिव आऽऽहुः परे अर्धे पुरीषिणम्। अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आऽऽरर्पितम्॥"—इति ऋ०सं०१, १६४, १।

‡ "द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः"—इति ऐ० ब्रा० १, ५, १।

§ "सप्तऋषीन् ज्योतींषि, तेभ्यः पर आदित्यः * * * इत्यधिदैवतम्। अथाध्यात्मम्,—* * * सप्तऋषीन् इन्द्रियाणि तेभ्यः पर आत्मा।"—इति प० दै० का० १०, ६, १।

॥ षड्वा ऋतव ऋतुश्च एव तत् संवत्सर मामुवन्नि"—इति ऐ० ब्रा० ४, ६, १।

आदित्यः; स हि सप्तभीरश्मिभिश्चकते दीप्यते *; 'सप्तचक्रे'—इत्येकं पदं तस्मादेव मपि भवति॥ एव मेके संवत्सर मादित्यप्रविष्ट माहुः, अपरे पुन रादित्यं संवत्सरप्रविष्ट मित्येष समस्तार्थः॥ एव मेतस्या मृचि आदित्यसंवत्सरौ स्तूयेते। वक्ष्यति हि "चन्द्रमसा वायुना संवत्सरेणेति संस्तवः"†। संवत्सरस्य चक्ररूपेण नाभ्यादिभिः स्तुतिरुपपद्यते॥ "अराः प्रत्यृता नाभौ" प्रतिगता इत्यर्थः। "षट् पुनः सहते;" ते हि पञ्चसङ्ख्या मभिभूय वर्त्तन्ते॥

"द्वादशारं न हि तज्जराय"—इति। "द्वादशप्रधयश्चक्रमेकम्"—इति‡। "इति मासानाम्" एतौ पादौ भवत इति वाक्यशेषः। "द्वादश प्रधयश्चक्रमेकं०—०न चलाचलासः"—इति §। "मासा मानात्"; मीयते हि तैः संवत्सरः। "प्रधिः प्रहितः" प्रश्लिष्य चक्रे निहितो "भवति", गण्डपुच्छः॥ प्रधिरित्युच्यते¶। 'द्वादशप्रधयः' मासाख्याः, संहताः सन्तः 'चक्र मेकं' भवति। तच्च पुनः 'चीणि नभ्यानि' फलकानि भवन्ति,—चय ऋतवो ग्रीष्मो वर्षा हेमन्त इति। यदेतदेवंलक्षणं चक्रम् 'क उ तत् चिकेत' कस्तु तत् याथात्म्यतो विजानाति? 'तस्मिन्' चक्रे 'साकं' सह 'त्रिंशता न

---

* "सप्त ऋषयः * * * रश्मय श्चादित्ये सप्त"—इति "ऋषयः सप्त (सह श्चादित्यरश्मयः"—इति च प० दै० ब्रा० १२, ४, ४।

† प० दै० का० ७, २, ४।

‡ ऋ० सं० १, ३, १६, १।

§ द्वादश प्रधयश्चक्र मेकं चीणि नभ्यानि क उ तच्चिकेत। तस्मिन्त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः॥"—इति ऋ० सं० १, ३, १३, १।

॥ "गण्डपुष्ठः" ग।

¶ प्रधिरिति नेमिवाचकः, चक्रस्याग्रेभूमस्पृशिभागे तस्य शक्तिः (अमरः २, ८, ५१)।

'शङ्कवोऽर्पिताः' त्रिंशतान्यहोरात्राणि शङ्कव इवार्पितानि। 'षष्टिर्न' षष्ट्यधिकानि त्रीण्यहोरात्रशतानि शङ्कव इवार्पितानि, प्रक्षिप्तानि। द्वितीयो नकारः समुच्चयार्थे। 'चलाचलासः' चलानि च अचलानि च; चलान्यनवस्थायित्वात्, अचलान्यहोरात्रात्मभावं न मुञ्चति। आह;—कथं गम्यते अहोरात्राणीतानीति? उच्यते;—संवत्सर-स्तुतिप्रायसम्बन्धाच्च। "षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहो-रात्राः इति * च ब्राह्मणं समासेन" अहोरात्रयोरेकत्वेनेत्यर्थः॥

"द्वादशारं नु हि०—०स्थुः †। 'न हि तज्जीर्यते', किं तर्हि? अन्यानि भूतानि जरयत् 'वर्वर्त्ति' च पुनःपुनर्वर्त्तते। 'परि द्यां' परिगृह्य द्यां च पृथिवीं च ततो वर्वर्त्ति। 'ऋतस्य' उदकस्य पूर्णम्, अथ वा 'ऋतस्य' आदित्यस्य स्वभूतम्, अथ वा 'ऋतस्य' यज्ञस्याङ्ग-भूतम् 'आ तस्थुः' पुत्राः। एतस्मिंश्चक्रे 'मिथुना' द्वन्द्वा इत्यर्थः। कस्य? 'अग्नेः'। अग्निशब्दोऽस्मिन् मन्त्रे सम्बोधनान्तः, षष्ठ्या विपरिणम्यते; अग्नेः पुत्रा आतस्थुरिति। अग्निश्चादित्य एवाभिप्रेतः ‡, तस्याहो-रात्राण्येव पुत्रत्वेनोच्यन्ते; तत्कृतत्वादहोरात्राणाम्। आह;—कियन्तस्ते पुत्राः? इति। उच्यते;—"सप्तशतानि विंशतिश्च"। ब्राह्मण

---

* ऐ० ब्रा० ४, २, ६ द्रष्टव्यम्।

† "द्वादशारं नु हि तज्जराय वर्वर्त्ति चक्रं परि द्यामृतस्य। आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः॥"—इति ऋ० सं० १, ६, १६, १।

‡ 'अग्निः सर्वा देवताः"—इति ऐ० ब्रा० २, १, २। "अग्निमयीः पुरश्चिपुरं पर्यास्यन्त'—इत्यादि च ऐ० ब्रा० २, २, १। "सोऽग्निर्दिविस्पृगूर्द्ध उदत्रयत, सः स्वर्गस्य लोकस्य द्वार मदृणोत्, अग्निर्वै स्वर्गस्य लोकस्याधिपतिः"—इत्यादि ऐ० ब्रा० १, ४, ४।

मपि चैतस्मिन्नर्थे भवति;—"सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः—इति च ब्राह्मणं महोरात्रयोर्विभागेन विभागेन"—इति * ॥ एव मेतस्मिन् सूक्ते संवत्सरं "सर्वमाभिः" सर्वैरवयवैः "स्तौति"। तस्मादुपपद्यते "सप्त युञ्जन्ति"—इत्येतस्या ऋचि संवत्सरप्रधानस्यैनाभिचक्र मित्येषोऽर्द्धर्चः। तदेतत् सर्वं मपि 'सप्तपुत्रं' सर्पणपुत्र मित्येतस्मात् पदात् प्रसक्तानुप्रसक्त मुक्तम्; प्रकृत मिदानीं वर्णयिष्यामः। किं पुनः प्रकृतम्? ऐकपदिकं समाम्नायव्याख्यानम् †। तत्र यदुक्तं तदुक्त मेव, यदनुक्तं तदुक्तव्य मितीद मारभ्यते;—"षष्टिं सहस्रा नवतिं नवेन्द्रश्चरथे नदीनाम्"—इति ‡ ॥ ६ (२७) ॥

॥ इति निरुक्तवृत्तौ नवमाध्यायस्य § चतुर्थः पादः ॥ ४, ४.

ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ नवमोऽध्यायः ॥ (चतुर्थोऽध्यायः) समाप्तः ॥ ४ ॥

(१ एकार्थैकानुवयः २ सुपर्णायद् ३ इन्द्रजुष्टोद ४ मूनाः ५ सम्मात- ६
७ पन्तीषिरेण ८ मरुत्वाँ ९ अतितउस १० क्तुमिवत ११ त्सूर्यस्येन्द्रेण १२ समीर्मा -

---

* "त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याह्नानि, तावान्त्संवत्सरः। * * *। सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः, तावानेव संवत्सरः।"—इति ऐ० ब्रा० १, १, ७।

† पु० १६८ ष्ट० १पं० द्रष्टव्या।

‡ पञ्चमाध्यायारम्भवाक्यमिदम् (१भा० १ष्ट०)।

§, ॥ पु० १४६ ष्ट० "¶" द्रष्टव्यम्।

१४ १५ १६ १७ १८ १९
न्तासःकायमानःकनीनकेवोपोअदर्शिसुवितेविद्यामदे-
२० २१ २२ २३ २४ २५ २६ २७
वानआघाद्यौर्मेऽदितिरदितिरुतस्माचाहास्यवामस्यसप्त-
युञ्जन्ति सप्तविंशतिः* ॥)

॥ इति निरुक्ते पूर्वषट्के चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

* पुं० १४६ पृ० " * * " द्रष्टव्यम्।

॥ खण्डाधिकता ॥

ङ-नाम-पुस्तके तु,

(१) द्वितीयेऽध्याये "आ ते कारो (१४६पृ०)"—इति खण्डतः परस्तात्, "उतस्य वाजी (२४८पृ०)"—इत्यतश्च पुरस्तात्, "हंसः शुचिषत्*"—इत्यधिको दृश्यते; परं तत्र चाख्येवैतत् खण्डमङ्गीकृत्वाक्यम्,—"अथ निर्वचन० ——— ० उतस्योऽष्टाविंशतिः"—इति (२५२पृ०); हंसः शुचिषदित्यस्याच स्वीकारे त्वष्टाविंशतिरिति खण्डपरिगणनं व्याकुप्यत एव।

(२) एवं तृतीयेऽध्याये "त्वया वयं (२९७पृ०)"—इति खण्डतः परस्तात्, "यत्रा सुपर्णा (३०२पृ०)"—इत्यतश्च पुरस्तात्, "द्वा सुपर्णा†"—इत्यधिको दृश्यते; परं तत्रापि पुस्तके विद्यत एवैतत् खण्डमङ्गीकृत्वाक्यम्,—"कर्मनामानि० ——० द्वाविंशतिः"—इति (३६८पृ०); द्वा सुपर्णेत्यस्याच स्वीकारे तु द्वाविंशतिरिति खण्डपरिगणनं व्याकुप्यत एव।

(३) तथा चतुर्थेऽध्यायेऽपि "देवा नो (४४५पृ०)"—इति खण्डतः परस्तात्, "आ घा ता गच्छा (४६०पृ०)"—इत्यतश्च पुरस्तात्, "आयाहीन्द्र‡"—इत्यधिको दृश्यते; परं तत्रापि पुस्तके विद्यत एवैतत् खण्डमङ्गीकृत्वाक्यम्,—"एकार्थ० ——० सप्तविंशतिः"—इति (५८९पृ०); आयाहीन्द्रेत्यस्याच स्वीकारे तु सप्तविंशतिरिति खण्डपरिगणनं व्याकुप्यत एव॥

---

* प० का० १२अ० ४पा० १ख०।

† प० का० १२ अ० ४ पा० १ ख०।

‡ प० का० १२अ० ४पा० १ख०।

स्वसङ्केतितार्थावबोधनम् ।

क = गवर्णमेण्टपुस्तकालयीयं निरुक्तमूलपुस्तकम्, कलिकातासंस्कृतविद्यालयीयं तद्वृत्तिपुस्तकञ्च ।

ख = मदीयं निरुक्तमूलपुस्तकम्, वाराणसी-संस्कृतविद्यालयीयं तद्वृत्तिपुस्तकञ्च ।

ग = मद्गुरोर्निरुक्तमूलपुस्तकम्, मदीयं तद्वृत्तिपुस्तकञ्च ।

घ = कलिकातास्थास्थायितिकसभापुस्तकालयीयं निरुक्तपुस्तकम्, गवर्णमेण्टपुस्तकालयीयं तद्वृत्तिपुस्तकञ्च ।

ङ = कलिकाता-संस्कृतविद्यालयीयं निरुक्तमूलपुस्तकम् ।

च = रोथ्स्-प्रकाशितं मुद्रितञ्च निरुक्तमूलपुस्तकम् ।

ऋ० सं० = ऋग्वेदीय-शाकलशाखायाः संहिताभागः ।

य० वा० सं० = यजुर्वेदीय-माध्यन्दिनशाखायाः संहिताभागः ।

सा० छ० आ० = सामवेदीय-कौथुमशाखायाः संहिताभागस्य छन्दोनामार्चिकः ।

सा० उ० आ० = सामवेदीय-कौथुमशाखायाः संहिताभागस्योत्तराभिधार्चिकः ।

सा० आ० आ० = सामवेदीय-कौथुमशाखायाः संहिताभागस्यारण्याख्यार्चिकः ।

सा० गे० गा० = सामवेदीय-कौथुमशाखायाः संहिताभागस्य गेयाङ्गानग्रन्थः ।

सा० ऊ० गा० = सामवेदीय-कौथुमशाखायाः संहिताभागस्योहेतिप्रथितगानग्रन्थः ।

अ० सं० = अथर्ववेदीय-शौनकशाखायाः संहिताभागः ।

ऐ० ब्रा० = ऐतरेयब्राह्मणम् (ऋग्वेदीयम्) ।

शु० ब्रा० = शतपथब्राह्मणम् (शुक्लयजुर्वेदीयम्) ।

तै० ब्रा० = तैत्तिरीयब्राह्मणम् (कृष्णयजुर्वेदीयम्) ।

ता० ब्रा० = ताण्ड्यमहाब्राह्मणम् (सामवेदीयम्) ।

षड्विं० ब्रा० = षड्विंशब्राह्मणम् (सामवेदीयम्) ।

म० = मनुसंहिता ।
का० सू० = कात्यायनसूत्रम् ।
गो० गृ० सू० = गोभिलगृह्यसूत्रम् ।
आ० सू० = आश्वलायनसूत्रम् ।
श्रौ० सू० = श्रौतसूत्रम् ।
वा० प्राति = वाजसनेयिप्रातिशाख्यम् ।

पा० = पाणिनिव्याकरणम् ।
का० वा० = कात्यायनवार्त्तिकम् ।
म० भा० = पातञ्जलमहाभाष्यम् ।
वै० भू० सा० = वैयाकरणभूषणसारः ।
प० शे० = परिभाषेन्दुशेखरम् ।
सि० कौ० = सिद्धान्तकौमुदी ।
अ० को० = अमरकोषः ।

नि० = निरुक्तम् (अयमेव ग्रन्थः) ।
नै० का० = अस्यैव नैघण्टुकं काण्डम् ।
नैग० का० = अस्यैव नैगमं काण्डम् ।
दै० का० = अस्यैव दैवतं काण्डम् ।
दे० = अस्यैव देवराजीय-वृत्तिग्रन्थः ।
सा० भा० = सायणमाधवीयं "वेदार्थ-प्रकाश"-नाम वेदभाष्यम् ।
मी० अ० = मीमांसादर्शनस्य अधिकरणमाला ।

प० = (अत्रैव) इतःपरस्तात् ।
पु० = (अत्रैव) इतः पुरस्तात् ।
१भा० = (अस्यैव) प्रथमे भागे ।
पृ० = पृष्ठायाम् ।
पं० = पङ्क्तौ ।
मु० = मुद्रितम् ।

१अ० = प्रथमः अध्यायः ।
१पा० = प्रथमः पादः ।
१ख० = प्रथमः खण्डः ।
१आ० = प्रथम आह्निकम् ।

भू० = भ्वादिगणे ।
अदा० = अदादिगणे ।
जु० = जुहोत्यादिगणे ।
दि० = दिवादिगणे ।
स्वा० = स्वादिगणे ।
तुदा० = तुदादिगणे ।
रु० = रुधादिगणे ।
तना० = तनादिगणे ।
क्र्या० = क्र्यादिगणे ।
चु० = चुरादिगणे ।
भू० प० = भ्वादिगणेऽयं परस्मैपदी ।
भू० आ० = भ्वादिगणेऽयमात्मनेपदी ।

(?) = इदानीं न लब्धस्य निर्देशम्, पर मनुसन्धीयत एवेति शम् ।

अथ प्रथमादि-चतुरध्यायानां सूची ।

प्रकरणम्		(विषयः)		पृ०
अथ प्रथमाध्यायः	...	(व्याख्यानोपदेशाः)	...	७
प्रथमः पादः	...	(नामाख्यातयोः)	...	,,
द्वितीयः पादः	...	(निपातानाम्)	...	४४
तृतीयः पादः	...	(,,)	...	४८
चतुर्थः पादः	...	(प्रकृतिविचारः)	...	८३
पञ्चमः पादः	...	(ग्रन्थप्रयोजनानि)	...	१०२
षष्ठः पादः	...	(,,)	...	११८
अथ द्वितीयाध्यायः	...	(नैघण्टुक-व्याख्या)	...	१४७
प्रथमः पादः	...	(निर्वचनोपदेशाः)	...	,,
द्वितीयः पादः	...	(नै० १, १)	...	१७४
तृतीयः पादः	...	(नै० १, २—३)	...	१८५
चतुर्थः पादः	...	(नै० १, ४)	...	२०४
पञ्चमः पादः	...	(नै० १, ५—६)	...	२१५
षष्ठः पादः	...	(नै० १, ७—१०)	...	२२३
सप्तमः पादः	...	(नै० १, ११—१७)	...	२३५
अथ तृतीयाध्यायः	...	(नैघण्टुक-व्याख्या)	...	२५३
प्रथमः पादः	...	(नै० २, १—२)	...	,,
द्वितीयः पादः	...	(नै० २, ३—२२)	...	२७७
तृतीयः पादः	...	(नै० ३, १—१३)	...	३०६
चतुर्थः पादः	...	(नै० ३, १४—३०)	...	३३४
अथ चतुर्थाध्यायः	...	(नैगम-व्याख्या)	...	३६८
प्रथमः पादः	...	(नैग० ४, १, १—८)	...	,,
द्वितीयः पादः	...	(नैग० ४, १, १०—२७)	...	४०३
तृतीयः पादः	...	(नैग० ४, १, २८—४८)	...	४२८
चतुर्थः पादः	...	(नैग० ४, १, ४९—६२)	...	४६८

अथ खण्डसङ्ख्यानिर्णयः ।

प्रथमाध्यायस्य,—

मुद्रितसङ्ख्या *		मतान्तरीया †
प्रथमे पादे	५ (१—५) =	३ (१— ३)
द्वितीये पादे	४ (६—९) =	२ (४— ५)
तृतीये पादे	६ (१०—१५) =	६ (६—११)
चतुर्थे पादे	४ (१६—१९) =	३ (१२—१४)
पञ्चमे पादे	२ (२०—२१) =	२ (१५—१६)
षष्ठे पादे	६ (२२—२७) =	४ (१७—२०)

सङ्कलनया २७ सप्तविंशतिः = २० विंशतिः ।

द्वितीयाध्यायस्य,—

मुद्रितसङ्ख्या *		मतान्तरीया †
प्रथमे पादे	७ (१—७) =	४ (१—४)
द्वितीये पादे	५ (८—१२) =	५ (५—९)
तृतीये पादे	३ (१३—१५) =	३ (१०—१२)
चतुर्थे पादे	२ (१६—१७) =	२ (१३—१४)
पञ्चमे पादे	३ (१८—२०) =	३ (१५—१७)
षष्ठे पादे	५ (२१—२५) =	५ (१८—२२)
सप्तमे पादे	६ (२६—३१) =	६ (२३—२८)

सङ्कलनया ३१ एकत्रिंशत् = २८ अष्टाविंशतिः ।

तृतीयाध्यायस्य,—

प्रथमे पादे	६ (१— ६)
द्वितीये पादे	६ (७—१२)
तृतीये पादे	५ (१३—१७)
चतुर्थे पादे	५ (१८—२२)

सङ्कलनया २२ द्वाविंशतिः ।

चतुर्थाध्यायस्य,—

प्रथमे पादे	८ (१— ८)
द्वितीये पादे	८ (९—१६)
तृतीये पादे	५ (१७—२१)
चतुर्थे पादे	६ (२२—२७)

सङ्कलनया २७ सप्तविंशतिः ।

* क-प्रभृतिपुस्तकसम्मता परं खण्डसङ्ख्यावाक्यविरुद्धेत्यग्राह्या टीप्पन्याम् ।

† घ-प्रभृतिपुस्तकसम्मता, खण्डसङ्ख्यावाक्यानुगता चेति सर्वत्रैवेह टीप्पन्या मिथ मेव ग्रहणीया ।

अथ अकारादिवर्णक्रमेण खण्ड-प्रतीक-सूची ।

खण्डप्रतीकाः	अ०	पा०	ख०	पृ०
अक्षण्वन्तः कर्णवन्तः	१	३	४(८)	७०
अतिष्ठन्तीना मनिवेशनानाम्	२	५	२(१६)	२१७
अतोऽन्ये भावविकाराः ...	१	१	४(३—)	३७
अत्रा ह गोरमन्वत ...	४	४	४(२५)	४७
अथ निपाताः	१	२	१(४—)	४४
अथ निर्वचनम्	२	१	१(१—)	१४७
अथ लुप्तोपमानि	३	४	१(१८)	३३४
अथातोऽनुक्रमिष्यामः ...	२	२	१(५)	१७५
अथापि यं एषां न्यायवान् ...	१	४	२(१३)	८६
अथापीद मन्तरेण पदविभागो न	१	६	१(१७)	१२०
अथापीद मन्तरेण मन्त्रेष्वर्थप्रत्ययो न	१	५	१(१५।१६—)	१०२
अथाप्यस्तेर्निवृत्तिस्थानेषु * ...	२	१	२(—१)	१५२
अथाप्येवं सर्व एव * ...	१	४	४(—१४)	८८
अदितिरदीना	४	४	१(२२)	४६८
अदितिर्द्यौरदितिरन्तरिक्षम् ...	४	४	२(२३)	४६८
अभीद मेक मेको अस्मि ...	३	२	४(१०)	२८१
अभ्रातेव पुंस एति प्रतीचीः ...	३	१	५	२६६
अयं स शिङ्क्ते	२	२	५(८)	१८२
अर्चतिकर्माण उत्तरे धातवः	३	४	२(१८)	३३७

(२—) अङ्कान्ते विद्यमानेनैतच्चिह्नेन तस्यैव खण्डस्य तत्रासमाप्तिर्बोध्या ।

(—१) अङ्कादौ विद्यमानेनैतच्चिह्नेन तत्खण्डस्य हि तत्पूर्वारम्भो बोध्यम् ।

* एतच्चिह्नितप्रतीकाः प्रत्यध्यायावसानश्रुतप्रतीकसङ्कलनाव्यतिरिक्ताः ।

खण्डप्रतीकाः	अ०	पा०	ख०	पृ०
अर्थवन्तः शब्दसामान्यात् ...	१	५	(१६) †	१०३
अश्वं न त्वा वारवन्तं * ...	१	६	६(—२०)	१४१
अस्य वामस्य पलितस्य ...	४	४	५(२६)	४८६
अह इति च ह इति च * ...	१	२	४(—५)	५५
अहश्च कृष्ण महरर्जुनञ्च ...	२	६	४(२१)	२३०
आ इत्यवागर्थे *	१	१	५(—३)	४१
आ घा ता गच्छान् ...	४	३	४(२०)	४६०
आ ते कारो शृणवाम ...	२	७	५(२७)	२४६
आर्ष्टिषेणो होत्र ऋषिः ...	२	३	२(११)	२८८
इतीमानि चत्वारि ...	१	४	१(१२)	८३
इदं श्रेष्ठं ज्योतिषां ज्योतिः ...	२	६	२(१८)	२२५
इन्द्रेण सं हि दृक्षसे ...	४	२	४(१२)	४१०
इन्द्रो अस्माँ अरदत् ...	२	७	४(२६)	२४४
इयं शुष्मेभिर्बिसखा इवारुजत्	२	७	२(२४)	२३७
इषिरेण ते मनसा सुतस्य ...	४	१	७	३८८
ईर्म्मान्तासः सिलिकमध्यमासः	४	२	५(१३)	४११
उत त्वं सख्ये स्थिरपीतमाहुः	१	६	४(२०—)	१३४
उत त्वः पश्यन्न ददर्श ...	१	६	३(१८)	१३२
उत स्मैनं वस्त्रमथिं न ...	४	४	३(२४)	४७०
उतस्य वाजी क्षिपणिम् ...	२	७	६(२८)	२४८
उपो अदर्शि शुन्ध्युवो ...	४	२	८(१६)	४२३
ऋचान्वः पोष मास्ते ...	१	३	३(८)	६६
एकार्थं मनेकशब्द मित्येतदुक्तम्	४	१	१	३६८

† एतच्चिन्हितप्रतीका नाम प्रतीकत्वेनोररीकृताः परं प्रतीकसङ्गृहवाक्यसम्मताः, वादिषु पुस्तकेषु दृश्याश्च ।

खण्डप्रतीकाः	अ०	पा०	ख०	ऋ०
ओघो मेघो नाधो गाधो ...	२	१	३(२—)	१५६
कक्ष्या रज्जुरश्वस्य * ...	२	१	५(-२।३-)	१६५
कतरा पूर्वा कतरापरा ...	३	४	५(२२)	३६६
कनीनकेव विद्रधे नवे ...	४	२	७(१५)	४१७
कर्मनामान्युत्तराणि ...	३	१	१ १	२५३
कायमानो वना त्वम् ...	४	२	६(१४)	४१४
कुह स्विद्दोषा कुह वस्तोः ...	३	३	३(१५)	३१५
को नु मर्या अमिथितः ...	४	१	२	३७३
क्रीळन्तो पुत्रैर्नप्तृभिरिति * ...	१	५	२(—१६)	२११
गौरश्वः पुरुषो हस्तीति * ...	१	१	१(-१।१-)	२३
चतुरश्चिद्दमानात् ...	३	३	४(१६)	३२०
चिदित्येषोऽनेककर्मा * ...	१	२	२(—४)	४८
जुष्टो दमूना अतिथिः ...	४	१	५	३८१
तत्सूर्यस्य देवत्वम् ...	४	२	३(११)	४०६
तदद्य वाचः प्रथमं मसीय ...	३	३	२(८)	२७८
तच्च चतुष्टं नोपपद्यते ...	१	१	(२)†	२३
तनुत्यजेव तस्करा ...	३	३	२(१४)	३१३
ता वां वास्तून्युश्मसि ...	२	२	३(७)	१८५
तितउ परिपवनं भवति ...	४	२	१(८)	४०३
त्वया वयं सुवृधा ब्रह्मणस्पते	३	२	५(११)	२८७
दशावनिभ्यो दश कक्ष्येभ्यः ...	३	२	३(८)	२८३
दासपत्नीरहिगोपाः ...	२	५	३(१७)	२२०
देवानां माने प्रथमा अतिष्ठन्	२	६	५(२२)	२३३
देवा नो यथासद मिद् ...	४	३	३(१८)	४४५
द्यौर्मे पिता जनिता ...	४	३	५(२१)	४६२

खण्डप्रतीकाः	अ०	पा०	ख०	पृ०
द्विश उत्तराणि नामानि ...	२	४	२(२०)	२४४
न जामये तान्वो रिक्थ मारैक्	२	१	६	२७५
न नून मस्ति नो श्वः ...	१	२	१(६)	५८
न हि यभायारणः ...	२	१	२	२५७
निष्टुक्कासश्चिदिन्नरो ...	१	२	(१०) †	७३
नूनं सा ते प्रति वरं ...	१	२	२(७)	६२
परिषद्यं ह्यरणस्य ...	२	१	२ २	२५४
पर्याया इव त्वदाश्विनम्* ...	१	३	५(-८।१०-)	७३
प्रियमेधवदत्रिवत् ...	२	२	५(१७)	२३१
बऋनामान्युत्तराणि ...	२	२	१(१३)	२०६
मनुष्यनामान्युत्तराणि ...	२	२	१(७)	२७७
मरुत्वाँ इन्द्र वृषभो रणाय ...	४	१	८	४०१
य ईं चकार न सो अस्य ...	२	२	४(८)	१८८
यत्रा सुपर्णा अमृतस्य भागम्	३	२	६(१२)	३०२
ययो हि नु वा एतत् ...	१	४	३(१४—)	८४
यदिन्द्र चित्र मेहनास्ति ...	४	१	४	३८७
यद्देवापिः शन्तनवे पुरोहितः ...	२	३	३(१२)	२०१
रमध्वं मे वचसे सोम्याय ...	२	७	३(२५)	२४१
रुभः पिनाक मिति दण्डस्य...	३	४	४(२१)	३५६
रश्मिनामान्युत्तराणि ...	२	५	१(१५)	२१५
राज्ञः पुरुषो राजपुरुषः ...	१	१	१(३) †	१६५
रात्रिनामान्युत्तराणि ...	२	६	१(१८)	२२३
रुशदत्सा रुशती श्वेत्यागात् ...	२	६	३(२०)	२२७
वयः सुपर्णा उपसेदुरिन्द्रम्...	४	१	३	३७८
वाङ्नामान्युत्तराणि ...	२	७	१(२३)	२३५

खण्डप्रतीकाः	अ०	पा०	ख०	पृ०
वायुर्वा त्वा	१	८	(५)†	५१
विद्याम ते वयम् ...	४	३	२(१८)	४३७
विद्या ह वै ब्राह्मण माजगाम	२	१	७(४)	१७२
विश्वकद्राकर्षो वीति चकद्र दृति *	२	१	६(—३)	१६७
वृत्तस्य नु ते *	१	२	३(-४।५-)	५०
वृत्ते वृत्ते नियतामीमयत् ...	२	२	२(६)	१८१
श्ववतिर्गतिकर्मा कम्बोजेषु *	२	१	४(-२-)	१६०
श्वासदृक्षिर्दुहितुर्नप्त्र्यात् ...	३	१	४	२५६
षड् भावविकाराः * ...	१	१	३(—२)	२४
सकृ मिव तितउना पुनन्तः...	४	२	२(१०)	४०४
सप्त युञ्जन्ति रथ मेकचक्रम्...	४	४	६(२७)	४८८
समाम्नायः समाम्नातः ...	१	१	१(१—)	७
सम्रा तपन्त्यभितः ...	४	१	६	३८३
साक्षात्कृतधर्माण ऋषयः *...	१	६	५(-२०-)	१३७
साधारणान्युत्तराणि षट् ...	२	४	१(१३)	२०४
सुविते सु दृते सूते ...	४	३	१(१७)	४२८
सुविदुरिव सु विज्ञायेते * ...	१	३	६(-१०।११)	८१
स्थाणुरयं भारहारः ...	१	६	२(१८)	१३०
स्वरादित्यो भवति ...	२	४	२(१४)	२१०
हविर्भिरेके स्वरितः ...	१	३	(११)†	८१
हिरण्यनामान्युत्तराणि ...	२	३	१(१०)	१८५

अथ द्रष्टव्यपदानां सूची।

पदम्	पृ०।पं०
अंशस्य	२०४।९
अंशुः	१७५।१०
अंहः	४७५।४
अंहतिः	,,
अंहुः	४७५।४
अकूपारः ... ४२७।१७.	४२८।१,९
अकूपारस्य	४२७।१९
अक्रूरः	१९१।२
अक्षण्वन्तः	७०।१७
अक्षरवर्णसामान्यात्	१४७।८
अक्षान्	३२०।१४
अक्षि	७०।१९
अगस्त्यः	५५।१९
अग्निः	२२०।१२
अङ्कः	२४९।१९
अङ्कम्	३७८।८
अङ्गाराः	३३१।४
अङ्गिरस्वत्	३३२।१८
अङ्गिराः	३३२।२
अङ्गुल्यः	२७८।१९
अचेतानस्य	२५४।१४
अच्छा	४७१।१९
अजगन्	४१४।१७
अजरम्	४९०।१९
अजाः	४७९।२
अजामि	४९०।२
अजामिकर्माणि...	४९०।४
अजास्य	४७९।१
अज्ञाननिन्दा	१२०।१
अञ्जम	४१२।१

पदम्	पृ०।पं०
अणीयस्त्वात्	२३।१५
अति	४१।१७
अतिथिः	२९१।५,७
अतिष्ठन्तीनाम्	२१७।५
अत्तिकर्माणः	२८४।२
अत्याः	४११।१४
अचिः	३३२।५
अचिवत्	३३१।१८
अदायादाः	२५९।११
अदितिः ... ... १०२।१.	११२।१२.
,, ...४९८।२,८,८,८,८,९,९,९	१०,१०
अद्भुतम्	५९।१२
अद्म	४२४।२
अद्मसत्	४२४।२
अद्य	५९।१०
अद्रिः	३८७।५
अद्रिवः	३८७।१
अधः	१९९।१४
अधरः	१९९।१४
अधर्म्मः	१९५।१५
अधा	२५७।२
अधि	४१।२१
अधिदैवतम्	३०२।११
अधिषवणचर्मणः	१७५।१०
अधेन्वा	१३४।८
अध्यात्मम्...	३०२।११
अध्यापिताः	१७२।७
अध्येषणाकर्मणः...	३३८।५
अध्वरः	९७।४
अध्वर्युः	९७।२

पदम्	५०।५०
अननाय	१७५।१०
अनन्विते	१४७।७
अनप्रसः	२९७।१९
अनभिचः	११२।११
अनर्वम्	४९०।९
अनवगतसंस्कारान्	६९९।९
अनसा	२४९।४
अनिर्दविदे	१९८।४
अनिन्द्राः	२९२'५
अनिमेषम्	६०२।४
अनिवेशनानाम्	२१७।५
अनु	४१।२०
अनुदात्तम् ... ... ४७५।१२.	४७९।२
अनुपपद्यमानायाम्	१५९।४
अनुपपन्नार्थाः ... ... १०२।१९.	११२।८
अनुपसन्नाय	१९८।४
अनुपालक्ष्माः	९४।९
अनुष्वधम्	४०।२४
अनुसन्धावीत्वत्	२४९।२
अनूची	२२७।१७
अनूपाः	२२३।७
अनूषत	४४९।२
अस्रजवे	१७२।४
अनेकपर्वसु	१९०।१७
अनेकशब्दम्	२९९।५
अनेकार्थानि	२९९।९
अन्नः ... ... ४९२।९.	४७५।९
अन्नतः	२४४।१७
अन्नप्राप्नाः	११२।१४
अन्नरिक्तनामानि	१९५।९
अन्नरिक्तम्	१९५।९
अन्नर्द्धातु	१५९।२
अन्नलोपः	१५२।१९
अन्नव्यापत्तिः	१५२।२
अन्नस्थाः	१५९।२
अन्निकनाम	१९८।२

पदम्	५०।५०
अन्निकनामानि	२८४।१०
अन्निकम्	२८४।१०
अन्ननामानि	२८४।२
अन्नम्	२८४।२
अन्यः ... ...५९।१४.	२७५।४
अन्यदेवते	१३८।१
अन्वध्यायम्	४४।४,५
अप	४१।१९
अपः	४२०।८
अपचीयते	२४।७
अपगूर्णः	२९९।१७
अपत्यम्	२५।२।७
अपि	४१।२०
अपिगुः	४४९।१२
अपीच्यम्	४७४ १५
अपुष्पा	१२४।१४
अप्रः	२९७।१९
अप्रत्तायाः	२९७।९
अप्रमत्तम्	१७२।१०
अप्रादेशिके	१४७।७
अप्रायुवः	४४५।२
अप्सः	१९९।१०
अफलाम्	१२४।८
अबिभ्यषा	४१०।२
अब्रह्मचर्याः	४४९।११
अभवः	४१४।१८
अभि	४१।१९
अभिपित्वम्	२१५।१
अभिवन्दनस्तुतिम्	४२४।८
अभिसन्धरेणम्	५९।१४
अभिस्वरन्ति	३०२।४
अभीच्णम्	२४२।१
अभीके	२४४।१०
अभीष्टना	१९२।१०
अभीशवः	२८२।१८
अभीषाट्	२५७।२

पदम्	पृ०।प०	पदम्	पृ०।प०
अभ्यधीताम्	२१२।१	अर्भके	४१७।१५
अभ्राणि	२२०।१६	अर्यः	४४६।१
अभ्रातरः	२५९।१६	अर्वुदः	२९१।१२
अभ्राता	२६६।१७	अल्पनिष्पत्तयः	१५६।५
अभ्रात्मतीवादः...	२५९।१४	अल्पीयोऽर्थेतरम्	४७५।१२
अभ्राचीम्	२६७।७	अव	४१।१८
अमन्थत	४७४।१५	अवक्तम्	१४७।११
अमिथितः...	३७३।१४	अवनयः	१८३।१६
अमीमयत्...	१८१।४	अवयुवती...	४०७।१
अमुथा	२२१।१०	अवरे	१३७।१५
अम्हतम्	१७२।१६	अवरेभ्यः...	१३७।१३
अम्हतस्य	३०१।४.१९	अवसम्	११८।३
अम्हते	१२७।१६	अवसाय	११८।२,४
अम्भु	२९१।१४	अवसे	२२५।१०
अम्यग्	१०३।३	अवस्युः	२४१।१७
अयताय	१७२।४	अवारम्	२२५।१५
अया	२५६।१६	अवातिरत्	२३०।९
अयाः	४७५।९	अविज्ञातुः	१९८।४
अयासः	१८५।१	अवितथेन	१७२।५
अयुतम्	२९१।१२	अविस्रष्टार्थाः ... ...१०३।२.	११२।१४
अयोः	२९६।९	अवैयाकरणाय	१९८।३
अर्चत्तिकमाणः	३३७।१३	अश्नः	४८६।१
अरणः	२५४।१६	अश्मन्मयीभिः	४४६।८
अरस्विान्	४७५।१४	अश्वः ... ८३।१५,१७. ८९।३.	२४६।७
अराः	४९०।१५	अश्वरश्मिभिः	२१५।४
अरातयः...	२९२।१५	अश्वाः	४१२।२
अर्जुनम्	२३०।८	अष्टमाचः...	१७८।१०
अर्थः	१३०।५	अष्टौ	२९१।१०
अर्थनित्यः...	१४७।७	असपत्नः...	११२।१०
अर्थवन्तः	१०३।३	असाक्षात्कृतधर्मभ्यः	१३७।१३
अर्थविकरणम्	३७।१७	असुः	१७८।७
अर्थान्	३७।१८	असुरः	१२७।१३
अर्थानाम्...	१३७।१८	असुरत्वम्...	१७८।१
अर्दम्	३४५।५	असुराः	१७८।९,१२
अर्दयः	४९०।१२	अस्त्रयकाय	१७२।४
अर्भकम्	३४४।१३	अस्त्रयोपसन्नाय...	१९८।५

पदम्	पृ०।प०
असोः	१७८।३
अस्ति	३४।९
अस्तिः	३५७।३
अस्य	४७५।११
अस्याः	४७५।११
अह	५४।१७
अहः ... ... १२।२.	१३०।८
अहनी	४९६।११
अहिः	१११।२ ३
अहिगोपाः	१११।२
अहिंसा	११२।९
अहेलमानः	४७५।१५
अहोरात्राः ... ... ४९०।११.	४९१।१
अहोरात्रकर्मा	३१३।९
अह्नः	४७५।१
अक्षे	१४१।१७
आ ... ...४१।१९. ५१।४.	३३०।१७
आकारः	३३०।१९
आक्षाणः...	१९२।९
आक्षिषुः...	४१३।१
आखण्डलः	१९२।९
आख्यानम्	७।१४
आगच्छान्	४९०।१
आगात्	२२५।९
आयायणः	७१।१,२
आचार्यः...	४९।१५
आज्यन्तः...	२१५।९
आट्णारः	९४।१५
आत्मगतिम्	३०२।१५
आत्मा	२१५।१२
आदघ्नासः	७०।१८
आदितेयम्	२०४।७
आदित्यः...	२०४।४.
२१०।७,९,११. २११।१,३,५.	२३०।१२
आदित्यतः	१८२।११

पदम्	पृ०।प०
आदित्यप्रवादाः	२०४।८
आदित्योपहितम्	१८८।१०
आदिलोपः	१५२।१५
आदिविपर्ययः	१५३।१
आदिष्टोपयोजनानि	२४९।७
आद्यन्तविपर्ययः	१५३।२
आधात्...	४९२।१०
आधीतम्	५९।९
आध्यः	३९४।४
आपनीफणत्	२४९।९
आपानः...	२९२।७
आभर	३८७।२
आमिनाने	२२०।१
आमिश्राणि	३०९।१५
आम्नायवचनात्	११२।९
आरैक् ... २२५।११. २२७।१०.	२७५।३
आर्चाभ्याम्नाये	२०४।९
आर्षेषु	१९०।१५
आर्ष्टिषेणः ... ...१९५।११.	१९९।९
आविः	४२३।१०
आविवासेम	२३९।११
आशयत्...	२१७।११
आश्वर्यम्...	२३७।३
आश्वद्	१५९।२
आश्रम्	७१।५
आहनसः...	४१८।४
इत्	७३।११
इतरया	१५९।४
इतरेतरोपदेशः...	२३।१४
इतिहासम् ... ...१९५।११.	२३७।४
इतिहासमिश्रम्...	३९४।९
इत्या	४७४।१५
इनः ... ... १९८।९.	२०२।९
इन्द्रः	२४४।१०
इन्द्रलिङ्गम्	११९।१३

पदम्	पृ०।प०
इन्द्रग्रचुः	२१७।११
इन्द्राग्नी	११२।७
इन्द्रियनित्यम्	२२।१२
इन्द्रानः	४७२।५
इमथा	२२१।८
इव... ... ... ४४।४.	७२।१७.
इषिरेण	२९८।९
इषुस्तुतौ	१७५।१५
इष्मिणः	४२४।५
ईम्... ... ...७२।१०.	१८८।५
ईमाश्वासः...	४१९।९
ईश्वरनामानि	२९८।९
ईषते	२७२।१५
उ ... ... ५५।१.	७२।१०
उच्चावचाः...	२७।१५
उच्चावचान्	४२।९
उच्चावचेषु... ... ... ४४।२.	८१।७
उच्चैः	४७१।१
उत्	४१।१९
उत ... ...१२२।४.	१२४।७
उत्तरः	१९९।१४
उत्तरा	४९०।१
उत्तानयोः	४९२।९
उदकचरः ... ...४२३।१५	
उदकम्	२३९।१...
उदानम् ... ...४७५।१३	
उदितानुवादः	११२।८
उदीच्येषु ... ...१९०।१९	
उप	४१।२१
उपकक्षास...	७०।१८
उपजिह्विकाः ... ...२४५।१२	
उपदिशः	२१५।७
उपधाविकारः ... ...१५२।१७	
उपधाक्षेपः ... ...१५२।१९	

पदम्	पृ०।प०
उपनिषद्वर्णः ... ...२०२।१०	
उपमाः ... ... २९७।७.	२०९।१९
उपमार्थे ... ...२२०।१७	
उपमार्थेन ... ...२१७।१४	
उपमोत्तमया	१२२।९
उपयमनप्रतिषेधः...	२९७।८
उपरः ... ...२३०।१४	
उपरस्य ... ...२९७।१,२	
उपरिष्टादुपचारः...	४४।८
उपलः ... ...२३०।१४	
उपवर्हेचि	४९०।२
उपसर्गाः	२७।१४
उपसृष्टः ... ...४९८।११	
उपस्थे...	४४९।९
उपेक्षितव्यम् ... १०२।१०.	१८१।११
उपेक्षितव्याः ... ... ४२।१.	८१।२
उभया	२८७।२
उभौ...	२८७।७
उद्गायस्य	१८५।७
उर्वः... ... ...२४४।१९	
उशती ... ... १२२।५.	२९९।११
उशीरम्	१७५।१०
उषसे	२२५।१०
उष्णम्	१५९।८
उष्ट्रा	४४९।२
उस्रिया	४४९।१
ऊतिः	१५९।५
ऊर्क्	२७८।१०
ऊर्जादः	२७८।४ ९
ऊर्दरम्	२४५।१५
ऊर्द्धगतिः	१९९।१५
ऋक्...	१०२।५
ऋकक्लोकाभ्याम्	२५९।९
ऋक्त्रिम्	२९४।७

पदम्	पृ०।प०
ऋक्षाः	२४५।८
ऋचम्	१८८।१६
ऋतम्	२४१।१९. ४४६।११
ऋतस्य	२५८।२०
ऋतावरीः	२४१।१८
ऋतुः...	२४१।२०
ऋतुकालेषु...	२६७।१६
ऋत्विक	३३८।२
ऋत्विङ्नामानि	३३८।२
ऋधक	४७५।९. १०
ऋन्धन्	२७५।५
ऋषयः	३३७।१३
ऋषिः ... १९९।९, ४१८।१.	४२३।१६
ऋष्टिषेणस्य...	१९९।१६
एकः	२९१।९
एकचक्रम्	४८९।१५
एकतः	३९४।८
एकपदानि... ...	१९०।१९. १९८।३
एकपर्वसु	१९०।१७
एकशब्दानि	३९९।१६
एकार्थम्	३९९।५
एना	२५६।१९
एयुषाम्	४२४।५
एरिरे	४६८।११
एनमर्थीये	२५३।८
एवैः	२४१।२०
ऐकपदिकम्	३९९।७
ऐकपदिकाः	९४।१४
ऐतिहासिकाः	२१७।१३
ऐन्द्री...	४२४।९
ऐश्वर्यकर्माणः	२९८।८
ओकः	२५७।५
ओघः	१५६।१

पदम्	पृ०।प०
औदुम्बरायणः ... ...२३।१३.	२७८।१३
औपमन्यवः ... ... ७१०.	१९१।४
१८१।१०. ९९१, ९.	२९८।७. ३३८।१
औपमिकः...	२९०।१
और्णवाभः...	१४४।१९
कक्षः	१९५।१
कक्ष्या	१९५।१
कक्ष्याः	२८३।१७
कच्छः	४३८।४५
कच्छपः	४३८।३
कतमच्चनाह	१७१।७,११
कथा...	२९९।११
कनीनके	४१७।१०
कन्या...	४१७।११
कपिः...	३३४।९
कपिञ्जलः	३३४।५
कम् ... ... ७३।१०.	२१०।१३. ४३८।५
कम्बलः	१९०।१४
कम्बोजाः	१९०।७३
कम्बोजेषु	१९०।१३
कर्णः...	७१।२
कर्णेन	२९८।१२
कर्त्ता...	२७५।४
कर्त्तीः	४०९।११
कर्म	१०३।४. २५३।५
कर्मसम्पत्तिः...	२४।१
कर्मोपमा	२१५।१०
कर्मोपसङ्ग्रहः	५१।२
कर्मोपसंयोगद्योतकाः	२४।१५
कल्याणवर्णरूपः	१९८।१
कल्याणम्	१९८।२
काकः	३३४।२.५
काणुका	१०३।३
काम्यिकर्माणः	२८४।१
कायमानः	४१४।१८

पदम्	पृ० प०
कारो	२४९।१
कार्मनामिकः	८९।१
कालः ... ...२२२।१.	२४२।१
कालयतेः	२४२।१
काष्ठाः ... ... २१५।१,६,७,८,९,१०	
किनवात्	२२०।१५
किल...	५५।४
कुचरः	१४२।१
कुणारुम्	१५९।१
कुत्सः...	२९८।५
कुत्साय	४०५।१
कदनन	२९८।११
कुल्माषाः	४९।१७
कुशिकः	२४२।५
कुवित्	४१८।१
कुच...	२१५।१
कूपः...	२२८।७
कूपनामानि	२२८।७
कूपयर्शवः	२९४।१
कृच्छ्रापत्तिः	१८५।१४
कृणवन्	४९०।१
कृतः	१५९।७
कृदरम्	२४५।१५
कृन्तत्रात्	२२३।१
कृष्णम् ... ...२२७।१५.२२०।८	
कृष्णा	२२७।१०
कौत्सः	१०१।९
कौरव्यो	१९५।१२
क्रंशतेः	२४२।९
क्रतुम्	२४९।२
क्राणाः	४५९।१
क्रध्यतिकर्माणि	२८४।९
क्रोधनामानि	२८४।७
क्रोशतेः	२४२।५
क्षणः	२४२।१
क्षितयः	४७०।१८

पदम्	पृ० प०
क्षिपणिम्	२४८।१९
क्षिप्रनामानि	२८४।८
क्षिप्रम्	२८४।९
क्षीरम्	१७५।९
क्षेत्रसाधाः...	१५९।७
खच्छः	४३८।४
खम्...	२०९।१०
खलु...	५५।७
खले... ... ...२८४।१२.	२९२।१
गतम्	१५२।१९
गत्वा	१५२।१९
गन्धर्वः	१८१।१२
गन्धर्वाः	२७८।१२
गमध्यै	१८५।१
गर्तः ... ... २९९।१४,१९.	२९७।२
गर्तारुक्	२९९।१०
गर्भः	२२५।१४
गर्भनिधानीम्	२७५।८
गर्भम्	४९२।१०
गवि ... ...१७५।११.	१८१।९
गव्या	१७५।१५,१९
गातुः	४७४।१८
गातुम्	४९२।१
गाथामिश्रम्	२९४।७
गाधः	१५९।१
गाधाः	२२७।१०
गायति	९९।१३
गायत्रम्	९९।१७
गार्ग्यः ... ...२७।१९.	२०९।१९
गालवः	२७८।१४
गावः ... ... १८१।१३.	१८५।४
गिरः	७२।१७
गिरिः	१४२।२,९
गिरिष्ठाः	१४२।२

पदम्	पृ०प०	पदम्	पृ० प०
गुणः	३१३।१०	चर्मे	१७५।११
गुणेन	१४७।६	चलाचलासः	४६०।१४
गृणातेः	२६७।३	चिकित्वान्	१६६।१३
गृहनामानि	३०६।७	चित्	४६।१४
गृहाः	३०६।७	चित्तम्	५६।१४
गोः ... ... १८१।१२.	४७४।१६	चित्तिभिः	१६२।२१
गोनामानि	२८४।६	चित्रम्	३८७।२
गोपाः	३०२।५. १३	च्यवनः	४४५।३
गोभिः ... ...१७५।६,	१३,१४. ४४६।३	च्यवानः	४४५।४
गौः	८३।१५		
१७५।३, १५.	२८१।४.६,१३.	जग्मतुः	१५२।१७
ग्राः...	२५६।६	जग्मुः	१५२।१७
ग्रन्थम्	१३७।१५. २११।१.	जघन्वान्...	२२०।१६
ग्रभाय	२५७।१	जठरम्	३६८।१२
ग्रीवा	२४६।१	जनिता	४६०।८
ग्रीष्मः	४६०।४	जन्तोः	४४६।६
ग्रायन्तः	१४७।१४	जमते	२७५।६
		जरते	४७१।५
घनः	१५३।१	जरिता	६१।६. ४६०।८
घृतम्	१५६।८	जसुरिम्	४७०।१५
घृतश्चुतः	४८६।१०	जह्वा	३६६।७
		जागरूकः	६४।१५
च	५१।३	जाठ्रः	६४।१५
चकद्मति...	१६७।१६	जातविद्याम्	६६।१४
चकार	१८८।८	जानपदीषु	११२।१६
चक्रम्	४८६।१८	जाम्	२७५।६
चक्रिया	२६६।१३	जामयः	४६०।१
चक्षुः	३७८।५	जामये	२७५।३
चतुर्थ्यर्थप्रेक्षा	११६।८	जामि	४६०।४
चत्वारः	२६१।१०	जामिः	२७५।११
चन्द्रमसम्...	१८१।१०	जाम्याः	२६७।११
चन्द्रमसोऽष्टचे	४७४।१८	जायते	२४।२
चन्द्रमाः	१८१।१३	जारः	२२०।१७
चम्वोः	४६२।६	जारयायि	१०३।३
चयसे	४७५।५	जित्रयः	३५६।६
चरथाय	४४५।६	जीवनः	६४।१३

पदम् पृ०।प०
जीवाति ... ... ४७१।१
जुह्वरे ... ... ४४५।१२
ज्ञातिः ... ... ४१२।१४
ज्ञानप्रशंसा ... ... १९०।१
ज्योतिः ... ... १५३।१
ज्योतिषाम् २१०।८, १०, १२. २११।४,९

तच्चतिः ... ... ४४५।८
तच्चा ... ... ९४।११
तड़ित् ... ... २९२।९. २९८।१
तड़ितः ... ... २९२।१५
तद्भिवादिनी ... ... २१७।१७
तद्धितसमासान् ... ... १९८।२
तद्धितसमासेषु ... ... १९०।१७
तनूनपात् ... ... २१३।५
तन्त्रम् ... ... १३२।५
तपन्ति ... ... २३३।१
तपस्यमानान् ... ... १९९।१०
तपस्विने ... ... १९८।९
तमः ... ... २१७।१०
तर्कुः ... ... १५३।३
तविषेभिः ... ... २२५।९
तस्थतेः ... ... ४७०।१०
तस्करः ... ... २१३।७
ताड़ितम् ... ... १७५।१९
ताड़ितेन ... ... १७५।९
ताम्बः ... ... १७५।२
तायुः ... ... ४९८।१८
तितउ ... ... ४०३।१३
तितउना ... ... ४०४।३
तित्तिरिः ३४५
तिरः ... ... ३४१।१
तीर्थम् ... ... ४१८।२
तीव्रार्थतरम् ... ... ४७५।१३
तुम्ब ... ... ४१८।२
तुरण्यति ... ... २४८।१४

पदम् पृ०।प०
तूनाव ... ... ४७५।२
त्वचः ... ... १५३।१
त्वणम् ... ... ८४।१. ८९।२
तैटिकिः ... ... ३७८।१२
त्रोकम् ... ... २९७।७
त्मना ... ... ३९९।१२
त्रयः ... ... २३३।५. २९१।१०
त्रितः ... ... ३९४।७ ९
त्रिनाभिचक्रम् ... ... ४९०।२
त्रिशता ... ... ४९०।१३
त्रुतुः ... ... ४९०।२
त्सः ... ९२।७. ९९.१३. १३२।९. ३४५।४
त्सत् ... ... ७३।९
त्सम् ... ... १३४।७
त्सष्टः ... ... ४७४।१५
त्साद्दातम् ... ... ३८७।१
त्साङ्गः ... ... २१७।१३
त्सिषितः ... ... ११९।१५

था ... ... ३२१।७

दंशः ... ... १४१।१७
दंसयः ... ... ४७५।१,२
दक्षिणः ... ... ९१।१२
दक्षिणा ... ... ९१।११
दघ्नम् ... ... ७१।९
दण्डः ... ... १९१।२
दण्ड्यः ... ... १९१।१
दण्डी ... ... १५२।१८
ददर्श ... ... १३२।४
दधिक्राः ... ... २४९।८
दधम् ... ... ३४४।१३
दमः ... ... ३८७।९
दमूनाः ... ... ९४।१४. ३८७।८
दयतिः ... ... ४२९।१७
दयते ... ... ४३०।३

पदम्	पृ०।प०
दयमानः	४२०।७
दयमानाः...	४२०।१
दरशया (दर्शया)	८४।२
दर्विद्योमी...	९४।१५
दश...	२९१।११
दस्यतेः	७१।९
दाक्षिणाजी	२९९।१४
दानवे	४१८।५
दातिः	१९०।१५
दाचम्	१९०।१९
दानकर्माणः	३३८।५
दानविक्रयातिसर्गाः	२५९।१३
दायादः	२५९।११
दारु	४१७।१४
दावने	४३७।१९
दासः	२२१।१
दासपत्नीः	२२१।१
दिवेदिवे	४४५।१
दिव्यासः	४११।१४
दिशः	२१५।५
दिशतेः	२१५।५
दीधितिम्	२५८।२०
दीर्घम्	२१७।१०
दुच्चः	२५४।१४
दुर्	४१।१८
दुश्चक्षात्	३९०।१५
दुर्वर्तुः	४३०।३
दुरोणः	३९१।७
दुहिता	२५९।१
दुहितुः	४९१।१०
दुहितृदायाद्यः	२५७।७
दुहीयत्	९१।९
दूरनामानि	३३८।११
दूरम् ... ...३३८।११.	४७५।८
दृक्षसे	४१०।३
देवः	१९५।१४

पदम्	पृ०।प०
देवताध्यात्मे	१३४।१९
देवतानाम्	१३७।१८
देवताभिधानम्...	२४।१
देवतेभयलिङ्गाः	१८८।१५
देवपीयुम्...	४७५।९
देवरः	३१५।५
देवश्रुतम्	२०१।१९
देवसख्ये	१३४।१०
देवसुमतिम्	१९९।११
देवाः	२७८।१२
देवापिः ... ... १९५।११.	१९९।११
देवतम्	१४२।७
दोः...	३७८।११
दोषा ... ... ३१५।३.	४३०।९
द्यावा	२२७।१७
द्यावाक्षथिवीनाम	३५७।९
द्यावौ	२२७।१८
द्युः...	५९।१०
द्यौः २१०।८,११,१३. २११।२,४,७.	४९।८
द्रप्सि	१९७।२०
द्रु	४१७।१५
द्रुपदे	४१७।१०
द्रुः	४४९।९
द्वा...	२३३।१०
द्वादशारम्	४९०।१५
द्वारः	१५९।२
द्वितः	३९४।९
द्विप्रकृतीनाम्	१५९।३
द्विवर्णलोपः	१५३।१
द्विशः	२४४।१०
द्वौ...	२९१।९
धननामानि	२८४।५
धनम्	२८४।५
धवः	३१५।७
धातुः	१३७।१७

पदम्	पृ०।प०
धात्वादौ	१४७।११
धीतिभिः...	२३५।११
धीरः	३०२।८,१५
धीराः	४०४।९
धूर्	२८३।१९
धूर्वतेः	२८३।१९
ध्रुवीकरोति	२२३।२
ध्वंसनौ	१९२।११
ध्वरति	९७।४
न	४४।५. ५५।५. १४१।१९,१७. २५४।१४. २१५।१४
नंसन्ते	४१८।२
न-दृत्	८१।१
नक्षद्वारीणि	२२३।२
नक्षतेः	२३५।८
नक्षत्राणि...	२४५।८
न-च-दृत्...	८१।९
नदनाः	२३७।२
नद्यः	२३७।२
ननु...	५५।५
नप्त्राम्	२५८।२०
नभः	२११।५
नरक्तम्	८१।४
नव...	२९१।११
नवनामानि	२३८।१३
नवम्	२३८।१३
नवे...	४१७।१५
नव्यः	२५७।२
नसते	४१८।२
नाकः	२१०।११
नाधः	१५९।१
नाधमानाः	२७८।१
नानाकर्माणि	१८५।११
नानानिर्वचनानि	१८५।११
नाभिः	४९२।८

पदम्	पृ०।प०
नाम	४९० १
नामकरणः	११९।४
नामधेयप्रतिलम्भः	८४।२
नामानि ... ... ८१. ८२।१२.	१४२।७
नि...	४१।२८
निकरोति	१९२।२१
निगमाः	७।८
निघण्टवः...	७।७
निण्णम्	२१७।९
नित्यस्य	२५४।१३
निधा	२७४।२
निधानम्...	२७५।४
निधिः	१७२।१२
निधिपाय	१७२।१२
निनंसे	२४९।२
निपाताः... ... ... ४४।२.	२१५।९
नियतवाचः ... ... १०२।१०.	११२।५
नियुतम्	२९१।१३
निर्	४१।२८
निर्ऋतिः...	१८५।१३
निर्ऋतिम्	१८८।७
निरिणीते	१९९।१०
निरुढोपधाट्	४७५।४
निर्णीतम्	२३८।१०
निर्णीतान्यर्चितनामानि ...	२३८।९
निर्बद्धाः...	३७।१३
निर्वचनम्	१४७।५
निर्वचनाय	१३२।१२
निर्वक्तव्यानि	१८५।१२
निष्टक्तिष्यानेषु	१५२।१५
निषादः...	२७८।१३
निष्षाट्	२९१।५
नीचायमानम्	४७०।१९
नीचैः	४७१।१
नु	४९।१७. ९४।७
नू-च	४३०।८

पदम्	४०।५०	पदम्	४०।५०
नू-चित्	४३०।७	परिचरणकर्माणः	३०६।८
नूनम् ... ... ५५।१०. ५९।८.	६१।१६	परिनक्त्या	४२४।९
नेमः	३४५।४	परिदेवयाञ्चक्रे	५५।१३
नैगमाः	१५६।७	परिधिम्	२४४।१०
नैगमानि...	१४२।९	परिवीतः	१८८।८
नैगमेभ्यः...	१५६।८	परिव्राजकः	९४।११
नैघण्टुकम् ...१३७।१८. १३८।२.	२३७।२	परिव्राजकाः	१८८।८
नैघण्टुकानि	१४२।८	परिषद्यम्	२५४।१३
नैरुक्तसमयः	८३।१३	परुषे	१८।९
नैरुक्ताः ... १८८।८. २१७।१३.	३१३।८	पर्व ... ...१४२।४,५,६	
२३७।१७. २३८।९.	४७०।१८	पर्वतः	१४२।४
नोधाः	४२३।१६	पर्शवः	३९४।२
		पर्शुः	३७८।७
पक्कम्	२७८।११	पर्षान्	२९२।१
पक्व	२७८।१६	पलितस्य	४८६।७
पञ्चजनाः	२७७।४. ७७८।४	पशुः	३२१।५
पञ्चर्तवः...	४९०।९	पशूनाम...	१७५।५
पञ्चम्यर्थप्रेक्षा	११९।१६	पशूपादः	१८५।८
पञ्चारे	४९०।८	पशूम्	४१५।३
पणिः	२२१।५	पशूमत्	४७१।३
पतिम्	४६०।३	पश्यतिकर्माणः...	३०६।१४
पथ्यदनम्	११९।३	पाकः	३०९।८,१५
पदजातानि	७:१२	पाञ्चजन्यया	२७८।१५
पदपूरणाः	४४।३	पाणिः	२४४।१४
पदप्रकृतिः	११९।९	पाणी	२४४।१५
पदप्रकृतीनि	११९।९	पातम्	४४५।१७
पदविभागः	११९।२	पानीयम्...	११९।१४
पदार्थः	३७।१६	पादः	१८५।८
पदानि	१८५।१०	पारम्	२३६।१५
पन्थाः	२४९।५	पारावतघ्नौम्	२३६।१४
पयः	१७५।९	पारोवर्ष्यवित्सु	११९।१८
परम्	२३६ १५	पार्थिवेन...	१९५।८
परमं पदम्	१८५।७	पार्श्वम्	३७८।७
परा	४१।१६	पार्श्वदानि	११९।९
पराङ्ङ्ख्यम्	१८५।७	पावकशोचिषम्...	४१५।४
परि	४१।२१	पाशः	३७४।४

पदम्	पृ०।प०
पाण्ययतेः	३७४।४
पाण्या	३७४।३
पितृवनः...	३३७।७
पितरः	३७८।१२
पिता ... ...४९२।८,१०	
पितापुत्रौ	११२।७
पितुमत्...	४७१।१९
पिनाकम्...	३५९।५
पियारुम्...	४७५।५
पीप्याना...	२४९।३
पीयतिः...	४७५।१९
पुंसः	२९९।१०
पुण्यकृतः...	२१०।१५
पुण्यकृद्भिः ... ... २१०।११.	२११।५
पुचः	१९९।७
पुचदाद्याद्यः	२५७।८
पुचभावः...	२९७।९
पुचिकायाः	२९७।११
पुम्	१९९.८
पुरस्कादुपचारः...	४४।९
पुराणनामानि...	३३८।१२
पुराणम्...	३३८।१२
पुरीषम्...	२३३।११
पुरुषः ... ... ८३।१९.	१९५।४
पुरुषम्...	८९।३
पुरुषविद्यानित्यत्वात्... ...	२४।१
पुरुषविशेषः	११२।१७
पुरुषादः...	१८९।५
पुरुषापराधः	११२।१७
पुरुहूतवयाः	५०।१९
पुरोहितः	१९५।१७
पुष्पफलम्	१३४।१५
पुष्पफले...	१३४।१५
पूर्द्धि	३७८।५
पूर्वेद्या	३३१।८
पृथिवी ... ...९।४. ८९।५.	९४।१०

पदम्	पृ०।प०
पृथुः ... ... ९४।१८.	१५९।९
पृश्निः	२१०।९
पृषतः	१५९।९
पृष्ठम्	३७८।८
पैजवनः	३३७।९
पौषम्	९९।१९
प्र...	४१।१९
प्रकृतिः...	१८५।१
प्रकृतयः	१५९।९
प्रकेतः	२२५।९
प्रज्ञानामानि	३०९।११
प्रत्तम्	१४७।११
प्रति	४१।१७
प्रतथा	३३१।८
प्रत्यूहते...	१९३।१९
प्रनारोः...	३९८।७
प्रनीची...	२९९।१०
प्रथमः	२३३।४
प्रथमम्...	३७८।३
प्रथमाः...	२३३।३
प्रदिवः...	४०३।१
प्रदेशाः	११९।१०
प्रधयः	४९१।१९
प्रधिः	४९१।१७
प्रपिले	३४४।१०
प्रभागपादः	१८५।१०
प्रवृषे	४१३।१८
प्रयुतम्	२९१।१३
प्रमस्यनामानि	३०९।१०
प्रस्कण्वस्य	३३१।१९
प्रस्तेयाः...	७१।७
प्राचीनम्	२३३।९
प्राच्येषु	१९०।१०
प्रादेशिकम्	९४।८
प्रादेशिकेन	१४७।९
प्राधान्यस्तुतीनाम्	१४१।७

पदम्	पृ०।प०
प्राशु	६१।१४
प्रियमेधः	२२१।१८
प्रियमेधवत्	२२१।१८
बन्धुः	४६२।८
बभ्रूः	४१७।१६
बलनामानि	२८४।४
बलम्	२८४।४
बष्कः	३०६।२
बष्कत्वग्जिनः...	२३८।१
बष्कनामानि	३०६।२
बष्कप्रजाः	१८८।६
बार्हस्पत्यः	४६२।१६
बाष्कम्	४६०।२
बाष्क	२७८।१७
बिन्दुः	१५३।२
बिलम्	२२१।६
बिल्लम्	१३७।१६
बिल्वम्	६६।१८
बिल्वादः	६६।१७
बिसखाः...	२३६।६
बिसम्	२३६।१२
बिस्यतेः...	२३६।१२
बृबूकम्	२३३।१०
बृहत्	६१।१७
बृहत्या	२४२।३
बृहस्पतिः	२०२।२
ब्रह्म ... ... १६६।१०.	२६४।६
ब्रह्मन्	१७२।१२
ब्रह्मचर्य्योपपन्नम्	१७२।१०
ब्रह्मा	६६।२०,२१
ब्राह्मणः...	११२।११
ब्राह्मणम् १०२।५. १७२।३.	४६०।१६. ४६१।२
ब्राह्मणवत्	२२१।११
ब्राह्मणाः...	१६५।१४
ब्राह्मणेन...	१०२।११. ११२।७

पदम्	पृ०।प०
ब्राह्मणवादाः	२१७।१५
भगः ... ... ६१।१६.	२२०।१८
भद्रम्	४०४।१०
भरूजा	१५६।२
भरे	४७०।१६
भरेषु	४७०।१५
भागम्	३०२।४
भारद्वाजः	२२२।६
भावः	८६।८
भावम्	८।२
भावप्रधानम्	७।१४
भावप्रधाने	८।१
भावविकाराः...	२४।१
भावस्य	२३।१२
भावैः	८४।२
भाषिकाः	१५६।८
भाषिकेभ्यः	१५६।६
भीमः	१४२।१
भीष्मः	१४२।१
भुवनस्य...	३०२।५
भूतानि... ... ... १७५।४.	२२३।३
भूमिजः...	६४।१२
भूतोपमा	२२१।४
भूयोविद्यः	११२।१७
भूरि	१८५।४
भूरिशुक्राः	१८५।१
भोजनानि	२६१।११
भोजनीयाः	१७२।६
भृगवः	४६८।११
भृगुः	२२२।३
भ्रसते	१५७।४
भ्राजसा...	२१५।१४
भ्राता	४८६।६
मंहवेः	६१।१०

पदम्	पृ०।प०
मखेभ्यः	२५७।१
मघम्	६१।१०
मघोनी	६१।९
मणिम्	१६१।२
मत्	४६०।२
मतिभिः	४४६।२
मत्सरः	१७५।७,८
मदाय	४०२।४
मद्देवता...	१८८।१७
मध्यमः... ... ...१८८।९,१०.	४८६।४
मधु ... ... १५६।१.	४०२।५,६
मधुपर्कम्	११२।१२
मध्या	४०६।११
मनः	२८७।९
मनस्यतिः	२७७।२
मनीषया	२४२।४
मनुः	२५९।१०
मनुष्यजारः	२२१।२
मनुष्याः...	२७७।२
मनोजवेषु	७०।१७
मन्यवे	२५७।१
मन्त्रः	२४।२
मन्त्रवर्णाः	२१७।१५
मन्त्राः	१०२।९
मन्त्रे ... ... ११९।१२,१४.	१२८।१
मन्दी	४७१।५
मन्दू	४१०।५
मन्मन्	४७५।२
मर्त्तम्	१९२।११
मर्यः	२१५।८
मर्याः	२७२।१५
मर्यादा	२७२।१
मरुतः	२१५।१५
मरुत्वान्...	४०२।२
मसीय	२७८।२
मह्नामानि	२०६।४

पदम्	पृ०।प०
मह्वान्	२०६।४
महित्रतः	२२२।९
मही	४६२।८
मा...	५५।९
माता ... ... १८८।११.	४६२।८
मातृः	४१४।१९
माचा	४७५।८
माध्यः	२९४।४
माध्यमिका	१९२।१४
माने	२२२।१
मान्यवे	११९।१४
मायया	१२४।८
मायुम्	१९२।१०
मार्ष्टिः	१४२।१
मांसम्	२७८।१४
मासाः	४९०।१२
मिचस्य	२०४।१०
मिचावरुणयोः...	२०४।९
मिमाति...	१९२।१०
मिश्रीभावकर्मणः	२१७।१४
मुमुग्धि	२७८।२
मुष्णातेः	२९१।१०
मुञ्जः	२४२।१
मुह्यन्तः	२४१।२०
मूर्द्धम्	८।२
मूषः ... ...२९१।११.	२९२।१९
मूषिकाः...	२९१।१२
मृगः	१४२।१
मृदुः	१५६।९
मेघः	१५६।१
मेदः	२७८।१५
मेथतिः...	२७२।१२
मेधा	२२७।१५
मेधाविनम्	१७२।१०
मेधाविनामानि	२२७।१२
मेधाविने	१९८।९

पदम्	पृ०।प०
मेधावी...	३३७।१४
मेनाः	३५६।९
मेघः	३३१।४
मेहना	३८७।१
यजुः ... ... १०३।५.	३३८।१
यजूंषि	३३८।२
यज्ञः	३३७।१९
यज्ञनामानि	३३७।१९
यथा	३१५।१०
यथो	९४।७
याचञ्ञाकर्माणः	३३८।४
यात्रे	११९।१०
यातन	३९८।१२
यादस्मिन्	१०३।२
यामि	१५३।१८
यामेषु	४१३।१०
युक्तयः ... ... १०२।१०.	११३।६
युगानि	४६०।१
युदवर्णाः	२१७।१५
युवा	४४५।१
यूथम्	४७१।४
योक्त्राणि	१८३।१७
योगः	१३।१५
योगपरीष्टिः	९४।१७
योजनानि	१८३।१७
योनिः ...१८८।११,१३. ३७८।११.	४६३।९
योनिम्...	३३५।११
योः	४६३।१७
योषाः	३१५।९
रक्तः	४३८।७
रक्तांसि...	१७८।१३
रजः	४४५।८,९
रजतेः	४४५।८
रज्जुः	१५३।३
रजांसि...	४४५।१०
रणाय	४०३।३
रथः	३९७।३
रथस्तुतौ	१७५।१४
रपः	४६३।१८
रमध्वम्...	३४१।१९
रश्मः	३५६।५
रयिः	४३०।११
रराणः	१०३।२
ररिवान्	४७९।१
रशनाभिः	३१३।३
रश्मिः	३१५।३
राजपुरुषः	१९५।४
राजा ... ११२।११. १५३।१७.	१९५।४
राचिः	३३३।२
रात्री	३३५।१०
राधः	३८७।१९
राधः	३५४।१३
रिक्थप्रतिषेधः...	३९७।११
रिक्थम्	३७५।३
रिणीते	३९९।११
रिप्रम्, ...	४६३।१८
रुक्मवक्षसः	३१५।१५
रुशत्	३३७।१३
रुशद्वत्या...	३३७।१३
रूपनामानि	३०९।१०
रूपम् ... ... १९८।३.	३०९।११
रूपसमृद्धम्	१०३।४
रूपसम्पन्नाः ... ... १०३।११.	११३।७
रूपोपमा	३३१।९
रेक्णः	३५४।१९
रेजते	३५६।४
रेतःसेकम्	३९७।९
रोचने	३३७।१३
रोचसे	३९८।३
रोदसी	३९४।५

पदम्	पृ०।प०
लक्षणाद्	४०४।११
लक्ष्मीः	४०४।११
लग्यतेः	४०४।१३
लज्जतेः	४०४।१३
लञ्छनात्	४०४।१२
लक्ष्मनात्	४०४।१२
लम्बचूडकः	९९।१७
लाभात्	४०४।११
लिङ्गाः...	११९।११
लुप्तोपमानि	२३४।२
लोधम्	४१५।२
लोम	२९७।१
लोहितवाससः...	२५९।१५
वक्षः	१३,१. ४२३।४
वचनम्	२३।१३
वज्रः	२९८।५
वज्रनामानि	२९८।४
वणिक्	२२१।५
वत्	३२१।१०
वधकर्माणः	२९२।७
वधूः	१५९।१
वनगू	३१३।९
वन्दनाय	४३०।९
वशीभिः	२४५।१२
वश्याः	२४५।१३
वयः ... ... १८१।४.	३७८।१
वयाः	५०।१७
वरः	९१।९
वरुणस्य	२०४।१२
वर्णः	१९८।२
वर्णलोपः...	१५२।१८
वर्णोपजनः, ...	१५९।१
वर्षिः	२४५।३
वर्द्धते	२४।५
वर्षकर्म	२१७।१४

पदम्	पृ०।प०
वर्षकामसूक्तम्	१९५।१८
वर्षा	४९०।४
ववक्थिथ	२०९।९
वव्रिम्	१९२।१९
वसूयवः...	४४९।३
वस्रोः	२१५।१
वस्रम्	४७०।१७
वस्रमथिम्	४७०।१९
वह्निः	२५८।२०
वा ... ... ५१।५. ९४।७	
वाक्	२२५।९
वाजी ... ...२४८।१७.	२५७।९
वाट्याः	१५३।१
वामस्य	४८९।७
वायसः	४३०।९
वायुलिङ्गम्	११९।१९
वारवन्नाम्	१४१।१९
वार्ष्यायणिः	३४।१
वालम्	१९८।५
वालाः	१४१।१७
वाशी	४२४।९
वाशीमन्तः	४२४।५
वाशीभिः	४४९।७
वासराणि	२९८।१०
वास्तूनि	१८५।१
वाहः	४२४।८
वि...	४१।१९
विकाराः...	३७।१९
विकारे	१४७।३
विक्रतयः...	१५९।९
विचरन्ति...	२१७।१०
विचिनवन्नः	४४५।१४
विज्ञातुम्...	१३८।५
वित्तम्	२९४।४
विदथा	३०२।४
विदथे	९१।८

पदम्	मू०।प०
विद्वसो...	६८७।२
विद्यते	४६०।२
विद्युयमानः	४६०।४
विद्युत्तः	६५५।१५
विद्या	१७२।३
विद्याख्यानम्	१०२।७
विद्युत् ... ...१९१।११,	१९८।१
विद्रधे	४१७।१०
विधवा	६१५।१६
विनश्यति	६४।८
विनिच्चे	४६८।१६
विपरिणमते	६४।४
विपाट्छुतुद्रयाः...	६६७।९
विप्रतिषिद्धार्थाः... १०२।१२,	११२।१०
विप्राः	१७२।८
विभक्तीः	१४७।११
विभागेन...	४९१।२
विभूतिम्...	४६८।१०
विभ्वा	६६५।१०
वियातः...	१९२।८
वियुते	४७५।६,७
विरूपः...	६६२।१
विरूपवत्	६६१।१८
विवक्तसे	६०६।१
विविदिषाणि...	१८८।१६
विवेद	६६६।१२
विंशतिः	१९१।१०
विश्पतिम्	४८६।११
विश्वकद्राकर्षः...	१३७।१८
विश्वस्य...	६०२।५
विश्वाः	६९१।४
विश्वामित्रः	१२७।४
विषयवत्यः	१४७।१०
विष्णुस्य	४४६।८
विष्टप्	१११।२
विसस्रे	१३२।५

पदम्	मू०।प०
विहायसः	४१८।५
वीतम्	४४५।१७
वीरः	६१।१७
वीरयतेः	६१।१८
वीर्यवती	१७२।५
वीहि	४४५।१६
वृक्तः	१८१।५
वृक्तेवृक्ते	१८१।४
वृक्तम्	१३७।३
वृक्तयः	१४७।१०
वृचः ... ... १९७।१९,	१११।७
वृचलम्... ... ...१९१।८,९,१०	
वृधे	४४५।१
वृषभः	४०२।२
वृषभाय	४९०।२
वृषलः	१९१।१९
वृषलवत्	१९१।१०
वृष्टिवनिम्	१०१।१९
वृष्णः	१८५।२
वेतेः	६१।१८
वेदम्	१३७।१५
वेदाङ्गानि	१३७।१५
वेद्याभिः	१३०।१९
वेनः	६२।२
वेसरम्...	४०७।१
वैखानसः	१३१।५
वैतसः	१५६।१२
वैयाकरणानाम्	८१।१३
वैश्वानरः	१३०।११
व्यन्तः	४४५।१५,१६
व्याघ्रः	१३४।९,१०
व्याघ्रिकमौणः...	१९२।५
व्याघ्रिमत्त्वात्	१२।१५
व्रावः	६१।२
व्रततिः...	९४।१४
व्रतम्	१०४।१३

पदम्	पृ०।प०
अंयुः	४६१।१७,१९
अकुनिषु	२२२।४
अक्तोः	६६।१८
अग्न्येन	२५८।२१
अचीः	८१।२
अतम्	२९१।१२
अन्ननुः	१९५।१९
अपतेः	२५६।१२
अब्दसामान्यात्	१०३।४
अब्दानुक्तिः	२२२।४
अम्	४६२।१७
अयुचा	२१५।१
अरत्	४७६।४
अरीरम् ... ... २१७।९.	२६६।१८
अर्दत्	४४६।९
अवः	१६०।१५
अवतिः	१६०।१३
अवतेः	४११।१४
अश्वचै	२४६।३
अश्वत्	५५।८
अश्वत्तमा	४२४।३
आकटायनः ... ... ८३।१३.	८९।७
आकपूणिः ... ... २९८।१.	२०६।५.
२२८।५.	१८८।१४. २७८।१०
आखाः	५०।१७
आसत्	२५८।२०
आस्तकृतः	२३।१५.
इच्चा	६१।७
इङ्के	१९२।१०
इतास	२२८।१०
इतिः	२७८।१४
इप्रे	४०४।१४
इरः	४११।११,१२
इशिरम्	७३।१४
इशीते	४२८।५
इश्मदेवाः	४४६।१०

पदम्	पृ०।प०
इश्मम्	४४६।१०
इश्मा	२९२।१७
ईरम्	४१,४।४
उल्कम्	२२०।१०
उचिम्	१७२।१०
उन्यवः	४२३।१५
उन्युः	४२३।१२,१४
उष्णम्	२९८।८
उष्मम्	१३६।१२
उष्मेभिः	२३६।९
ऊरः	४१९।१४
ऊर्ध्वम्	१८५।५
ऊर्ध्वे	४२८।९
ऐपः	२५६।१५
ऐवधिः	१७२।३,१०
ऐषः	२५५।१
ऐनःशेपे	२५९।१४
ओम	२९६।१७
ओमशानम्	२९६।१७
ओमभु	२९६।१८
ओषामम्	२७८।१३
ओषेनः	४७१।१
अवः	४७१।३
अुतम्	१७२।९
अुधी	२२१।१९
अेणिः	४११।१६
अेणिशः	४११।१५
अेणिः	२७८।९
अेणतेः	२७८।९
अेष्मा ... ... १७५।१३,१४	
ऋः	५९।११
ऋा	२२२।३,८
ऋत्या	२२७।१४
षट्	४९०।११
षड्रे	४९०।१०

पदम्	पृ०।प०
षड्तुया	४९०।१०
षष्ठिः	४९०।१४
षष्ठ्यर्थप्रेक्षा	११९।७
संवत्सरः	४९०।२
संवत्सरप्रधानः	४९०।२
संग्रहरणासः	४११।१३
संस्तवः	४१७।१७
संहिता	११९।८,९
सक्तुः	४०४।६
सङ्कल्पयाञ्चक्रे	१८८।१४
सङ्ख्यानि	४०४।४
सङ्ग्रामः	२८४।११
सङ्ग्रामनामानि	२८४।११
सचते	२५७।१
सञ्चरेणम्...	५९।१४
सञ्जग्मानः	४१०।२
सञ्जनी (सञ्जनी)	८४।२
सतः	२४५।१
सत्यनामानि	२०६।१२
सत्यम् ... ... ८९।७.	२०६।१२
सत्यसङ्गरः	२६६।१४
सत्त्वभूतम्	८।२
सत्त्वम् ... ... ८२।१७.	९४।१०
सत्त्वस्य	१२७।१७
सत्त्वानाम्	१८५।१०
सदनम्	४२०।१०
सदम्	४४५।१
सधस्थे	२१५।२
सनये	२६६।१०
सनाभयः...	४६२।१२
सनितुः	२७५।२
सन्ततकर्मा	२१२।८
सन्तानकर्मणे ... २५९।१७.	२६६।१२
सन्ति	१५२।१५
सन्देहाः	१८५।१०

पदम्	पृ०।प०
सपयन्	२५८।२१
सप्त	४८६।१२
सप्तनाम	४८९।१९
सप्तपुचम्	४८६।१२
सप्तशतानि	४९०।१६
सभास्थाणुः	२६६।१४
सम्	४१।१९
समग्मत्	४०७।६
समानम्	४७५।८
समान्या	४७५।७
समानकर्मणि	१८५।१०.
समाननिर्वचनानि	१८५।१०
समान्वस्थू	२२७।१६
समानवर्चसा	४१०।६
समाम्नाताः	७।९
समाम्नायः	७।६
समासेन	४९०।१०,१६
समिधा	२५६।१६
समुद्रः	१९५।८
सम्दृढम्	१०२।४
सम्प्रदित्साम्	५५।१२
सम्प्रेषति... ... १०२।१७.	११२।१२
सम्बन्धवः...	४६२।१४
सम्भेदम्	२२७।९
सरस्वती	२२५।७
सर्वचरणानाम्...	११९ ९
सर्वपदसमाम्नाय	२०६ १५
सर्वम	२२७।६
सर्वमाचाभिः	४९०।८
सर्वरसाः	११२।१२
सवाय	२२५।१०
सवितुः...	२२५।१०
ससतः	४२४।२
सहस्रम्...	२९१।१२
साक्षात्कृतधर्माणः	१२७।१२
साधारणानि	२०४।२

पदम्	पृ०।प०	पदम्	पृ०।प०
सानु	२२६।१२	सूक्तभाक	१०४।७
सिंहः	२२४।१	सूक्तम्	२८४।६
सिकताः	१५२।२	सूरात्	४१९।२
सिद्धायाम्	१५६।४	सेना	१८८।७
सिद्धोपमा	२२१।१०	सोः	१७८।८
सिमस्मि...	४०६।१३	सोम्याय	१४१।१७
सिलिकमध्यमासः	४११।७	स्तः	१५२।१५
सिषक्तु...	२५७।१	स्तेनः	२२८।८
सीम्	६२।१,६	स्तेननामानि	२२८।८
सीमा	६२।६	स्तोकाः	१५२।१
सीमिका	२४५।१३	स्तोत्रनामानि	२२७।१५
सु	४१।१	स्तोमान्...	१८८।१०
सुकृतेः	१७५।५	स्थायतेः...	३५६।९
सुखनामानि	२०६।९	स्त्रिभिः (सृभिः)	२४५।८
सुखम्	२०६।९	स्त्रियः	३५६।९
सुतुकः	४२८।८	स्त्रीभगः...	२२१।२
सुतुकेभिः	४२८।८	स्त्र योनिः	२२५।१४
सुप्रायणाः	४२८।९	स्थाणुः	१३०।४
सुदाः	२२७।६	स्थाणोः...	११२।१५
सुनीथासः	४४६।३	स्थावराणाम्	२१५।११
सुपर्णः... ... २७८।२.	३०२।४,११	स्थिरपीतम्	१२४।७
सुपाणिः...	२४४।१४	स्थूणा...	८४।३
सुप्रष्टकृणम्	२७८।११	स्नावः	१७५।१४
सुप्रायणाः	४२८।९	स्नार्हा	२९७।११
सुभगे	४६०।३	स्नुतिः	११९।५
सुरत्नम्...	२७८।८	स्नुः	२४८।१६
सुरा	८१।७	स्नः	२१०।७
सुरुचः	६२।४	स्नधिते	१०२।१३
सुवासाः...	१३२।६	स्नपिति	३३८।६
सुवास्तुः	४१८।१	स्नयम्भू	१९९।१०
सुविते	४२९।१६	स्नरन्ति	३०२।४
सुवीराः	६१।१८	स्नरसंस्कारोद्देशः	१०२।७
सुष्टुक्तिभिः	२३६।१०	स्नरसंस्कारौ ... ... ९४।७.	१४७।५
सुष्टधा	२९७।११	स्नरात्	१५६।१
सुश्रेवः	२५७।१	स्नसारम्...	३२१।२
सुषुमृणः...	१८१।११	स्नसुः	३२१।१

41

पदम्	पृ०।प०
स्वस्ति	२३८।९. २५७।२
स्वाधीः	४७१।५
स्वायंभुवः	२५९।१०
ह	५ ४।१७
हंसाः	४११।१४
हतवर्त्मनः	२५९।१७
हनन	२९८।१२
हरः	४४५।११
हरसी	४४५।१३
हरांसि	४४५।१२
हरिः	४४९।९,७
हरितः	४०९।१२
हयम्	२२१।१९
हस्तः	९१।१३
हस्ती	८३।१४
हत्या	१८७।२
पदम्	पृ०।प०
हस्वा	२९९।११
हि	५५।३. ९४।७
हिन्वन्ति	१३४।७
हिमम्	४९०।५
हिरण्यनामानि	१९५।३
हिरण्यम्	१९५।३
हिरण्यरूपः	२११।९
हिरुक्	१८८।५
हेमन्तः	४९०।४
होतुः	४८३।८
ह्रः	५९।१२
ह्रदः	७१।७
ह्रस्वः	३०९।३
ह्रस्वनामानि	३०९।३
ह्लादतेः	७१।८

॥ इति ॥

मूल-पाठशुद्धिः ॥

अ०	पा०	खं०	...	पं०	...	अशुद्धम्	...	शुद्धम्
१	१	५	...	३	...	प्रतिलोम्यं	...	प्रातिलोम्यं
,,	२	१	...	३	...	भवन्तीवेति	...	भवन्तीतीवेति
,,	५	२	...	४	...	विधियन्त	...	विधीयन्त
२	१	२	...	१	...	र्न्निवृत्ति	...	र्न्निवृत्ति
,,	,,	५	...	९	...	भवति	...	भवति
,,	७	२	...	९	...	दुनन्तीति	...	दुनन्तीतिं
३	१	२	...	६	...	मस्मि	...	मस्ति
,,	२	२	...	१	...	मसीय	...	मंसीय
,,	४	३	...	२२	...	मूर्दर	...	मूर्दरं
४	२	७	...	९	...	प्रसङ्गायाह	...	प्रसङ्गायाह
,,	,,	८	...	१	...	दूवाविरक्त-	...	दूवाविरक्त
,,	३	५	...	३	...	पिता माता	...	पिता पाता
,,	,,	,,	...	७	...	सम्बन्धव	...	सबन्धव
,,	,,	,,	...	१०	...	सुखंयुः	...	सुखयुः
,,	,,	,,	...	१३	...	तच्छ्रंयो	...	तच्छ्रंयो

मूल-पाठभेदपूर्त्तिः ।

अ०	पा०	खं०	...	पं०	(मुद्रितातिरिक्ताः पाठाः ।)
१	३	४	...	१	... "सखायो"—नैतत् क-ख-ग-पुस्तकेषु ।
,,	,,	,,	...	६	... "कच्छन्ती दव खे"—इति क, ख, ग ।
,,	,,	५	...	३	... "पदपूरणार्थे"—इति क, ख, ग ।
,,	४	३	...	३	... "सत्य मुपालभ्य"—इति क, ख, ग ।
,,	५	१	...	२	... "विद्यात्स्थानं"—इति क, ख, ग ।
२	३	१	...	५	... "अन्तरि क्षय"—इति क, ख, ग ।
,,	७	२	...	११	... "वित्त"—इति क, ख, ग ।
,,	७	३	—	—	— "दमया"—इति क, ख, ग ।
३	३	१	...	७	... "उत्तरे"—नैतत् क-ख-ग-पुस्तकेषु ।
,,	४	२	...	१७	... "दूरयं"—इति क, ख, ग ।
४	१	५	...	४	... "परगृहाणीति वा"—इति ङ, च ।

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018